ख्यातीविकल्पबोधे प्रत्येकं समर्थत्वादिति भावः । एकस्यापरात्मत्वप्राप्तिलक्षणं व्यतिकरमाचष्टे—व्यतिकर इति । तत्र दोषमाह—तदाविति । अविवेचनीयत्वलक्षणमपरं सङ्करं निर्वक्ति—सङ्करस्त्विति । सापत्तु यथा भिद्यते तथा च प्राप् दोषप्रसक्तिरपरेत्याह—ताभ्यां चेति । वामस्थावस्थाया विनिद्रावस्थात्मत्वं यावावामिवत्थत्वमाह—पुरुषस्यात्मत्वादिति । वामदृष्टवस्थाया पुरुषात्मत्वे पुरुषत्वमेव स्यात् न तु विनिद्रावस्थात्मत्वमिति तत्र व्यतिकरसङ्करविरह-मत्र—पुरुषस्यात्मेति । इत्थमेव पुरुषस्याप्युरुषत्वं विनिद्रावस्थात्मत्वेन विनिद्रावस्थात्वमेवाह—पुरुषस्या-पीति । यथा च पुरुषत्वयोः व्यतिकरादिभ्यां तत्स्वैवासिद्धा तत्र तदेवैकत्वं भवेदित्याह—इत्यमितीति । पृथक् पृथगिति यतश्चोऽवस्था परस्परं भिन्नाः सर्वानुवर्तनशीलः पुरुषोऽवस्थाभ्योऽन्य इति व्यवस्था मन्यस इत्यर्थः । तदभिन्न-व्यवस्थाभ्युपगमे सर्वं पुरुषमयमिति वचनविरोधोऽनेके हि ते सम्भवति चाभ्येवाह—उक्तवद्वेति । तथापि तदतिदेशा-[illegible] पुरुषके-चाह—यदर्थमयमिति । विनिद्रावस्थायां [illegible] परस्परं भिन्नतया [illegible] पुरुषमत्वे

स्मात्? पुरुष एवेदं सर्वमिति, किमर्थमसावविशेषः? अद्वैतप्रत्यर्थः-अद्वैतमेकपुरुषमयमित्येतत्प्रति पादनार्थत्वस्यैवासिद्धिः-अद्वैतप्रत्ययस्य, किं कारणं? यस्मादेकपुरुषाभ्युपगमोऽयमेकपुरुषासिद्धिमेव ते करोति, तत्कथमिति चेत्? योऽसावेक एव त्वया पुरुषः सम्भाव्यते तस्याप्यनेकत्वमेवमापद्यते एवमिति त्वदभिप्रेतेनैव पुरुषस्यात्माविशेषाद्वैतेन ।

5 क्व पुनर्भावना? उच्यते—

यत्स्वरूपाव्यतिरिक्तलक्षणा अवस्थास्तया विना भेदेनोत्पद्यन्ते पुरुष एवावस्था इति, नावस्था एव पुरुष इति अत एव तस्य ताभ्यो नानात्वं तासां च स्वरूपेणावेव सिद्ध्यति, यथोर्ध्वग्रीवादिलक्षणो घटो घट एवोर्ध्वग्रीवादय इति, न त्वमेवेऽव्यधारणभेदोऽस्ति, यथा घट स्वात्मन्य घटो घट एव घटस्वात्मेति, स पुरुषोऽप्येवञ्च सति पुरुषान्तरेणाभिव्याप्तः, ततश्चान
10 वस्थितैकत्वतत्स्वप्रतिज्ञः पुरुषान्तराविवेकप्रसङ्गश्च, पुरुषस्वात्मत्वादवस्थायाः ।

यत्स्वरूपेत्यादि यावदवस्थायामिति, यस्य स्वरूपं यत्स्वरूपं तस्य स्वरूपं पुरुषस्य, किं स्वरूपं? नित्यसर्वगतसर्वात्मकसर्वकारणत्वादीनि, तदव्यतिरिक्त लक्षणमासां ता अवस्थास्तदव्यतिरि क्तलक्षणाः तत्स्वरूपपुरुषाव्यतिरिक्तलक्षणास्तया विना भेदेनोत्पद्यन्ते-तस्मात् पुरुषादभिन्ना एवोत्पद्यन्त इत्यर्थः तथा पुरुष एवावस्था [इति] नावस्था एव पुरुष इत्यवधारणभेदादेव भेदोपदर्शनेन च भेदोऽ-
15 भ्युपगम्यते अत एव तस्य ताभ्यो नानात्वं तासां च स्वरूपमात्रेण सिद्ध्यति यथोर्ध्वग्रीवादिलक्षणो घटो घट एवोर्ध्वग्रीवादयः न घटो न घटावयवा इति तस्य तासु तासां च तस्मिन्नवधारणानवधार-णाभ्यां भेद एव सिद्ध्यति न त्वमेवेऽव्यधारणभेदोऽस्ति यथा घटस्वात्मैव घटो न [घट एव] घटस्वात्मेति तस्मादवस्थानां विनिवृत्तीनामवस्थानाम् पुरुषस्य भेदस्वरूपमात्रेणेति । किञ्च स पुरुषोऽपीत्यादि, एवञ्च सति-एकपुरुषमयत्वाविशेषात्यागे सोऽपि पुरुषः पुरुषान्तरेणाभिव्याप्तः

---

20 तथा च पुरुषाः सर्वे तु तदविशेषात्मकत्वेऽभिन्ना इति भावः। एतदेव स्पष्टीकर्तुमाह-यत्स्वरूपेति पुरुष एवावस्था इति अवधारणभेदेनाह पुरुषस्यावस्थाव्यतिरिक्तत्वमवस्थायाः प्रदर्शितम्। तथा नावस्था एव पुरुष इति सामान्यविशेषव्यभिचारेण प्रतीयमानानामेतस्य तस्य विशेषावस्थाभ्यः पुरुषस्य भेदो गम्यते तथाऽवस्थानामपि परस्परं भेदस्तथा सिद्ध एवेति भावः। अत्र दृष्टान्तं दर्शयति-यथेति ऊर्ध्वग्रीवादिलक्षणो घटो न घटः घट एवोर्ध्वग्रीवादयो न घटावयवा इति अन्येन प्रथमेन ऊर्ध्वग्रीवादि प्रतीयत इति भावः। ततश्चानवस्थितेति एतस्यैव तत्त्वेन च पक्षान्ते तत्त्वे व्यवस्थित्य प्रतिज्ञा
25 यस्य पुरुषस्येति विग्रहः पुरुषस्यानेकत्वादात्मस्वरूपस्यासिद्धत्वप्रतिज्ञत्वम् पुरुषान्तरव्याप्तस्यात्मस्वरूपस्याविशेषात् अवस्थितत्वप्रतिज्ञत्वं बोध्यम्। पुरुष एवावस्था इति निर्देशेऽवधारणविपर्ययेऽपि अवस्था एव पुरुष इत्यनुक्त्वा अवस्था एव पुरुष इत्यवधारणभेदात्पुरुषस्यावस्थायोर्भेद एव स्यात्, न हि यथैवाऽविशेषेऽवधारणभेदः क्वापि तद् दृष्टम्-अवधारणानवधारणाभ्यामिति। तत्र-पुरुषस्य तासु-अवस्थासु अवधारणेन तासां-अवस्थानां तस्मिन्-पुरुषेऽनवधारणा
रणेन। अवधारणभेदाभावे निदर्शनम्-यथेति। अर्थं पुरुषः पुरुषान्तरेणाभिव्याप्तः पुरुषस्वात्मत्वात्, यो यत्स्वात्मा
30 स तेनाभिव्याप्तो यथा विनिवृत्तरूपा या हि पुरुषस्वात्मा स पुरुष एव, अन्यः पश्चिमस्वात्मत्वात्. तस्मादेव तदेकेनाभिव्याप्तः न तु व्याहतः एवमेव पुरुषोऽपि पुरुषान्तरेणैव वैन कैवल्यमनेन पुरुषेणाभिव्याप्तः स्यात्, न तु येनैव पुरुषेण व्याप्तस्य पुरुष-स्यापि अभिव्याप्तिरिति तस्य सैवाऽभिव्याप्तत्वमभ्युपगमात् पुरुषान्तराभिव्याप्तत्वं सिद्धं तदपि पुरुषान्तरं पुरुषान्तरेणा-देवान्तरपुरुषान्तराभिव्याप्तं अनेकैरेव पुरुषैरेकपुरुषान्तराभिव्याप्तत्वं पूर्वपूर्वपुरुषैरनन्तम्, तथा च अनेके पुरुषा अद्वैतपुरुषवादिनोऽप्य-एकपुरुषमयत्वेति एवं पुरुष इत्येतदेव वा न व्यवतिष्ठते तथा स्वात्मन्यपि स्वात्मन्तरेण वैसा-

पुरुषस्यात्मत्वादवस्थावदिति प्राप्तः, यथा विनिद्राद्यवस्थाः पुरुषस्यात्मान एव नावस्थान्तरात्मिका इति कृत्वा पुरुषेणाभिव्याप्तास्तथा पुरुषोऽपि पुरुषस्यात्मत्वात्तदविनाभावात् पुरुषान्तरेणाभिव्याप्तः स्यात्तथा तदपि पुरुषान्तरं पुरुषस्यात्मत्वात्तद्वदेवेति पुरुषानेकत्वं स्यात्तस्यापि तथैवेत्यनवस्था च, ततश्च पुरुषेणाभिव्याप्त त्वादनवस्थितैकत्वप्रतिष्ठः पुरुष इति प्राप्तम्—अनवस्थिता एकत्वेन एकत्वे वा प्रतिष्ठाऽस्य सोऽयमन वस्थितैकत्वप्रतिष्ठः पुरुषः स्यात् पुरुषस्यात्मत्वात्, अवस्थावत्, यथाऽवस्थाः पुरुषस्यात्मत्वादनवस्थितैकत्व- 5 प्रतिष्ठास्तथा पुरुषोऽपि स्यादिति । तथाऽनवस्थिततत्त्वप्रतिष्ठः— तस्य भावस्तत्त्वमात्मस्वरूपम्, अनवस्थिता तत्त्वेन तत्त्वे वा प्रतिष्ठाऽस्य सोऽयमनवस्थिततत्त्वप्रतिष्ठः न स्वरूपे प्रतिष्ठितः स्यात् पुरुषः पुरुषस्यात्मत्वादवस्थावत्, यथाऽवस्थाः पुरुषस्यात्मानोऽनवस्थितात्मस्वरूपव्यवस्थाप्रतिष्ठाः पुरुष स्वरूपव्यवस्था एवेष्यन्ते तत्रैव तासां प्रतिष्ठा, न स्वात्मसु, तथा पुरुषोऽपि स्यात् । पुरुषान्तरा विशेषश्च पुरुषः स्यात् पुरुषस्यात्मत्वादवस्थावत्, यथेमाः सुप्ताद्यवस्थाः पुरुषस्यात्मत्वात् पुरुष एवेद 10 सर्वमित्यविशिष्यन्ते तथा पुरुषः पुरुषस्यात्मत्वात् पुरुषान्तरमेवायमित्यविशेष्यः स्यात् ।

स्वाभ्युपगतमेवदोषभयादिपक्षमप्यप्रत्यक्षादर्थान्तरं पुरुषमनभ्युपगम्यैता एवावस्था पुरुष इति प्रत्यक्षार्थैकविषयतया पुरुष एवेदं सर्वमिति ईदृगेवाऽऽत्मव्यपदेशः स्यात्, यथाऽयं देवदत्त एवेदं सर्व- प्रत्यक्षो हि देवदत्तः प्रत्यक्षत्वाप्रत्यक्षत्वयोः स एव तथा पुरुष एवेदमिति, एतच्चायुक्तम् यस्मात्—

अस्यां प्रत्यक्षार्थैकविषयतायां याऽचेतनत्वैकमूर्त्तानित्यादिरूपार्थपुरुषपरमार्थता प्राप्नोति । 15

(अस्यामिति) अस्यां प्रत्यक्षार्थैकविषयतायां सत्यामचेतनत्वैकमूर्त्तानित्यादिरूपार्थपुरुषपर मार्थता प्राप्नोति । आदिग्रहणादसर्वात्मक[सर्वगत]कायानेकत्वादिरूपार्थपुरुषपरमार्थतापि, न चेत नात्वैकामूर्त्तनित्यसर्वात्मकसर्वगतत्वकारणैकरूपार्थपुरुषपरमार्थता स्यादिति प्रसङ्गोऽयं दोष आपा दितः, एवं तावदन्य[था]निरूप्यः पुरुष इति पुरुषस्यात्मापरित्यागेनावस्थाभेदद्वारेणोक्तो दोषः ।

तदेवेति यस्य स्वात्मानमस्वभावमपरित्यागेन यो व्याप्तः स तदभिव्याप्त इति तस्मात् व्याप्तस्यापि पुरुषान्तराभिव्याप्तस्यानव- 20 स्थितेयमिति पुरुषोऽनवस्थितैकत्वतत्त्वप्रतिष्ठः पुरुषस्यात्मत्वादवस्थावदिति भावः । अनवस्थितैकत्वतत्त्वप्रतिष्ठ इति पदं व्याख्यो व्याकरोति—अनवस्थितेति । यथेति अवस्थानां चतुर्विधत्वेनैकत्वे एकत्वेन चाऽनवस्थितत्वं योज्यम् । अवस्थानां पुरुषात्म- त्वाद् पुरुषस्वरूप एव व्यवस्थितत्वं नात्मस्वरूपेऽतोऽनवस्थितत्वतत्त्वप्रतिष्ठास्तथा पुरुषोऽपीत्याह—तथेति । एवमवस्थाः यथा पुरुष- मात्रत्वेनाविशिष्यन्ते तथा पुरुषोऽपि पुरुषान्तरमात्रत्वेन पुरुषान्तरमेवायमित्यविशेष्यः स्यादित्याह—पुरुषान्तरेति । यदिदं सर्वं पुरुष एवेति पुरुषप्राधान्येन न पुरुषमात्राविशेषः क्रियते येनोक्तदोषाः स्युः अतोऽस्मिन्पक्षे पुरुषमात्रत्वादिदोषेण [illegible]- 25 मेविच पृथिव्यादिभेदैरेतत्सर्वमतिरिच्य पुरुषोऽपि पुरुषमात्रत्वात् किन्तु एता अवस्था एव पुरुष इति प्रत्यक्षार्थैकविषयतया एवे- दिदं पुरुषमात्रं विशेषतः स्यात् पुरुषमात्रस्य प्रत्यक्षत्वात् न पुरुषः पुरुषान्तराविशेषः इति चेदत्र—स्वाभ्युपगतमिति । एवं यदि पुरुषमात्रावस्थात्वयो [illegible] प्रत्यक्षाप्रत्यक्षत्वयोरभेदेन पुरुषस्यापि प्रत्यक्षार्थैकविषय- तायां सत्यां प्रत्यक्षार्थस्याचेतनत्वैकत्वमूर्त्तत्वानित्यत्वासर्वात्मकत्वादिधर्मवत्त्वम् पुरुषोऽपि तथैव अचेत तु चेत नत्वैकत्वामूर्त्तत्वनित्यत्वादिधर्मवान् स्यादित्युपपत्ति—अस्यामिति । अयं दोषः पुरुषस्यावस्थात्मकत्व एव प्रसज्यते न 30 तु पुरुषमात्रत्व इति पुरुषमात्रत्वमनुपपद्यमानमपि [illegible] मनुचितमिति [illegible] अभेदेनाऽऽसमद्धीऽ- मपि दोषः प्रसज्यत इति प्रदर्शित इत्याह—प्रसङ्गोऽयमिति । एवं पुरुषं प्रधानतया परित्यज्य अवस्थाभेदद्वारेण पुरुष-

---

१ सि. क. एवमवस्थापरिमितिरिस्याद् । २ सि. क. °त्ताणि । ३ सि. क. °भेदं तद्द्वा° ।

इदानीमवस्थान्य[त्व]द्वारेणैव पुरुषानेकत्वं त्वदुक्तमाह—

अवस्थास्वन्यत्वानेकत्व एव पुरुषः, अवस्थास्वात्मत्वात् पुरुषस्य, तत्तत्सामान्यत्वेनानेकः, त्वदुक्तेरेवावस्थान्यासाः पुरुषात्मान्यश्च सोऽन्यस्तद्रूपापत्त्यनिष्टत्वात् अवस्थान्तरवत् ।

(अवस्थास्विति) अवस्थास्वन्यत्वानेकत्व एव पुरुष इत्येवमसमेदोपन्यासवाक्यम् तद्रूपसमारम्भेण विचारार्थोपन्यासा[थ] इत्यर्थः अवस्थासु पुरुषोऽन्यत्वानेकत्वे सत्येव, यतोऽवस्थात्मत्वं पुरुषस्येष्यते तत्तत्सामान्यत्वेनानेकः अन्योऽनेकश्चेति वा, तत्कथमिति चेत् त्वदुक्तेरेवावस्थान्यासाः पुरुषात्मतानिरा[प]काः तान्यश्च सोऽन्य इति परस्परापेक्षमन्यत्वं साध्यते तद्रूपापत्त्यनिष्टत्वादिति हेतुः, यथोऽवस्थावस्थावतोस्तद्रूपापत्त्यनिष्टत्वं सिद्धम्, अन्यथाऽवस्थानां विशेषितान्यमन्यत्वे साम्ये पुरुषद्रव्यत्वेन तदसिद्धेरात्मत्वासिद्धिः, तद्रूपापत्त्यनिष्टत्वं चाऽसिद्धमासज्येत । अथवा

10 पुरुषोऽवस्था इति चाविशेष्य परामिमतवस्तुमयमपि परस्परतोऽन्यमिति सामान्येन साध्यते, इतरेतररूपापत्त्याऽनिष्टत्वादित्यर्थः । अवधारणमेतावेवतररूपापत्त्यनिष्टत्वमापादितम्, किमिव ? अवस्थान्तरवत्, यथा विभिन्नावस्था सुखावस्थारूपापत्त्या नेष्टा तथा सर्वोऽन्यत्वमेति ।

तद्रूपापत्त्यनिष्टत्वासिद्धिरिति मा मस्था इत्यत आह—

यतोऽवस्थास्वात्मत्वमस्य नेष्यते, पुरुषाविशेषात्तु पुनरन्यत्वं न सम्भवत्येव, स्वपरयोरपि

15 प्रकृतभेदद्वारान्यत्वासम्भवात्, कस्यचित्कथञ्चित्तोऽन्यस्यानुपपत्तावपि यतसोऽवस्थाः त्वदुक्त्यैव येन केनचिदुपपत्तिप्रकारेण सम्भावनापादितान्यत्वाः पृथक् पृथक् स्युः पुरुषाः ।

(यत इति) यतोऽवस्थास्वात्मत्वमस्य नेष्यते पुरुषस्य, यतश्चावस्थारूपापत्त्या पुरुषाभिन्नत्वावस्थाद्वारेण पुरुषस्यावस्थानान्यत्वानेकत्वं त्वदुक्त्यैवमुपपादितम् । पुरुषाविशेषात्तु पुनरिमानि,

---

वस्तुत्वात् पुरुषस्यान्यत्वानेकत्वमनुक्तमित्याह—एवं तावदिति । अथान्यत्वं प्रदर्शनीयम् तद्द्वारेणैव पुरुषस्यान्यत्वमे

20 त्याह—अवस्था इति । पुरुषोऽवस्थाऽभिन्नत्वात् [illegible] सोऽन्यत्वलक्षणोऽन्यत्वं [illegible] वा [illegible]

इदं वाक्यं [illegible] इति पूर्वपक्षं [illegible] [illegible] पुरुषस्य भेदे

[illegible] —प्रत्ययभेदोपन्यासवाक्यमिति । पुरुषभेदप्रतिपादक-

[illegible] —त्वदुक्तेरेवेति अवस्था एव पुरुष इत्युक्तेरेव इत्थं पुरुषोऽन्यत्व-

भेदोऽवस्थाद्वा पुरुषभेदो वा तद्रूपापत्त्यनिष्टत्वादिति हेतुना [illegible] —परस्परेति [illegible] परस्परं भिन्नमिति

25 प्रतिज्ञार्थं पुरुषावस्थयोरभिन्नत्वस्य [illegible] हेतोः पुरुषोऽवस्थाभिन्नत्वाद्रूपापत्त्यनिष्टत्वादित्युक्ते तु [illegible]

दोषः अवस्था पुरुषभिन्ना तद्रूपापत्त्यनिष्टत्वादित्युक्ते [illegible] पुरुषभिन्नावस्थाऽभिन्नेत्याह—अन्यथेति । पुरुषोऽवस्था

इति [illegible] परस्परतोऽभिन्नं [illegible] [illegible]—अथ

वेति । यथा [illegible] [illegible] परस्परतोऽभिन्नत्वम्, न

चाभिन्नत्व हेतोः [illegible] सिद्धत्वादिति भावः । [illegible]

30 मवस्थान्तरवदिति । इत्येवाह—यत इति अवस्था एव पुरुष [illegible] पुरुषस्यावस्थान्यत्वानापत्ती

[illegible] । पुरुष एवेत्यादि [illegible] पुरुष एवैकत्वात्[illegible]

---

1 सि त्वदुक्त्यै वेत्यपि पाठः ।

पुरुष एवेदं सर्वमिति पुरुषत्वेनावस्थानात्मभिरविशेषेऽन्यस्य न सम्भवत्येव कथं ? स्वपरविषयकृत्वभेदद्वारा-
न्यत्वासम्भवात्—स्वविषयकृतो घटस्य रूपादीनां प्रधानस्य सत्त्वादीनामेकवस्तुगतानामेव धर्माणां भेदः
परविषयकृतस्तु तयोरेव वस्त्वन्तरात् घटादेः पुरुषाच्च भेदः, तदुभयभेदद्वाराऽन्यत्वं सम्भाव्येत,
तच्चानभ्युपगतमन्यस्य तद्द्वारकं भेदद्वयासम्भवात्, ततोऽन्यत्वानुपपत्तिः कस्यचिदिति वस्तुनः, कथञ्चिदिति
रूपादिसत्त्वादिप्रकारेण तद्द्वारानभ्युपगमादेव, ततः— पुरुषादन्यत्वानुपपत्तौ सर्वा ता अपि भवतोऽ- 5
वस्थाः [अन्यत्वोपपत्तिवत्] पृथक् पृथक् पुरुष [अ]—चत्वारः प्रभेदाः स्युः पुरुषाः, इदमपि त्वदु
क्तिवदेव, तत्कथमिति तदुच्यते यथा केनचिदुपपत्तिप्रकारेणासम्भाव्यमप्यन्यत्वमुच्यते तथा ता अव्य
क्ताः सम्भाव्यतापादितान्यत्वा पृथक् पृथक् स्युः ततश्च ताः पुरुषस्वात्मत्वात् परस्परतोऽन्यत्वाच्च
पुरुषाः पृथक् पृथक्, विनिद्रावस्था प्रत्येकं पुरुषः, एवं शेषा अपि प्रत्येकं पुरुषाः, केन पुनरुपपत्तिप्र
कारेणान्यत्व ? अवधारणभेदादेव, एवं पुरुषाविशेषात् पुरुषबहुत्वं विनिद्राद्यवस्थानां पुरुषस्वात्मत्वा- 10
दिति ।

अथ पुरुषलक्षणापि विनिद्रावस्था न पुरुषः पुरुषोऽपि न तर्हि पुरुषोऽस्तु, पुरुषलक्षण-
त्वाद्विनिद्रावस्थावदेवं शेषा अपीति पुरुषाभाव एव, कुतोऽस्य सर्वगतता ?

अथेत्यादि, अथ पुरुषलक्षणापि विनिद्रावस्था न पुरुषः—यदि प्रत्येकं पुरुषत्वं तद्बहुत्वञ्च
दोषो दृष्टा पुरुषलक्षणापि विनिद्रावस्था पुरुषो नेष्यते ततः पुरुषोऽपि न तर्हि पुरुषोऽस्तु पुरुषलक्षण- 15
त्वाद्विनिद्रावस्थावत्, एवं शेषा अपीति—यथा विनिद्रावस्था पृथक् पुरुष इत्यापाद्य तत्परिहारार्थं पुरुषलक्ष
णत्वे सत्यप्यपुरुषत्वमाश्रितम् पुरुषस्याप्यपुरुषत्वं तद्वदेवापादितं तथा प्रत्येकं सुप्ताद्यवस्था अपि [पृथक्]
पुरुष इत्यापाद्य तत्परिहारार्थं पुरुषलक्षणत्वे सत्यप्यपुरुषत्वमाश्रितम् सुप्ताद्यवस्थानां तद्वत् पुरुषस्यापि

च तयोर्भेदमन्यत्वं सम्भवतीत्याह—पुरुषेति । अन्यत्वप्रयोजकमाचष्टे—स्वपरेति । वस्तुनोऽन्यत्वे हि स्वविषयकृतभेदः
परविषयकृतभेदश्च प्रयोजकः यथा घटनिष्ठानां रूपादीनां प्रधाननिष्ठानां सत्त्वरजःप्रभृतीनां परस्परं भेदात्, यथा वा तस्य 20
घटस्य परविषयात् पटादेः प्रधानस्य च पुरुषाद्भेदादन्यत्वम्, एवंविधान्यत्वप्रयोजकं प्रकृते नास्ति सर्वस्य पुरुषात्मकत्वेन
स्वपरभेदाभावात् कस्यचित् कथञ्चिदिति भावः । त्वदुक्त्या तु तासामेकत्वं सम्भवतीत्याह—तत इति विनिद्राद्यवस्थाऽवस्थाः
परस्परमन्याः पुरुषाविशेषात् पुरुषस्वात्मत्वात् इति पुरुषस्यापि चतुर्विधत्वं प्रसक्तं पुरुषबहुत्वमपीति भावः । अवस्थानां
पुरुषात्मकत्वे पुरुषवदनन्यत्वमेव स्यान्न तु भिन्नाभिन्नत्वम् तदभिन्नत्वस्याभावात्, अन्यत्वमु तासामसम्भाव्यमेव परन्तु
त्वयाऽवधारणभेदमात्रोपपत्तितश्चातुर्विध्यमुक्तमेवं पुरुषबहुत्वमित्याह—यथेति । तत हेतुमाह—ततश्चेति । प्रसक्तं 25
पुरुषत्वपर्यायमपि दर्शयति—विनिद्रावस्थेति । विनिद्रावस्था पुरुषः पुरुषस्वात्मत्वात् पुरुषवदित्यनुमानं फलितम् । अथ पुरुष-
लक्षणत्वेऽपि विनिद्रावस्थाया न पुरुषत्वमितीष्यते तर्हि पुरुषलक्षणत्वाविशेषात् पुरुषस्यापि पुरुषत्वमात्रप्रयोगेन कस्य
सर्वगतता भवेत् पुरुषाभावात् निरुपात्मत्वेन हि सर्वगतत्वं नास्तित्वाभावमेवाह—अथेति । शेषावस्थास्वपि विनिद्रावस्था-
तिदेशमपाद्यमानं निरूपाति—एवमिति । पुरुषाविशेषात्तदेव पुरुषस्वात्मत्वाद्विनिद्रावस्थाया पुरुषत्वेऽपादिते बाधिते च तत्परि
हारार्थं पुरुषस्वात्मत्वेऽपि बाधो पुरुष इत्युक्ते प्रतिपादिता पुरुषस्वात्मत्वाद्विनिद्रावस्थावत् पुरुष इति यथोपवर्णितं तथैव 30
सुप्ताद्यवस्था अपि पुरुषस्वात्मत्वात् प्रत्येकं पुरुष इति प्रतिपादितेऽपि बाधिते च पुरुषस्वात्मत्वेऽपि पुरुषत्वानभ्युपगमे

---

१ सि. क्ष. ०वस्थान्यत्वोपपत्तिवत् ।

पुरुषात्मनोऽपुरुषत्वमित्यापादनीयमिति पुरुषाभाव एव—इत्थं पुरुषस्याभाव एव प्रसक्तः कुतोऽस्य सर्वगतता ? विद्यमानस्य हि सर्वस्यासर्वस्य सर्वगतस्यासर्वगतस्य वेति विचार्यं स्यात् ।

अथवा त्वदभिप्रेतमेवैतदेवम्, तदात्मत्वाभिमतनिरसनात्, यथोष्णो न भवत्यग्निरिति ध्रुवमौष्ण्यात्मानमग्निमेव निरस्येत् तथेहापि ।

5 (अथवेति) अथवा त्वदभिमतमेवैतत्—अभावप्रतिपादनं नाऽस्मदभिप्रायः, एवमिति, एतेन विधिना, कुतः ? तदात्मत्वाभिमतनिरसनात्, यो यदात्मत्वेनाभिमतोऽर्थस्तं निरस्यन् तदात्मानमेवार्थं निरस्येत् यथा, यथोष्णो न भवत्यग्निरिति ध्रुवमौष्ण्येनाविनाभाविनमौष्ण्यात्मानमग्निमेवार्थं निरस्येत्, तथेहापि विधिग्राहकवाक्यस्थं पुरुषमुक्त्वा पुरुष [आत्मान एव ता] पुरुषात् भिन्नाः सन्तीति वा निराकुर्वंस्तदात्मानं पुरुषमेव त्वं निराकरोषीति त्वदभिप्राय एवायं पुरुषाभावः । एवं तावत् मदुक्त्योपक्षि-
10 प्तस्त्वदीयोऽभिप्रायो व्याख्यातः ।

नाभिप्रायमात्रादेवाभावः किं तर्हि ? स्फुटमेव त्वयोक्तं नास्ति पुरुष इति तद्यथा—

यत्तु यत्तेन [भवत्याऽलक्षणः पुरुषः पुरुषलक्षणा भवत्या इत्यतिदिश्यते तेनैकत्वान्यत्वादि विकल्पप्रसङ्गेनाविकल्पपरमार्थतयेष्टस्य तस्यासत्त्वमेवोक्तमतो न पूर्ववत्]

यत्तु यत्तेनेत्यादि, सामान्येनायं न्यायोऽवतार्यते भावना त्वस्य विशेष्य वक्ष्यमाणा, भवत्याऽल-
15 क्षणः पुरुषः पुरुषलक्षणा भवत्या इति यद्यतिदिश्यमानानां परस्परमेकत्वमन्यत्वमवक्तव्यत्वमसत्त्वं वेति विकल्पाः स्युः, अविकल्पत्वेन पुनरेते सन्ति वस्तुनाविषयत्वात् विकल्पातीतनिर्विकल्पपरमार्थ-

---

[illegible] पुरुषोऽपि न पुरुष इत्यात्मनीन इति भावः । एवं सति यो दोष इत्याह—इत्यमिति । योऽयं पुरुषस्याभावो मया प्रतिपादितः स नास्मदभिप्रायेण किन्तु त्वदभिप्रायानुसारेणैव [illegible] भवतीति तदात्मत्वेनाभिमतीन्निरस्यतेऽर्थनिरसनमपि मन्यते यथा पुरुषो विधिग्राहकवाक्यस्थ [illegible] पुरुषभिन्ना
20 न सन्तीति विधिवादीनां निरसनात्तदात्मा पुरुषोऽपि निराकृत एव [illegible] वेति । तदात्मत्वेति स आत्मा यस्य तदात्मनो भाव तदात्मत्वेनाभिमतं तस्य निरसनात् औष्ण्यस्य वह्नेरात्मा [illegible] निरस्त एव [illegible] पुरुष [illegible] पुरुषात् भिन्ना [illegible] सन्तीति [illegible] निरसनात् पुरुषोऽपि निरस्त एवेति भावः । एवं तावदिति [illegible] पुरुषाभावप्रतिपादनं [illegible] । [illegible] पुरुषाभाव [illegible] अभिप्रायेणेति । यत्त्वितित्ति अत्र मूले टीकायां [illegible] ।
25 [illegible] पुरुष [illegible] पुरुष इत्येवं [illegible] पुरुष [illegible], पुरुष एवैतं [illegible] पुरुष [illegible] परस्परं तयोरेकत्वं वाऽन्यत्वं वा [illegible] वा [illegible] वा [illegible] पुरुषमात्र [illegible] एव, [illegible] सामान्येनाभि-मतः [illegible] भावना [illegible] । [illegible] परमार्थतो विकल्पैर्निर्दुष्टस्यैव पुरुषस्य [illegible] पुरुष [illegible] न [illegible]
30 [illegible] । पुरुषाभावादेव [illegible]

1 सि. क. पुरुषात्मैवाः ।

त्वाच्चाक्षमत्वं स्वयोक्तं प्राक्, अतो न युक्तम् स्वयैव स्फुटीकृत्यमसत्त्वं प्रतिपादयितुमिष्टं स्ववचनेनैव सर्वस्यापि, न केवलं पुरुषस्यैव, अवस्थानामवस्थावतः पुरुषस्य चेति ।

वयमपि ब्रूमोऽसदेव सर्वं त्वदिष्टमिति, त्वन्मते सर्वस्याभावात्, भवनं हि द्विविधं सन्नि-धिभवनमापत्तिभवनञ्च, सन्निधिभवनमापत्तिभवनाभावे न भवितुमर्हति, इदमपि कुतोऽस्य? भेदत्वेन परिणामित्वेन वाऽभूतत्वात्, वन्ध्यापुत्रवत् ।　5

(वयमपीति) वयमपि ब्रूम — न केवलं त्वद्वचनादेवासत्त्वं पुरुषस्य, त्वद्वचनसमर्थनाय वयमप्यसदेव सर्वं त्वदिष्टमिति ब्रूमः कुतः? त्वन्मते सर्वस्याभावात्, भवनं हि द्विविधं मया वक्ष्यमाण-मितरेतरापेक्षद्वैतवृत्ति सन्निधिभवनमापत्तिभवनञ्च सन्निधिभवनमापत्तिभवनाभावे न भवितुमर्हति, तिष्ठतु सन्निधिभवनम्, इदमपि कुतोऽस्य? आपत्तिभवनं पुरुषस्य, कथं नास्ति? भेदत्वेनाभूतत्वात् परिणामित्वेनाभूतत्वात्, वन्ध्यापुत्रवत्, यथा वन्ध्यापुत्रो भेदत्वेन परिणामित्वेन वाऽभूतत्वाभावात्　10 तथा त्वदिष्टं सर्वमापत्तिं नानुभवतीत्यसत्, किमथ विशेष्यते भेदत्वेन परिणामित्वेन वाऽभूतत्वादिति? न पुनरभेदत्वादपरिणामित्वादित्युच्यते? उच्यते भेदो न भवति [अभेदो] भेदादन्यो वा स्यात् एव-मपरिणामीति, अभेदत्वादपरिणामित्वादिति नास्य भेदोऽस्तीत्यभेदो नास्य परिणामित्वमस्त्यपरिणामि-[त्वमपरिणामि] त्वादभेदत्वादिति बहुव्रीहिसमासो वा स्यात्, बहुव्रीहिस्तावन्न घटत एव, अन्यपदार्थ-स्यान्यस्यार्थस्याभावात्　अतः समन्वयाभावः समन्वयाभावात्तदभावः, तत्पुरुषोऽपि प्रसज्य　15

स्यान्युक्तमासम्यगमितावपेक्षाह–सर्वस्यापीति । केवलं त्वद्वचनादेवासत्त्वं पुरुषस्य नास्मद्वचनादिति मा वादीः वयमप्यसत्त्वं समर्थयाम इत्याह–वयमपीति त्वदिष्टं सर्वमसत् त्वन्मते सर्वस्याभावात् सर्वत्वासम्भवात् असम्भवमेव चाह कुत्तुपपद्यते–भवनं हीति पुरुषस्य सन्निधिभवनापत्तिभवनान्यतरानात्मकत्वात् द्युभयस्मिन्निरिच्यभवनाप्रसिद्धेश्च न भव-नधर्मित्वमतो वन्ध्यापुत्रवदसत्त्वं इति भावः । सन्निधिभवनापत्तिभवनयो परस्परापेक्षत्वात्प्रसूतकत्वाद एव तयो वन्ध्यैकान्तेन पुरुषत्वे तयोरसम्भव एवेत्याशयेनाह–इतरेतरापेक्षेति । तत्राद्यापत्तिभवनमभिप्रेत्याह–तिष्ठत्विति । 20 भोग्य पुरुष सन्निधिभवनम् अथवा भोक्तुः पुरुषस्य व्यापकत्वेन देशादीत्यत्वादेकक्षणत्वं सन्निधिभवनम्, यथा प्रत्य-क्षमिति प्रत्यक्षे इन्द्रियेषयोरेकत्वेन वा सन्निकर्षस्यभिव्यक्तेः सन्निधिभवनम्, आपत्तिभवनन्तु महदादेः पुरुषोपभोगार्थं महदादि-स्वापत्तिः तदुभयविधं भवनं परस्परापेक्षत्वात् योर्भोग्यभोक्त्रोरभावे च सम्भवति तत्रापत्तिभवनं भवेदेवापद्यते परिणामं वा तत्तत्वेन भवेत्, अविकारित्वमि अर्थः सत्त्वादयो गुणाः धर्मीभूता भवन्ति परिणामऽविशुम्बे अन्यत्वमवस्थान्तरपरम्परया भेदं तमुपगते न च निर्गुणस्य पुरुषस्य भवोऽपत्तिभवनं परिणामात्मको भवन्तीति भावितमस्त्वं पुरुषस्येत्याशयेनाह–भेदत्वे 25 नेति । अभेदत्वापरिणामित्वाभिप्रायेण भेदत्वेनेत्यादुक्तेः कारणमाह–उच्यत इति अभेदत्वादपरिणामित्वादित्यत्र तत्पुरुषो वा बहुव्रीहिर्वा समासः स्यात्, तत्पुरुषपक्षे च नञः प्रसज्यप्रतिषेधे पर्युदासो वाऽर्थो भवेत्, विधाय निषेधकरणं प्रसज्यप्रतिषेध प्रसज्य क्रियागुणौ ततः पश्चात् निवृत्तिं नञ् करोति एष पूर्वपदार्थप्रधानः उक्तञ्च 'प्रतिषेध च विशेषो यत्र पूर्वपदेन नञ्' इति । यथाऽनुपलब्धिरभावात् इत्यादि । परे तु प्रतिषेधः च विशेष क्रियया सह यत्र नञ्' इति वचनात् यत्र नञ् क्रियया वाक्यार्थेनान्वेति तत्र च प्रतिषेधं बोधयति तत्र सामर्थ्याभावात् समास इति वदन्ति । अनयेव 30 पक्षोऽत्रारतः भेदो न भवतीति न भेदोऽभेद इत्यत्र 'नञ्' इति सूत्रेण समासोऽप्युत्तरपदार्थप्रधानः तथाऽत्राप्यनन्तर्भावारोपे-पितो ब्राह्मण इति बोधोऽर्थोऽप्यस्थानिव इत्यर्थ पर्यवस्यति तथाऽभेद इत्यत्राऽऽरोपितो भेद इति बोधोऽर्थोऽपितमिव इत्यर्थः पर्यव-स्यति एतस्वाभावेन भेदादन्यो वेत्युक्तम् । अयं पर्युदासः उक्तञ्च प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्' इति । अन्यपदार्थप्रधानो यथा–नास्य भेदोऽस्तीत्यभेद इति अभेदोऽस्यार्थो वाच्यो वा बोधोत्तरपदस्येप'

प्रतिषेधपक्षे न घटते नञः क्रियापदसम्बन्धिनोऽसमर्थत्वात्, तस्मादेतदन्य इति पर्युदासः स्यात्, स च बहुव्रीहिगुणस्य तथापि एव इति भेदत्वेनाभूतत्वात् परिणामित्वेनाभूतत्वादिति सुखग्रहणार्थं प्रद्योतनार्थमेतदुक्तम् ।

भिन्नानां हि भावानामव्यभिचरितैकत्वापत्तीनां सर्वत्वं भवति न त्वविशिष्टस्यैकस्याभिन्नस्येति
5 तद्दर्शयति—

अव्यभिचरितानेकत्वापत्तिरनेकेन विना न भवति यथा शुक्रशोणितादेरनेकस्यैकत्वापन्नस्याध्यात्मिकस्य, स हि भेदभावः सर्वत्वं तस्मादभिन्नस्यैकस्य सर्वत्वमिति सर्वत्वाभावात् पुरुष एवेदं सर्वमित्ययुक्तमुच्यते ।

अव्यभिचरितेत्यादि, यावद्भेदभावः सर्वत्वम्, अव्यभिचरितमनेकत्वं यस्य तदिदमव्य-
10 भिचरितानेकत्वमेकं तस्य गतिपरिणामलक्षणापत्तिः, सैकत्वापत्तिरनेकेन विना न भवतीति, यथा शुक्र-
शोणितादेरनेकस्यैकत्वापन्नस्याध्यात्मिकस्य । यथोक्तम् 'माउ ओयं पिउ सुक्कं तदुभयसंसिट्ठं कलुसं
किब्बिसं तप्पढमयाए आहारमाहरेत्ता जीवो गब्भत्ताए वक्कमति (१ सू०) । (२ सू०) सत्ताहं कललं
होति सत्ताहं होइ अब्बुदं । अब्बुया जायए पेसी पेसीओ जायते घणं' (त०वे०गा०१७) इत्यादि,
भिन्नानां वैधर्म्येण परिणतानां शुक्रशोणितसंसृष्टाहारादीनामैक्यापत्त्या हि सर्वस्य शरीरेन्द्रियादेः, तथा
15 बाह्यानामपि सर्वत्वं मृत्स्नाम्भस्तेजोवाय्वाकाशादिभिन्नभावानां वैधर्म्येण विपरिणाममापन्नानामैक्यापत्त्या
सर्वस्य दृश्यते नान्यथेति । किमस्मात् भवत्यर्थे, यस्मादित्थं भिन्नानामव्यभिचरितैकत्वापत्तिः सर्वत्वम्, स
हि भेदभावः सर्वत्वम् तस्मादभिन्नस्यैकस्य सर्वत्वं कस्यचित्, तस्मात् सर्वत्वाभावादयुक्तमुच्यते पुरुष
एवेदं सर्वमिति ।

किञ्चान्यत्—

20 त्वदुक्तैकसर्वतायान्तु प्रत्यक्षत एव भिन्नानेकैकसर्वताया दर्शनात् प्रत्यक्षविरोधो ग्रहण-

---

[illegible]

भेदादनुमानविरोधः, स्वपुत्रकासत्पुत्रकैकार्थ्याभावे भेदाभ्युपगमात् स्ववचनाभ्युपगमविरोधो लोके घटपटादिभेदप्रतीतेर्लोकविरोधः, अविकल्पशब्दार्थाद्विकल्पव्यवहाराङ्गीकरणादभ्युपगमविरोधः, असिद्धादिहेतुता च, न घटादयस्याऽभेदाद् वृक्षादिदृष्टान्तः ।

स्वपुत्रैकसर्वतायां स्थितस्यादि, एकमेव सर्वमित्येवमात्मैकसर्वतायाम्, सर्वैकतायामिति वा पाठात् सर्वैकपुरुषमयतायां प्रत्यक्षत एव भिन्नानेकैकसर्वताया दर्शनात् प्रत्यक्षविरोधः, महदणुभेदा- 5
दनुमानविरोधः, महदणुभेदे हि व्याप्यो भावभेद इति, भेदस्वपरिणामित्वादिभावाभावे सर्वत्वापत्ति-वचनाभावादनुमानविरोधः स्वपुत्रकासत्पुत्रकैकार्थ्याभावे भेदाभ्युपगमात् स्ववचनाभ्युपगमविरोधः, लोके घटपटादिभेदप्रतीतेर्लोकविरोधः । अविकल्पशब्दार्थत्वादित्यादि, अविकल्पः शब्दार्थ इत्यभ्युपगम्य विकल्पव्यवहाराङ्गीकरणादभ्युपगमविरोधः, सर्वमेकमिति विकल्पधर्मत्वेन धर्मित्वेन च सदुभयविशेष-सामान्यात्मकस्य तेनैवाभ्युपगमेन निराकरणादविकल्पशब्दार्थस्य, अभ्युपगतधर्मधर्मिस्वरूपविशेषोभयवि- 10
रोधः असिद्धादिहेतुता च, हेतोरनतिरिक्तपरापरार्णीयोज्यायोरूपात्मकत्वादित्यादेः प्रतिज्ञार्थैकपुरुषाभेदात्, तथाऽस्माभिर्योक्तेन न्यायेन पुरुषाभावाद्धर्म्यसिद्धेरुभयासिद्धिः, स्वमतेनार्थान्वयाभावेऽसाधारणता, अस्मन्मतेन विपक्ष एव भावाद्विरुद्धता साधारणानैकान्तिकता वा, सपक्षमभ्युपगच्छतो वा । न घटा-

---

पुरुष एवेदं सर्वमिति वाक्यस्य पुरुषे एतत्सर्वाभेदपरत्वे बोध्यम् । अत्र भिन्नानामनेकेषामेकत्वापत्ति[illegible] प्रत्यक्षतो दर्शनात् प्रत्यक्षविरोधः । यदा स्थितस्सर्वैकतायामिति पुरुषस्य बोधनं तदा[illegible]—सर्वैकतायामितीति । 15
सर्वेण पुरुषोऽयमिति सम्बन्धाभावात् पुरुष एव पुरुषत्वमात्रम्, पृथिव्यादौ च पृथिव्यादित्वेन महदणुभेदः, यथा पुरुषस्यापि [illegible] महदणुभेदः न हि सर्वत्वस्य महदणुभेदः सम्भवति अन्यथा [illegible] घटो वा पटो वा एक एव [illegible] पुरुषमयत्वादिहेतोरनुमानविरुद्ध इत्याह—महदणुभेदादिति ।
सर्वस्य पुरुषमयत्वादित्युक्त्या सर्वस्य पुरुषत्वमहत्त्व[illegible] महदणुभेदे वस्तुतो भावभेद इति [illegible] अनुमानविरोध इत्याशयेनाह—भेदस्वेति [illegible] सर्वत्वापत्तिः वस्तुनि 20
पुरुषमयत्वं विधीयेत विधीयते च तथा तस्मात् [illegible] एकैकपुरुषमयत्वमेवानुमानविरुद्ध-मिति भावः । स्वपुत्रकेति सर्वमेकमिति स्वपुत्रकस्य सर्वं नैकमिति [illegible] अन्यथा [illegible] भिन्नार्थोऽभ्युपगमात्, एकार्थत्वं तु न युक्तं परस्परविरुद्धत्वादिति भावः । लोकवि-रोधमाह—लोक इति । [illegible]
[illegible] 25
[illegible] सर्वमेकमिति [illegible] प्रतिज्ञापदमाह—सर्वमिति [illegible] प्रतिज्ञापदोषा एवोक्ता प्रत्यक्षादिविरोधा अपि । अथ हेतुदोषानाह—असि-द्धादीति । [illegible] हेतोरिति [illegible] इति भावः । [illegible]
[illegible] इति भावः । [illegible] 30
[illegible]—स्वमतेनेति । अस्मन्मतेन [illegible] एव हेतोः [illegible]—अस्मन्मतेनेति । [illegible] साधारणेति । [illegible]
[illegible]

यवस्थाऽभेदात् इत्यादि दृष्टान्ताः, एष इति पुरुषव्यतिरिक्तस्वभावप्रभेदाभावे साध्यसाधनोभयधर्म-धर्मिसिद्धा दृष्टान्तदोषाः, आदिग्रहणात् यथासम्भवं कल्पनां कृत्वा वैधर्म्यदृष्टान्तदोषा योज्याः, एवं तावत् पुरुषमतस्य सर्वमायुक्तमित्युक्तम् ।

अधुनाऽविशेषेण नियत्यादिष्वपि दोषातिदेशमाह—

5 यथा च पुरुषे तथेतरद्रव्यार्थेष्वपि प्रतिस्वं योज्यम्, तद्यथा—विभिन्नावस्थास्थाने पुरुषस्य सामान्यलक्षणं विशेषलक्षणञ्च यथा व्याख्यातं तथा नियत्याद्यभेदैकत्व सामान्यलक्षणमतीतानागतवर्तमानबाल्यकौमारयौवनक्रमयौगपद्यादयो भिन्नाविषयविशेषलक्षणमिति व्याख्याय विकल्पद्वयप्रतिषेधस्तथैव कर्तव्यः ।

यथा च पुरुषे तथेतरद्रव्यार्थेष्वपीति, नियतिकालस्वभावभावेष्वपि, एवं स प्रति प्रति

10 एवं प्रत्येकं योज्यम्, तदतिदेशोपपत्त्यर्थम्—तद्यथा विभिन्नावस्थास्थानेऽभेदैकत्वं विभिन्नावस्थासामान्यलक्षणं पुरुषस्य पुरुषवादे सुखादयस्तद्व्याप्तित्वात् सुखादयस्तु अपि विशेषाः, तत्र तदात्मत्वादिति यथा व्याख्यातं तथा नियत्याद्यभेदैकत्व नियत्यादेः सामान्यलक्षणम्, अतीतानागतवर्तमानबाल्यकौमारयौवनक्रमयौगपद्यादयो भिन्नाविषयविशेषलक्षणमिति व्याख्याय विकल्पद्वयप्रतिषेधस्तथैव कर्तव्यः—अथ किं या एता अवस्थाः एव नियत्यादिः, उत नियत्यादिरेवावस्थाः ? यदि ता एव नियत्यादिः

15 समुदयवादः क्षणिकवादो विज्ञानमात्रवादः शून्यवाद इत्यादि, अथ नियत्यादय एवावस्थास्ताऽभेदे कल्पनावस्थाभ्युपगमादिः स एव प्रपञ्चो योज्य इति ।

भवतस्त्वेवं तावत्सर्वत्र सति यदयं भवति सोऽस्य भाव इति सर्वगतत्वनित्यत्वदेशकालाभेदात् । इदं पुनर्न तावदित्थमसौ यस्तु भवति स कर्तेति, सम्भवार्थत्वात्, भवतेरकर्तृत्वाभावे रपि भवनात्, भवनव्यापृतिमात्रसत्तार्थत्वाद्भवनस्य, करणपर्यायत्वात् करोतेरकरण-

20 मपि भवत्येव, भवतेः स क्रियापत्तिभवनद्वयार्थत्वात्, अस्तिभवतिविद्यतिपद्यतिवर्ततीनां सन्निपातषष्ठानां सत्तार्थत्वात् ।

दृष्टान्त—एष इतीति । एवं पुरुषवादे दोषानुक्त्वैवं नियत्यादिवादेष्वपि तानेव दोषानतिदिशति—यथा चेति । अविशेषो-क्तस्यातिदेशस्य—तद्यथेति । नियत्यादेः सामान्यलक्षणं विशेषलक्षणञ्च दर्शयति—तथा नियत्याद्यादिति । अनयोर्द्विकल्पं प्रदर्शयति—अथ किमिति । उभयपक्षे विकल्पद्वये दोषं दर्शयति—यदि ता इति । अथ पुरुषादिवादिभिः कल्पितस्य

20 सर्वगतस्य सामर्थ्यकृतं प्रत्यर्थं निश्चायकत्वं प्रदर्शयति—भवत इति । पुरुषादेरनभिमते सर्वगतत्वं नित्यत्वं देशकालाभेदात् कर्तृत्व भवतीति यथा येन भूयते यो भवति स एव भाव इत्यर्थो व्यक्त्यर्थं निरस्य इति भावः । कर्तृत्वं कर्ता न एवेति प्रदर्शयन् पुरुषादिवादिभिरिष्टं निराकर्तुमिच्छति—इदं पुनरिति एवं हि पुरुषादावपि न भवतीति भावः यो भवति स कर्ता न कर्ता वा कर्तृत्वं च अकर्ता यो न इति योजनीयार्थमिति भावः । भवतेरर्थभिन्नत्वे कर्तृत्वे विप्रकर्षेण यद्यु भावविकारेषु द्वितीयो विपरिणमतीति योऽयं भवति विवर्ते सन्निपातषष्ठानामित्यत्र

0 विशेषो भावः स वर्तमानत्वं भवती विपरिणामवादी अर्थैन्तरम्, न तं प्रतिशेषति तदभिधानत्वम्, किन्तु भवनमात्रावि-भावकस्तत्सम्बन्धित्वमात्रं भवनस्य । देवदत्त भवनक्रियायोऽपि यदि यो भवति स कर्तैवेत्युक्ते तर्हि करणत्वेनाभिहिते भिन्ने भवने न स्वातन्त्र्यमेवाह—भवतेरपीति । भवतेः द्विविधः व्यापारमात्रमपि भवति यत्नविशिष्टभवनमात्रविषयमनुमवन इति दर्शयति—भवतेरिति । भवनं हि न विशेष एवं न सर्वेति देवदत्तादिस्थानात् कर्मपदार्थमिदम्, तथैवार्थमेव

(अत इति) अतोऽस्मात्तत्त्वे तावत् संवदति शेष न संवदति तच त्वदुक्तम्, कथमत् तेन ब्रवीति चेत् ? यदय भवति सोऽस्य भाव इत्येतत् संवदति तस्य भावस्तत्त्वम्, येन भूयते यो भवति स एव भावः, कर्तृलक्षणां षष्ठीं कृत्वा तस्य भावः स भाव इतीदमस्य दर्शनेन सह संवदति, किं कारणं ? सर्वगतत्वनित्यत्वदेशकालाभेदात्—सर्वगतत्वेन नित्यत्वेन यथासंख्यं देशकालाभ्यामभेदात्, तद्धि भवन देशतः क्वचिन्न भवतीति सर्वगतत्वादभिन्नम्, कालतः सततं भवति न कदाचिन्न भवतीति नित्यत्वादभिन्नं 5 तस्मादभेदाभिव्यक्त एतत्, इह पुनर्न तावदिच्छामः सम्प्रत्यर्थत्वात्, यस्तु भवति स कर्तेवेति सम्प्रत्ययेम्, न हि कर्तरि विहितक्तिप्प्रत्ययान्तभवतिशब्दभवनादेव कर्तृत्वम्, अकर्तुराकाशादेरपि भवनात्, भवनस्याद्युत्पित्सात्रसत्यार्थत्वाद्भवनस्य, कारणपर्यायत्वात् कर्तेरकारणकार्यमपि भवत्येव, भवतेः सन्निध्यापत्तिभवनद्व्यार्थत्वात्, अस्तिभवतिविद्यतिपद्यतिवर्ततीनां सन्निपातपक्षानां सत्तार्थत्वाविशेषदसर्वत्रसाम्यात्तस्यापि भवने कारणमाह, भवतेः सन्निध्यापत्तिभवनार्थत्व अस्तिविद्यतिसन्निपातानां 10 सन्निधिमात्रभवनार्थत्वम्, पद्यतिवर्ततोरापत्तिभवनार्थत्वमिति भागः सव्यापारत्वाभिव्यापारत्वाच त्रयाणां [द्वयोः], भवतेः सामान्यभवनवाचित्वादिति, अपरिणामित्वादकर्तृत्वात् [परिणामित्वात्] कर्तृत्वाच विशेषः ।

असतो भवनाभावादस्त्यादिभवनं सन्निधिमात्रवृत्त्यैव तदापत्तिभवनपृथग्भूतम् ।

(असत इति) असतो भवनाभावादस्त्यादिभवनं सन्निधिमात्रवृत्त्यैव सन्निधिमात्रा वृत्तिर 15 स्येति सन्निधिमात्रवृत्ति तदस्तिभवनमापत्तिभवनपृथग्भूतं ततोऽन्यदीपरिणमनव्यापृतमित्यर्थः ।

स्यान्मतम्—

सर्वत्रप्रसिद्धान्तेन विरुद्धमस्त्यसर्वभवनम्, भवतेः कर्तृविहितक्तिप्प्रत्ययान्तत्वादित्येतद्यायुक्तम्, तत्रैवानुज्ञातत्वात्, यदुपादायैतदभिधीयते—यत्राप्यन्यत् क्रियापदं न श्रूयते तत्रापि 'अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यतेऽर्थसद्भावात्, यथा वृक्ष इति, 20 अस्तीति गम्यते,' (महाभाष्य० अ २ पा ३ सू १) अस्ति भवति सन्निहितमित्यर्थः ।

भान्येवेति तत्कर्तरीत्येनाभावादिरस्तायाभिन्नमित्याह—सर्वगतत्वेनेति । ननु 'भः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रेण क्तिपः कर्तरि विधानाद्भवतीत्यस्य भवनकर्तृत्वार्थं तदर्थं सम्प्रत्ययार्थमित्यत आह—न हीति । भवनस्य द्विविधे व्यापाराव्यापारवति— भक्तिमभवतीति । सन्निधिभवनमपरस्य व्यापार एव भवेदित्यत आह [illegible]—असतोऽन्य इति । सन्निधिभवनमव्यापारमपरिणामकर्तृ च अपरिणामकं व्यापारं परिणामि कर्तृ चेत्याह—सव्यापारत्वादिति । ननु- 25 सिद्धस्यापि सन्निधिभवनाभावे वस्तुनोऽसत्त्वात् [illegible]—असत इति । सन्निधिभवनं [illegible] [illegible]—सर्वत्रेति [illegible] [illegible] [illegible] [illegible]। व्याकरणे कर्तेः कर्तृत्वमुक्तम्, भवतीत्यत्र तिपः कर्ता कर्तरि विहितत्वात् तेन सर्वत्रभवनमेव तत्सिद्धान्तेन [illegible] [illegible]—भवतेरिति । सन्निधिभवनमपि तत्र [illegible] [illegible] प्रथमपुरुष[illegible] 30

---

१ क. देवे । २ सि. कर्तृत्वादेवेति नास्ति ।

(सर्वत्रेति) सर्वत्रसन्निधान्येन व्याकरणेन विकल्पमसर्वत्रभवनम्, भवतेः कदाचिद्भवतिप्रस-
पान्तत्वमित्यवधारणम्, तत्रैवानुगतत्वात्, यदुपादायैवदभिधीयते इत्यादि इदन्तु सन्निधिमात्र-
त्रिभवनमेवोपादायाभिहितम्। यत्रान्यत् क्रियापदं न श्रूयते तत्रापि अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयु-
ज्यमानोऽप्यस्तीति गम्यते भवती वर्तमाना विभक्तिः पूर्वापार्यसंज्ञयोक्ता छेदितार्थः तत्परोऽस्ति-
5 अस्तिः—अस भुवीति धातुः 'इक्श्तिपौ धातुनिर्देशे' (वार्तिक पा ३।३।१०८ सूत्रे) प्रथमपुरुषे
न मध्यमोत्तमयोः अप्रयुज्यमानोऽपि गम्यते अर्थसद्भावात्-अविनाभावार्थेन, तदुदाहरति—वृक्ष इति,
अस्तीति गम्यते, किमुक्तं भवति अस्ति भवति सन्निहितमित्यर्थः निर्दिष्टं सन्निधिभवनमुभयोः
समान[illegible]त्वादादौ ।

आपत्तिभवनम्—

10 अस्तिभवनमेवेदं सन्निहिततयावृत्ति आपत्तिभवनम्, कारणे कार्यस्य सत्त्वात्, यथा
घटो भवतीति पूर्वमघटत्वेन दृष्टं सन्निहितमेव मृदि घटभवनं व्यक्तं निर्वर्तते आपद्यत इति।

अस्तिभवनमित्यादि, आपद्यापद्यत इति, इदमपि चेयमिह सन्निधिभवनमेव, यथा वृत्ति
सन्निहितस्य तथावृत्तेरापत्तिभवनम्, अथवा तथावृत्तिरस्य तथावृत्ति सन्निहितं च तथावृत्ति च तदिति
सन्निहिततथावृत्ति किं तत्? आपत्तिभवनम्, कुतः सन्निहितमेव तथावर्तत इत्युच्यते? उच्यते कारणे
15 कार्यस्य सत्त्वात्, यथ अङ्कुरादि बीजादौ सन्निहितमेव तथा तथा देशकालाकारनिमित्तसाम्यप-
व्यक्तिरूपेण वर्तत इति, तन्निदर्शयति—यथा घटो भवतीति, पूर्वमघटत्वेन मृत्त्वेन दृष्टं सन्निहितमेव

भावस्यार्थसद्भावादेवाविनाभावादित्याह—तत्रैवेति। यत्र हि क्रियान्तरं अस्तिर्भवन्तीपर प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति
इति गम्यते [illegible] अस्तीति गम्यते' इति [illegible] 'अस्तिर्भवन्तीपरः' इति [illegible]
इत्यादौ द्वितीयादिविभक्ति [illegible] न चात्र द्वितीयादिविभक्तौ प्रथमा निरवकाशा स्यादिति वाच्यम्, यत्र क्रियापदं न श्रूयते तत्र
20 [illegible] इत्यादौ प्रथमाया अवकाशात्, तत्र क्रियापदाभावेऽपि अस्तीति पदस्य गम्यमानतया कर्तरि तृतीयापत्तौ प्रथमाया अन-
वकाशतया तत्समाधानम् तथा च न तृतीया कर्तुरविवक्षितत्वात् किन्तु प्रथमैवेति। भवन्तीति वर्तमाना विभक्ति
पूर्वाचार्यसंज्ञा, तथा च भवन्तीपर इत्यस्य [illegible] इत्याह भवन्तीति। इक्श्तिपाविति धातोर्निर्देशे वर्तमाने तत्
इक्श्तिपौ [illegible] इत्, तेन धातुमात्रस्य [illegible] भवन्ति [illegible] अस्तीति निर्दिष्टम्
प्रथमपुरुषस्यानेकत्वेऽपि [illegible] मध्यमोत्तमयोरप्रयुज्यमानत्वे [illegible] इत्याह—नेति। प्रयुज्यमाने [illegible]
25 एव अस्तीति [illegible] इति प्रथमाऽपि क्रियाऽविनाभाविनीति [illegible] इत्याशयेनाह—अर्थसद्भावादिति।
[illegible] भवति [illegible] भवति भवनस्य च [illegible]
[illegible] सन्निहितमिति सन्निधिभवनमुच्यत इत्याशयेन तदर्थं व्याचष्टे—
सन्निहितमित्यर्थं इति। सन्निधिभवनापत्तिभवनयोर्भवनसामान्येन सन्निधिभवनस्य प्रागुक्तयोर्द्वयोः समान-
त्वादादौ सन्निधिभवनमुक्तमित्याह—निर्दिष्टमिति। पूर्वोक्तौ सन्निधिभवने निरूपिता [illegible] भवनादिभावात् ये
30 [illegible] इत्याह—अस्तिभवनमिति। सन्निहितस्य [illegible] तदेव तस्य वर्तनम्, [illegible]
[illegible] कार्यं [illegible] सन्निहित
[illegible] —यथा घटोति। [illegible] सन्निधिभवनस्य [illegible]

---

१ मि क. भवतीतिपरः। २ मि. क. भवती। ३ मि क. तद्विवर्णः।

तदेव घटभवनं व्यक्तमित्यर्थः, तत्पर्यायकथन निर्वर्त्यते आपद्यते इत्यर्थः, सन्निधिभवनमेवापचीभवति, उपमानचिभवनमपि ।

अनयोरेव न्यूनाधिकरूपतया सिद्धिरुच्यते—

सा च सन्निधिसिद्धिः भोग्यद्वैतभूततया, नाद्वैतत्रैतादितायां व्यतिरेकाभावात् ।

सा चेत्यादि, सामान्यत्वात् सन्निधिभवनसिद्धिरुक्ता—सा च भोग्याद्वैतभूततायां सन्निधि 5 सिद्धिः— सन्निधिभवनसिद्धिः तद्धि सन्निधिभवनं द्वैतभूततायां सिद्ध्यति नाद्वैततायाम्, द्वयोर्विवेकभोक्तृ- भोग्यत्वापुरुषत्वाविरोधात्, न ततो न्यूनतायां सिद्धिरधिकतायां वा द्वैतात्तृतीयस्याभावात् न्यूनाधिकभा- वानुपपत्तौ कारणमाह—व्यतिरेकाभावादिति, व्यतिरेकः—पृथक्त्वेनैकस्यैव वृत्तिं विनापि भावः, तदभावा न्यूनतायामसिद्धिः, यथा स्वामिना विना भृत्यस्य, भृत्येन विना वा स्वामिनः । अधिकेऽपि व्यतिरेको यथा भावव्यतिरिक्त भातीति, तथेह भोक्तृभोग्यव्यतिरेकाभावात्, अतो न्यूनाधिकाभावात् द्वैते 10 सन्निधिभवन सिद्ध्यति नाद्वैतत्रैतादितायामिति ।

तदुपपादनार्थमुपपत्तिरुच्यते—

न ज्ञेयमन्तरेण ज्ञातृत्वं ज्ञेयासत्त्वात्, अथवाऽनुपपन्नं ज्ञातृत्वमसंज्ञेयत्वात् खपुष्प- ज्ञत्ववत्, वैधर्म्येणेतरकुसुमज्ञत्ववत्, अथवा ज्ञातृत्वमुपपद्यते संज्ञेयत्वादितरकुसुमज्ञत्ववत्, वैधर्म्येण खपुष्पज्ञत्ववत्, एवं हि ज्ञातुर्ज्ञातृत्वम्, यो हि संज्ञेयं जानीते स तु मुख्यो ज्ञाता, 15 यथा सलिलं सलिलमिति विद्वान्, यः पुनरसज्ज्ञेयं विजानीते स तु न ज्ञाता, यथा मृगतृष्णिकां सलिलमिति विद्वानिति ।

(नेति) न ज्ञेयमन्तरेण ज्ञातृत्वम्, भोग्यस्य ज्ञेयत्वात्, रूपादिगुणपुरुषोपलब्धिमद्गुणपुरुषोप-

---

लभ्याऽऽप्रतिभवनात् सन्निधिभवनमेवैषमिद्धं सदुपपत्तिभवन भवतीत्याह—सन्निधिभवनमिति । अत्र प्रकृतिमहदादयो भोग्यतया पुरुषस्तु भोक्ता भोक्तृभोग्यभावेन सन्निधिभवनोपचिभवने उच्येते तयोर्द्वैतभावोऽपरस्परापेक्षभाव एव परस्परा- 20 पेक्षत्वादिति प्रथमं सन्निधिभवनव्याख्यानं भोक्तृ साधयितुमाह—सा चेति द्वे इते न च हीनः न च एव द्वैतो भूतः भोग्यत्वे द्वैतभूतत्व भोग्याद्वैतभूतः तस्य भावस्तया तस्यां भोग्यद्वितीयतायामित्यर्थः भोग्येन हि भोक्ताऽनुमीयते न च केवलस्य भोग्यस्य भोक्तारमन्तरेण भोग्यतोपपद्यते न च मुक्तादीनामेव भोक्तृत्वसम्भवः तथा सति तेषां भोग्यस्याप्युत्पत्तिः स्यादिति इतिविरोधेन तस्य तेन भोग्यत्वासम्भवात् न क्षयित्वानं छिनत्ति तथा च मुक्तावस्थायां मुक्तादिर्व्यतिरेकेण वैल- क्षण्येनाप्युपपन्नमिति, भोग्यतादोषप्रसङ्गादिति भावम् । न्यूनतया दोषमाह—नाद्वैततायामिति—एकस्य तु स्वभावे तस्य 25 एकत्वमिति भावः । अधिकं दूषयति—त्रैतादिति सर्वेषां भोक्तृभोग्ययोरधिकत्वेन तदन्तर्भावित्वे वस्तुना [illegible] भावादिति भावः । पृथक्त्वेनेति भोक्तृभोग्यभिन्नत्वेनैकस्यैव पुरुषस्य परस्परव्यतिरेकमन्तरेण [illegible] भावः । अधिकस्याभावमाह—अधिकेऽपीति यथा भावव्यतिरिक्तं किञ्चिदपि नास्ति सर्वस्य भावान्तर्भावित्वात् तथा भोक्तृ- भोग्यव्यतिरिक्तं किञ्चिदपि नास्ति भिन्नभोग्यत्वात् [illegible] तयोरेवान्तर्भावादिति भावः । भोक्तृभोग्ययोः परस्परा- पेक्षत्वात् [illegible]—न ज्ञेयमिति पुरुषस्य भोग्यत्वार्थं हि प्रकृत्यैव [illegible] अत्र भोग्यस्य [illegible] 30 रेवभावे पुरुषार्थभावात् कथं पुरुषस्य [illegible] ? [illegible] तस्य ज्ञातृत्वं भोक्तृत्वं चेति भावः । भोग्यस्य ज्ञेयत्वं कथमित्यत आह—शब्दादीति भोगापवर्गार्थं हि पुरुषस्य तज्ज्ञेयं न तु केवलं प्रयोजनम् अत्र भोग [illegible]

---

१ सि क. तद्भेव ।

भोगार्थत्वात् तद्भोग्यमायामिभवने तदन्तरेण न ज्ञातुर्ज्ञातृत्वम्, कुतः ? ज्ञेयासत्त्वात् ज्ञेयत्वासत्त्वादिति । वैधर्म्यदृष्टान्ताभावादसाधर्म्यत्वादसिद्धो हेतुरिति चेन्न ज्ञातृज्ञेययोः सम्भिन्नत्वेन साध्यधर्मोऽसदसत्त्वस्य धर्मत्वात् अथवाऽनुपपन्नं ज्ञातृत्वमसंज्ञेयत्वादिति प्रयोगान्तरेऽर्थव्याख्या, तत्र ज्ञेयत्वासत्त्वात् अगृहीतज्ञेयत्वादिति दृष्टान्तः खपुष्पज्ञत्ववत्, यथा खपुष्पविषयं ज्ञातृत्वमसंज्ञेयत्वादनुपपन्नमेवमसंज्ञेयं ज्ञातृत्वम्, वैधर्म्येण इतरकुसुमज्ञत्ववत्, यथा चूतादिपुष्पेतरकुसुमज्ञत्वं संज्ञेयत्वादुपपद्यते तथा त्वदभिमतात्मज्ञत्वं ह्येते सत्युपपद्येत न चैतस्य ज्ञातृज्ञेयव्यतिरेकभावाद्यनन्तःपातित्वादसत्त्वमिति । अथवा पृथक् साधनं ज्ञातृत्वमुपपद्यते संज्ञेयत्वादितरकुसुमज्ञत्ववत्, वैधर्म्येणानुपपन्नमसंज्ञेयत्वात् खपुष्पज्ञत्ववदिति एवं हि ज्ञातुर्ज्ञातृत्वं यो हि संज्ञेयं जानीते स तु मुख्यो ज्ञाता यथा सलिलं सलिलमिति विज्ञान्, यः पुनरसंज्ञेयं विजानीते स तु न ज्ञाता यथा मृगतृष्णिकां सलिलमिति विज्ञान्, एवं तावत् ज्ञातैव न ज्ञेयमित्येतद्दर्शनं निरस्तम् ।

अथेदमधुना ज्ञेयमेव न ज्ञातेत्येतन्निरस्यते—

न ज्ञातारमुपग्रहारमन्तरेण ज्ञेयत्वं ज्ञातुरसत्त्वात्, एवमेव हि ज्ञेयस्य ज्ञेयता भवितुमर्हति यदि केनचिदनुपहतेन्द्रियज्ञानेन ज्ञायते, अनुपहतेन्द्रियबुद्धिपुरुषज्ञेयघटवत्, यथा न भोक्तारमन्तरेण भोक्तृत्वमसम्भोग्यत्वात्, खपुष्पमकरन्दभ्रमरवत्, वैधर्म्येणेतरकुसुममकरन्दभ्रमरवत् सम्भोग्यत्वाद्भोक्तृत्वमिति तत्साधर्म्येण वैधर्म्येण वा खपुष्पभ्रमरवत्, एवमेव हि भोक्तुर्भोक्तृत्वं भवितुमर्हति, यदि सम्भोग्यं भुनक्ति तथा न भोक्तारमन्तरेण भोग्यमसम्भोक्तृत्वात् वन्ध्यासुतयौवनपार्थक्यवत् सम्भोक्तृकं भोग्यत्वादितरसुतयौवनपार्थक्यवत्, एवमेव हि भोग्यस्य भोग्यत्वं भवितुमर्हति यदि सम्भोक्त्रा भुज्यत इति ।

न ज्ञातारमित्यादि, ज्ञातारमन्तरेण तत्पर्यायं दर्शयति उपग्रहारमिति, ज्ञाता विना न ज्ञेयत्वं

तयोर्भोगो [illegible] ... भोग्यम् । [illegible] ... ज्ञातृज्ञेययोरिति । [illegible] ... उपग्रहारमिति । [illegible]

---

१ सि. क. तं सम्भेव ।

ऽक्षातुरसत्त्वात्, अत्रापि पूर्ववदसञ्जातत्वादिति वा हेतुः, साधर्म्यदृष्टान्तो वन्ध्यासुतक्षेयपटत्वम्, वैधर्म्येणेतरसुतक्षेयपटत्वम्, विपर्ययेण वा पूर्ववत् साधनद्वयम्, परस्परापेक्षत्वाज्ज्ञेयत्वसाम्यतया वा वैयधिकरण्यपरिहारेण हेतुर्वाच्यः, एवमेव हि ज्ञेयस्य ज्ञेयता भवितुमर्हति यदि केनचिदनुपहतेन्द्रियज्ञानेन ज्ञायते, यथाऽनुपहतेन्द्रियबुद्धिपुरुषज्ञेयपटवत् मध्यस्थेन तर्कागमकुशलेन विपश्चिता प्रमात्रा वा ज्ञेयसाधनम्, यथेति, यथा न भोग्यमन्तरेण, भोक्तृत्वम्, असद्भोग्यत्वात् खपुष्पमकरन्द- 5
भ्रमरवत् वैधर्म्येणेतरकुसुममकरन्दभ्रमरवत्, सद्भोग्यत्वाद्भोक्तृत्वमिति तत्साधर्म्येण वैधर्म्येण वा खपुष्प-भ्रमरवत्, परस्परापेक्षिकं वा पूर्ववद्भोक्तृभोग्यत्वसाधनम्, अत्रापि चैवमेव हि भोक्तुर्भोग्यत्वमिति भव्यो दृष्टान्तः, तथा न भोक्तारमन्तरेण भोग्यमसद्भोक्तृत्वाद्वन्ध्यासुतयौवनवत्, सद्भोक्तृक भोग्यत्वा-दितरसुतयौवनौपभोग्यवत्, पूर्ववदेवात्रापि व्याख्या यावदेवमेव हि भोग्यस्य भोग्यत्वमिति ।

युगपद्वा परस्परसम्बन्धिसत्ताकौ भोक्तृभोग्यौ, तत्सम्बन्धित्वात्, यथा सम्बन्धी भ्राता 10
सम्बन्धिनेतरेण भ्रात्रा विना न भवति तथा भोक्तृभोग्याविति ।

(युगपद्वेति) युगपद्वा परस्परसम्बन्धिसत्ताकौ भोक्तृभोग्यौ तत्सम्बन्धित्वात् तयोः सम्ब-न्धित्वादित्यपसर्गप्रदर्शनहेतुः, प्रयोगहेतुस्तु सम्बन्धित्वादित्येव, यथा सम्बन्धी भ्राता सम्बन्धिनेतरेण भ्रात्रा विना न भवति कनीयान् ज्यायसा ज्यायान् वा कनीयसा तथा भोक्तृभोग्यौ, यथा [च] दम्पत्यौ दम्पतीत्येवमादिदृष्टान्तैर्भोक्तृभोग्यसम्बन्धित्वसिद्धिरन्योन्याविनाभाविनीति प्रागुक्तं सन्निधिनिबन्धन हेतो 15
सति सिद्धमितीति ।

दृष्टान्ताभिप्रायेणाह–अत्रापीति । असंज्ञातत्वस्य बोधयज्ञातसत्त्वम् बोधकस्य ज्ञातुरभावे हि वस्तु न ज्ञातमिति वर्ण्यं हेतं स्यात् यथा वन्ध्यासुतविषया क्वचो ज्ञेयो न भवति वन्ध्यासुतेन च ज्ञेके भवतीति भावः । युगपद्वेति प्रकृतिपुरुषसंयोगो हि दर्शनार्थं कैवल्यार्थं च प्रधानेन सुखादात्मकसकलजगत्संसारानुभवरूपभोगार्थं पुरुषोऽपेक्ष्यते न च प्रकृतिः स्वयमनुभवितुमलम् स्वात्मनि क्रियाविरोधात् पुरुषेण च भोगकारणविवेकख्यातिरूपप्रकृतिपरिणामार्थं प्रधानमपेक्ष्यते पुरुषो हि अनादितः प्रधा- 20
नाद्ध्यस्तके विविक्तत्वमनुपलभमानः भोगस्य संयुक्तोऽपि कैवल्यार्थं संयुज्यतेऽतोऽत्र भोक्तृभोग्यौ परस्परापेक्षसत्ताकौ विवेके सत्यन्येव भोक्तृत्वे भोक्ता भोग्यविषयो भोग्यः भोक्तुरभावे भोग्याभावाद्भोगविषयतायाः असम्भवेन न भोग्यता सम्भव-तीति भोग्यं सकलमविभागेन भोक्तृपेक्षसत्ताकम्, विषयाभावे विषयिणो भोगस्याप्यसम्भवात् भोक्तृता पुरुषस्य निर्वर्तयतीति सकलसम्पत्त्ये भोक्त्रपि भोग्यापेक्षसत्ताकः भोग्यस्य भोक्तृतयोः परस्परापेक्षसत्ताकत्वादिति भावः । तत्सम्बन्धित्वाच्च पौरुषेयं सम्बन्धित्वम् तत्र यदि भोक्तृनिरूपितसम्बन्धित्वमुच्यते तर्हि तस्य भोग्य एव सत्त्वादेकदेशासिद्धिः यदि च भोग्य- 25
निरूपितसम्बन्धित्वमुच्यते तर्हि तस्य भोक्त्र्यभावात् स एव दोष इत्यत आह–तयोरिति उभयनिरूपितसम्बन्धित्वमनु न यदि भोक्तृभोग्यव्यतिरिक्तमाश्रयतः सम्बन्धित्वमात्रं प्रयोगहेतुस्तत्र प्रतियोग्यनुयोगिताख्यतत्सम्बन्धेनेममभिप्रायतः दोष इति भावः । भोक्तुः भोगस्वरूपप्रयोजकत्वमेव दृश्यस्य तत्सम्भवे भोक्तृत्वमेव प्रतिबन्धकताकम् यदि परप्रयोजनक वस्तु परप्रयोजनं विना कदापि स्थातुं क्षमते जडचेतनाद्वीप सत्ता दृश्यस्य न स्यात् द्वयोऽपि द्रष्टृ बुद्धिस्थं भोग्यमर्थं दृष्टानित्य-स्वरूपमतीति प्रतिबिम्बनाद्वाऽऽरोपितविम्बा दर्शनकर्तृत्वमस्य द्रष्टृत्वमिति तयोः स्त्रीपुंसयोरिव परस्परं सम्बन्धित्वं विशेषमिति 30
भावार्थमाह–यथा दम्पत्यादिरिति प्रकृतिस्त्वात्मनो वा महदादिस्वरूपपरिणामभावेन पुरुषभोग्या भोक्ता च पुरुष इति तयोः परस्परसम्बन्धित्वस्वरूपं बोध्यम्, तदेवं भोग्याद्यैतन्मूलकत्वमेव सन्निधिनिबन्धनहेतोरपि विवेकख्यातिः–प्रागुक्त-

---

१–२ सि क. °नार्थितक० ।

अधुनेदम्—

यदि च तथा तथा वर्तनं भवनं रूपादौ पृथिव्यादौ गवादौ घटादौ च सकलजगद्विवर्तरूपं तदपि नैकैकस्मान्नयति, अपरिणामिनो वा, किन्त्वनेकैकस्मात् परिणामिन एव, आपतितत्वात्, व्रीहिवत् ।

५ (यदि चेति) यदि च तथा तथा वर्तनं भवनं रूपादौ तेन तेन प्रकारेणान्यथाऽन्यथा वाऽऽपतितभवनं रूपे रसे गन्धे स्पर्शे पृथिव्यादौ गवादौ घटादौ च सकलजगद्विवर्तरूपं तदपि नैकैकस्मात्—एकमेवैकमेकैकं पुरुषादि तस्मादेकैकस्मान्न भवति, किन्तर्हि ? यदनेकमेकं तस्मादनेकैकस्माद्भवति, अपरिणामिनो वा—चिन्मात्रभवनात् नेति भवति किं तर्हि ? परिणामिन एवापतितभवनयोग्याद्भवति कुतः ? आपतितत्वात् आपतितभवनत्वात् व्रीहिवत् यथा व्रीहेरनेकैकस्मात्परस्परमणु-

१० त्वगुणविसंघातादङ्कुरोत्पत्तिः अङ्कुरादेर्वा भूम्यम्बुमारुतादिसंघाताद्व्रीह्युत्पत्तिः तथैवानेकात्मकैकस्मादापतितभवनं भाव्यद्वैते । इत्थं तावत् सविषयाद्वैते सत्यापतितभवनम् ।

परविषयाद्वैते सत्येवापतितभवनमित्युच्यते—

नाप्यद्वैते भवत्यापतितभवनमेकैकस्य कस्यचिदर्थमकुर्वतः किन्तु संघातात्मकत्वात् संहत्यकारिणां हि पारार्थ्यं नानर्थक्यं न स्वार्थत्वं नाप्योऽन्यार्थत्वात् केवलम्, गृहघटपृथिव्या

१५ दिवत्, क्षीरक्षामनार्याङ्कुरवत्, तथा वा चक्षुरादयोऽप्याध्यात्मिकाः ।

(नाप्यद्वैत इति) नाप्यद्वैते परविषयाद्वैतामावे भवत्यापतितभवनमानर्थक्यमपरस्यभावादेकै-

---

मिति । [illegible]—अधुनेदमिति इदम्—आपतितभवनम् [illegible] तेन तेन [illegible] [illegible] तदापतितभवनं नैकैकस्मात् अपरिणामिनो वा किन्त्वनेकैकस्मात् परिणामिन, यद्यपि प्रकृतेः [illegible] 'अनेकमाश्रितं लिङ्गम् [illegible] विपरीतमव्यक्तमि'त्युक्तेः (सां का १)

२० तथापि [illegible] । (कपिलसूत्रे अ. १ सू. १४) इति [illegible] [illegible] [illegible] सकलजगदिति । अपरिणामिनो वेति [illegible]

२५ [illegible] । [illegible] परिणामिन इति । [illegible] व्रीहि वदिति । [illegible]

३० [illegible]—नाप्यद्वैत इति [illegible] [illegible] [illegible] ।

कस्माद्वितीयस्य कर्मणो विधर्ममकुर्वतः, किन्तु संघातात्मकत्वात् पारार्थ्यमिति सम्बन्धः संघातात्मकभवनात् पारार्थ्यम्, संहत्यकारिणो हि पारार्थ्यं नानर्थक्यं न स्वार्थस्य नान्योऽन्यार्थत्वञ्च केवलम्, दृष्टान्तो गृहपटपृथिव्यादिवत्, यथा गृहपटपृथिव्यादय संघातात्मका अतः पृथग्भूतपुरुषार्था नानर्थका न स्वार्था नान्योऽन्यार्थाः पुरुषार्था एव चान्योन्यार्थाः, क्षीरोमनाथाङ्कुरवत् तथा चा चक्षुरादयोऽप्याध्यात्मिका इति दृष्टान्ताद्धस्मात् परार्थव्याप्तिं दर्शयति । चा चक्षुरादयोऽपीति, चक्षुरादयोऽपि सूक्ष्मा 5 आध्यात्मिका येऽन्या यावत् परार्थां यावत् रूपादिरूपणुकादयः किमङ्ग ? पुनर्गृहपटपृथिव्यादयः स्थूला मामारामादयश्चेति ।

यत्पुनरिष्यते एकं कारणं पुरुषादीति तत्र वयमभ्युपेमः, स्वन्मतेनाप्येकञ्चेत् किञ्चित् पारार्थ्यं कारणमिष्यते तदभ्युपगम्य भेदात्मकेन भावेन भवितव्यमिति प्रतिजानीमहे परार्थार्थेन च, कारणत्वात् तन्त्वादिवत्, शब्दाद्युपलब्ध्यर्थत्वात् किं हि कारणं रूपादि दृष्टमेकं 10 स्वार्थञ्चेति ?

(यदिति) यत्पुनरिष्यते एकं कारणं पुरुषादीति तत्र वयमभ्युपेमः, स्वन्मतेनाप्येकञ्चेत् किञ्चित् पारार्थ्यं कारणमिष्यते तदभ्युपगम्य भेदात्मकेन भावेन भवितव्यमिति प्रतिजानीमहे, परार्थार्थेन च, कारणत्वात् तन्त्वादिवत्, तन्तुकपालादयो हि कारणत्वात् पटघटादीनां कार्याणां रूपादिगुणसमावेशभावरूपा अनेकात्मका एव कारणभाव विभ्रतो दृष्टाः, नान्यथा, यथा तेनापि स्वविदेन 15

नैवेश इति भाव । संघातात्मकत्वादिति संहन्यन्ते मिथीभवन्त्यनेके विशेषा यस्मिन् संघातस्तदात्मकत्वादिति चक्षुरादीनामपि महाभूतः संघातः भवन्ति गुणगुणात्मकत्वात् पारार्थ्यं—स्वामितस्य भोग्यत्वम्भवत्वम् । परविपक्षे तपसाद्युपमेयम्—संघातात्मकत्वभवनादिति संहतिरूपेण भवनादित्यर्थं तथा च चा चक्षुरादयोऽप्याध्यात्मिकाः परार्थाः संघातात्मकत्वात् संहत्यकारित्वात् गृहपटपृथिव्यादिवत् क्षीरोमनाथाङ्कुरवदिति प्रयोगः यथा बहून्यङ्गानि यावन्ति एकभवनेन मिलित्वा सर्वोपकारं कार्यं कुर्वन्ति तथा चक्षुरादिरिव्वातभोक्तृत्वसत्त्वे भोक्ता अविवेकेन स्यात् यदर्थमेतानि यावन्ति 20 भवन्त्य इति भावः । चक्षुरादयः संहत्यापि अवस्थन्ति स्वार्थमपि ये विषमचासकत्वात्के इत्यत्राह—संहत्यकारिणामिति एकत्वाभ्येवार्थक्रियाकारिणामित्यर्थः अनर्थकत्वं व्यर्थप्रारम्भार्थत्वात् न स्वार्थत्वं संहननैयर्थ्यात् नान्योऽन्यार्थत्व चक्रकत्वादिति भावः । दृष्टान्तमाह—गृहपटेति यद्वा गृहकाष्ठादय संहताः परशरीरार्थे दृष्टा इति संहतपरार्थत्वव्याप्तत्वं संघातत्वमनुमानं प्रतीतमिति तेन हेतुना संघातान्तरार्थत्वमेव सिद्ध्येत् न पुरुषार्थत्व येन स्वविविभवनाभावे व्यक्तिभवत् न सर्वेति येन व्याससाधारणात् संघातान्तरस्यापि संघातात्मकत्वेनापरसंघातार्थत्वात् तस्यापि तदन्यार्थत्वात्तदवस्थेति तस्मादीश्वरेण संहतस्य 25 पारार्थ्यमात्रेणान्वय इति बोध्यम् । क्षीरोमनाथेति यथाऽङ्कुराः क्षितिः क्षोभकाले एव न स्वार्थो नान्योन्यार्थो न व्यर्थक इतीति भावः । अन्वयमारम्भापरार्थं स्थूलसूक्ष्माणां सर्वेषामेव परार्थत्वं व्यनक्ति—चा चक्षुरादय इति । अथ पुरुषनित्यतादिसाधने एकत्वेन पुरुषार्थमिष्यमाणस्यैकत्वं बाधयन् तदिदमाह—यत्पुनरिष्यत इति । तेषां मते पुरुषादिव्यतिरिक्तस्य वस्तुनः कस्यचित्स्वभावेन यदि पारार्थ्यमेकं कारणं किञ्चिदभ्युपगम्यते तर्हि तदपि नैकं भवितुमर्हतीति निगमयते—स्वन्मतेनापीति पुरुषस्तु न कार्यं प्रतिनिमित्तमात्रत्वात्, अनेकत्वमेकस्य तत्त्वाभावात् एवं नित्यस्यादिरपि 30 तदतिरिक्तेन कस्यचित्स्वभावेन परार्थत्वमनुमाने तेनापि तन्मूलकारिणा भवितव्यम्, नहि किञ्चिदेकं परार्थं कार्यं यदि तु तन्मूल एव केनचित् प्रकारेण न कस्यचिदप्येकत्वात् तन्मयोऽपि किन्त्वनेकस्वभावेति भावः । तत्र हेतुमाह—कारणत्वादिति, भवदभ्युपगतं परार्थमिदं वस्तु अनेकात्मकमेव कारणत्वात् स्यात्, तन्त्वादिवदिति भावः । दृष्टान्ते व्याप्तिं भावयति—तन्तुक

1 सि क. परार्थेन ।

कारणेन भवितव्यमनेकात्मकेन, परार्थार्थेन च, भवितव्यमिति मन्यते, परस्मै अर्थः परार्थः परार्थोऽर्थः प्रय यस्य कारणस्य तेन कारणेन परार्थार्थेन कार्येण भवितव्यं कारणत्वात् तन्त्वादिवदेव, यथा देवद त्तशरीरत्राणार्थं पटकार्योत्पन्नस्तथा तेन कारणेन स्वाङ्गेन भवितव्यम्। स कथमोऽर्थ इति चेदु च्यते—शब्दाद्युपलब्ध्यपवर्गत्वात् आत्मिमहत्त्वाच्छब्दाद्युपलब्धिपरार्थैः गुणपुरुषान्तरोपलब्धिरन्त्या इत्यध्-

5 यात्मोपभोगद्वयं पुरुषस्यार्थं, सोऽस्याप्रतिमवनस्य परार्थार्थः, तस्माच्छब्दाद्युपलब्ध्यपवर्गार्थत्वात् परार्थार्थेन तेन कारणेन भवितव्यम् किं हि कारण रूपादि तदनेकं स्वार्थमेवेति कारणस्यानेकैकत्वाविभागाभाव पारार्थ्योचि- नाभावं स्वार्थमात्राभावं दर्शयति, विपक्ष एव नास्तीत्यविनाभावः, रूपादिभेदस्य तु पक्षत्वात्।

रूपादीनां संघातपारार्थ्यपरिणामित्वैः सन्निविभवनभेदलक्षण्य दर्शयति—

तदिदं सूत्रे तु प्रकृतेरनेकात्मिकाया आत्मभिः सुखदुःखमोहैः स्वपरयोः प्रतिपत्तिवच-

10 नघटनकरणैः प्रागभिहिताऽऽचार्यपवनपाषाणवत् महदादिना परिणामानुक्रमेणारब्धाः शब्दा- दयोऽपि तदात्मका एव तदात्मत्वाभिव्यक्तकार्यत्वात्, मृत्कार्यपिण्डशिवकादिमृत्त्ववत्, सुखाद्युपलब्धेः।

तदिदं सूत्रे त्रिविधादि त्रिविधपुरुषोपभोगार्थमनेकात्मिकायाः प्रकृतेरित्यादिना ग्रन्थेन तदाप्रतिसवनलक्षणवर्णनम्, प्रक्रियन्ते विकारास्तत इति प्रकृतिः, प्रधीयन्तेऽस्मिन् महदादय इति

15 प्रधानम्, बहूनां वार्त बहुधानकमसत्त्वादविनाशात्प्रसूतमित्याद्यव्यक्तात्मिकायाः प्रकृतेरनेकात्मिकया

पाषाणय इति तेनैव हेतुना पक्षार्थकमपि साधयति—परार्थार्थेन चेति। अत्र पुरुषार्थं दर्शयति—शब्दादीति इन्द्रियाद विषयविज्ञानवता शब्दादयो विषयविषयिस्वभावेऽपरावन्ति आकारतया परिणमयन्ति तदपेक्षया बुद्धित्वं विषयाकारं भवति विषयदर्शी पुरुषप्रतिबिम्बसंक्रान्तिर्भवति तदा शब्दाद्युपलब्धिमनुभवामीति शब्दाद्युपलब्धिर्भवति अन्यच पूर्वमज्ञातोऽपि कथञ्चिदात्मा प्रकाशात्मिकत्वादेव बुद्धिः परिणामिनीत्युच्यते गुणात्मको हि इन्द्रियस्य पुरुषस्य सर्वस्यार्-

20 थस्यास्य तस्याः दर्शयेव हि दर्शं तस्मात् पुरुषः स्वामी दर्शं गुणात्मिके स्वम्, स्वामी च तत्कार्यं सेव संयुक्तः दर्शयोऽस्य प्रधानादिरवस्थेयपि च भोग या तु कारणीयस्येव सोऽस्वार्थं एवम् पाकस्योपलब्धिसौम्यः प्रथमः तत्स्योपलब्धि- वान्तः भोग इति पठितम् तस्येव च भोगास्वर्थस्य दर्शयमानमिथ्यस्य गुणादि एवं तस्मात्तेन कारणेन भेदात्मकेन परार्थार्थेन च भवितव्यमिति मत। एवं च एषां विकाराणामनेकरूपत्वात्सर्वेऽप्यात्मवत् परार्थत्वात् च किञ्चिदेकं कार्येव कारणमवोचत्—किं हीति। तथा च कारणस्यानेकैकत्वाभाव परार्थत्वात्सम्यम् च तु कार्यमेवैकस्येव च

25 स्वात्मविकरणे तेन व्यभिचारः स्वांशेनार—कारणस्येति। अत एषां विकाराणामपि सुखदुःखमोहात्मकत्वं वयुत्पत्त्या तदित्ययमिति प्रकृतिरूपं सूत्रयति—प्रक्रियन्त इति अन्यथा व्युत्पत्त्या प्रकृतिसम्या कारणवाचको योग्यो सम- न्वितो यथा चन्द्रमूर्ति विकारभिन्नत्वे व्यवहारः एवम् व्युत्पत्तिः प्रधानेऽव्यक्तेऽव्यक्तत्वेन अव वा प्रकृतयः प्रत- नामक भा एव इति नायोऽवयवक पुत्रिपक्वने परिणामतो प्रथम स—प्रकृता सुखा दुःखे—मोही वा चेति व्यपि परस्परवृद्धिव्यस्तेन दुःखस्येन सन्निवेशो च त्व प्रकृतिभिन्नर्थं तथा प्रधाना तत्रैव प्रकाशो दर्शयति विकारत्वमपि पुरुषे

30 भोगः तेन पुरुषमन्निभेदार्थं तथा सत्त्विमुखरजस्तमसामप्यसमवत्त्वमपि कल्पते एवम् अन्यानन्यत्वाभाव् अन्यानन्यो- न्यमिति पुरुषप्रकारवचनं प्रदर्शितम् तत्रैव पर्यवसानमाह—प्रधीयन्त इति प्रधीयन्ते यस्मिन् महदादिविकारा कार्येषि प्रधानमिति व्युत्पत्त्या विकारजालस्येव पर्यन्तं प्रकृतिकल्पते सर्वेषां प्रधानभूतं भवति प्रधीयन्तेऽस्मिन्निति व्युत्पत्त्या गुणत्रयात्मकस्वरूपमितो सर्वेषां प्रधानभूत भवति तत्र यदि प्रधान एव वसार्थं विकारजातं वर्तमानत्वात्

१ नि क. भेदं वदन्ति। २ नि क स्वार्थमेवेति।

आत्मभिः सुखदुःखमोहैः प्रकाशप्रवृत्तिनियमात्मकैः प्रागभिहितापायपवनपापाणवत् स्वपरेषां—नर्तिका-
पर्णनाशामात्मनश्च प्रतिपत्तिचलनधरणकरणैरिवेति, ते हि वैकारिकतैजसभूतादिविकाररूपाः, सुखदुःख
मोहाः प्रकाशप्रवृत्तिनियमात्मकाः सत्त्वरजस्तमोलक्षणा गुणाः साम्यावस्थायां प्रकृतिरित्युच्यन्ते वैषम्येण
तु परिणामानुक्रममापन्ना परस्पराविनिर्भागवृत्तयोऽङ्गाङ्गिभावेन परिणामाधिकारीभवन्तः शब्दादीनार
भन्ते, तैर्महदादिना परिणामानुक्रमेणारब्धाः शब्दादयोऽपि तदात्मका एव (शब्दादिपरिणामानुक्रमः 5
सोऽनुपदमेव वक्ष्यति, अधुना तदात्मकत्वं तावत्साध्यते तदात्मका एव) सुखाद्यात्मका एव
शब्दादयः तदात्मत्वाभिव्यक्तकार्यत्वात्—ते सुखादय आत्मा तदात्मा तद्भावस्तदात्मत्वं सुखाद्यात्मत्व
तदात्मत्वेनाभिव्यक्तं कार्यं येषां ते तदात्मत्वाभिव्यक्तकार्याः शब्दादयस्तद्भावात्तदात्मत्वाभिव्यक्तकार्य
त्वात्, मृत्कार्यपिण्डशिवकादिमृत्स्वभाववत्, यद्यदात्मनाऽभिव्यक्तकार्यं वस्तु तत्तदात्मकमेव दृष्टम्, यथा
मृदः कार्यं पिण्डः तस्य कार्यं शिवकः एवं क्रमेण स्थासकुशूलकादि यावद् घटः कपालानि वा मृदात्म 10
कान्येव कार्याणि मौलस्य कारणस्यात्मना विनोत्तरोत्तराणां कार्याणामभावात्, आदौ मध्येऽवसाने च
मृदात्मकत्वं दृष्टमेव शब्दादयः सुखा[दी]नां कार्यं शब्दादिकार्यान्त्याकाशादि तत्कार्यं च गवादि घटादि
सर्वं सुखाद्यात्मकत्वेनाभिव्यक्तं तदात्मकमिति ग्राह्यम्, कथं सुखाद्यात्मकत्वेन शब्दादिकार्यमभिव्यक्त-
मिति चेत्, सुखाद्युपलब्धेः ।

[illegible] किन्तु यथा [illegible] एव
[illegible] न सामान्यं वा विशेषो वा [illegible] भावः ।
अथ सर्वात्सर्वात्मकत्वादेव [illegible] त्रिगुणत्वादिवर्णनमनुपपन्नमेव
मथेति । अनेकेति प्रधानस्य सर्वगतत्वेन [illegible] न गुणानामिति भाव ननु गुणानामेव [illegible]
30 सर्वात्मकत्वात् प्रधानस्य [illegible]–यथास्येति । प्रधानस्याभावमेव [illegible]
असत्येवेति एवं [illegible] । नार्थ इति [illegible] तत्र [illegible] भाव । ननु गुणस्य
प्रधानस्य [illegible]
[illegible] अथात इति [illegible] प्रधानस्यैवेति तथा च प्रधानमत्र [illegible]

---

१ सि क्ष. "[illegible]" ।

प्रधानाभावात्सत्वाभाव्यतैव, तथा[सति]त्वमेव स्यात्, प्रकृत्या सदेकत्वान्यत्वे प्रति अवचनीयत्वात् खपुष्प-वत्, अथ न तदेकं नान्यद्वा वाच्यं निरुपाख्यत्वात्, यत्तु सत् तत् प्रकृत्या सदेकत्वान्यत्वे प्रति वचनीयं यथा प्रवृत्त्यात्मा, प्रकाशनियमात्मनो वाऽन्यतरोपग्राहपरित्यागायुक्तत्वादपि च तदुभययुक्तत्वाच्च त्वाभ्युपगम एव पितृपुत्रत्ववत्, प्रधानस्यात्मैव वा त्रीणीति पुरुषात्मत्ववदिति, यथैव हि यदि पुरुष स्यात्मा[नोऽ]न्यत्वा न तर्हि सः, अनन्यत्वात्, खपुष्पवदिति, तथैव यदि प्रधानस्यात्म[नो]गुणा न 5 तर्हि प्रधानम् [अ]गुणत्वात्, खपुष्पवत्, अभ्युपगमेऽपि तु प्रधानस्य गुणानां त्रयाणामप्यैक्यं प्रधानस्यात्मत्वात् प्रधानवदिति सर्वत्र सत्त्वाद्यभावादेव सर्वाव्यापिता, प्रवृत्तिगुण एव हि प्रकाशगुणः प्रवृत्त्यात्मत्वात् प्रवृत्तिवदेवमितरोऽपि, प्रकाश एव प्रवृत्तिः प्रकाशस्यात्मत्वात् प्रकाशवदेवमितरोऽपि, नियम एव च प्रवृत्तिर्नियमस्यात्मत्वान्नियमवदेवमितरोऽपि, य एव चान्यो गुणः स एवेतरोऽपि, एकात्मत्वात्, स इव, प्रकृतिरेवेदं सर्वमित्यविशेषाभावो भेदाभावात्, उपवर्णनमिमत्यप्यविकर 10 सङ्करान्यां त्वेकमयमात्मैकपालस्य च तस्यात्मत्वादिति प्रधानगुणव्यवस्थाभाव एव, यत्स्वरूपव्यवस्था-नुमतो प्रधानाविशेषः स्याच्च, तत्त्यागे पर्यायमयमविशेषोऽद्वैतैकान्तार्थत्वमेवापसिद्धिः, यत्रेकत्वेष सम्भाव्यते प्रधानं तस्याप्यनेकत्वेनैवमापद्यते, यत्स्वरूपाव्यतिरिक्तप्रभृता गुणा विना भेदेनोच्यन्ते तत्प्रधानमपि प्रधानेनाभिन्नात्मत्वादनवस्थितैकत्वतत्त्वमतिद्वं प्रधानमित्यविशेषश्च स्यात् प्रधानस्यात्म-त्वाद्गुणवत्, प्रत्यक्षार्थेन्द्रियविषयतायां वा व्यक्तमूर्तानित्यादिरूपार्थप्रधानपरमार्थता, गुण[ा]त्वव्यत्वानेकत्व 15

प्रति अवचनीयत्वात् खपुष्पवत्, खपुष्पं हि प्रकृत्या तदेकमिति अन्यमिति वा न शक्यं वक्तुं निरुपाख्यत्वादिति भावः। व्यतिरेकव्याप्तिं दर्शयति—यत्तु सदिति। ननु प्रवृत्तिप्रकाशप्रवृत्तिनियमयोरन्यतरपरित्यागेनोपादानायुक्तत्वाद्विरुद्धत्वेनाभिमतेन वाऽवचनीयत्वमस्तु प्रधानस्य, सर्वथाऽवाच्यत्वन्तु नैव तदेकत्वान्यत्वोभययुक्ततया वाच्यत्वसम्भवात्, तदन्यतरोपादानायुक्त-त्वस्य तदुभययुक्तत्ववाच्यत्वाभ्युपगमव्याप्यत्वादित्याह—प्रकाशेति। ननु प्रधानं सर्वव्यापीष्टम्, सत्त्वादयस्तु गुणानां प्रधान-स्यात्मत्वेऽभ्युपगमात् खपुष्पस्येव प्रधानस्यैवाभावस्तथा तत्कथं सर्वव्यापि। अभ्युपगमेऽपि तदनभ्युपगमे प्रधानगुणानामेकत्वेन 20 सर्वाभावात् कथं तत्सर्वव्यापि स्यादित्याह—प्रधानस्यात्मैवेति। दृष्टान्तं दर्शयति—यथैवेति। सर्वस्यत्वाभावमनुपगमयति— अभ्युपगमेऽपि त्विति। गुणानां प्रधानस्य प्रकृत्या गुणानामपि परस्परासङ्करमाह—प्रवृत्तिगुण इति एवं प्रधानस्यैकत्व विशेषविरहाभावात् सर्वस्य प्रधानत्वाविशेषो निर्विशेष एवेति भावः उपवर्णनेति विशेषणैव कल्पिता- [illegible] 25 सम्भवतीति भावः। भेदकल्पेन व्यवस्थाभ्युपगमे च सर्वं प्रधानमयमिति वचनमतिविरुद्धमेवेदमैव हि न सम्भवति नान्यथैवाह— तत्स्वरूपेति। यदीष्टे भवतामाभ्यां तर्हि प्रधानमनपायिविशेषैकान्तेन चाप्रीतपरिविशेषोऽभिमता या न चैतन्यवि-भिन्नत्वेऽपि प्रधानानि प्राप्नुवन्ते प्रकृत्यादिभिन्नत्वात् प्रधानस्येवाह—तत्त्याग इति। एतदेव प्रव्यक्तिमाह—यत्स्वरूपेति प्रधानस्यैव गुणा इत्यनेन निर्देशात् प्रधानस्यात्मनानेकत्वमेव गुणानामभिन्नता गुणानान्तु प्रधानेनाभिन्नत्वे एवेति प्रधानस्याप्यनेकत्वात् प्रधानान्तरैरभिन्नत्वात् स्यात् तथा च प्रधानमिदं प्रधानेनाभिन्नत्वम्, प्रधानस्यात्मत्वम्, यो 30 यत्स्वरूपो स तेनाभिन्नात्मा यथा महदादयः ते हि प्रधानस्यात्मत्वात् प्रधानेनाभिन्नात्मानः तद्वत् प्रधानमपि प्रधानस्यात्मैवेति प्रधानान्तरैरभिन्नात्मा अविशेषपरस्य तदनेकत्वेन तत्त्वेन च यदेकत्वे तत्त्वे चानवस्थित्या प्रतिज्ञा यत्र

---

१ डि. क. मधु खपुष्पवत्।

एव प्रधानम्, अथान्यस्मै तेऽस्मात् [तिस्मन्नेवमन्यत्] कल्पनास्यासिद्धत्वादुपात्तत्वात् यतो गुणत्वस्य स्वमस्य नेष्यते प्रधानासिद्धेरात् पुनः स्वपरमिषमकृत्स्नमेवप्रधानमभ्युपगमे कस्यचित् कथञ्चिदप्यप्रधानत्वानुपपत्तौ तेऽप्यन्यत्वापत्तिवत् पृथक् पृथक् प्रधानम्, अथ प्रधानत्वमपि प्रवृत्तिर्वे [प्रधानम्] प्रधान-मपि तर्हि न प्रधानं प्रधानत्वमप्यत्वात् प्रवृत्तिवदेव सेयावपीति प्रधानाभाव एव कुतोऽस्य सर्वगतता ?
5 तदभिप्राय एवैवम् तथात्मस्वामिमतनिरसनात्, अन्यत्वनिरसनेनात्मभावमतिपादनवत् [इति] इत्य मङ्गलमवर्णनम् ।

आपादितमेवैकपूर्वकमिदं नानेकैकपूर्वकमित्येतदापन्नमित्याह—

एवमेवैकपूर्वकत्वावापत्तेरेव किमनेकात्मकैककल्पनया ?

एवमेवैकपूर्वकत्वावापत्तेरेवेति, अथपारम्पार्यत्वादेवकारस्य तत्र त्रिगुणप्रधानकारण-
10 कल्पनानर्थकमित्यत आह–किमनेकात्मकैककल्पनया यदि प्रवृत्तिलक्षणप्रधानस्यैकैके प्रकाशनियमप्रवृत्ति-रूपेण प्रवर्तते प्रवृत्तिरेवैका त्रिगुणरूपा तत्तमोमयप्राप्येकैककारणत्वात् एवेति पृथगात्मकत्रिगुणकारण-कल्पनाप्याख्याननमापासमात्रम्, तथाप्येकात्मकैकमेव व्यवस्थास्वरसाहकारेणानेकाकारं भवति यथा प्रागु-पवर्णितपुरुषादिकारणपूर्वकानन्तप्रभेदजगत्सृष्टिसमर्थं यतो वास्त्वनेकाकारं किं त्रिगुणमित्येवाववेति ।

किञ्चान्यत्—

15 तथापि च सङ्घातपारार्थ्याविशिष्टेतनाभ्यस्ते स्थिताचैतन्यैकत्वपरिणामित्ववृत्ति कारणं सुखमिति वा दुःखमिति वा मोह इति वा परमाणव इति वा कारणमित्येव वा तत्कारणस्यापि-तात्मस्वतत्त्वप्रवृत्तित्वादसः किमिति न गम्यते त्वया यस्मात्प्रमाणसाधनकदनन्ये सुखदुःखे इति ।

(तथापि चेति) यद्यपि त्वदुपैर्देवमि। संघातपारार्थ्यादिभिः प्रकृतेरन्यः पुरुषः सिद्धाति '[1]सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् । पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्चे'ति

20 तदिदं प्रधानमनेकत्वापारमार्थ्यस्यापारमार्थ्यानन्यविवेकत्वतत्पर्यवसितमिति यथाक्रमीति भाव । ननु तत्रे पुरुषपूर्वकत्वमात्रं न दुष्टं कल्पनरस्यत् प्रधानात् संघातपारार्थ्यादिभिरन्यस्य पुरुषस्य सिद्धेरित्याशयेनाह–यद्यपीति । पुरुषसाधकहेतुमाह-संघातेति । इह संघाताः परार्थाः स्वा शय्यासनादयः न हीत किमपि कार्यं साधयन्ति न च परस्परार्थाः, किन्तु यतो देवदत्तादेरुपभोग्याः यथैते स्वे स्वेन पञ्चमी सते मिलन्तीति एवमेते महदादयस्संघातत्वो न स्वार्थं न च परस्परार्थं किन्तु परार्थाः यथासौ परः स पुरुषः न चैतन्यविपरीतम्, तथापि संघातत्वेनान्यार्थत्वात् ।
25 त्रिगुणादिविपर्ययात्–व्यक्ताव्यक्तधर्मविपर्ययादित्यर्थः यदि हि पुरुषे न स्यात् त्रिगुणत्वविकलत्वादिधर्मा तर्हि त्रिगुणत्वे विवेकित्वरूपमनुपपत्त्यभावप्रसङ्गात् । अधिष्ठानात्, न ह्यचेतनमधिष्ठातारं विना प्रवर्तते यथा रथः सारथिना तथा सत्त्वादयः अविवेक-निवेशिनो न स्युः तथा भोक्तृभावात्मना चेतनानुपपत्तिर्हि दृष्टानेकत्वेऽप्यनुपपत्तिरेवान्यत्र वा तस्मादिह तस्मादि-देव यदधिष्ठाता गुणानां त्रिगुणत्वादिविपरीतः चेतनः स पुरुषोऽधिष्ठितं प्रधानं प्रवर्तते इति, अधिष्ठानलक्षणस्यान्यार्थत्वात् । भोक्तृभावात्–भक्ष्यं भोज्यं दृष्ट्वा भोक्ता गम्यते, अस्ति भोक्ता यस्येदं भोज्यमिति एवमिदं व्यक्ताव्यक्त-
30 मप्य दृष्ट्वा तदन्योऽन्यकर्तो परं आत्मा यस्येदं भोक्तृभोग्यमिति कैवल्यार्थं प्रवृत्तेः प्रधानस्य विविक्तमन्तरेण हि विनिवर्तते, प्रधानमपि च प्रवृत्तिमत् भाव्यत्वान्नात् तस्माद्यस्य कैवल्यं प्रधानप्रवृत्तिहेतुः स पुरुष इति एवं हेतुभिः पुरुषसिद्धि-रसिद्धम् । ननु तन्त्रान्तरम् चाहं चैतन्यमिति तथापि परार्थत्वमात्रमेव सम्यगपि तदेव चैतन्यं परार्थत्वप्रयोजनम्

[1] सि. का. तद्धत्वात् इत्य पद्यां प्राग् पूर्वं प्रतिपाद्यते ।

(सां० का० १७) तथापि च तस्य कारणस्य चेतनाद्यन्यत्वे सत्येवैतानि सद्रूपाणि स्थितानि, चेत नस्य परस्यार्थे प्रवृत्तेः चेतनस्य मोक्तृत्वात् रूपादिपरिणामिनोऽचेतनत्वाच्च तेनैवाचेतनत्वेनैकत्वं स्थितम्, न ह्यचेतनस्य भेदोऽस्ति, परिणामित्वञ्चास्य तत एव स्थितम्, आपस्तिमवनस्य रूपादिरूपस्य परिणामा-न्यत्वात्तस्य च सन्निधिमवनाङ्गित्वात्, यथोक्तम्—'जेचेव पोग्गला सुब्भिगंधत्ताए परिणमंति ते चेव पोग्गला दुब्भिगंधत्ताए परिणमंति' (एतत्समानार्थकपाठः ज्ञाताधर्मे सू० ९२) इति, तदत्रास्य सद्भावपा- 5 राम्यौंऽस्तिमिश्चेतनान्यत्वे स्थिता[न्य]चेतन्यैकत्वपरिणामित्वानि वृत्तयोऽस्य तदिद कारणं स्थिताचेतन्यैक-त्वपरिणामित्ववृत्ति तच्च सुखमिति वा दुःखमिति वा मोह इति वा परमाणव इति वा कारणमित्येव वा वक्तव्यम्—तकेन तुल्यमुक्तवत्, यथोक्त मिथ्यात्वकषायाद्यु सत्त्व न प्रकाशेतामप्रवृत्तिस्वाभित्वतः प्रभृति यावदेयोऽनभिव्यक्तसुखवदेव, स्थापितात्मसत्त्वस्वप्रवृत्तित्वात्—आत्मसत्त्वस्वेन स्थापिताऽस्य प्रवृत्ति-रित्यतः किमिति न गम्यते त्वया वक्ष्यमाणसाधनबलमन्ये सुखदुःखे इति ? किं स्वपक्षरागान्मोहाद्वा 10 मायाया वा, किमिति मोच्यते तस्य कथायां प्रस्तुतायां ? किमनुवृत्त्या मतिक्षोभापत्तोभयादितो चेति ।

किं पुनस्तत्साधनमिति चेत् सुखादनन्यदेव दुःखम् अनात्मत्वेऽप्यरणाद्यात्मकत्वात्, सुखस्वात्मवत्, अवधारणेन च वक्ष्यमाणसाधनान्तरापक्षितान्यत्वो विपक्षाभावः सूच्यते । सुखादनन्यत्वेन दुःखे साध्येऽनात्मत्वविशेषणेनात्मनि निरस्ते साधनान्तरनिरस्ते तमसोऽन्यत्वे न किञ्चित्सुखादन्यदस्ति तस्मादन्यः कश्चिद्विपक्ष एव नास्ति, मोहेऽन्यत्वमिति चेत्तमिवर्ध- 15 यिष्यते ।

(किं पुनरिति) किं पुनस्तत्साधनमिति चेत् सुखादनन्यदेव दुःखम्, अनात्मत्वेऽप्यरणाद्या त्मकत्वात्, वरणधनापर्यन्तसमवेतस्वादेन्यगौरवाणि वरणादीन्यस्यात्मा कार्यं तद्वरणाद्यात्मकं तमः, न वरणाद्यात्मकमवरणाद्यात्मकं किं तत् ? दुःखं तदनात्मत्वे सत्यवरणाद्यात्मकत्वात् सुखादनन्यत्वमेव किमर्थं पुनरनन्यदेवेत्यवधार्यते ? उच्यते—अवधारणेन च—सुखादनन्यदेवेत्यनेन वक्ष्यमाणसाधनान्त 20 रापक्षितान्यत्वो विपक्षाभावः सूच्यते, वक्ष्यमाणं साधनं सुखादनन्य एव मोह इति, तेनापक्षितं अन्यत्वं तमसोऽपीति विपक्षाभावः सोऽनेनावधारणेन सूच्यते, पुरुषस्तु स्यात् सुखादन्यत्वाद्विपक्षः ततो व्यावर्तनार्थमनात्मत्वे सतीति विशेषणम्, सुखस्वात्मवदिति दृष्टान्तः यथाऽवरणाद्यात्मकत्वात् सुखस्यात्मा सुखादनन्य एव दुःखमवरणाद्यात्मकत्वात् सुखादनन्यदिति, अस्मै हेतोरव्यभिचारव्या ख्यानम्—सुखादनन्यत्वेन दुःखे साध्येऽनात्मत्वविशेषणेनात्मनि निरस्ते साधनान्तरनिरस्ते तमसोऽन्यत्वे 25

चस्यान्यत्वेन न भवेतु तस्मात् प्रधानमचेतनमेव अचेतनत्व कारणमेकमेव प्रधानात्मैव परिणमते इत्येककारणवाद एव स्यात् न तु त्रिगुणकारणवाद इत्याशङ्केनाह—तथापि चेति । तच कारणं सुखं वा दुःखं वा मोहो वा परमाणवो कारणमात्रमेव वा भवतु किं तेन वरन्तु तत् प्रतिपत्तव्यमेव चैव च प्रवृत्ति तु एव प्रत्यक्षे नामकः कश्चिदर्थं तथा प्रवृत्तत्वादिति पुनः सुख-दुःखयोरनन्यत्वं नाङ्गीक्रियते इत्याह तथेति वक्ष्यमाणसाधनबलमन्ये सुखदुःखे इत्युक्तमनुवर्तय तदेव साधनं व्याचष्टे—किं पुनरिति वरणधनादरणस्येनान्यमोहप्रवर्तकमिति सर्वत्वरणोपादानव्यावरणात्मकं तमो मोहश्च तद्भिन्नं दुःखमिदं सुखा 30 दन्यत् किञ्चिदनात्मत्वे सत्यवरणाद्यात्मकं नास्तीति दर्शयन्नेवमाह इत्याह—अवधारणेन चेति अपक्षितं निरस्तम् । ननु

---

१ सि क. प्रवृत्तेर २ सि क. अन्यत्वमिति ।

न किञ्चित् सुखाद्यनुभवति, तस्मादन्यः कश्चिद्विपक्ष एव नास्तीति विपक्षाभावादेवावृत्तिरसपक्षेऽस्य हेतो-
रित्यव्यभिचारी हेतुः मोहोऽन्यत्वमिति चेतसिनिवर्तयिष्यते, व्याख्यातार्थस्तुल्यक्रिया चाद्यौ चोद्योत्तर
पक्षौ गतार्थौ न विव्रियेते ।

अवरणाद्यात्मकत्वात् कुतोऽन्यत्वनिवृत्तिरिति चेत्, अवरणाद्यात्मकत्वादिति विधिप्र
5 धानपर्युदासात्मकत्वात्, अनपुंसकवचनादप्रतिषेधेऽनपुंसकसुटः सर्वनामस्थानत्ववत् ।

(अवरणादीति) अवरणाद्यात्मकत्वात् कुतोऽन्यत्वनिवृत्तिरिति चेत्—सामर्थ्यं वरणाद्यात्मक-
मोहप्रतिषेधादेवावरणाद्यात्मकाभ्यां सत्त्वरजोभ्यां मोहस्य प्रतिषेध्यसामर्थ्यं सिद्धम्, तस्मात् तदन्य-
त्वनिवृत्तिरित्येतच्च न, अवरणाद्यात्मकत्वादिति—अवरणाद्यात्मकत्वमस्य विधिप्रधानपर्युदासस्वरूपत्वात्
नञो हि द्वयी गतिः प्रसज्यप्रतिषेधः पर्युदासश्च, यथा ब्राह्मणो न भवत्यब्राह्मण इति ब्राह्मणस्य निवृ-
10 त्तिप्रधानः प्रसज्यप्रतिषेधः, ब्राह्मणादन्योऽब्राह्मणः क्षत्रियादिरिति क्षत्रियादिविधिप्रधानः पर्युदासः,
तयोरिहाप्यवरणाद्यात्मकत्वादिति वरणाद्यात्मकाभ्योऽन्यदवरणात्मकमोपाधिप्रसाद्याद्यात्मक[त्वं] विधी-
यते वरणाद्यात्मकत्वस्य तु नैव विधिर्न प्रतिषेधः पर्युदासात्मकत्वात्, न तु प्रसज्यप्रतिषेध इति,
तदर्थसमर्पणार्थं दृष्टान्तमाह—अनपुंसकवचनादप्रतिषेधेऽनपुंसकसुटः सर्वनामस्थानत्ववत्, यथा नपुंस-
कादन्यत्र सुट् सर्वनामस्थानसंज्ञं भवतीति स्त्रीपुंसयोः सुटः सर्वनामस्थानसंज्ञा विधीयते, नपुंसके तु
15 'शि सर्वनामस्थानम्' (पा० १ अ १ पा ४२ सू) इति विभक्त्यन्तरविहिता, सुटः सर्वनाम-
स्थानता न विहिता न निषिद्धा तथेहापि वरणाद्यात्मकत्वस्य नैव विधिर्न प्रतिषेधः, लोपप्रसादाद्यात्मकत्व-
विधानादिति ।

विपक्ष एव नास्तीत्युक्तं चेदस्य सुखाद्यनुभवाभावात् [illegible] मोह इति। ननु वरणाद्यात्मकं
न भवतीति वरणाद्यात्मकप्रतिषेधादेव [illegible] कुतोऽन्यत्वं निवर्तितमित्याशङ्कते—अवरणाद्यात्मकत्वादिति।
20 वरणाद्यात्मकं न भवतीति प्रसज्यप्रतिषेधपक्षे [illegible]
[illegible] । [illegible]
[illegible]
[illegible]—यथा ब्राह्मण इति । [illegible]
[illegible] ब्राह्मणादन्य इति । [illegible]—अनपुंसकेति [illegible]
25 (पा. १-१-४२) [illegible] सु औ जस् अम् औट् [illegible] सर्वनामस्थानसंज्ञा विधीयते [illegible]
[illegible]
[illegible] 'शि सर्वनामस्थानं' इति [illegible]
[illegible]
[illegible]
30 [illegible] इति भावः । [illegible]
[illegible]

१ सि. क. [illegible] । २ सि क. [illegible] । ३ सि क. [illegible] ।

साम्प्रतम्—

वैषम्याददृष्टान्तोऽयम्, सम्बन्धिनः सुटः सर्वनामस्थानसंज्ञाविधाने नपुंसकानपुंसकविषयत्वाविरोधात्, विरोधाद्धरणाधारात्मकत्वानुपपत्तिरित्येतदपि न, वैषम्यस्यात्रापि तुल्यत्वात्, तटस्तटं तटीति स्त्रीपुंनपुंसकत्ववदेतत्स्यात्, एकस्मिन्नेव लिङ्गत्रयदर्शनात् ।

(वैषम्यादिति) वैषम्याददृष्टान्तोऽयम्, सम्बन्धिनः सुटः सर्वनामस्थानसंज्ञाविधाने 5 नपुंसकानपुंसकविषयत्वाविरोधात्तुल्यमेव सर्वनामस्थानसंज्ञाविषयस्य नपुंसकानपुंसकत्वम्, विरोधा[त्] धरणाधारात्मकत्वानुपपत्तिरित्येतदपि च न, वैषम्यस्यात्रापि तुल्यत्वात्, तटस्तटं तटीति स्त्रीपुंनपुंसकत्ववदेतत् स्यात्, एकस्मिन्नेव लिङ्गत्रयदर्शनात्—दृष्टं हि तटे लिङ्गत्रयम्, तटस्तटी तटमित्येकस्मिन्नेव, यदा च नपुंसकलिङ्गं तदा न स्त्रैणं न पौंस्नम्, पुंस्त्वे न स्त्रीता न नपुंसकता, स्त्रीत्वे नेतरद्वयमिति स्त्रीपुंनपुंसकत्ववत् तथा धरणाधारात्मकत्वमस्तु को दोषः ? सरूपैकशेषाकरणमसुकरत्वाल्लिङ्गत्रयस्यैकपर्य- 10 मित्यदोषः ।

एवं तर्हि सुखदुःखयोरपि धरणाधारात्मकत्वादधरणाधारात्मकत्वासिद्धिरेव, धरणाधारात्मकत्वासिद्धौ चाऽनन्यत्वासिद्धिरिति चेन्न, अधरणाधारात्मकत्वेऽप्यनन्यत्वाद्धरणाधारात्मकत्वस्य, धरणसदनमोहात्मकत्ववत् ।

(एवं तर्हीति) एवं तर्हि सुखदुःखयोरपि धरणाधारात्मकत्वादधरणाधारात्मकत्वासिद्धिरेव, 15 धरणाधारात्मकत्वासिद्धौ चाऽनन्यत्वासिद्धिरिति चेदेतदुच्यते, अधरणाधारात्मकत्वेऽप्यनन्यत्वाद्धरणाधारात्मकत्वस्य—अधरणाधारात्मके अपि सुखदुःखे धरणाधारात्मकत्वतो न स्तः, तस्मादभिन्ने धरणाधारात्मके एव प्रसादशोषादिकार्यभेदेऽपि कारणत्वात्मत्वपरिणामित्वादिभ्यः, [१]किमिव ? धरणसदनमोहात्मकत्ववत् यथा मोहात्मकानि धरणाद्यानि सदनादीनि धरणाधारात्मकमोहात्मकानि अधरणात्मकानि[च] यथा वा

धरणात्मकत्वं न सम्भवति विरोधादिति न दृष्टान्तस्य समत्वेनाभावमाह—वैषम्यादिति नपुंसकत्वमनपुंसकत्वं चैकस्य न 20 सम्भवति [illegible] दृष्टान्तं वैषम्यमित्युक्तवति—वैषम्यस्यात्रापीति विरोधाभावेऽप्यस्य सर्वनामस्थानसंज्ञाविषयेऽपि तुल्यत्वादित्यर्थः । तटस्तटी तटमित्यत्र 'पुमान् स्त्रिया' [illegible] (पा० १-२-६४) इति सूत्रेण [illegible] लिङ्गत्रयं [illegible] इत्याह—सरूपेति । अधरणाधारात्मकत्वादिति हेतोरसिद्धत्वमाशङ्कते—एवं तर्हीति यदि एकस्य न लिङ्गत्रयं विरोधादिति दृष्टान्तमाश्रित्योच्यते तर्हि [illegible] धरणस्य 25 [illegible] भावः । अधरणाधारात्मकस्य धरणाधारात्मकस्य चाभेदं [illegible] दर्शयति—अधरणाधारात्मकत्व इति सुखदुःखयोः प्रसादशोषादिकार्यभेदेऽपि अभेद एव कारणत्वात्, आत्मत्वात्, तत्परिणामित्वादिहेतुभ्यः अत एव तयोरधरणाधारात्मकत्वं धरणाधारात्मकत्वमेवेति भावः । तत्र दृष्टान्तमाह—धरणसदनेति धरणसदनमोहात्मकत्ववत् [illegible] तथा धरणात्मकमोहात्मकत्वाद्धरणस्य [illegible] एवं मोहो [illegible] तथा 30 धरणात्मकमेवेति भावः । ननु सदनादीनां मोहात्मकत्वे धरणात्मकत्वमेव स्यात् [illegible] अधरणात्मकत्वं वा धरणात्मकत्वं

१ सि० क० त्मकत्वयोः । २ सि० क० दुःखयो । ३ सि० क० किमिति वा । ४ सि० क० नयधरणात्मकानि ।

मोहो वरणविभ्रमसदनापध्वंसनदैन्यवैमनस्यगौरवधर्मोऽपि वरणात्मक एव [कार्य]कारणयोरभेदादेतत्, अन्यथा पौनरुक्त्यानर्थक्ये प्रसक्ते स्याताम् अपरेऽप्यपरेऽप्यभावदोषश्च स्युः नेष्यन्ते च तथा, तस्मात् रणायात्मकत्वं मोहस्य सत्त्वादीनां चैष्टव्यम्, यथा चैवमेवं सुखदुःखप्रसादशोषादयश्च वरणाद्यात्मकाः स्युः, तस्मात् सुखदुःखयोरनन्यत्वहेतुव्यभिचारप्रदर्शनाय नोत्सर्पणोऽस्तीति ।

5 किञ्चान्यत्—

वक्ष्यमाणत्वाच्च वरणाद्यात्मकत्वेऽप्यनन्यत्वादवरणाद्यात्मकत्वस्य प्रापितत्वात् ।

(वक्ष्यमाणत्वेति) वक्ष्यमाणत्वाच्च वरणाद्यात्मकत्वेऽपि अनन्यत्वादवरणाद्यात्मकत्वस्य प्रापितत्वात्, वक्ष्यति हि सुखादनन्यत्वात् प्रकाशादनन्यो नियम इति च, तत्र तमसो वरणाद्यात्मकत्वे प्रसादशोषादिकार्यैकत्वादेव सुखाद्यनन्यत्वं साधयिष्यते तमसोऽप्यवरणाद्यात्मकत्वाद्वरणाद्यात्मक-

10 मप्यवरणात्मकं तमः सत्त्वरजोवत् । (किञ्चान्यत् अवरणाद्यात्मकत्वस्य वरणात्मके सत्येवानन्यत्वं प्रापितत्वात् तथा वक्ष्यमाणत्वादिति ।)

इतर आह—

असाधनमिदं सर्वतुल्यत्वात् प्रसिद्धिविरुद्धसिद्ध्यतिप्रसङ्गात्, शक्यते हि वक्तुं पटः घटादनन्यः, तन्त्वनात्मकत्वात् यथा घटस्यात्मा वैधर्म्येण पटवदिति ।

15 (असाधनमिति) असाधनमिदं सर्वतुल्यत्वात् प्रसिद्धिविरुद्धसिद्ध्यतिप्रसङ्गात्, प्रसिद्धिविरुद्धानामप्यर्थानां सिद्धिरेवमतिप्रसज्यते, सर्वोऽप्यर्थैर्धर्मनिवृत्त्या तदात्मत्वापादनात्, यथथा शक्यते हि वक्तुं पटः घटादनन्यः, तन्त्वनात्मकत्वात्, यस्तन्त्वनात्मकः स अघटादनन्यः यथा घटस्यात्मा, यः घटादन्यः स तन्त्वनात्मको न भवति यथा पट इति वैधर्म्येण पटवदित्युक्तम् ।

आचार्य आह—

20 अथ सर्वतुल्यता कथं दोषः? स्वमतेन परमतेन वा, यदि स्वसिद्धान्ते मते तत्तत्र प्रसिद्धिविरोधदोषासक्तिर्मामिमतैव, भाष्यपक्षवत् ।

(अथेति) अथ सर्वतुल्यता कथं दोषः? स्वमतेन परमतेन [वा]इति प्रश्नः, उभयथाप्यदोष इति मन्यमानस्य । यदि ते स्वसिद्धान्ते मते दोषस्तत्रैव प्रसिद्धिविरोधदोषासक्तिर्मामिमतैव

न स्यात्, ततः कस्मान्न समाधत्ते अत्र हेतुमाह—कार्यकारणयोरिति कार्यकारणयोरभेदात्तत्कारणत्वं कार्यात्मना च भेद-

25 स्तत्कारणत्वमिति भावः । भेदाभ्युपगमे दूषणमाह—अन्यथेति । इत्थं च सति वरणाद्यात्मकत्वं मोहस्य तथैव मोहस्यापि प्रसादादिवत् मिलितमाह—वक्ष्यमाणत्वेति । सर्वेऽपि सुखदुःखमोहाः प्रत्यनन्यत्वादवरणाद्यात्मकत्वेन सर्वेषामेकत्वेन सुखदुःखा प्रसिद्धानां विरुद्धानामनन्यत्वसाधनपरिचोदितमाह—असाधनमिदमिति अन्यत्रान्यत्वसिद्धिप्रसङ्गनिरासे हेतुमाह—सर्वा- त्मकेति अस्यार्थोऽत्र सर्वेषां धर्माणामन्यत्वमनन्यत्वं तद्विपरीतपक्षेऽपि व्यवस्थितमात्मानिकार्थः । तथैव प्रयोगमाह—शक्यतेति । अन्वयव्यतिरेकाभ्यामपि प्रदर्शयति—यस्तन्त्वनात्मक इति । दुःखमपि अनिष्टविषयावभासकत्वेन यथा सर्वानन्यत्वमिदं तथैव

30 मतान्तरेऽपि सर्वानन्यत्वाक्षेपप्रसिद्धिविरोधदोषो सम्भवो नास्ति स्वैकात्-यदि त इति । न स्वाभिमतावेव

1 सि. क. रणत्वम् । २ क. तस्मोऽ । ३ सि क. धर्मनिवृत्त्या । ४ सि क. वक्ता क्वा° पृष्ठमेकमपि । () सि क. नास्ति ।

तथाविधाविभो मम तु सर्वोनेन्त्वस्यापादनमभिमतमेव, भावपक्षवत्, यथा भावविधिविधिनियमतेऽनन्त-रातीते सर्वानन्यत्वमिष्टम्, एतस्योदाहरणमात्रत्वादुत्क्रमेण स्वभावकालनियतिपुरुषपक्षवत् वक्ष्यमाण-विधिनियमवच्च यथास्वम्, अत एव, एष तावत् परवाद्यभिप्रायवशात्स्वमते दोषासक्तिरिष्टा।

न केवलं पराभिमते एव किं तर्हि ?—

अपि च स्वमतेऽपि सर्वानन्यत्वं सुखाद्यन्वयमात्रत्वात् सर्वस्य, मृदि घटः कट इव त्रिगुणोऽपि नास्तीति चेत्ततश्च सत्कार्यवादत्यागो वा तत्राभावात्, समुदयक्षणिकशून्यवादा पत्तेश्च ।

(अपि चेति) अपि च स्वमतेऽपि सर्वानन्यत्वं सुखाद्यन्वयमात्रत्वात् सर्वस्य, न तु कटो घटादन्यः, सुखदुःखमोहान्वितमेवाध्यात्मिकभेदरूपं जगद्विष्वक्तसे त्रैगुण्यजालानुच्छेदेन सर्वं सर्वात्मकमेव, त्रैगुण्यान्वयानतिरेकात् को हि सत्त्वाद्यतिरिक्तः ? यदि सत्त्वरजस्तमोऽतिरिक्तं किञ्चित् स्यात् सर्वसर्वात्मकत्ववादेऽलोपः स्यात्, न त्वस्ति, तस्मात्तथैव दोषः, स्यान्मतं[मृदि]घटः कट इव त्रिगुणोऽपि नास्तीति, ततश्च सत्कार्यवादत्यागो वा तत्राभावात्, यदि सत्त्वादित्रिगुणे मृदादौ कटादिर्न स्यात् त्रिगुणोऽपि तथा घटोऽपि मा भूत्, यतोऽसन् घटः पश्चादुत्पद्यते प्रागभूत इत्यसत्कार्यवादः सत्कार्यवादत्यागश्च प्राप्तः । किञ्चान्यत् प्रकाशादिविविक्तस्वरूपगुणसमुदयाभ्युपगमात्पातिरिक्तस्य समुदयवाद एवायमपि देशभिन्नयुगपद्ग्राह्यानिर्देश्यगुणसमुदयमात्रत्वात् क्षणिकवादश्चायुगपद्ग्राह्यविधि-ण्वविषयकायनिर्देश्यनिर्विकल्पार्थमात्रत्वात्, अत एव च शून्यवादापत्तिः अनिर्देश्यत्वभावत्वात् खपुष्पवत् ।

सर्वेषामनन्यत्वमपि तु स्व मतेऽपि सर्वानन्यत्वमभिप्रेतमित्याह—अपि चेति सर्वं हि सुखदुःखमोहान्वितत्वात्तदतिरिक्तस्य वस्तुनोऽभावात् सर्वात्मकमतो न कटघटयोरन्यतेति भावः एतमेवोपपादयति—सुखदुःखेति । त्रैगुण्यजालानुच्छेदेनेति, यथाश्मनोः पार्थिवत्वे [illegible] तथा [illegible] सर्वेषु वस्तुषु सर्वविकारजालस्यविच्छिन्नता सुखदुःखमोहात्मकत्वानुच्छेदेन सर्वं सर्वात्मकमिति तेऽस्मीत्यमेवेति भावः । सर्वत्र [illegible] न कोऽपि सत्त्वाद्यतिरिक्तोऽस्तीत्याह—त्रैगुण्येति । सत्त्वाद्यतिरिक्तस्य तु कस्यचित् वस्तुनः [illegible] भिन्नत्वेन सर्वानन्यत्वविधौ प्रतिनियतोपपत्तिर्न स्यात् तत्र [illegible]—यदीति । सर्वत्र सर्वात्मकत्वानभ्युपगमे दोषमाशङ्कते स्यान्मतमिति । समुदयक्षणिकशून्यवादापत्तेश्चेत्यनेन [illegible] यथा [illegible] व्याख्यातुमनाः प्रथमं समुदयवादं [illegible] प्रकाशादीति [illegible] गुणात्मकत्वाभ्युपगमाद-परस्परं परमार्थतो गुणसमान त्रैगुण्यान्वयानतिरेकात् ते च परस्परभिन्नाश्च गुणा युगपद्ग्राह्योऽनिर्देश्य इति [illegible] तद्गुणसमुदयवाद इति भाव । अथवा सुखदुःखमोहानां सत्त्वरजस्तमसां [illegible] निर्विकल्पत्वेन च [illegible] एवमभिप्राय—क्षणिकवादश्चेति । ननु [illegible] सर्व एव भावा भिन्नभिन्ना एव परमार्थतो [illegible] परस्परसापेक्षतामात्रेण [illegible], सोऽयं परमार्थः भावोऽनभिलाप्योऽपरिच्छेद्यो-ऽनिर्देश्यो न कालो नाकालो न सुखं न दुःखं न मध्ये नान्यत्र न सर्वं नास्तीति शून्यमेवेति [illegible] इत्याह—अत एव चेति अनिर्देश्यनिर्विकल्पार्थमात्रत्वादित्यर्थः । तदेव सुखादन्यत्वेन दुःखम्, [illegible]-

१ सि. क. °न्यथा° । २ सि. क. न तु घटः कटादन्यः । ३ सि तथायेत्ता । ४ सि क. कटे घि ।

रूपरसगन्धस्पर्शसंख्यासंस्थानादीनां घटादिषु रूपादीनामर्थत्वादिपक्षोऽप्यतीतासङ्केतात्रापि—

रूपादीनामानेन न्यायेनान्यत्वेऽपदिष्टे प्रत्युदाहरणाभाव एव ।

रूपादीनामानेनेत्यादि यावत् प्रत्युदाहरणाभाव एव, न रूपं रसादन्यत्, अनन्यघटात्मकत्वात् रूपवत्स्वपरिमाणं प्रसिद्धिविरुद्धसिद्धान्तप्रसङ्गोऽपि ते तत्प्रतिवादिनो दोषापत्तिरिति

5 तैवेति तथैव यावद्घटपटवदिति, पुनश्च समवेऽपि सुखाद्यन्वयमात्रत्वादिमानि यावत् सत्त्वरजस्तमः-

शून्यवादापत्तेरिति, समानत्वार्थो, एवं सुखादनन्यदुःखमित्येतदुपदिष्टम् ।

तमोऽनन्यदिति भाष्यं तदपि—

यथा च प्रकाशादभिन्ना प्रवृत्तिस्तथा नियमोऽप्यभिन्नः प्रकाशात्, प्रकाशस्यात्मत्वप्र-

तिलम्भ एव हि तन्नियमः प्रकाशानन्यत्वात् एतन्नियमलक्षणेन निरुच्यतेऽन्यः प्रकाशा-

10 न्नियम इति, तत्र दोषदर्शनात् ।

(यथा चेति) यथा च प्रकाशादभिन्ना प्रवृत्तिस्तथा नियमोऽप्यभिन्नः प्रकाशात्, प्रकाशानति-रिक्तत्वप्रदर्शनार्थं नियमलक्षणमाह—प्रकाशस्यात्म[त्व]प्रतिलम्भ एव हि तन्नियमः, प्रकाशस्यात्मा—प्रकाशत्वमेव स्वरूपः प्रकाशस्यात्मत्वं तत्प्रतिलम्भ एव हि—तदात्मलाभ एव हि तन्नियमः रूपस्य रसस्य वा प्रकाश्यस्य स्वरूपव्यक्तिर्नियमः, नहि क्रियाप्रवृत्तमसतीव नियामकः कश्चिन्नियमोऽस्ति

15 तत्स्वरूपः। कथं नियमः ? प्रकाशानन्यत्वात्—प्रकाशस्वरूपमात्रम्, एतन्नियमलक्षणेन निरुच्यते योऽन्यः—प्रकाशाद्भिन्नो नियम इति, तत्र दोषदर्शनात् ।

को दोष इति चेदुच्यते—

भिन्नात्मकतायां प्रकाशात्तन्नियमस्य सत्त्वं न स्यात् प्रकाशो वा, तथाऽनियतत्वात् गुणान्तररूपापत्तिरहितस्य सत्त्वस्य प्रकाशस्य चान्यथाप्रकाशनाभावात् रजोवत्, प्रवृत्तिवत्

20 मूलत एव सत्त्वमेवं प्रकाश इति न स्यादनियतत्वाद्वन्ध्यापुत्रवत्, न च तत्प्रकाशात्मकं पुरुषवत् पूर्ववद्वाऽनभिप्रकाशकत्वाद्वा ।

(भिन्नात्मकतायामिति) भिन्नात्मकतायां प्रकाशात्तन्नियमस्य सत्त्वापगमस्य सत्त्वं सत्त्वमेव न स्यात्, प्रकाशो वा—प्रकाश एव न स्यादिति वर्तते, तथाऽनियतत्वात् गुणान्तररूपापत्ति-

---

रिति मते नियमाभावे सत्त्वेऽपि पुनर्नियमाद्युपगमात्तत्र पर्यवस्य—रूपादीनामानेति अनेन न्यायेन—अनन्यत्वमेतत्त्वा

25 तदात्मरूपापत्त्यध्यासमैवेति । तमेव न्यायं दर्शयति—न रूपमिति प्रकाश एव प्राप्ति प्रवृत्तिवत्तेन प्रकाश रसवत्वोऽनन्यत्वं प्रतिपादयता प्रकाशनियमयोरनन्यत्वं पूर्वोपदर्शितमेव प्रख्यापयति—यथा चेति प्रकाशस्यात्मत्वेति प्रतिनियम्य त्यागेन प्रकाश आत्मधर्मं लभते, यावच्च तथाविधस्य प्रकाशरूपत्वात् सर्वकारणेभ्योऽन्य नियमः प्रकाशस्य गुणानां परस्परात्मकेन एतेनैव प्रकाशव्यतिरेकेण नियमस्य दर्शितमिति नियमलक्षणेन प्रकाशात्मत्वं भिन्नात्वमिति भावः । प्रकाशनियमयोर्भेदे दोषमाह भिन्नात्मकतायामिति तत्त्वतयोः प्रकाशनियमयोश्च परस्परमन्यत्वे सत्प्रकाशयोर्नियमेनान्यत्वे

30 मान्यत्वस्यानियतपरिणामात्मकेन गुणान्तरापत्तिरहितत्वात् सत्त्वं सत्त्वमेव न स्यात् प्रकाशः प्रकाश एव न स्यादिति भावः । इदमत्र—तथाऽनियतत्वात्, गुणान्तरापत्तिरूपेण नियतत्वाभावादित्यर्थः सामान्यत्वात् हि सत्त्वं प्रकाश

---

१ सि. क. मध्यता नि० । २ सि क. °मन्यत्व । ३ सि. क. यत्ना । ४ सि सामिन ।

रहितस्य सत्त्वस्य प्रकाशस्य च, गुणान्तरात्मनो गुणान्तरात्मापत्तिरहितत्वादित्यर्थः, शब्दो हि सत्त्वतया प्रकाशमानो रूपाद्यात्मव्यावृत्तस्वरूपेण नियत एव प्रकाश्यते, अन्यथा प्रकाशनाभावात्, व्यक्त्यभावा दित्यर्थः, दृष्टान्तौ यथासंख्यं रजोवत् प्रवृत्तिवत्, यथा प्रकाशात्मनाऽनियतत्वाद्रजः सत्त्वं न भवति प्रवृत्तिश्च प्रकाशो न भवति तथा सत्त्वं सत्त्वं न स्यात् प्रकाशः प्रकाशो न स्यादिति, न केवलं गुणान्तररूपापत्तिरहितस्य स्वात्मसामर्थ्यमात्र एव, किं तर्हि ? मूलत एव सत्त्वमेव—तथा प्रकाश इति न 5 स्यादित्यस्तित्वमेव निराक्रियते, अनियतत्वात्, यदि तस्यैव एव नियतं ततो नास्ति तत्सत्त्वं बन्ध्यापुत्रवत्, न च तत्प्रकाशात्मकं पुरुषवदिति पूर्ववद्यथासंख्यं दृष्टान्तौ ।

इतर आह—

ननु प्रकाशात्मकत्वादेव प्रदीपवत् सत्त्वस्य सर्वतो नियतानियतप्रकाशस्य पूर्वोत्तरभ्य त्त्यभिमुखतायां सति नियामके कुड्यादावभ्रेरिव तमसा नियम्यत्वं तथानन्यथाप्रवृत्ततेति 10 दृष्टत्वादनपह्नवनीयो भेदो नियम्यनियामकयोरित्यभोच्यते, यद्यनियतोऽस्यवसंस्तर्हि, अनियतत्वाद्वन्ध्यापुत्रवत् ।

नन्वित्यादि यावदन्यथाप्रवृत्तता, नन्वित्यनुज्ञापने, प्रकाशात्मकत्वादेव प्रदीपवत् सत्त्वस्य सर्वतो नियतानियतप्रकाशस्य महद्वद्वाराद्यतिसर्परूपादिपिण्डदीपकपूर्वोत्तरभ्यत्यभिमुखतायां सत्यां प्रकाशस्य सति नियामके कुड्यादौ अभ्रेरिव—कुड्यादिनाऽऽवरणेन नियम्यस्य भाव इव वा सर्वनि 15 माभनरोधिना घनपाषाणेन गुरुणा च द्विधापि मोक्षान्तरप्रासिरोधिना तमसा प्रकाशस्य दृष्टिविषयस्वविषयत्वम्, तथानन्यथाप्रवृत्तता,—एवमेते प्रवर्तितव्ये भावोऽप्ययेति दृष्टत्वादनपह्नव

गुणान्तरापत्तिरहित एव तत्र तयोर्निर्भासमाने कस्यापि परिणामस्यानन्यत्वाद्यथारूपेण व्यक्तिरेव भवतीति तत् सत्त्वमेव न स्यात् प्रकाशः प्रकाश एव न स्यादिति भावः । कथं प्रकाशने व्यक्तिरित्याह—शब्दो हीति कथं नियत एव प्रकाशत इत्याह—अन्यथेति । तदर्थे दृष्टा प्रकाशते प्रतिनिर्भासन्त इत्याह—दृष्टान्ताविति । भेदान्तरमत्र सर्वे 20 यदि—न केवलमिति । यथा प्रकाशात्मकत्वाभावानियतत्वात् सत्त्वं न प्रकाशते तथेतरस्यानन्यमपि एवं यथाऽभिनियामकस्यात्म अनभिरतमिव न प्रकाशते एवं सत्त्वमपि अवश्यनियमोऽभिमतत्वात् प्रकाशकेभ्यासभेदात् पूर्ववदिति । ननु सत्त्वं प्रकाशकं प्रकाशत एव न तदात्मेव प्रतिबन्धः तथा च तत् सर्वत्रैव सर्वदा प्रकाशकं भवेत् यदि नियामकेन केनचित् नियम्येत तत्प्रतिनियमात्मकत्वे नियम इति न तत्सामर्थ्यो न वाऽप्रकाशकत्वमित्यापद्यते नन्विति । ननु नियतानियतवस्तु प्रकाशात्मकं सत्त्वं भवेदात्म अनन्यनियतया सर्वतो प्रकाशते व्यभिप्रतिनियतायामपि कथं सर्वं प्रकाशयेदित्याह— 25 महद्वद्वारादीति एतत् अवश्यंभवत्यत्र प्रवर्तितं हि तत्, अत एव महद्वद्वारादि पूर्वोत्तरवस्तुप्रकाशेऽभिमुखत्वे तथा च सर्वं प्रकृत्य प्रकाशवैशिष्ट्यमपीत्येऽभ्यसामर्थ्ये इति भावः । कुड्येन्धनं प्रकाशो वा अनुपपन्नत्वमित्येतः भावः तिर्यग्भवनमात्मनुत्पन्नत्वं सर्वत्रिदमनन्तमपि अनुपपन्नत्वमित्येतम्, तत्र अनन्तं यत्नमपि मोक्षान्तरप्राप्तिरूपं आवरणमात्रेण इत्यादिना गुरुसमानेन घनपाषाणेन यथा प्रतिरुध्यते तथा गुरुतरत्वमात्रेण तमसा तत्त्वस्य नियतानियतविषयप्रकाशनोन्मुखः प्रकाशो नियम्यत इत्याह—कुड्यादिनेति । तत्त्वतस्तोऽत्यन्त नियम्यत्वम् सार्वत्रिकत्वार्थविशेषप्रतिपत्ति- 30 कत्वेन नियतविषये प्रवृत्तत्वमित्याह—तथेति । पूर्वेऽप्यतरवर्ती । तथा च तत्तत्त्वतोऽभिमानोऽपि नियम्यत्वं तमसः कुड्यादिघन-पाषाणेऽपि नियामकत्वमत एव च नियम्यनियामकयोर्भेदो नियतत्वमस्तीति भावः । एवं प्रकाशनियमयोर्भेदे सत्यमपि

1 क. °यावृत्तता । 2 सि क. °नियम्यत्वं । 3 सि क. गुरुत्वेन ।

गीतो भेदो नियम्यनियामकयोः, तस्मादन्यो नियमः प्रकाशनिरोधोच्यते—यदनियतोऽसावर्थस्तर्हि-यदि सत्त्वमेवानियतः प्रकाशोऽर्थस्तर्हि सावनियतत्वादन्येवत् ।

एवं हि कार्यं कारणेऽस्तीति घटते यदि तत्त्वं नियतमनन्यथावृत्तिकार्यमिति, तत्र सन्निधिवर्त्ततेः सधार्यत्वात् सन्नियतो वर्त्तत इति ।

5 एवं हीत्यादि, यतस्तेन व्याख्यानमनिष्टपादनद्वारेण कार्यं कारणेऽस्तीति एतद्दर्शनमेवमेव घटते यदि तत्र नियतमिति, किमुक्तं भवति ? अनन्यथावृत्तीत्युक्तं भवति यथा वर्त्तितव्यं तथैव वर्त्तते, नान्यत्प्रकारमनेन च वर्त्तते नान्येन केनचिद्वर्त्तते तथानन्यथावृत्तिरस्य तदिदमनन्यथावृत्ति कार्यं कारणे सदिति प्रत्ययमभ्युपगन्तुम्, किं कारणं ? तत्र सन्निधिवर्त्ततेः सधार्यत्वात्—तत्र कारणे सन्निध्यर्थो वर्त्ततिः सधार्यः सन्नियतो वर्त्तत इति, अविशेषवद्विपर्ययविपर्ययवर्त्तवया सन्निपातपक्षः सधार्या इत्यत्र 10 वर्त्ततेः सन्निधिमवनार्थवाचित्वात्, वर्त्तते नियतः सन्निहितोऽस्तीत्यर्थः ।

इतर आह—

न आधिक्येन यतस्त्वाधिको यमो नियमः, तमोऽनुग्रहाच्च स चानन्यथावृत्तिरूपता, तस्मात् सत्त्वं तमोऽनुगृहीतं तथाप्रकाशात् न स्वतः एवेत्यतस्तथासत्, तमसोऽपि सत्त्ववत् पृथगपरिसमाप्तरूपत्वात् तमोनियमनाप्यप्रकाशात्मकसत्त्ववत् तमसोऽपि हि स्वरूपव्यक्ति-15 रसमाप्तरूपैव तस्य तथाव्यक्तेः सत्त्वप्रकाशनप्रतिलम्भत्वादिति तथाप्रकाशनं व्यक्तिः प्रकाशात्मकसत्त्वानुग्रहाद्भवति, अनियतश्च कथमन्यनियमने प्रवर्त्तेतेत्यादिः यावच्च परिणामस्य तत्रैवोक्तत्वादिति ।

(नेति) न आधिक्येन यतस्त्वात्, नियम्यस्याधिक्यार्थत्वादधिको यमो नियमः सोऽत्र विवक्षितो न सन्निधिमात्रवृत्तिः, कोऽसावधिको यमः ? तमोऽनुग्रहात्, स चानन्यथावृत्तिरूपता,

20 तत्सान्निध्यानुमतम् प्रकाशोऽन्येन स्यात् अपरिणामित्वादित्युपपत्तिः—यदीति [illegible] तदा [illegible] नियतत्वाद्गम्यतः प्रमाणानपेक्षत्वादिति भावः । ननु प्रकाशे यदि [illegible] नियतो भवति तत्र तदर्थत्व [illegible] [illegible] स्यात् [illegible] तत्र [illegible] इत्याह—एवं हीति । कारणे कार्यस्य नियतत्व-[illegible] कोऽभिप्राय इत्याह—किमुक्तं भवतीति कारणे कार्येण येन प्रकारेण वर्त्तितव्यं तेनैव प्रकारेण तत्र तस्य [illegible] नन्यथावृत्तित्वं तत्र नियतत्वमिति भावः । केन प्रकारेण वर्त्तितव्यमित्यत आह—नान्येति [illegible] वर्त्तितव्यं [illegible]-25 त्मना येनैव वर्त्तते कार्यं नान्येन केनचिदित्यर्थः । यदि नियमोऽन्यथा [illegible] वर्त्तते तर्हि न [illegible] [illegible] भावः । तथा च प्रकाशत्वसमानार्थक एव नियम इति [illegible]—तत्रेति । [illegible]—वर्त्तत इति । [illegible] इतिनियमे [illegible] [illegible] सन्निधिमात्रेण इत्यपि तमो न नियामकं, तथा च न प्रकाशः [illegible] न [illegible] इतिमात्रेण कारणे कार्यस्य सत्त्वात् [illegible] आधिक्येन भवति एव तादृशे नियम तमोऽनुग्रहादेवेति तत्र प्रकाशस्यापि तमोऽनुग्रहादिना [illegible] [illegible]—आधिक्येनेति तमसोऽनुग्रहादि एव 30 तत्त्वं [illegible] [illegible] प्रवर्त्तते [illegible] [illegible] तत्र [illegible], अत एव [illegible] [illegible], एवमेव वर्त्तितव्ये नान्योऽन्यथेति तमसोऽनन्यथावृत्तिरूपता नियम एवमेवानुग्रह इति भावः ।

१ टि. क. 'ब्दादि ।

तमसाऽनुगृहीतस्य सत्त्वस्य प्रत्यासन्नरूपेण रूपान्तरमिवृत्त्याऽनन्यथात्विरूपता, शब्दोऽयं न रसो न रूपं नाकाशादि चेति, तस्मात् सत्त्वं तमोऽनुगृहीतं यथाप्रकाशते न स्वत एव, तस्मादन्यः प्रकाश-नियम इत्येवमासत्, तमसोऽपि सत्त्ववत् युगपदपरिसमाप्तरूपत्वात्, सत्त्वप्रकाशनियमने स्वत सत्त्व-प्रकाशनाकाङ्क्षित्वात् तमस्त्वम्यवेनापरिसमाप्तमेव, तमोनियमनापेक्षप्रकाशात्मकसत्त्ववत्, तद्व्याख्यानं तमसोऽपि हीत्यादि, तमो हि सत्त्वप्रकाशरूपव्यक्ति सत्त्वप्रकाशनप्रतिबन्धकत्वादिति कुर्यादप्रकाशित यथानियतिव्यक्तिं, किं कारणं? तस्य तथाव्यक्तेः सत्त्वप्रकाशनप्रतिबन्धकत्वात्, यस्मात्तथाप्रकाशनं व्यक्तिरिति, इतिशब्दस्य हेत्वर्थत्वात्, नियमनयोग्यतया हि तमसः प्रकाशन सत्त्वस्य व्यक्तिः, सा च प्रकाशात्मकसत्त्वानुग्रहाद्भवति, सत्त्वाप्रकाशिततमोनियमनापरिसमाप्तरूपस्य प्रकाशनानुग्रहे सत्य-नियतत्वात्, न च स्वयमनियत नियमयितुमन्यं समर्थं वन्ध्यापुत्रवदिति आह—अनियतश्च कथमन्य-नियमने प्रवर्तेतेत्यादिरत्र उत्तरः प्रागतीतमन्याख्यातिवेदम् एवमस्तु नान्योरित्यादिपूर्वोत्तरपक्षप्रपञ्चात्मको वाचक परिणामस्य तत्रैवोक्तत्वादिति, तद्यथा—एवमस्तु मानयोरितरेतरानुग्राहिता, तत्राप्यसाधारण-प्रवृत्त्यभावात्तनोदयवद् ज्ञानशिबिकवाहकवत्सम्पूर्णशक्तिता चाऽप्रकर्षः—अनियत इत्यर्थः, इति कार-णमेव न स्यात्सम्पूर्णशक्तित्वादुपहतवीजवत्, असत्करणादिभ्योऽन्यतो न तत्स्वरूपप्रकर्षः, यदा च सुदूरमपि गत्वा प्रागपूर्वेरसत्कार्यत्वं मा भूदिति प्रकर्षः परिणामादेव तदा परिणामस्यान्यत्र वृत्त्यसा-परिणामकत्वात् पुरुषमात्रवृत्तित्वमेव नान्यत्र वृत्तोऽन्यथान्यथा करोति परिणामित्वात्, एवं तर्हि पूर्वमनुग्राहकत्वादेवात्मप्रवृत्त्यात्मकत्वं गुणस्य, अनियतरूपेणात्मप्रवृत्त्यात्मकत्वमित्यर्थः, को हि विशेषस्त-मोनियमनात्वे, क्षीरदधिपरिणामकालवत् पूर्वं न प्रवृत्तं पश्चाच्च प्रवृत्तमिति, न, परिणामस्य तत्रैवोक्त

एतस्मिन्नेव प्रवर्तितव्ये नातोऽन्यत्रेति पूर्वोक्तिसमस्तग्रन्थवासितत्वमर्थं निदर्शयति—शब्दोऽयमिति । तमः नियमनेऽपरिसमाप्तरूपम् तत्र यदर्थं सत्त्वप्रकाशनापेक्षित्वात्, तमोनियमनापेक्षप्रकाशात्मकसत्त्वपरिग्रहानुमानेन यतो नियामकत्वं तमसो न सम्भवति तस्मात्तत्स्वाभिप्रेतमुपरचयति—तमसोऽपीति पृथक्त्वमपेक्षते अत इति यावत् सत्त्वप्रकाशनियमने—सत्त्वस्य प्रकाशं नियमयितुमित्यर्थः । अप्रकाशमेव यदि तमसः कार्यं तर्हि तत् सत्त्वस्य प्रकाशं रुणद्धि मा प्रापि [illegible] नैवम्, तत्सामर्थ्येन नियमनारम्भेण प्रकाशनेन दृष्टान्तमिति तत्र सत्त्वप्रकाशनापेक्षत्वादनियममिति अपरिसमाप्तरूपमेवेति व्याचष्टे—तमो हीति । नियति—नियम । सत्त्वेति सत्त्वेनाप्रकाशितस्य तमसोऽन्यनियमनेऽपरिसमाप्तरूपत्वेनैवार्थः । प्रकाशनप्रवर्तननियमनादौ कालस्व-भावादीनां परानुग्राहकत्वेऽपि प्रधानत्वासामर्थ्यं भावयति—एवमित्यादि । व्याख्यातपूर्वं एतदर्थं ग्रन्थः प्रवर्तनात्र नियम-कत्वो [illegible] इत्यर्थं दर्शयति—अनियत इत्यर्थं इति । अनियतरूपेणेति न च तत्सम्बन्धात्म-कत्वात् पूर्वकम् अनभिव्यक्तोऽपि प्रत्येव पूर्वमिति [illegible] तदात्मैव च सत्त्वस्य पूर्वोत्तरावस्थाऽनुगमता भवति सत्त्वस्य पूर्वत्वात् प्रागसत्त्वावस्थायां [illegible] तमोनियमनादेव भवति तत्रापि तत्त्वं न यतो नियतत्वाभिमतमपि तदनियतरूपेणात्मप्रवृत्त्यात्मकमिति व्याचष्टे । यदि तत्त्वं तदैव प्रवृत्त्यात्मकं वर्तते अपरिणामित्वेन वस्तुस्वरूपमात्रत्वात्, परिणामात्मता हि गुणा [illegible] इति तस्याप्यनुपपन्नत्वात् तस्मात् प्रकाशात्मैव प्रतिनियतत्वा नियामकत्वं वा [illegible] इति पूर्वमेवोक्तत्वात् न तत्र [illegible]—परिणामस्येति । प्रकाशकस्तयोर [illegible] इति

---

१ सि॰ क॰ तमसो । २ सि॰ क॰ नियति । ३ सि॰ क॰ व्यक्ति । ४ सि॰ क॰ प्रवर्तेत इ । ५ सि॰ क॰ तमस्त्व-वर्तेता । ६ सि॰ क॰ वैशिष्ट्ये वाच्ये ।

स्यादित्येव ग्रन्थः समानोऽत्रापि, अत एतस्तु ग्रन्थोऽर्थतः समानगमनिकोऽपि विविच्य लिख्यते भावनार्थं विशेषेणाग्रुप्यत्वात्।

तथा—

प्रकाशात्मैव तु नियमः, इतरथा स प्रकाशो न स्यात्, तथाऽनियतत्वात्तथाऽभूतत्वात्

5 घटपुरुषवत्, य एव नियमः स एव प्रकाशः, तथानियतत्वात्तथाभूतत्वात् घटघटस्वात्मवत्, नियम्यनियामकत्वाभावोऽध्यनपायाणवभेति चेन्न, तदात्मन एव तथानियतत्वात्, सन्निधिमा त्रात् पूर्ववन्नियमनात्।

(प्रकाशात्मैवेति) प्रकाशात्मैव तु नियम इतरथा सः प्रकाशो न सः, तथाऽनियतत्वात् तथाऽभूतत्वादिति असैवार्थकथनं प्राक्तनप्रयोगस्थानवत्, रूपादिस्वरूपमिपदार्थप्रकाशनाम् प्रकाशः स्वात्म-

10 न्येवेति स्वमतेन घटपुरुषवत्, यस्तथाऽनियतं तत्र प्रकाशो यथा घटः पुरुषे न नियतो घटे च पुरुषः, यो वा प्रकाशः स तथानियत एव यथा रूपरसादि श्रोत्रप्रतीतोदाहरणमेव घटघटवदिति, य एव नियमः प्रकाशस्य रूपान्तरनिवृत्तिरूपं नियममन्तरेण प्रकाशमात्रमावृत्यर्थमाम्नायस्वरूपमुक्तम्, इदानीं च एव नियमः स एव प्रकाश इति तयोरनन्यत्वप्रापणम्, तथानियतत्वात्—तेन प्रकारेण नियतत्वात्, रूपेण रूपान्तरेण रसाद्यात्मनिवृत्त्या प्रकाशस्य नियतत्वात्, तथाभूतत्वादिति अस्यैवार्थकथनम्, वृत्ति-

15 नियतिम्यतीयामेकार्थत्वं, घटघटस्वात्मवत्, यत्तथानियतं यत्तथाभूतं यत्तथाप्रकाशं तदेव तत्, यथा घट एव घटस्वात्मा वस्तुमन्तरेण न भवति न तत्तथानियतं तथाभूतं तथाप्रकाशं वा यथा पुरुषः, नियम्यनियामकत्वाभावोऽध्यनपोपायणवत्—यथा गौः प्रवर्तमाना नियम्यते अध्यनपायामेन नियामकेन, तयोरन्यत्वमेवं सत्यनयोरित्येवत्र न, तदात्मन एव तथानियतत्वात्—तथैवात्मा स एव वाऽऽत्मा तदात्मा तथैव प्रकाशात्मनो नियतत्वात्, तस्मादेव तेनैव वाऽऽत्मना प्रकाशात्मन एव

20 नियतत्वा[त् सत्त्व]तमसोर्भेदाभावाद्गोऽध्यनपायाणवद्भेदसाधर्म्याभावादयुक्तं दृष्टान्त इति वक्ष्ये,

तथापि प्रकाशनियमयोरनन्यत्वऽभावस्तेऽपीत्यर्थ । प्रकाशात्मकत्वं नियमस्य साधयति—प्रकाशात्मैवेति यदि प्रकाशः प्रकाशात्मना नियतो न स्यात् अन्यात्मनापि स्यादिति स प्रकाश एव न स्यात् न चैवम्, तस्मात् प्रकाशात्मना नियतत्वम् प्रकाशात्मैव नियमः प्रकाशो हि तदात्मने नियतमर्थं प्रकाशयन् प्रकाशः स्यादन्यथेति भावः दृष्टान्ते व्याप्ति प्रदर्शयति। व्यतिरेकव्याप्तिमाह—यो न इति। व्याप्तिरेव नियमः यस्तु नावश्यिम्याप्तिरनपते नियमात्मकः प्रकाश

25 इत्यत्र—एवमन्वयव्यतिरिति। प्रकाशस्य नियमो भवतु नियमात्मा तु न प्रकाश इत्याशङ्क्याह—इदानीमिति प्रकाशो हि रूपं रूपात्मनैव रसादिव्यावृत्तिरूपेण नियतं प्रकाशयतीति नियम एव प्रकाश इत्यत्र रूपेति। व्याप्तिनियतप्रकाशार्थं पर्याय- त्वमाह—वृत्तीति वृत्तिः—व्याप्ति नियतिः—नियमः व्याप्तिः—प्रकाशः। दृष्टान्ते हेतुं व्यवस्थापयति—यत्तथेति। नियम्यनियाम कयोर्भेदव्याप्यत्वमित्यभिमानेन परः शङ्कते—नियम्येति। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमभिप्रेत्य परिहरति—तदात्मन एवेति प्रकाशात्मना सत्त्वस्यैव प्रकाशस्यैव वा तेन प्रकारेण नियतत्वादित्यर्थः प्रकाशस्यैव नियमरूपत्वं परिस्फुरणात् तयोर्भेद इति,

30 गोऽध्यनपायणवत्त्वं नास्ति तयोर्भेदस्य प्रकाशान्तरेण नियतत्वात् प्रकाशनियमयोस्तु नान्यता भेदसिद्धेरिति वैषम्यम्, तत्र- एतच्चैव पैरे प्रकाशात्मत्वमनुसन्धित्वाभिधानमपि तयोः यथा न नियामकं तयोरपीति नियामकं न भवेत्, किन्तु नि

1 सि. क. इत्यादपाठः। 2 सि. क. तथात्मत्व्।

तद्व्याख्यातार्थमाह—सन्निधिमात्रात् पूर्ववदनियमनात्—इह तमःसन्निहितमपि प्राह्य सन्निधिमात्रादेव नियामकं स्वयमनियतत्वात् सत्त्वाधीननियतित्वात् किन्तु नियम्यमनियमनात् ।

कस्तर्हि नियामकः ? उच्यते—

य एवासौ सत्त्वस्यात्मा तथानियम्यव्यक्तिस्वरूपः प्रकाशः स एव नियामकः, तथानियमविधेः, इतरकर्तृकुम्भकारादिवत्, तमोनियमात्मरूपापादनात् ततस्तदभिमतनियामकत्वविपर्ययापत्तिः, तमसो नियम्यत्वात्, सत्त्वस्यैव नियामकत्वात् इतरतयात्मरूपापादनात्तमोवत्, तमोऽपि हि स्वमतेनेतरयोस्तथात्वरूपापादनादृते किमन्यत् करोति ? एवञ्च नीचतम एवाऽऽपद्यते सत्त्वमेव नियामकम्, तथाप्रकाशेन नियम्यत्वात् ।

(य एवेति) य एवासौ सत्त्वस्यात्मा प्रकाशः स नियामकः, कथमिति चेदुच्यते यस्मात्तथा नियम्यव्यक्तिस्वरूपत्वेन प्रकारेण शब्दादिनियतत्वेन नियम्यव्यञ्जनस्वरूपः स एव—प्रकाश एव, कुतः ? तथानियमविधेः—येन हि प्रकारेण नियमस्य विधिः शब्दस्वरूपेण प्रकाशमानस्य शब्दस्य रूपायमात्मना नियता प्रकाशमानता नियमविधिः, तस्मात्तेनोः प्रकाश एव नियमः, दृष्टान्त इतरकर्तृकुम्भकारादिवत्—यथा घटस्य पिण्डशिवकादिभावेनाभिव्यज्यमानं तथा तथा प्रकाशयता कर्त्रा कुम्भकारेण नियमकारिणा निर्वर्त्यते नियम्यते नियते रूपेऽवस्थाप्यते नाप्रकाशमानमप्रवर्तमानञ्च, सत्कार्यवादाभ्युपगमात्तदेककरणादिहेतुसामर्थ्याच्च, तस्मात् स कर्ता प्रकाशस्थानीयो नियामकः पिण्डशिवकादेर्नियमस्य, तथा प्रकाशस्तमसः, कुतः ? तमोनियमात्मरूपापादनात् सत्त्वेनैव हि तथा तथा प्रकाशमानेन तमसो नियमरूपमापाद्यते मृद्व्यवत् तथाप्रकाशयता कर्त्रा कुम्भकारेण तदात्मलाभहेतुत्वात्, ततस्तदभिमतनियामकत्वविपर्ययापत्तिः तमसो नियम्यत्वात् सत्त्वाधीननियतित्वात् सत्त्वस्यैव नियामकत्वात् पक्षधर्मविपरीतता, सत्त्वापाद्यनियमात्मरूपता प्रसक्ता, सत्त्वाप्रकाशिते नियमाभावात्, सत्त्वापादितं हि तमसो नियमात्मरूपं तस्मात्तमोनियमात्मरूपापादनात् सत्त्वं नियामकमितरतयात्मरू-

---

न्यमेव स्यात्, सत्त्वेनोद्भूतस्यैव तमस प्रतिनियमनियतित्वात् तस्मात् प्रकाशात्मन एव नियतत्वमित्याह—यद्वेति । यथा सत्त्वस्यात्मा प्रकाशः शब्दादिनिर्वर्त्यप्रकारेण प्रवर्तमानव्यक्तिस्वरूपः प्रवर्तकस्तथा स एव प्रकाशः शब्दादिनियतत्वेन नियम्यव्यक्तिस्वरूपो नियामक इत्याह—य एवासाविति । प्रकारेण प्रकाशमानस्यैव शब्दस्य शब्दस्वरूपेणैव प्रकाशमानता न तु रूपादिरूपेणेति तमसा नियम्यते प्रकाशाप्रकाशिते तमसाऽनियमनादित्यभिप्रायेणाह—तथा नियमविधेरिति । दृष्टान्तं करोति—यथेति पिण्डशिवकादिप्रकारवशीकं घटरूपं तत्तद्रूपेण प्रकाशयन् कुम्भकारो यथा प्रतिनियतरूपेण नियमयति न त्वप्रकाशमानं न चाऽप्रवर्तमानं नियमयति तथैति भावः इतरत्-मृद्व्यादि कर्तृ प्रकाशयितृ प्रवर्तयितृ यस्य पिण्डादेः तस्य कुम्भकार इवेत्यर्थः । सत्प्रकाशमानप्रवर्तमानस्यैवेतरनियम्यत्वे हेतुमाह—सत्कार्येति । तन्मते हि असदसत्प्रवर्तमानस्याऽप्रवर्तकत्वात् न तत्त्वकर्म प्रकाशं रजोकर्म प्रवृत्तिमात्रिक नियमं करोतीति तस्य नियमकर्तृता तत्त्वतोऽभिप्रेताह—तमोनियमेति एवञ्च तमस एव नियम्यत्वं नियामकत्वञ्च सत्त्वस्य इति त्वदभिमतविपरीतत्वप्रसक्त्या तम सत्त्वाधीनियमम्, नियम्यनियामकत्वात् नौकर्मकर्तृपाक्षधर्मपीति नेदपाकर्मोदीरितकर्मतेति भाव । सत्त्वस्य नियामकत्वमेव दर्शयति—सत्त्वं नियामकमिति इतरत् तमसः तथात्मरूपापादनात्—नियमात्मरूपापादनात् तमोगुणेऽपि सत्त्वरजःकर्मभूते प्रकाशमाने तदतत्स्वरूपेणोपादाय कार्ययैव नियमेन

1 सि. नियमविधिनियमः ।

पापादनात्तमोवत्, तमोऽपि हीनावि तमसोऽपि हि नियामकत्वमेवमेव युज्यते, [तमोऽपि] नैयत्ये-
न हीतरयोः सत्त्वरजसोरात्मस्वरूपापादनं कुर्यादन्यथा इतरस्वरूपापादनाद्वे तमः किमन्यत् करोति ?
तयोर्हि सत्त्वरजसोरात्मस्वरूपतापादनमेव कुर्वन्नियामकमित्युच्यते यथा तमः पूर्वं प्रकाशप्रवृत्त्या-
रम्भायामनियतयोः सत्त्वरजसोस्तथानियमनान्नियामकमेव सत्त्वमपि इतरयोः नियमात्मस्वरूपापादनाभि-
5 प्रायकमस्तु को दोषः ? एवञ्च नौवत्तम एवापद्यते—एवञ्च सत्त्वस्यैवोक्तविधिना नियामकत्वान्नौस्थानीयं
नियम्य तम एव स्यात्, न नियामकं, लम्बनपाषाणस्थानीय सत्त्वमेव नियामकं न नियम्यं स्यात्, किं
कारणं ? तथाप्रकाशेन नियम्यत्वात्, यथा येनोक्तप्रकारेण प्रकाशेन नियम्यत्वं मोहस्य, तस्मात्तमसः
सत्त्वेन नियम्यत्वानिर्णयः, तस्मात् प्रथमप्रकाशिते तमसो नियतत्वाभावात्तमसः प्रकाशेन तथानियम्य-
त्वात्तदात्मन एव तथानियतत्वादिति साधूक्तम् एवं तावत्सत्त्वतमसोर्भेदमभ्युपेत्य विपर्ययापत्त्या
10 नियम्यनियामकत्वानिरासस्य हेतोरसिद्धिरुक्ता ।

भेद वा सत्त्वव्यतिरिक्तं तमोऽभ्युपेत्य इत्यत आह—

तथाप्रकाशानतिरिक्तस्वरूपत्वाद्वा नियमस्य कुतोऽनौलम्बनपाषाणभेदसाधर्म्यम् ?
भेदे सति लम्बनपाषाणो नौविलक्षणो नावं प्रवर्तमानां निरुणद्धीति युज्यते, न तद्रूपत्वमत-
द्वृत्तित्वादिति चेन्न तमसः स्वनियमयत्तदात्मन एव नियतत्वात् अन्यथा सत्त्वं न स्यात्
15 प्रकाशो वेत्युक्तत्वात्, तथाऽन्यथा तु नियत्यभावात् प्रकाश एव नियमः ।

(तथेति) तथाप्रकाशानतिरिक्तस्वरूपत्वाद्वा नियमस्य—उक्तप्रकारेण रूपादिप्रकारेण च या
प्रकाशस्वरूपानतिरिक्तस्वरूपत्वान्नियमस्याभिव्यक्तेः कुतोऽनौलम्बनपाषाणभेदसाधर्म्यम् ?—न नौरपि
कः ? लम्बनपाषाणस्य भावो भेदस्तत्साधर्म्यमनौलम्बनपाषाणभेदसाधर्म्यं तत्कुतः सत्त्वतमसोर्भेद-
साधर्म्ये ? भेदाभावान्निर्णयः, ततो दृष्टान्तदार्ष्टान्तिकयोः साधर्म्याभावादयुक्तमिति नैयत्यं दर्शयति—
20 भेदे सति लम्बनपाषाणो नौविलक्षणो नावं प्रवर्तमानां निरुणद्धीति युज्यते, न तु तथाप्रकाशातिरिक्त-
तत्त्वरूपो मोहो नियामकोऽस्त्येतयोः, लम्बनपाषाणनिर्भावमात्रफलत्वात्तो न युज्यते न तद्रूपत्वमतद्वृत्तित्वा-
दिति चेत्—आत्मत्वं प्रकाशनमात्रं सत्त्वस्य वृत्तिर्नियमयन्तु तमसस्तथात्वस्य नियमात्तद्वृत्तित्वात्

सत्त्वरजसोः तथात्वमवगतीति सत्त्वरजसोरात्मस्वरूपापादनमेव करोति अन्यत् [illegible] तत्त्वमपि [illegible] प्रकाशेन तमसो नियामकत्वमापादयतीति तदेव नियामकमित्याह—तमोऽपीति । एवमेतदिति—तस्मादिति । ननु [illegible]
25 भेदात् [illegible] नियतस्य [illegible] प्रकाशरूपं प्रवृत्तिरूपं नियमरूपं [illegible]
[illegible] नियम इति नियमं प्रकाशानतिरिक्तत्वात् [illegible]
[illegible] नियमरूपत्वाच्च तथाच सत्त्वतमसोर्नौलम्बनपाषाणभेदसाधर्म्यमिति अभि-
प्रायेणाह—तथेति । भेदे सतीति नौलम्बनपाषाणयोर्भेदे सतीत्यर्थः । [illegible]
[illegible] नियामको भेदाभावान्नौलम्बनपाषाणभेदसाधर्म्यं युज्यत इत्याह—न त्विति । तत्त्वं न नियमरूपम्
30 [illegible] तमसो नियम एव [illegible] लम्बनपाषाणवदभ्युपगम्यते—अत्रात्मतमिति ।

1 नि क. [illegible] । 2 नि क. [illegible] । 3 नि क. [illegible] ।

त्तिभेदाच्च न नियमेन सत्त्वस्य तमसश्च न प्रकाशनमित्यस्ति भेद इत्येतच्च न, तमसः स्वनियमवत्त्वात्मन एव नियतत्वात्—यथा तमसः स्वो नियमः प्रागुक्तः पश्चात् स्वत एव तमःस्वात्मना नियतस्तमसा विनाऽभूतत्वात्तत्त्यागेन वृत्तेस्तदधीनत्वात्तद्रूप एव तदात्मन एव नियतत्वात्तथा सत्त्वप्रकाशवृत्त्यनतिरिक्तस्वरूपस्तमोनियमः सत्त्वान्यतिरिक्तः प्रकाशाधीनत्वात्तदविनाभावात्तदपरित्यागेन प्रवृत्तेस्तदात्मन एव नियतत्वादिति । किञ्चान्यत्—अन्यथा सत्त्वमित्यादि—यदि स्वत एव नियमो न स्यात् तयोऽ 5 न्यथा सत्त्वं सत्त्वमेव प्रकाशो वा प्रकाश एव न स्यात्तथाऽनियतत्वात्पुरुषवत् प्रवृत्तिवत्, मूलत एव तथा प्रकाश इति न स्यादनियतत्वादन्यापुत्रवत् पुरुषवदित्युक्तत्वादिति, तथाऽन्यथा तु नियमाभावात्—प्रकाशाप्रकाशिते तमसो नियमाभावादनियतस्य चाऽभावात् प्रकाश एव नियम इति । साम्प्रत मर्थेन कारन प्रकाशनमित्यादि यावत् प्रवृत्तिरिति प्रासङ्गिकं तदेव प्राय तत्रोत्तरमपि । तत्रापि सत्त्वस्यापि तमोवदपरिसमाप्तरूपत्वादित्याद्यपरविपर्यासेन यथायोगाश्रयोपन्यासं यावदुत्ताप्यसाहाय 10 कश्चित्साधावाहवनीयवद् ध्यानशिबिकावाहकवत् यावद्बोपहतबीजवदिति वाच्यम्, तस्मादिदं व्याख्यानार्थं नियामकाभावस्य च पर्याप्तत्वेनोक्तत्वात् ।

एवमेकैकविनिवृत्तस्यापुरुषत्ववदित्यादि यावन्नञ्वृत्त्यपवर्तनं प्रवृत्तिस्थाने नियमतश्च, पुनश्च नियमस्यात्मैव वा त्रीण्यपीति पुरुषवस्थायवन्नञ्वृत्त्यपवर्तनं यावत्सुखादनन्यदुक्तमिती

यथा पुरुषः तमोनियमदर्पे तथैव प्रकाश एव नियमस्य इत्याह—तमस इति तमसो हि स्वार्थे नियमः स तु पर्वत्वादेव 15 पूर्वेभ्यः प्रकाशावस्थायां हि व्यवहृततया इष्यते वैयग्र्यावस्थायां तमः स्वात्मनैव न तत्त्वेन भवन् तमोव्यतिरिक्तेनाभवन् तमसोऽन्यप्रकाशेऽभावोऽप्रतिबद्धात्मैव एव नियम इष्यते तथैव सत्त्वधर्मप्रकाशात्मैव नियमः तमसः सत्त्वप्रकाशरूपतया सत्त्वधर्मे प्रकाशमानस्य तेन नियमनात् प्रकाशाधीनत्वात् प्रकाशं विनाऽभावात् प्रकाशपरित्यागेनाप्रवृत्तेः प्रकाशात्मन एव नियतत्वादिति भावः । प्रकाशनियमयोर्भेदे तु सत्त्वस्य सत्त्वतया प्रकाशस्य प्रकाशतया प्रवृत्त्यपेक्षी न स्याताम्, तयोर न्यथाऽसत्तया नियतत्वाभावात्, सत्त्वात्मना प्रकाशात्मना चानियतत्वादेव हि एवं प्रवृत्तौ सत्त्वं प्रकाशो वा न भवति सत्त्व- 20 प्रकाशयोश्च तयोरनियतत्वेऽन्येनापि नियतत्वाभ्युपगमेन गुणान्तरापत्तिप्रसङ्गपरिणामाभ्युपगमात् [illegible] एव न स्यात्तथा च कथं सत्त्वं सत्त्वं भवेत् प्रकाशकार्यं हि सत्त्वम्, तदभावे च न तत्कार्यं सत्त्वं स्यात् प्रकाशश्च कथं प्रकाशः [illegible] सामान्यादिसाम्येनाह—अन्यथेति । [illegible] । न केवलं सत्त्वं सत्त्वमेव प्रकाशः प्रकाश एव न स्यादिति [illegible] एव दोषोऽपि तु तयोरसत्त्वमेव सत्त्वादे [illegible] मूलत एवेति । सत्त्वस्य प्रकाशत्वस्याऽनियतत्वे च सत्त्वेन तमसोऽप्रकाशकत्वाद्विनियमकत्वं तमो न भवेत् गुणानामन्योन्याश्रयतया सत्त्व 25 [illegible] नियमपरित्यागस्य तदभाव एव स्यात्, तस्मात् प्रकाशात्मैव नियमोऽभ्युपेयः इत्याह—तथाऽन्यथेति । अथ साम्प्रत सत्त्वादी [illegible] माधुपसर्वथोऽस्तमयथा एव [illegible] [illegible] इत्याद्य [illegible] [illegible] सत्त्वात्—साम्प्रतमित्यादिना एवं नियामकत्वं तमसो न सम्भवतीति सांख्यम् । अथ यथा पुरुषः [illegible] [illegible] एव तथापि [illegible] सः 30 तथा [illegible] प्रधानम्, तथापि [illegible] एव प्रधानमिति [illegible]—एवञ्चेति । तदेवं [illegible] प्रधान [illegible] गुण [illegible] भावे वा [illegible] पूर्व एव मन्त्रोऽप्यपि मान्य इत्याह

---

१ सि. क. प्रवर्तमान । २ सि. क. प्रवृत्त । ३ क. तत्त्वस्य । ४ सि. क. प्रवृत्त° । ५ सि. क. विरत ।

यदूरम्, अत्र तु विशेषः सुखादनन्य एव मोहः, अनारम्भत्वेऽप्युपादानत्वात् सुखस्यासत्य-त्वित्यादिप्रक्षेपपरिहारं पूर्ववत् ।

(एकत्रेति) एकत्रैकैकविनिग्राहकत्वादुपलब्धत्वविशेषादि वाचनाप्रत्यावर्तनमिति प्रागुक्त भङ्गन क्रममात्रत्वं स्यादन्येनमिति तथैवाशिष्यमिति समानत्वात्, अत्र तु प्रवृत्तिरेव प्रधानं प्रवृत्त्यापत्तिसम्भ-
5 वप्रसत्वात् प्रवृत्तिप्रकरणमिति प्रवृत्तिमात्रत्वे प्रधानमप्युपलभ्यमानार्थितम्, इह तु प्रवृत्तिकाले नियमं कृत्वा प्रधानस्थाने प्रधानमेव च कृत्वा भङ्गप्रत्यावर्तनं तथैव कार्यम्, पुनश्च नियमस्थानमेव वा त्रीण्यपीति पुरुषप्रत्यायनक्रमप्रत्यावर्तनं द्वितीयं त्रिविधं यथा तथाऽत्र प्रवृत्तिवैगुण्यपरिनियमवैगुण्यं त्रिविधं द्रष्टव्य-मिति, मतमन्यपरिशुद्धिपरिमाणमप्याह—यावत् सुखादनन्यदुःखमितीयदूरम्, अत्र तु विशेषः सुखा-दनन्यो मोह इति प्रतिज्ञा, हेतुरनारम्भत्वेऽप्युपादानत्वादिति, दृष्टान्तः सुखस्वात्मवदिति, इत्यादि
10 साक्षेपपरिहारं पूर्ववदिति अवधारणेन चोक्तसाधनान्तरापत्तिप्रसङ्गस्यो विपर्ययाभावः सूच्यते इत्यादि सर्वोतीतव्याख्यातप्रकाशविशेषः, तत्त्वाख्यातोपायविरुद्धाभावसमन्वेतत् प्रवृत्तिस्थाने नियमतमेति ।

न चापीदमेकत एव तत्त्वं सुखदुःखमोहानां सामान्यविशेषभावात्, किन्तूभयतः, अन-न्यत्वात्, अभिन्नत्वात्, एकत्वात् पूर्ववत् सन्निहितापत्तिभवनसंचार्यत्वमन्यथार्थं स्यात्, आपत्तिभवनं सन्निधिभवनाविनाभावे युज्यते, यदि तद्रूपादिवीजे न तु सन्निहितं तयो-
15 ऽङ्कुरस्यासत्त्वापत्तिः स्यात् ।

न चापीदमेकत एव तत्त्वमित्यादीत्युत्तरस्य विकल्पोत्थापनप्रत्ययस्य सम्बन्धः सुखदुःख-मोहानामनन्यत्वं तत्त्वमुक्तम् तत्त्वमेकतः सामान्यविशेषभावात्—सामान्यविशेषभेदभावात् यथा वृक्ष इति सामान्यं कदम्ब इति विशेषः, यथाऽत्र कदम्बो नियमाद् वृक्षो वृक्षस्तु स्यात् कदम्बोऽन्यस्मिन्नेकत्वतत्त्वं तथा यदि सामान्यविशेषभावः स्यात् स्यादेकत एव तत्त्वम्, न तु तथेह सुखदुःखमोहानां सामा-
20 न्यविशेषभावोऽस्तीति, किन्तूभयतोऽनन्यत्वादभिन्नत्वादेकत्वादित्यादिना सत्त्वरजस्तमसामेकत्वात् तदर्थं पूर्ववत् सर्व एव प्रक्रमभेदः स एव तथैव ग्रन्थः प्रवृत्त्या प्रकाशविशेषितया मोहविशेषितय

पुनश्चेति । यद्यपीति चोपलक्षणं हि एवं तमस्तु विभ्याऽऽवरणस्वभावत्वादनभीक्षणीयत्वादेकत्वं बोध्यम् । यत्र यस्य सत्त्वस्य प्रकाशस्य वा प्रकाशादिविनिर्माणत्वं यत्र विभक्तिविभागाभावात् तथान्योऽन्यत्वमेकत्वमारम्भपूर्वकत्वमेवास्तीति अथात्र तादात्म्यम्, न चैकत्वमेकत्वकारणपूर्वकत्वं भवतीत्युपपत्तिविप्रतिपत्तौ—न चापीदमिति सुखदुःखमोहानामेकता—एकत्वेन
25 प्रतिपन्नानां व्याप्यव्यापकत्वमनन्यत्वं न सम्भवति सुखदुःखमोहानां परस्परं सामान्यविशेषभावाभावादिति भावः । पूर्वमन्येन सामान्येति—सुखदुःखमोहानामिति तयोरेकत्वेऽनन्यत्वं भवति तयोः सामान्यविशेषभावो वा यथा वृक्षकदम्बयोः सामान्यविशेषभावे सति, एकार्थत्वमनन्यत्वमपि कदम्बो हि नियमाद् वृक्षस्वरूपः वृक्षस्तु नियमात् कदम्बात्मको न भवति एवं तयोरेकत्वमेकतः स्यादत्र वैरूप्येणानन्यत्वं सुखादीनाम्, सामान्यविशेषभावाभावप्रतिपादनाय—तथा भवतीति । यदि विशिनष्टि—किन्तूभयत इति सुखमेव दुःखम्, दुःखमेव सुखम्, सुखमेव मोहः मोह एव सुखमित्येकत्व-
30 मनन्यत्वं प्रत्येतीति भावः । तत सर्वं विचार्य प्रक्रमभेदे योगक्रमत्वेन दीक्षणमिति भाष्य एव प्रतिपत्तिविशेषतया विविक्त एतदुक्तम्, तथा प्रकाशार्थमाचरेदित्यभिप्रायमानेऽपीति नैव सम्बन्धं दृश्यते, इतो यत्सन्निधानप्रत्यक्षार्थमेकत्वम्

१ सि. क. सर्वमेव ।

नेयः तथा च भाष्य एव शुक्तिरजतवाम विप्रियते, सन्निहितापत्तिभवनसत्कार्यत्वमयथाय स्याविलत्र तु विशेषः आपत्तिभवन सन्निधिभवनाविनाभावे युज्यते, नान्यथा, यदि तदपाक्रियेते न तु सन्निहित ततोऽङ्कुरस्यासत्त्वापापत्तिः स्यात्, सत् कार्यं कारणं चेति द्वैविध्यञ्च भवनस्यैवमेव युज्यते, आपत्त्य नापेक्षिभेदादिति, शेष पूर्ववत्, सत्त्वेन तमसा च सह भावनायां कृतायां पुनश्च तथैव तमसोऽपि सत्त्वेन रजसा तद्वदेव भावनामन्यो निरवशेषो लिखित आचार्येणैवेति न विघ्नमहे स एवानुसर्तव्यः, ५ सर्वत्र भेदयोगेषु प्रवर्त्यप्रवर्तकत्वात् पचनपवनपदमेति चेन, तदात्मन एवेत्यादि तदेव सत्त्वरजः-संयोगेपि, प्रकाश्यार्थप्रकाशभेदासमर्थयनिवर्तकार्यत्वमेति चेन तदात्मन एवेत्यादि सत्त्वरजःसंयोग [नियम्यनियामकत्वालौकम्भनपाषाणवमेति चेन तदात्मन एवेत्यादि] रजस्तमःसंयोगे च तत्र तत्र प्रकाशप्रवर्तननियमवचनानि च यथोपपत्ति योज्यानि । कुतोऽपक्वपचनभेदसाधर्म्यं कुतोऽनर्थ निवर्तकार्यभेदसाधर्म्यं कुतोऽनौकम्भनपाषाणभेदसाधर्म्यमिति चोपनयेषु इयं इय द्वयोर्द्वयोर्गुणयोः 10 सैन्याय्य चोदयित्वा परिहार्यमिति ।

एवञ्च तावत् सुखदुःखमोहानां प्रकाशप्रवृत्तिनियमात्मकानामनन्यत्वादेकात्मकैक-कारणपूर्वकत्वमिति सम्यगभ्यधाम् । एवन्त्वनभ्युपगमे इदं निरूप्य यत्त्रिगुणात्मकत्वं परिगृह्य प्रयुक्ते कार्यकारणयोस्तेऽभिहित सत्त्वरजस्तमांसि त्रीणि शब्दाद्यात्मभिर्व्यवतिष्ठमानानि पर स्परार्थं कुर्वन्तीति, एतत्कथं निरूप्यते ? वक्ष्यमाणेषु विचारविकल्पेषु यथा यथोच्यते तथा 15 तथाऽनुपपत्तिरेवेति ।

(एवञ्च तावदिति) एवञ्च तावत् सुखदुःखमोहानां प्रकाशप्रवृत्तिनियमात्मकानामनन्यत्वादे कात्मकैककारणपूर्वकत्वमिति सम्यगभ्यधामिति । एवन्त्वनभ्युपगमे इदं निरूप्यमित्यादि, एवमेकैकात्मकै-ककारणानभ्युपगमे सांख्यैरिदं निरूप्य कथमत ? यत्त्रिगुणात्मकत्व परिगृह्य प्रयुक्ते कार्यकारणयोस्तेऽभि-हितम्—अपि प्रधाने भेदानां कार्यकारणभावात्–आध्यात्मिकानां बाह्यानाञ्च भेदानां कार्यकारणभावो 20 दृष्टः, आध्यात्मिकानां कार्यात्मकानां वक्ष्यामः । सत्त्वरजस्तमांसि त्रीणि शब्दाद्यात्मभिर्व्यवतिष्ठमानानि परस्परार्थं कुर्वन्तीत्येवमादि, एतत् कथं निरूप्यते ? वक्ष्यमाणेषु विचारविकल्पेषु यथा यथोच्यते तथा तथाऽनुपपत्तिरेवेति इतिशब्द[स्य] हेत्वर्थत्वात् निरूपणाभाव एवेत्यभिप्रायः ।

निमेषनयनादिविशेषा मूल्येऽपि पूर्व नोपलभ्यते सन्निधिभवनमापत्तिभवनस्य अविनाभावित्वप्रतिपत्तिनिर्देशेन प्रतिपादयन्ति एतस्मिन् इति वचनात्, अविनिर्भागविभागप्रत्ययानां सन्निधिमात्रसत्कार्यत्वात् पर्यायवर्तकोत्पत्तिभवनमर्थकत्वात् भवतेश्च सामान्येन सत्ता- 25 भिधानात् तत्र कारणभूतं सत् सन्निधिभवनस्य कार्यभवनत्वेनभवनम् सत्, असतो भवनाभावात् कारणमापत्तिभवनत इत्यभिप्रायः सन्निधिभवनस्यैव सन्निहितमेव कार्यं यीजादौ वैलक्षण्यमात्रनिमित्तपदार्थोपलभ्यमानं व्यपदीयमानादि भवतीत्यभिप्रायमेवैव च्च इत्यादिनाऽऽह–आपत्तिभवनमिति । तदन्यता अन्येन परिनिष्पन्नमुपवर्ण्यते–एवञ्चेति । अत निरन्तरमुत्पत्ति-वशेः–एवमिस्थादि । त्रिगुणात्मकत्वमिति सुखदुःखमोहानां परस्परं भेदमभ्युपगम्य अनेकात्मकैककारणत्वाभ्युपगमा-भाव तत्त्वापत्तिरिति भावः । कार्यकारणयोरिति इति प्रधानप्राधान्यात् सांख्यैः एव हेतव उपन्यस्ताः ते चैतावन्तः त्रिगुण 30

१ सि. क. यथोक्त । २ क. त्रिभेदाभेदादि । ३ सि तत्त्वेन । ४ सि पश्चादेव पदम् । ५ सि. क. सम्यगभिधा । ६ सि. क. सम्यगभ्यधामेति । ७ सि क. कार्यं कारणयोस्ते ।

तद्विचारोद्देशाय वाक्यमाह—

अनेकात्मकत्वकारणकल्पनाऽसद्भाव एव, सम्भाव्यविकल्पानुपपन्नार्थत्वात्, तदुक्तसत्त्वानुपपन्नार्थसर्वोक्तानृतत्ववत् ।

(अनेकेति) अनेकात्मकत्वकारणकल्पनाऽसद्भाव एव, सम्भाव्यविकल्पानुपपन्नार्थत्वात्—
5 अनुपपन्नसम्भाव्यविकल्पार्थत्वादित्यर्थः, येऽत्र सम्भाव्यन्ते विकल्पास्तेऽनुपपन्नार्था इति वक्ष्यते, तस्मा
दयमसद्भाव एव, दृष्टान्तः तदुक्तसत्त्वानुपपन्नार्थसर्वोक्तानृतत्ववत् तेनैवोक्तमनुक्तः सर्वमनृतमिति
स यदोक्तवदुक्ते वा असौ सत्यमेव तर्हि सर्वमुक्तमनृतमस्य सत्यत्वात्—सर्वान्तःपातित्वाच्च,
अथासत्यमिव न तर्हि सर्वस्योक्तस्यानृतत्वमनेनासत्येन प्रतिपाद्यते, अस्यानृतत्वस्याप्रमाणत्वादित्यु
परस्परभावनिवृत्तौ द्रव्यादिषट्पदार्थनिवृत्तिः, यथाधाराधेयभावभेदे संयोगवद्द्विवृत्तिः स्यात्
समवायस्यानित्यत्वं स्यादिति पूर्वपक्षं कृत्वा परिहारमाह वैशेषिकः, न बहूनामेकत्वात्, न तु 15
द्वयोर्द्वयोः सम्बन्धत्वं संयोगवत् समवायस्येति एतेनापि सङ्करप्रसङ्गः, पदार्थलक्षणव्यव-
स्थानासम्भवात् षट्पदार्थनिवृत्तिर्या, यत्तु प्रत्युक्तं नाधाराधेयनियमात्—यद्यप्येक एव
समवायः तथाप्याधाराधेयनियमोऽस्ति द्रव्य एव द्रव्यत्वं गुण एव गुणत्वं कर्मण्येव कर्मत्वं
सर्वत्र चैकः समवाय इति एतदपि प्रत्युक्तं सर्वत्र सर्वाधेयवृत्तौ सर्वाभिधानप्रत्ययसांकर्यात्
कथं द्रव्यादीनि प्रतिनियतानीति । 20

द्रव्यगुणेत्यादि, द्रव्यत्व[गुणत्व]कर्मत्वादीनामाश्रयाभावादनुपपत्तिः सामान्यविशेषाणाम्,
आदिग्रहणात् सत्तायाः, तदभावे—परस्परेत्यादि भावितार्थं यावत् षट्पदार्थनिवृत्तिरिति, यथेत्यादि,

---

त्वादिलक्षणमिति द्रव्यलक्षणं वा भावलक्षणं वा उभयमपि नास्तीति प्रश्न-गुणवदिति । निगमयति द्रव्यपदार्थनिवृत्तिरु-
पसंहरन्-तस्मादिति । प्रकारान्तरेण व्याचिख्यासुराह अथवेति, सर्वगतस्य द्रव्यत्वस्य सम्बन्धाद्गुणकर्मणी
द्रव्यम्, न तु द्रव्यं द्रव्यत्वेनासम्बन्धात्, अत एव ते न द्रव्याश्रिते इति द्रव्यलक्षणाभावम् द्रव्यं नास्ति क्रियावत्त्वं गुणवत्त्वं 25
हि द्रव्यलक्षणम्, परन्तु क्रियागुणकर्मोर्द्रव्यत्वाच्च लक्षणमिति भाव । तथा गुणकर्मणोरपि नास्ति लक्षणं तयोरप्याश्रय-
भावादित्याह-एवमेव चेति द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्, एकद्रव्यमगुणं संयोगवि-
भागेष्वनपेक्षकारणमिति कर्मलक्षणम्, गुणकर्मणोः द्रव्यत्वाभावात् [illegible] एवं लक्षणाभावाद्द्रव्यभावनिवृत्तिरिति भावः ।
उपपत्तिः [illegible] द्रव्यस्याभावे गुणकर्मणोरभावः स्यात् आश्रयाभावादिति । द्रव्यभावनिवृत्तिनिर्वर्तितदर्शितवद्
गुणकर्मभावनिवृत्तिरपि [illegible] द्रव्यगुणकर्मणामपि [illegible] एवं गुणकर्मणोरपीति । द्रव्यादीनामभावमाह द्रव्य 30
गुणेति । तत्सम्बन्धाद्-परस्परेति द्रव्यादीनां परस्परेण गुणकर्मत्वादिपरस्परकर्मसम्बन्धापत्त्या द्रव्यादिनिवृत्तौ द्रव्या-

---

१ सि. क्ष. क्रियावद्द्रव्यं ।

आधाराधेयभावेन भेदे सति संयोगवद् द्विवृत्तित्वात् समवायस्य तदभिन्नत्वं स्यादिति पूर्वपक्षं कृत्वा परिहारमाह वैशेषिकः—न बहूनामेकत्वात्—बहूनां द्रव्यादीनामेकः समवाय इति स्वरूपवर्णनं द्विवृत्ति-प्रतिषेधार्थम्, न तु द्वयोर्द्वयोरङ्गुल्यादिसंयोगेन वैधर्म्यं गतार्थं यावत् समवायस्येति आचार्य आह—एतेनापी-त्यादि एतेन अभिन्नत्वपरिहारवचनेनापि सङ्करप्रसङ्गः, सामान्येन व्यवस्थाभावात् सर्वत्र सर्वापेक्षत्वे

5 सर्वाभिधानप्रत्ययसङ्करः, विशेषस्य च पदार्थान्तरव्यवस्थानासम्भवात् षट् पदार्थनिवृत्तिर्वैयर्थ्यादिरूपदोषस्य एव दर्शितः बहूनामेकसमवायाभ्युपगमात् तदा सङ्करयुक्तत्वात् षडपि पदार्था निरर्थकाः, तन्निवृत्तौ समवाय्यभावात् समवायनिवृत्तेस्तस्यासतः खपुष्पस्येव कुतो नित्यत्वमनित्यत्वं वा ? यत्तु प्रयुक्तमित्यादि सङ्करदोषस्य यदुत्तरमुक्तं न आधाराधेयानियमादिति यद्यप्येक इत्यादि तद्व्याख्या यावत् कर्मण्येव कर्मत्व मिति, सर्वत्र चैकः समवाय इत्यनेन द्विवृत्तित्वपरिहारेणाभिन्नत्वमपि परिहृतमिति वैशेषिकः, आचार्य

10 आह—एवमपि प्रयुक्तमित्यादि गतार्थं यावत् प्रतिनियतानीति द्विवृत्तित्वमेवास्येति च वक्ष्यति ।

यदुच्यतेऽभ्युपगम्यतां तावत् यथा कुण्डदधिसंयोगे दध्येवाधेयं कुण्डमेवाधार इति नियमस्तथा द्रव्यादीनां समवायैकत्वेऽप्याधाराधेयनियमः स्यादिति इदमपि स्ववादेनैवोत्तर मार्गविधानं कृतं त्वया, न तु तथा सङ्कराभावो घटते, यदि दधिमधुघृतादिभिर्बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति ? यदि सर्वात्मकः समवाय एक एव

15 भवति तदा किमिति संकरो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य, यतः संयो-

गमाधाराधेयाभावात् सामान्यादिवत् समवायस्यापि षट्पदार्थनिवृत्तिरिति भाव । बहूनामेकः समवायः न तु संयोगवद् द्वयोर्द्वयोः तथा सति संयोगस्येवानेकत्वं स्यादिति वैशेषिकस्याभिप्रायः आधाराधेयेति आधाराधेयभेदेन समवायस्य भेदे द्विवृत्तित्वात् संयोगे यथाऽनित्यत्वमपि स्यादिति पूर्वपक्षं विधाय प्रथमपरिहारं चैवं भेद समवायस्य, बहूनामेकत्वाभ्युपगमेन संयोगवैधर्म्येण नानित्यत्वमिति भाव । अनेकाभ्युपगमेन सङ्करप्रसङ्गो दुर्वार इत्याशयं आह आचार्य इति । सामान्येनेति

20 सम्बन्धविशेषेण सामान्यस्य प्रतिनियतपदार्थानां प्रतिनियतधर्मेषु प्रसिद्धो यथा विभिन्न पदार्थेषु व्यवस्थाप्रभावो भवेत्, न च प्रतिनियतोऽपि तत्र यतः बहूनां समवायाधीनाधारेयत्वेनाल्प सर्वेषां निखिलेषु व्यतिकरेषु सर्वेषामेवान्यान्यानुप्रवेशमिश्रणात् द्रव्यगुणकर्मादीनां सर्वाभिधानाभिधेयप्रसङ्गात् सामान्यं, कथं प्रतिनियतानि अवगम्येरन् ? यतो व्यवस्थाभावात् षट् पदार्था इति व्यवस्था न स्यादिति भाव । न च समवायोऽप्येकोऽपि कथं षट्पदार्थनिरूपितिसिद्धस्य तदभिवृत्त्यादिति, द्रव्यादिषट् पदार्थनिरासे समवायाभावात् समवायोऽपि नास्ति समवायिभिन्नत्वादिसत्त्वापि निरासादिति भाव । अभिन्नत्वमित्यादौ हि

25 समवायः स्वरूपेण प्रतिनियतः एवं तदनुपपत्त्या कथ्यमानो हि समवाय एको वा स्यादनेको वा तदभिरोधेनैव कल्पनीय, यदि प्रमाणं वा स्वयं तद्विदं नाम तदनुविद्ध द्रव्यं गुणकर्मसामान्यादावत्वेन विरोधिरोधी न तु गुणत्वाद्यैवाधाराधेयता द्रव्यात्मनाधारत्वा वा गुणकर्मसामान्यानि च द्रव्याधेयत्वेन नियमेनाधाराधेयनियमात् समवायस्य बहूनां सम्बन्धेऽपि न सङ्कर इति वैशेषिकस्य वचनम्—यदुत्तरमुक्तमिति । तदेवमाधाराधेयनियमात् सङ्करानुपपत्तौ च समवायस्य द्विवृत्तित्वपरिहाराय संयोगवन्नियमाभावेऽपि तु एक एवेति चाभिप्रायं वैशेषिकस्य सूचयति—सर्वत्र चैक इति । अत्र वैशेषिके

30 ननु समवायो यदि एकः तदा द्रव्यादीनां सङ्करप्रसङ्गः गुणकर्मादिसमवायस्य द्रव्ये सम्बन्धाविशेषादाधाराधेयनियमाभावप्रसङ्गः, यद्यपि द्रव्यगुणकर्मसमवाय एकः तथापि तथा न द्रव्याधार तत्र तेषामाधेयत्वे द्रव्येणैव हि द्रव्यस्य आधेयत्वं गुणेषु गुणत्वं कर्मसु कर्मत्वं सामान्यं तत्सम्बन्धिनि तत्रैवेति नियम यथा कुण्डबदरे संयोगाविशेषेऽपि कुण्डमेवाधारो न दधिवाधारमिति भावनियमः इति सामान्यसामर्थ्यविशेषरूपेणापि नियम उपपद्यत इत्याह संदिग्धत्वमेवान्यसंयोगो भिन्न इति—यदुच्यत इति । नियमोऽनियमात्मताभ्युपगमान्नैवात्मानम्, अन्यत्र एकस्य एकान्तविशेषः सर्वैः समवायविधिः,

१ दे० न तु इत्यादि ।

गाद्वैधर्म्यमुच्यते सर्वत्रैव च द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, द्वयविशिष्टा-
भिधानप्रत्ययत्वात् कुण्डदध्यादिसंयोगवत्, यथा कुण्डदध्नोः संयोगे दध्ना कुण्डेन वा विशिष्टे
तन्निमित्तमभिधानं प्रत्ययश्च दृश्यते तद्द्विवृत्तित्वञ्च तथा समवायेऽपि द्रव्यगुणयोः विशिष्टे
तन्निमित्तमभिधान प्रत्ययश्च स्यात् तद्द्विवृत्तित्वञ्च, तथा च समवायस्य संयोगवत् द्विवृत्ति-
त्वादनित्यतैव । 5

यत्तूच्यतेऽभ्युपगम्यतां तावदित्यादि, इद तस्य दोषपरिहारप्राप्तसर्वसम्बन्धव्यतिरेकार्थां
नियमादिप्रसङ्ग[ा]भावगतं गतार्थं यावत् समवायैकत्वेऽप्याधाराधेयनियमः स्यादिति आचार्य आह–
इदमपीत्यादि, स्वभावेनैवोत्तरमार्गो विहितोऽस्य त्वया–इहेदमित्यादिना समवायलक्षणप्रमाणेनाधारा-
धेयसम्बन्धज्ञानलक्षणत्वात् कार्यकारणयोराधाराधेयभावसम्बन्धिनोः कुण्डबदरदृष्टान्तेन च सुभावितोऽ-
पवर्गः तेनैव वयं ब्रूमः–न तु तथेत्यादि, न तु तथा सङ्करभावो घटते त्वत्प्रकारेण, कुण्डबदरसंयोगदृ- 10
ष्टान्ते यदि दधिमधु[ध]कादिभिः बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति ?
तथा यदि सर्वात्मकः समवायो द्रव्यगुणकर्मद्रव्यत्वगुणत्वकर्मत्वसत्ताद्याधार एक एव भवति तदा किमिति
सङ्करो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य, यतः संयोगाद्वैधर्म्यमुच्यते त्वया द्वयोर्द्वयोरि-
त्यादिना, तत्र साधनं सर्वत्रैव च द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, साधयामश्चैतद्द्वि-
वृत्तित्वं समवाये द्वयविशिष्टाभिधानप्रत्ययत्वात्, कुण्डदध्यादिसंयोगवत्, यथा कुण्डदध्नोः संयोगे विशिष्टे 15
तन्निमित्तमभिधानं प्रत्ययश्च दृश्यते दधिकुण्डं कुण्डदधि चेति तद्द्विवृत्तित्वञ्च तथा समवायेऽपि द्रव्यगुण-
योरित्यादिद्विवृत्तित्ववर्णनम् तस्मात्त्वत्पूर्वपक्षितदोषासङ्गतस्वस्थः समवायस्तेनैव आह–तथा चेत्यादि
यावदनित्यतैवेति गतार्थम् ।

व्यतिरेक–द्रव्यत्वादिनिमित्तानां गुणत्वाद्यभाव । इत्यादेर्दोषपरिहारप्राप्तसर्वत्र तत पूर्वपक्ष इति वर्तमानं–इदं तस्येति ।
उत्तरयति–इदमपीति । इहेदमित्यादिनेति इहेदमिति यतः कार्यकारणयो स समवाय इति सूत्रम्, कार्यकारणयोरित्य- 20
नेनाकार्यकारणयोरपि ग्रहणम्, अयुतसिद्धयोरित्यध्याहारमनुसन्धेयम् तत्र इह कुण्डे दधि इह कुण्डे बदराणीत्यादि इह तन्तुषु
पट इह वीरणेषु कटः इह द्रव्ये गुण कर्म वा इह [illegible] गोत्वमित्यादीनुविदितत्वात् सर्वं तन्त्वादिपटादेरिव सम्बन्धान्तरेण नोत्प-
द्यमानेति तस्मात् प्रतिनियताधिकरणत्वेन समवायोऽनुमीयत इति त्वयैव व्याख्यानेनैवोत्तरं विवादे मार्गो विहित इति भावः ।
कुण्डबदरदृष्टान्तेनाधाराधेयनियम एकसमवायत्वे न व्याहते तथोक्तप्रकारेण यतः तेन न सङ्करो दुर्वार एव न द्वयेकनिरूपितत्वे
समवायस्य व्यवस्थासङ्करोद्भवाधाराधेयभावनियमं साधयितुं [illegible] संयोगदृष्टान्तो भवते [illegible] सङ्कर 25
दोषमित्युक्तं यदि दृष्टान्त- स्यात्, आधाराधेयनियमत सङ्करदोषाभाव तथा तु नास्तीत्याहेवाह–न तु तथेति
अनेकनिरूपितसंयोगभावस्य सङ्करभाव–यदीति । न वा समवायस्य द्विवृत्तित्वनिवृत्तिः यतः संयोगवैधर्म्येण द्वयोर्द्वयोरेव
विशिष्टाभिधानप्रत्ययवर्णनात् तथा त्वयाऽपि तत्र तत्र द्वयोरेव समवायप्रदर्शनात् [illegible] नापि चेति । द्विवृत्तित्वं समवायस्य
साधयाम इत्याह साधयामश्चेति अनन्तरसमवायस्य द्विवृत्तित्वमुपवर्ण्यते तथैव वयं समवाये साधयाम इत्यर्थः । दृष्टान्त
दार्ष्टान्तिकयोर्योजनमाह यथेति । एवं द्विवृत्तित्वसिद्धौ संयोगदृष्टान्तेन तस्यानित्यत्वमित्याह–तथा चेति । अथ 30
समवायसर्वगतत्वेऽपि द्रव्यत्वगुणत्वादीनां विशेषणानामपेक्षाणां [illegible] द्रव्यादीनां नियमो भवति इत्यपदे हि [illegible]

---

१ सि क्ष °व्यासमि । २ सि डे. °विद्यात्वेनायता । ३ सि क्ष °भावा स । ४ सि क्ष वद्दस्वा ।
५ सि क्ष सर्वेकवत्प्रस्य ।

यस्त्विदं स्वतत्त्वानुरूपप्रत्ययोत्पत्तेः परस्परव्यतिरिक्तैराधेयैर्द्रव्यत्वादिभिराधाराणां द्रव्यादीनां नियमेन द्रव्येष्वेव द्रव्यमिति ज्ञानमित्यादि, अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया, न हि समवायस्यैकत्वे व्यतिरेको नियमश्चास्ति, अविशिष्टत्वात्ततो न स्यात् द्रव्येष्वेव द्रव्यमिति ज्ञानम्—एवं ते द्रव्येष्वपि गुणज्ञानं स्यात्, गुणज्ञानकारणत्वात् समवायस्य, गुण-
५ वत्, एकत्वे योऽयं द्रव्यस्य द्रव्यभावेन सम्बन्धः स एव गुणस्यापीति प्राप्तं द्रव्यस्यापि गुणत्वम् तस्य गुणभावेन सम्बद्धत्वाद्गुणवत् द्रव्यभावनिवृत्तिरिति । तत्त्व द्रव्यस्य गुण-भावेन सम्बद्धत्वाद्गुणभूतस्य गुणानामाश्रयस्याभावः, असति द्रव्ये कस्य गुण इति गुण-भावनिवृत्तिः लक्षणानुपपत्तेः क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणम्, द्रव्याश्रय्य-गुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणमिति, ततश्च गुणेष्वपि द्रव्यज्ञानं
१० स्यात् किं कारणम्? द्रव्यज्ञानकारणत्वात् समवायस्य, द्रव्यवत्, एकत्वे योऽयं गुणस्य गुणभावेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्ते गुणस्यापि द्रव्यत्वम्, द्रव्यत्वाभिसम्बन्धाच्च तस्य द्रव्यस्यापत्तेर्गुणत्वस्याभावश्च द्वे अनवस्थाने ।

यस्त्विदमित्यादि यदुक्तमेव मत्वमतिविनाशि यावज्ज्ञानमित्यादि, द्रव्यादीनामाधाराणां द्रव्य-त्वादिभिराधेयैः परस्परव्यतिरिक्तैर्विविक्तैर्नियमो भवति स्वतत्त्वानुरूपप्रत्ययोत्पत्तेरिति, अत्रोच्यते—
१५ अनेन स्वपक्षे प्रत्यक्षविरोधः उद्भाव्यते त्वया कथम्? न ह्यनेन भावयति, हि यस्मात् हेत्वर्थे यस्मात् समवायः एकः तस्मादेकत्वाद् द्रव्यत्वादिभिरविशिष्टत्वात् व्यतिरेको नियमश्च नास्ति, अतो द्रव्येष्वेव द्रव्यमिति ज्ञानं न स्यात् तस्य व्याख्या एवमित्यादि—एवं ते समवायैकत्वे द्रव्येष्वपि गुणज्ञानं स्यादविशिष्टत्वात्, गुणेष्विव अविशिष्टत्वात् कर्मस्वपि किं कारणम्? गुणज्ञानकारणत्वात् समवायस्य, किमिव? गुणवदिति गुणेष्विव गुणवदिति साधनं तदेव व्याचष्टे—एकत्वे योऽयमित्यादि यावत् द्रव्यस्यापि
२० गुणत्वम् यदि दृष्टिमभूतकर्मादीनां द्रव्यगुणकर्मणामविवेके नियमाभावस्यैव त्वमाह इत्यत्रायमभ्यासरिदं

द्रव्य एव प्रसज्येत द्रव्यमिदं न गुणो न कर्म वा गुणोऽयं न द्रव्यं न कर्म [illegible] ग्रहणे—यस्त्विदमिति । तदेव व्याचष्टे—यदुक्तमित्यादि वैशेषिकेणोक्तम् [illegible] पदार्थविशेषेऽपि [illegible] [illegible] भूतस्य इति यं विशेषमपश्यन् पदार्थे इदं द्रव्यं कर्म गुणः इदं [illegible] भवन्ति ताः विशेषा [illegible] इति [illegible] विशेषं द्रव्यत्वादयो [illegible] धर्मो द्रव्यमिदं गुणोऽयं कर्मेदमिति [illegible]
२५ भावार्थः । तदेतं [illegible] न हि [illegible] न सर्वत्र सत्ये [illegible] सम्भवति, तथा च द्रव्यत्वस्यापि सर्वत्र सत्त्वात् [illegible] [illegible] नियमोऽत्, [illegible] [illegible], तथा तु नास्ति [illegible] द्रव्यमिति [illegible] ज्ञानं [illegible] [illegible] इति [illegible] सर्वत्र द्रव्यबुद्धिः स्यात्, न तु द्रव्य—एवेति भाव । [illegible] एवं त इति द्रव्येऽपि गुणज्ञानं स्यात् यथा गुणेषु गुणज्ञानं भवति, [illegible] हि गुणत्वं [illegible]
३० [illegible] [illegible] भाव । [illegible]—गुणज्ञानकारणत्वादिति [illegible] गुणेष्विव द्रव्येष्वपि [illegible] भाव । गुणज्ञानकारणत्वं समवाये भवतु नाम तेन द्रव्यस्य [illegible] एकत्व इति,

---

१ भि० क० यैविद०। २ सि० क० के० °व्यावीय। ३ सि० क० के० द्रव्येष्विव।

संयोगे दधिकुण्डमेव मधुकुण्डमेवेति, एकत्वात् संयोगस्य सर्वेष्वपि सम्बन्धात् तथात्रापि यो द्रव्यभावेन सम्बन्धः स एव गुणस्यापीत्येतस्मात् कारणात् प्राप्तं गुणत्वं-द्रव्यस्यापि गुणभावः, द्रव्यं गुणो भवतीत्यर्थः गुणत्वाभिसम्बन्धाच्च तस्य द्रव्यभावहानिः, एवं गुणभावापत्तौ द्रव्यभावो हीयत इति पररूपतामापाद्य स्वरूपत्यागमापादयति, तत्रैव(?) व्याख्यानसाधनं यावन्निवृत्तिः, द्रव्यं गुणभावेन सम्बद्धत्वात् त्यक्तद्रव्यभावं गुणवदिति एवं तावद्द्रव्यस्य गुणत्वापत्तिर्द्रव्य[त्व]त्यागश्च[द्वे अ]-नवस्थाने, तस्य द्रव्यस्येत्यादि, तद्द्रव्यं गुणभावेन सम्बद्धमतो गुणभूतं नाश्रयो गुणान्तरस्येति द्रव्यानाश्रित-त्वस्य च गुणस्याभावस्ततो गुणनाश्रयस्य द्रव्यस्याप्यभावः, तदभावादसति द्रव्ये कस्य गुण इति गुणभावनिवृत्तिर्गुणस्य तल्लक्षणानुपपत्तेः क्रियावदित्यादिसूत्रद्वयेन लक्षणं दर्शयति, तत्रैवाभ्युपदिष्टार्थो पनयः किं कारणमित्यादि कारणप्रश्नपूर्वकं पूर्ववदत्रापि द्रव्यत्वापत्तिगुणत्वत्यागौ द्वे अ[न]वस्थाने।

तथा—

योऽयं गुणस्य कर्मत्वेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्तं गुणस्य कर्मणश्च द्रव्य त्वम्, द्रव्यत्वाभिसम्बन्धाच्च तयोर्द्रव्यत्वापत्तिः गुणकर्मभावत्यागश्च, तस्य द्रव्यस्य गुणभावेन कर्मभावेन च सम्बद्धत्वात् गुणभूतस्य कर्मभूतस्य च गुणक्रियानाश्रयत्वाभावः, असति द्रव्ये कस्य गुणः कर्म चेति न गुणकर्मणी तथा लक्षणे, तयोरलक्षणत्वादसत्त्वात् आश्रयोपलक्ष्यद्रव्याभावः, तस्मिंश्चासति निराश्रययोर्गुणकर्मणोरभावाद्द्रव्यस्य चाभावादाश्रयिणां द्रव्यत्वादीनामप्यभावः, तथा कार्यकारणयोः गुणस्येत्यादिः।

योऽयं गुणस्य कर्मत्वेनेत्यादि कर्मणा सह पररूपापत्तिः स्वरूपत्यागश्च द्वे अनवस्थाने लक्षण[ा]योगद्वारेण तेऽव्याख्याने गतार्थे यावत् गुणकर्मणी तथा लक्षणे इति लक्षणाभावापादनम्, तयो[र]लक्षणत्वादसत्त्वात्-तयोर्गुणकर्मणोरलक्षणत्वात् असत्त्वं खपुष्पवत्, तदसत्त्वादाश्रयोपलक्ष्य-

गुणवत्त्वाद्यां दधिमधुप्रभृतीनां संयोगस्यैकत्वे यथाऽन्येषामपि संयोग इति नियममिदं न लभ्यते दधिमध्वादीन् भिन्नीभावापत्त्यैव विशेषमिदं गुणत्वकथनात्, तदन्यथा दधिकुण्डमेवेदं मधुकुण्डमेवेदमिति न नियमः तथैवार्थे समवायो द्रव्यत्वेन न गुणत्वेनेति नियमसम्भवात् द्रव्यसमवाय एव गुणसमवाय इति कृत्वा तत्सम्बन्धाद्द्रव्यस्य गुणत्वात् द्रव्यत्वं निवर्तत एवेति परस्परापत्तिरिति भावः। एवं पररूपापत्तौ स्वरूपस्य त्याग इत्याह गुणत्वाभिसम्बन्धाच्चेति। एवं तावत् द्रव्यस्य गुणत्वापत्तिरेकम-नवस्थानम्, द्रव्यत्वत्यागः(?)...(?)-एव तावदिति। ओकमितरेव(?) गुणस्यापि द्वे अनवस्थाने दर्शयति-तस्य द्रव्यस्येति। व्याचष्टे-तद्द्रव्यमिति समवायस्यैकत्वात् द्रव्यं गुणत्वेन सम्बद्धं सत् गुणात्मकमतो गुणान्तरा-श्रयाभावाच्च ततश्च तत्सम्बन्धी गुणोऽनाश्रितः ततश्च द्रव्याश्रयगुणत्वात् लक्षणानुपपत्तौ गुणाभावः एवञ्च गुणेषु गुणत्वं न स्यात्, द्रव्यनिवेशेन तु ज्ञानं स्यात् द्रव्यत्वापत्तेर्वा समवायस्य द्रव्य एव गुणैर्वृत्तिनियतत्वात्, एकत्वे हि समवायस्य य एव गुणसमवायः गुणेऽपि स एव द्रव्यत्वस्यापि समवाय इति गुणेषु द्रव्यत्वसमवायसत्त्वात् द्रव्यत्वं प्राप्तम्, तथा च समवायमतत्वाद्द्रव्यत्वापत्तिर्गुणत्वत्यागश्चेति गुणान्यत्वे द्वे अनवस्थाने भवत इति भावः। एवं द्रव्यस्य कर्मत्वापत्तिर्द्रव्य-त्वत्यागश्च कर्मणश्च द्रव्यत्वापत्तिः कर्मत्वत्याग इत्येवमन्तरेण भाव्यः तदेवमेकसमवायापत्त्यादिना...(?) कर्मद्रव्यसंयोगेना-प्यवस्थानासम्भवादि-योऽयमिति। व्याचष्टे-कर्मणा सहेति कर्मणा सह गुणस्य द्रव्यत्वापत्तिः गुणकर्मभावत्याग इत्येवम् कर्मकत्वाभावस्य द्रव्यत्वं गुणेऽपि तत्त्वात् योऽयं गुणस्य कर्मत्वेन सम्बन्धः स एव द्रव्यस्यापीत्यादिकमत्र योज्यम्, शिष्टं सर्वं पूर्ववदिदमिम्, ततोऽनवस्थान-लक्षणायोगद्वारेणेति। आश्रयेति आश्रयो द्रव्यम्, आश्रयिणी गुणकर्मणी तयोर्लक्ष्ये

1 सि क्ष द्रव्यसदा। 2 सि. क्ष. संख्याने।

द्रव्याभावः—गुणकर्मणोरसमवाय्ययोरुभयियोरभावाद्योऽभावो द्रव्यं नास्ति, औपम्याभावेऽप्यभावत्, ग्यसमवायभावात् रूपुण्यवद्, तस्मिन्नासति द्रव्यं निरवयवयोर्गुणकर्मणोरभावाद्द्रव्यस्य चाभावादाभिप्र्यं द्रव्यत्वादीनामप्यभावः उक्तं हि 'द्रव्यगुणकर्मणामभावस्याभावियित्' (वैशे०) इति एवमेतानि त्रिकसं-योगेन द्रव्य[स्य]गुणेन सह, कर्मणा च द्वे, गुणस्य द्रव्येण कर्मणा च सह द्वे कर्मणो द्रव्येण गुणेन च सह
5 द्वे इति षट् चत्वारि, द्रव्यत्वेन गुणस्य कर्मणश्च द्वे गुणत्वेन द्रव्यस्य कर्मणश्च द्वे कर्मत्वेन द्रव्यस्य गुणस्य द्वे इति षट् एव द्वादश चत्वारि एव द्रव्यत्वस्य कर्मणा गुणेन च, गुणत्वस्य द्रव्येण कर्मणा च कर्मत्वस्य द्रव्येण गुणेन च षट् चत्वारि द्रव्यस्य गुणत्वेन कर्मत्वेन च गुणस्य द्रव्यत्वेन कर्मत्वेन च, कर्मणो द्रव्यत्वेन गुणत्वेन च षट् तान्यपि द्वादश, एवं त्रिकसंयोगेन चतुर्विंशतिरनवस्थाचत्वारि भवन्ति। कस्मात्? तथा कार्यकारणयोरिमानि चाव्युण्यत्वेसातिरिति हेतु व्याख्यातमेवोपनयति ।
10 आह—

ननु सर्वगतत्वात् समवायस्य स्वतत्त्वेनापि सम्बन्धात् द्रव्यभावः गुणभावः कर्मभावो वा सिद्धसतीत्यभोप्यते, नन्वत एव सङ्कर उच्यते, परतत्त्वेनापि सम्बन्धादतत्त्वमपीति सङ्करदो-षाभिमोक्षः एवञ्च स्वविषयसर्वगतानि हि तत्त्वानि समवायस्य सर्वगतत्वे तान्यधुना सर्वगतानि प्राप्तानीत्यभ्युपगमविरोधः अतो द्रव्यगुणकर्मणां व्यवस्थितानामभावात् कथं द्रव्येषु द्रव्य-
15 ज्ञानं? गुणेषु गुणज्ञानं? कर्मसु कर्मज्ञानमिति ।

ननु सर्वगतत्वादित्यादि, समवायस्य सर्वगतत्वात् स्वतत्त्वेनापि सम्बन्धोऽस्ति द्रव्यस्य द्रव्यत्व स्वतत्त्वम् एव क्षेपयोरपि क्षेपद्वयम् सर्वेण सह समवायसद्भावात् स्वेनापि तत्त्वेन सम्बन्धात्, तयोरप्यत्र सत्त्वम् [?] द्रव्यभावो गुणभावः कर्मभावो वा सिद्धसतीत्यभोप्यते—नन्वत एव सङ्कर उच्यते, परतत्त्वेनापि सम्बन्धात् अतत्त्वमपीति, इति[सम्बन्धो]हेत्वर्थे यस्मात् परतत्त्वेनापि सम्बन्धः तस्मात्त-
20 थोऽप्यतत्त्वोऽपीति सङ्करदोषाभिमोक्षः अभिप्रायेण त्वदुक्तेनैव समर्थितत्वात् किञ्चान्यत् दोषोपच-यम—एवञ्च स्वविषयेत्यादि स्वविषयसर्वगतानि हि तत्त्वानीष्यन्ते ततस्समवायस्य सर्वगतत्वात्तान्यं

द्रव्यं तपस्वको गुणकर्मणोरिति तयोरभावे द्रव्यमपि नास्तीति भावः । आमन्यमानेन पर्यन्तं व्यभ्यामात्मनः प्राप्तमिपो-रभावादेति । रूपस्य भावावधुण्यस्य सामान्याद्—रूपवत्त्वप्यभावादिति । एवं त्रिकसंयोगेन सम्बन्धोऽनवस्थानानि सर्वाणि-एवमेतानीति धर्मिणि धर्मिद्वयेन धर्मिद्वये एकेन धर्मेण एकस्मिन् धर्मे धर्मिद्वयेन एकस्मिन् धर्मिणि धर्मद्वयेनानवस्थानानि
25 भवन्ति । ननु द्रव्यादौ गुणत्वादिसम्बन्धस्य द्रव्यत्वादिसम्बन्धोऽप्यस्ति, समवायस्य सामान्यस्यादिसर्वगतत्वात्, एवञ्च द्रव्यभावादिनिराकृतिरिति व्याचष्टे—समवायस्येति सामान्यस्य सर्वगतत्वात् समवायस्यैकत्वे क्षेपयोरपि—गुणकर्मणोरपि गुणत्वं कर्मत्वं सततमिवार्थं । समाधत्ते—नन्वत एवेति सामान्यस्य सर्वगतत्वेन समवायसम्बन्धात् क्षेत्रयोरपि सम्बन्धात्, द्रव्यादेः द्रव्यत्वादिसम्बन्धत्वापि प्रसज्यत इति सङ्करे इत्यर्थः । एवं परतत्त्वसम्बन्धात्तत्त्वेनापि सम्बन्धादिसत्त्वापि तत्त्वेन प्रतीयमानत्वात्—अभिप्रायेणेति । दोषान्तरमाह किञ्चान्यदिति उच्यते सामान्यं सर्वगतं
30 गतमितम्, न तु सर्वसर्वगतम्, यत्सामान्यं यत्र वर्तते तत् तद्विषयं तत्रैव सर्वस्मिन् गतं स्वविषयसर्वगतम्, सर्वसर्वगतत्वात् तत्रयतः सर्वगतत्वं न, समवाये सर्वसर्वगतत्वं तदा तत्त्वानामपि सर्वगतत्वं प्रसक्तमिति तदभ्युपगमविरोधदोष इति भावः ।

१ सि. क्ष. °त्यभ्रमिसादि । २ सि. क्ष. डे. तत्त्वाभ्युपं । ३ सि. क्ष. डे. सर्वगतत्वान्तान्यं ।

तान्यधुना सर्वगतानि प्राप्तानि, ततोऽभ्युपगमविरोधो जायत इति, क्षेपपदार्थाभाव उच्यते— अतो द्रव्यगुणकर्मणामित्यादि प्राक्तन एव ग्रन्थो यावत् कर्मसु कर्मज्ञानमिति, तत्र व्यवस्थितलक्षणानामसमावादिति लक्षणाभावद्वारेण निराकरणम्, इह तु व्यवस्थितानामसमावादिति सह तल्लक्षणैश्च तेषां निराकृतत्वादिति विशेषः, आधेयज्ञानभेदनिमित्तनियमनिराकरणद्वारेण चेति ।

यदपि कुण्डदधिसंयोगवद्द्रव्यादीनामाधाराधेयनियम इत्युक्तं तदपि नैव, कुण्डदध्या- 5 धाराधेयभावसमवायानामप्येकत्वात् तदवस्थः सङ्करदोषः, यद्यसङ्करेण नियमेन चार्थो वयमेव स्पष्टतरं ब्रूमः, समवायनिमित्तस्य तत्त्वस्य स्वत एवात्मप्रतिलम्भः, तयोश्च लोकसिद्धिश्च भेदः स्ववृत्तिप्रतिलम्भादेव, दधिकुण्डयोर्लोकसिद्धिवभेदाभावात् कारकशक्तित एव तु प्रतिपद्यते भेदसिद्धिः, तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्य, आधेयशक्तिर्दध्न इत्यसङ्कीर्ण आधाराधेयनियम इति, अवश्यञ्चैतदेवं त्वयाऽपि प्रतिपत्तव्यं यथा त्वमेवात्र न समानत्वाद् 10 इत्युत्तरमात्थ, समवायस्यैकत्वेऽपि कारकशक्तेरेव नियममेव इत्युत्तरमात्थ द्रव्यत्वादिसमवायो न सर्वत्र किन्तु क्वचित्क्वचिदेवेति ।

यदपीत्यादि, यदपि परेणोक्तं यथा कुण्डदधिसंयोगे दध्येवाधेयं कुण्डमेवाधार इति नियमस्तथा द्रव्यमेवाधारो गुणकर्मण्येवाधेयम् द्रव्यगुणकर्माण्येवाधारो द्रव्यत्वगुणत्वकर्मत्वान्येवाधेयानीति तदपि नैव कुण्डदध्याधाराधेयभावसमवायानामप्येकत्वात्—तत्रापि स्वस्वभावेनाधारयोः कुण्डदध्नोराधेययोश्च 15 कुण्डत्वदधित्वयोस्तयोः, द्रव्यत्वादीनाञ्च तत्त्वानां ये समवायास्तेषामप्येकत्वात् समयमेवोपचरितमेवाभ्यामास्तेनैकत्वात् पूर्वोक्तविधिना तदवस्थः सङ्करदोषः, यद्यसङ्करेण नियमेन चार्थः वयमेव स्पष्टतरं ब्रूमः तद्यथा—समवायनिमित्तस्येत्यादि—समवायस्य निमित्तं तत्त्वं कुण्डदध्नोः कुण्डत्वं दधित्वञ्च तस्य स्वत

समवायस्यैकत्वे परार्थेना द्रव्यादीनां व्यवस्थाभावे तत्त्वेन न सम्बन्धसमभावात् एवं द्रव्येषु द्रव्यत्वं गुणेषु गुणत्वं कर्मसु कर्मत्वं स्यादित्यत अतो द्रव्यगुणकर्मणामिति द्रव्यादीनां समवैकत्वेन व्यवस्थानामभावादित्यर्थं । द्रव्यादीनां पूर्वं निरा- 20 कृतानां पुनरत्र कथं निराकरणमित्यत्राह—तत्रेति पूर्वत्रेत्यर्थः—तयोर्गुणकर्मणोरित्यादिग्रन्थेन व्यवस्थितलक्षणाभावाद्व्यावर्तन उक्तः इह तु अनेन वाक्येन व्यवस्थितानां तल्लक्षणैः सह असमावेशान्न तत्त्वात्मकत्वाद्येन [illegible] व्यवस्थानुपपत्तिरिति द्रव्यादयो निराकृता एवमाधेयज्ञानभेदेन कोऽपि नियम तस्यापि निराकरणात् त निराकृता इत्यर्थः । अथ कुण्डदध्नो संयोगाविशेषेऽपि कुण्डमेवाधारो न दधीत्याधाराधेयनियमस्तथा [illegible]द्रव्यत्वादीनामाधाराधेयभावनियमः यद्वि द्रव्येषु द्रव्यत्वम् गुणत्वकर्मत्वादयनियम्यन्ते तथा [illegible] प्रति पूर्वपक्ष इत्याह—यदपीति । व्याख्याति—यदेति स्पष्टा 25 व्याख्या । एवं हेतुमाह—कुण्डदध्याधारेति समवाय एक तथा च कुण्डत्वदधित्वद्रव्यत्वादीनां समवायस्यैकत्वात् सर्वं कुण्डदधिव्यादिकं वस्तुत एकमेव भेदस्तु [illegible] औपचारिक इति [illegible] तदवस्थमेवेति [illegible] दृष्टान्तेन दार्ष्टान्तिकस्य व्यवस्था कृत इति भावः । यद्यसङ्करेण नियमेन चार्थः तर्हि वयं ब्रूमः न [illegible] किन्तु तद्विधं विज्ञानमित्याह—यद्यसङ्करेणेति । अधुना स्पष्टयति समवायस्येति यदि समवायस्य तत्त्वं सामान्यं दधित्वकुण्डत्वादिकं स्वत एवात्मानं प्रतिलभते—आत्मानं दधिकुण्डादिकं प्रति प्राप्नोति न तु 30 समवायात्, त च कुण्डदध्नोर्भेदः [illegible] भिन्ने तयोः प्रतिलम्भादिति भावः । दधिकुण्डयोस्तु लोकेन यथा भेदो गृह्यते तथा एव न तु तत्त्वभेदः [illegible] तत एव भेदस्य भेदो भवतु, तादृशस्तु भेदो नास्ति दधिकुण्डयोः संयोगस्यैकत्वात् भेदस्तु [illegible] औपचारिक कारकशक्तिभेदात्, एतत्र [illegible] वा नास्ति

एवास्मप्रतिबन्धः, तयोश्च लोकसिद्धिवदेव प्रवृत्तिप्रतिबन्धादेव स्वमतेऽप्याकाशक्षणयोरिव दधिकुण्डयो-र्लोकेन प्रसिद्धो भेदो नार्थान्तरात् तस्मात् ततो वयमपि लोकनिर्देशं मा बोधामेति लोकसिद्धिवद् भेदाभावात् कारकशक्तिः एव तु प्रतिपद्यते भेदसिद्धि[१]संयोगपरिणामकृत सम्बन्धैकत्वमनादृत्य, तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्याधेयशक्तिर्दध्न इति नियममसङ्कीर्णमाचक्ष्महे, अस्यार्थस्य भावनार्थो

5 गत्यार्थो यावदाधाराधेयनियम इति अथवं चैवदेव त्वया समवायमपि कल्पयित्वा एतदेव प्रतिपत्तव्यं त्वद्वचनप्रामाण्यादेव यथा त्वमेवात्रेति, संयोगैकत्वेऽपि कारकशक्तिरेव कुण्डदध्नोराधाराधेयनियमो भिन्न इत्युत्तरमात्थ किं तदुत्तरमिति चेदुच्यते न समानत्वादिति, तथेहापि समानमुत्तरं समवायैकत्वेऽपि कारकशक्तेरेव नियमभेदः, तस्मात्त्वा गत्यार्थो यावत् कर्मभिरेवेति ।

यदुच्यते व्यंग्यव्यञ्जकत्वभेदाद्द्रव्यद्रव्यत्वादीनां भेदो घटप्रदीपवत् तस्य चैकत्वेऽपीति

10 न सङ्करप्रसङ्ग इति, एतच्च व्यङ्ग्यव्यञ्जकत्वं द्रव्यद्रव्यत्वादेस्तदा स्याद्यदि प्रदीपघटदृष्टान्तवत् पृथक् सिद्धं स्यात् न तु तदात्मभेदनियमः, सिद्धे हि तदाधाराधेयभेदनियमोऽपि स्यात्, ततो न दृष्टान्तसाधर्म्यं भवत एतदिति नासङ्करः स्यादेवम् समवायस्यैकत्वेन व्यतिरेकनिय-मयोरभावात् तथा यदि य एव गुणकर्मभावाभ्यां सम्बन्धः स एव द्रव्यस्यापीति प्राप्त गुण-कर्मणोरपि द्रव्यत्वम् द्रव्यत्वाभिसम्बन्धाच्च तयोर्गुणकर्मभावविनिवृत्तिरिति सर्वं प्रपञ्चनीयं

15 यथास्वार्थमिति ।

यदुच्यते व्यङ्ग्यव्यञ्जकेत्यादि, व्यङ्ग्यव्यञ्जकत्वभेदाद् द्रव्यद्रव्यत्वादीनां भेदो घटप्र-दीपवदिति परिहारान्तरं तस्य च सङ्करप्रसङ्ग इति वैशेषिकस्य, आचार्येण पुनः एतच्च व्यङ्ग्यव्यञ्ज-केत्यादि स्यादेतदेव यदि दार्ष्टान्तिकस्य [द्रव्य]द्रव्यत्वादर्थान्तरसम्बन्धकत्वाभावः प्रदीपघटदृष्टान्तवत् पृथक् सिद्धः स्यात् न तु तदात्मभेदनियमः सिद्धे हि तदाधाराधेयभेदनियमोऽपि स्यात्, तदर्थोऽयमयं

---

20 एवात्मप्रतिबन्धात् [illegible] कर्मान्तरसम्बन्धात् [illegible] आधाराधेययोरदृष्ट्या नियम उपपद्यते इत्यत्रोच्यते- दधिकुण्डयोरिति दधिकुण्डयोरपि [illegible] लोकनिर्देशं मा बोधामेति [illegible] [illegible] लोकसिद्धिवदेव इत्युक्तमिति यदि ततो वयमपीति । कारकशक्तिरेव भवद्भिरपि [illegible] संयोगाविशिष्टत्वाधाराधेयभावनियमोऽभ्युपेयः तथा च समवायस्यापि [illegible] कारकशक्तिरेवाधाराधेयनियामिका किं [illegible] अभ्युपगन्तव्यमिति । यदेवमुक्तं [illegible] कर्ममिति-यथा त्वमेवात्रेति, एवं कारकशक्तिरेव

25 निर्दिष्टे [illegible] निर्दिशेति भावार्थः । [illegible] सङ्करप्रसङ्गे [illegible] वैशेषिकेण [illegible] आधाराधेयनियमा-भाव [illegible], कारकशक्तिराधाराधेयनियामिका [illegible] वैशेषिकेऽपि [illegible] नियममुपपादयितव्याद्-न समानत्वादिति। [illegible] [illegible] द्रव्यत्वाभिमानापि [illegible] तथा समवायस्यैकत्वेऽपि द्रव्यत्वादीनां [illegible] नियमो [illegible], [illegible] इति [illegible] यदुच्यत इति । [illegible] नियमात् सङ्कर इति [illegible], द्रव्यत्वादभिन्ना [illegible] च [illegible] नियम [illegible]

30 [illegible] एव [illegible] इति [illegible] न सङ्कर इति भावः । [illegible]-आचार्यस्तु [illegible] [illegible] [illegible] सत्, द्रव्यं द्रव्यत्वं न पृथक् सिद्धम् तदात्मत्वात्

---

१ डि. च 'नियमभावोपपत्तिरिति ।

यावद्यङ्गः स्यादेवमिति, तस्य हेतोरसिद्धिप्रतिपादनार्थमाह—समवायस्येत्यादि, यथोक्तमेवैतदाधाराधे-
यभेदनियमाभावस्य तुल्यत्वात् दृष्टान्तसाम्यं न भवत एवेति प्राग्विस्तरेण व्याख्यातार्थत्वात्, तदेवं
स्मारयति—तथा यदि च यथेत्यादि यावद्गुणकर्मभावविनिवृत्तिरिति यत्र—सर्वविकल्प प्रपञ्चनीयमिति
पूर्वोक्तार्थातिदेशः क्व—कुतः ? इति चेदुच्यते—अस्माद् ग्रन्थात् यथास्वार्थमिति—यो यः स्वार्थो यथा
स्वार्थं द्रव्यगुणकर्मद्रव्यत्वगुणत्वकर्मत्वसंयोगाद्यवस्थानचक्राण्यत्र व्याख्येयानि पूर्ववदिति । 5

यत्पुनरिदमाशङ्कितं समवायैकत्वं यत्नत्वव्यवहारेण विरुध्यत इति तदेवमेव ममापि प्रतिभाति यत्पुनरिदं प्रत्युच्यते, न आश्रयविशेषात्, भाववत्, अलक्तद्रव्यं तथा समवायस्यैकत्वेऽप्याश्रयाणां नानात्वादुपचारेण नानात्वव्यवहारो भविष्यतीति, इदं निर्मूलमेव, व्यङ्ग्यस्याऽऽधेयनियमादाश्रय एवासिद्धेः कुतस्तद्व्यङ्ग्यो व्यञ्जको वाऽऽधेयोऽर्थः ? कुतो वाऽऽश्रयाणां वैचित्र्यम् ? समवायैकत्वे षट्पदार्थनिवृत्तेः सुभावितत्वात्, अलक्तद्रव्यवदेकत्वात्,[1] समवायस्य भावस्य च अलक्तद्रव्येण साधर्म्याभावात्कुतो नानात्वोपचारः ? छायामात्रत्वाच्च अलक्तद्रव्यस्य, भावो वा कुत इत्यलमतिविकासिन्या सङ्कथया । 10

यत्पुनरिदमाशङ्कितमित्यादि, समवायैकत्वं यत्नत्वव्यवहारेण विरुध्यत इति यदाशङ्कितं त्वया तदेवमेव ममापि प्रतिभाति विरुध्यत एवेति यत्पुनरिदं प्रत्युच्यते—तदाशङ्कितस्योत्तरं वैशेषिकेण, न, आश्रयविशेषात्, भाववदित्यादि द्रव्यादिसद्भावस्य दृष्टान्तः, मणिदृष्टान्तश्च अलक्तद्रव्यं, तथा 15
समवायस्यैकत्वेऽपीत्यादिदार्ष्टान्तिकं गतार्थं यावद् भविष्यतीति, अस्योत्तरमाहाचार्यः—इदं निर्मूलमेव
व्यङ्ग्यस्याऽऽधेयनियमात् पूर्वोक्तन्यायेन एवासिद्धो व्यञ्जको व्यङ्ग्यो वा त्वदिष्टः कुतस्तद्व्यङ्ग्यो व्यञ्जको वा

तस्य कथं प्रतिपत्तव्यम् व्याप्यव्यापकव्यवस्थितिर्यतो भेद, ततो तुल्यत्वात्, तस्माच्च दृष्टान्तस्तुल्य इति सङ्करो दुर्वार एवेति भाव । व्याप्यव्यापकभेदमसिद्धं वर्णयन्नाह—तस्य हेतोरिति समवाये हि एक एवः तथा सति द्रव्यत्वसमवायो द्रव्यस्यैव न तु गुणादेरिति नियमो व्यतिरेकेण न भवत एव तदभावे चाधाराधेयभावनियमाभावः तदेवं व्याप्यव्यापकत्वाच्च न 20
दृष्टान्तसाधर्म्यमिति भाव । पूर्वोक्तमेव समवायैकत्वप्रयुक्तमार्गदूषणं स्मारयति तथा यदि च यथेत्यादि । अतिदेशमपनयन्नाह-
विभाग—क्व कुत इति व्याख्यातार्थप्रकारेणैव यावद्गुणकर्मभावनिवृत्तिरिति द्रव्यगुणकर्मसमवायचक्राणि पूर्ववदेव व्याख्येया-
नीत्यर्थः । ननु समवाये यद्येकत्वं तर्हि द्रव्यसमवायविशेषणाच्चोऽयं गुणसमवायोऽयं कर्मसमवायोऽयं द्रव्यत्वादिसमवाय इति विशेष-
व्यवहार इवेदं समवाये यत्नत्वव्यवहारः, एकत्वयत्नत्वयोर्विरोधादिति वैशेषिकेणाऽऽशङ्क्य आश्रयाश्रयभेदप्रयुक्तो यत्न-
त्वादेव समवाये यत्नत्वव्यवहार औपचारिको न तु वास्तविक एकत्वात्तस्य, यथा सत्तायाः एकत्वेऽपि द्रव्यस्येयं सत्ता 25
गुणस्येयं सत्ता कर्मण एषा सतीति वैशिष्ट्योपचारः यत्र तु नानात्वाभ्यन्तरो यथा अलक्ताभावस्य, न तत्र अलक्तद्रव्या-
भेदस्योपचार भिन्नत्वेनस्योपचार एवेति समाश्रितम्, तत्रायमर्थ आह तदभिमतत्वो विरोधस्य. न युक्त एकत्वात् समवाय—यत्पुनरि-
दमिति । व्याचष्टे—समवायैकत्वमिति समानाभिमतत्वात् समवायस्यैकत्वात् यदि समानाभिमत एव तर्हि सम्बन्ध
समवाय एको न स्वरूपे वा समानाभिमत एवं न स्यात् विरोधादिति यदाशङ्कितं तदुच्यतेऽपि भावः । वैशेषिकेणोक्तमुत्तरं
निराकुर्वन्नाह—यत् पुनरिदमिति आश्रयनिमित्ताभेदेऽपि समवाय एकत्वाद् नानात्वोपचार यथा सत्ताया आश्रयो द्रव्यादयः 30
व्यापकत्वात् एवं व्यापका द्रव्यादीन भेदात् द्रव्यविशिष्टा सत्ता गुणविशिष्टा सत्ता कर्मविशिष्टा सतीति त्रिधा व्यपदेश
औपचारिकः यथा चाऽऽश्रयभेदाभावेन अलक्तद्रव्यानेकत्वप्रतिभासेऽपि एकत्वेनोपचर्यते तथा समवायेऽपि यत्नत्वोपचार
औपचारिक एवेति भावः । एतदुक्तं निराचष्टे—इदं निर्मूलमेवेति व्याख्यानं निमित्त आश्रय एवासिद्धः द्रव्यद्रव्यत्वादेराधारादेः

1 इदं वाक्यं मि प्रती नास्ति । २ ख क्ष. व्याप्यव्यापकाधाराधेयनियमात् ।

भावेषोऽर्थः ? कुतो वाऽऽश्रयाणां नैमित्तम् ? समवायैकत्वे यद्यपदार्थमितृवेः सुमपश्चितत्वात् अजकप-मूबत्-व्योमचन्द्रपरैकत्वात् समवायस्य भावस्य च सत्ताख्यस्य वकपर्मेण सह साधर्म्याभावात् कुतो नान्यत्वोपचारः ? सामासामत्वाच वकपमूस्य यहुत्वाद्य भावो वा कुतः ? भावोऽपि द्रव्यादिव्यतिरिक्तो नास्त्येवैकः तन्मूलत्वात्रेत्सेतत्कमतिविरुद्धसिम्या सङ्गमय ।

5 एव समावसरसम्बन्धसद्भावमेव नानिवैशेषिकमतनिराकरणमपदो नैश्यायातमिति दर्शयति—

एवमेतदुभयमुभयभागिस्यस्य नयस्य स्वरूपम्, यत्तत्सामान्यं तदपि विधीयते नियम्यते च, योऽपि विशेषः सोऽपि विधीयते नियम्यते च, सामान्यं भावः प्रकृत्यर्थः यत्तयेन भूयते सा सत्ता भू सत्तायामिति पाठात् सामान्यम्, विशेषोऽपि प्रत्ययार्थः सः, तस्यैव भवितृत्वयाभिप्रत्ययार्थत्वात्, योऽसौ भवति स विशेषः सामान्यमपि भवनात्मकत्वात् भवन 10 सामान्यमन्तरेण तस्याकर्तृत्वात् स एव प्रकृत्यर्थानतिक्रमेण वृत्तः ।

एवमेतदित्यादि, उभयमुभयभागिनस्य नयस्य स्वरूपम् यत्तत्सामान्यं तदपि विधीयते नियम्यते च योऽपि विशेषः सोऽपि विधीयते नियम्यते चेति, तद्व्याचष्टेऽक्षरार्थं प्रदर्शयन् प्रकृतिप्रत्ययार्थौ सामान्य भावः प्रकृत्यर्थः, तद्दर्शयति—यत्तयेन भूयते सा सत्ता, भू सत्तायामिति(धातुपाठे १) पाठात् सामान्यम् तत् किं प्रकृत्यर्थमात्रमेव ? नेत्युच्यते—विशेषोऽपि प्रत्ययार्थः सः, तस्यैव भवितृत्वेनाभिप्रत्ययार्थत्वात्, 15 स एव प्रकृत्यर्थः प्रत्ययार्थोऽपीत्युक्तः योऽसौ भवति कर्तृत्वाभिप्रत्ययार्थः स विशेषः सामान्यमपि भवति सत्ता भावः भवनात्मकत्वात् भवनसामान्यमन्तरेण तस्याकर्तृत्वादभवितृत्वात् स एव प्रत्ययार्थः प्रकृत्यर्थानतिक्रमेण वृत्त इति ।

भावस्य पूर्वं निषिद्धत्वात् [illegible] समवायैकत्वे हि पदार्थकदम्बस्य भावस्येव समवायस्य [illegible] । एवं समवायस्य [illegible] निरस्ते [illegible] दर्शयति—एवमेतदिति सामान्य 20 विशेषयोः सामान्यविशेषात्मकस्य [illegible] दर्शयति । तत्कथं व्याचष्टे—यत्तत्सामान्यमिति सामान्यं प्रवर्तते निवर्तते च विशेषोऽपि प्रवर्तते निवर्तते चेत्यर्थः । तत् [illegible] दर्शयति—सामान्यं भाव इति भवनं प्रकृत्यर्थः [illegible] प्रत्ययार्थः [illegible] सामान्यमनुप्रवृत्तिधर्मत्वात्, तदेव स्पष्टयते [illegible] [illegible] भवनं सामान्यं सत्ता [illegible] इति [illegible] सामान्यं [illegible] । सा किं केवलं प्रकृत्यर्थः [illegible] तस्या [illegible]—विशेषोऽपीति 25 प्रत्ययार्थः [illegible] सामान्यस्य प्रत्ययार्थोऽपीति भावः । हेतुमाह तस्यैवेति [illegible] । भवति भावः [illegible] [illegible] च भावे [illegible] इति [illegible] विभागात् [illegible] विशेषोऽपि [illegible] सामान्यं प्रकृत्यर्थो भवतीति निरूपयति—योऽसाविति [illegible] योऽसौ कर्तृत्वाभिप्रत्ययार्थः [illegible] । एवं च सामान्यस्यैव [illegible] [illegible] कर्ता [illegible] भवति [illegible] विशेषोऽपि सामान्यं सत्ता भाव [illegible] प्रकृत्यर्थोऽपि सामान्यं विशेषोऽपि प्रत्ययार्थोऽपि विशेषः सामान्यमपीत्युभयमुभयात्मकमिति भावः । ननु विधिविधिनयवादिनः सामान्यविशेषयोरेकत्वात्-30 [illegible], [illegible] प्रत्ययानेऽपि [illegible], तस्मात् पौनरुक्त्यप्रसङ्गः स्यात्, तस्मात् [illegible] सामान्यविशेषयोर्विशेषणम् [illegible]

---

१ सि ×× । २ डा. प्रकृत्य(च)र्थं । ३ डा. भवितृत्वा ।

सामान्यत विधिविधिभिर्नियमवदेकत्वापत्तिः सामान्यविशेषयोरिष्टा सैषा खपुष्पन्यायेनैव लोक-स्यापत्तिरपीति, सा मा भूदिति सर्वविकल्पभावैकत्वमुद्धासेन विशेषलक्षणमनयोः पर्यायाविभिरुक्त-मनुकाम आह—

सामान्य प्रवृत्तिः द्रव्यमन्वयो धर्मी विधिर्भाव इति, विशेषोऽपि निवृत्तिः पर्यायोऽन्यत्वं धर्मो नियमोऽभाव इति, द्वावेतौ भावौ पूर्ववदेकमेवेदमित्येवविध भावमनापद्यमानौ सामान्यमपि 5 सामान्यं विशेषश्च भवतः, विशेषोऽपि विशेषः सामान्यञ्च भवतः, प्रवृत्तिः निवृत्तिरित्याद्युभ-यमन्योऽन्याविनाभाविभावः तस्य सतो भावः सत्ता, येन हि सता यथा भूयते सततनियमेनेति तमयोर्नियमो विधिश्च । यदि स्यात् खपुष्पवत् ।

सामान्य प्रवृत्तिरित्यादि यावद्विधिर्भाव इति तथा विशेषोऽपीत्यादि यावन्नियमोऽभाव इति द्वावेतौ भावौ—पर्यायमेवादेवद्रुमस्य पूर्ववत् विधिविध्यरविकल्पपुरुषादिवादवदेकमेवेदमित्येवविध भाव 10 मनापद्यमान सामान्यमपि सामान्य विशेषश्च भवतः, विशेषोऽपि विशेषः सामान्यञ्च भवत इति तद् दर्शयति—प्रवृत्तिर्निवृत्तिरित्याद्युभयमन्योऽन्याविनाभाविभावो वस्त्वित्यर्थः, भावाभावस्य भवन तद्वस्तु, तस्य सतो भावः सत्ता येन सता भूयते सततनियमेनेति प्रकृतिप्रत्ययार्थयोरुभयोर्नियमो विधिश्च, तावेव दर्शयति—येनेति प्रत्ययार्थं यथेति प्रकृत्यर्थञ्च, येन हीत्यादि कर्त्रा क्रियायां नियतेन नियतायां भवनमाह, यदि स्यादित्यादि अन्यथाऽनिष्टापादन यावत् खपुष्पवदिति भवननियमेनास्मदभावो भवत उक्तः, तदभाव- 15 रणेन[?]भवितृनियमेन भवनास्मदभाव इत्येतदुभयमुभयत्र विधिर्नियमश्चेति सामान्येनोक्तम् ।

विशेष्यापि वक्ष्यति—

एव द्रव्यक्षेत्रकालभावैः घटपटघटान्तरगृहवहिःस्वपरक्षेत्रान्तरवर्तमानातीतानागतश्च

वर्णन्यारेण विधिविधिमतोर्द सर्वविकल्पात्मकं भावैकत्वमुदस्यन्नाह स्वाम्मतमिति सामान्यादेः पर्यायमाह—सामान्यं प्रवृत्तिरिति । विशेषस्य पर्यायमाह विशेषोऽपीति । द्वावेव पर्यायभेदतो द्विविधौ भावौ सामान्यविशेषरूपौ प्रत्येकमुभय- 20 रूपौ अत एव च विधिविधिमत्पुरुषनियत्यादिवादवदेकविधौ भवत इत्याह द्वावेतावित्ति । प्रवृत्तिरिति प्रवृत्तिर्निवृत्त्य-विनाभाविनी, निवृत्तिश्च प्रवृत्त्यविनाभाविनी एवञ्च प्रवृत्तिनिवृत्त्यात्मको भाव एवं द्रव्यं पर्यायाविनाभावि पर्यायश्च द्रव्याविना-भावी द्रव्यपर्यायात्मको भावः अन्वयः—एकत्वं तदन्यत्वाविनाभावि अन्यत्वमप्येकत्वाविनाभावि एकान्यत्वात्मको भावः धर्मी धर्माविनाभावी धर्मश्च धर्म्यविनाभावी धर्मिधर्मात्मको भाव विधिर्नियमाविनाभावी नियमो विध्यविनाभावी विधिनियमात्मको भाव भावोऽभावाविनाभावी अभावो भावाविनाभावी भावाभावात्मको भाव इति भाव । एवमुभयात्मकत्वेन वस्तु सद्रूपं 25 भवनात्मकत्वात् तथा च सत् येन रूपेण भवति तद्रूपं प्रकृत्यर्थः यो भवति स कर्ता प्रत्ययार्थः सततनियमेन भवति वस्त्विति नियमाविधिसमवायेनार्थम्—तस्य सत इति । भावार्थमाह—कर्त्रेति नियतो हि कर्ता नियतक्रियायां भवति नानियतक्रियायां भवति एवञ्च भवतो वस्तुन आत्मलाभो न यथा तथा किन्तु भवननियमेनेति सामान्यमपि सामान्यं विशेषश्च भवतः सविता-ऽपि भवितृनियमेन आत्मलाभं लभत इति विशेषोऽपि विशेषः सामान्यञ्च भवत इति भाव । इत्येवाह—भवननियमेनेति । अथ तदभावेन एव भावाभावात्मकमिति निदर्शनप्रदर्शनेन व्याचष्टे—एवमिति द्रव्यक्षेत्रकालभावरूपेण भवत 30

१ सि क्ष डा विधिनियमत । २ सि क्ष डा. पर्यायादिभिर्निर्दिश्य । ३ सि क्ष पूर्व च द्विविधविकल्प । ४ सि क्ष डा भवत्य । ५ सि. क्ष कर्ता । ६ सि क्ष यदि केनचित् ।

न्तरैः घटशिवकस्तूपकादिकपालादिपूर्वोत्तरभावैः वर्तमानयुगपदयुगपद्भाविभावभावान्त-
रैर्वा भावाभावाभ्यां भवतीति घटस्य सदसत्त्वम्, प्रतिवृत्तिवस्तुप्रवृत्तः घटादि मृदादिकारण-
मपेक्षते निर्विशेषत्वे भावाभावत्वेनाविशेषः कण्ठकपालादिभावाभावात्मना परस्परतश्चास्तु
भेदं प्रति वृत्तत्वादिति स्वावयवभेदेषु सदसत्त्वेन वृत्तिः, तद्भावाभावात्मको घटस्तदभावे न
5 भवति, तद्भावभावे च भवतीति, तथा घटपटादिद्रव्यक्षेत्रकालभावसत्ताया घटसामर्थ्येऽपि
न कश्चिद्विशेषः वस्तुत्वात्, असामान्यवत्, यथैव गुणाद्
न्यनावृत्तिभेदेषु विवक्षया चैव विशेष उभयोरपि तत्त्वात् ।

एष द्रव्यक्षेत्रेत्यादि, यावत् स[द]सत्त्वमिति, द्रव्यतो घटो भवभावात्मानुवृत्त्या पटादिव्यावृत्त्या
घटान्तरव्यावृत्त्या च भावाभावात्मको भवति, क्षेत्रतो गृहे घटो न बहिर्नान्यत्रेति स्वक्षेत्रे भवन् परक्षेत्रे
10 क्षेत्रान्तरे चाभवन् भवति, कालतो वर्तमाने काले भवन्नतीतानागतयोः कालान्तरयोरभवन्[भावतो घटा
वस्थायां घटत्वेन भवन्] शिवकस्तूपकादिभिः पूर्वैरुत्तरैश्च कपालादिभिरभवन्, शिवकावस्थायामेव वा
पिण्डस्तूपकाभ्यां पूर्वोत्तराभ्यामभवन् शिवकत्वेन भवन् भवतीत्युच्यते अथ वा भावतः शिवकादिभि-
राकारैर्भैमैः वर्तमानै[र]युगपद्भाविभिः युगपद्भाविभिश्च रूपरसादिभिर्भवन् भावान्तरैरयोगपद्भिश्चाभवन्
भवतीति सदसत्त्वमेव सर्वभावानां भावाभावात्मकत्वम्, अथवा प्रतिवृत्तिवस्तुप्रवृत्तेः—वस्तुनि वस्तुनि
15 वृत्तिः प्रतिवृत्ति घटादि मृदादिकारणमपेक्षते, आदिग्रहणात् पटादि तन्त्वाद्यपेक्षते, निर्विशेषत्व इति,
कारणान्तरानपेक्षत्वात् स्वकारणमपेक्षत्वाच्च भावाभावत्वेनाविशेषः कण्ठः स्वेनात्मना भवति, कपालाद्या-
त्मना न भवति कपालानि स्वात्मना भवन्ति न कण्ठाद्यात्मनेति भावाभावात्मना परस्परतश्च

भवति घटोत्पत्त्यादिरूपत्वेन न भवति इत्थं मृदो भावाभावरूपाभ्यां भवनं विज्ञेयम् इति सामान्यमपि तथात्वं
विशेष विशेषोऽपि तथैव विशेष सामान्यमेवेति दर्शयति द्रव्यत इति घटस्य यत् स्वरूपं तदेव द्रव्यं तद् दर्शयन्नाह,
20 तेन घटो भवति, पटादिस्वरूपं घटस्य परत्वं तेन च घटादि घटादिना भावान्तरेण व्यावृत्तोऽसौ न भवति, घटान्तरेणापि
विशेषेषु भेदेषु मध्ये यावतो घटो विवक्षितस्तत्त्वेन तावत्त्वादिना भवन् स घटान्तररूपत्वान्तरेण चाभवन् विशेषो भवति
भावाभावात्मकमिति दर्शयन् घटान्तरव्यावृत्त्या चेत्युक्तम् । क्षेत्रत इति आधार क्षेत्रम्, यथा गृहादि, तदाधारस्य घटो
क्षेत्रं यत्र एव वा प्रदेशान्तरं परक्षेत्रम्, स्वक्षेत्रे भवन् परक्षेत्रे चाभवन् भवतीति क्षेत्रतो भावाभावात्मकं वस्तु भवतीति
भावः । कालत इति व्यापत्तितदभिव्यक्तिः काल कालतः तदतिरिक्तः तदनन्तरम् परक्षणोत्पत्त्यादिः प्रतिनियतकाला-
25 त्मकतां वर्तमाने भवन् परकाले चाभवन् भवतीति भावः । भावत इति पर्यायो भावः क्रमभाविपर्यायापेक्षया वर्तमानविवक्षि-
तादिपर्यायापेक्षया घटो भवति पूर्वोत्तरभाविपर्यायापेक्षया च न भवतीति भावाभावात्मकं वस्तु इति भावः । सहक्रमभावि-
पर्यायभेदसर्वं भावभेदेन दर्शयन्नाह—अथ वेति शिवकादिपर्यायभावभवनभाविपर्यायेण रूपरसादिसहभाविपर्यायेण भवन्
च पिण्डाद्यतीतभाविना रूपरसादिपर्यायेण चाभवन् क्रमाक्रमभाविभिश्चाभवन् घटो भावाभावात्मकः तदेवं वस्तुमात्रं
विवक्षितमतीतमनागतं प्रतीत्योत्पन्नमेवरूपम्, अत एवासौ पदार्थो भेदं प्राप्नोति तथा सुवर्णात् सजातीयमन्यत्वान्तरात्, तथा
30 कालान्तरात् क्रमभाविभावात् तथा सहभाविभावान्तरात् भेदं प्राप्नोति. सहभाविभावान्तरेण भेदं दर्शयन्नाह —यदा घटस्तु
पार्थिवः तदा न जलादिसंभूतस्वात्मना भवन् रसाद्यात्मना च न भवति सोऽपि घटः क्वाथाद्युपयोगात्मना भवन् अनुपयो-
गात्मना च न भवतीति सर्वभावानां सहभाविपर्यायैर्भावत्वम् । इत्थं भावभावानपेक्षतया सर्वाणि वस्तूनि भावाभावात्मकत्वं
पुष्यन्ति तत्समर्थनायाह—अथ वेति वस्तुनि वस्तुनि वृत्तिः प्रतिवृत्ति, प्रतिवस्तुनियतं कार्येण हि भवेत्

---

१ सि. क वैसे भव इति । २ सि क प्र प्रतिपत्तिवत्तु । ३ सि भावाभावात्मना ।

[सत्त्व]सत्सु च भेद प्रति द्रव्यत्वादिति न्यायवद्भेदेषु सद[स]त्त्वेन वृत्तिः, तस्यार्थस्य भावना–तद्यथा-
भावात्मको घट इति–तदभाव न भवति–भावाभावाभावे न भवति भावाभावभाव एव च भवति–तद्भाव
एव भवतीत्यर्थः, एतस्यैवार्थस्य भावनार्थं साधनमाह–तथा घटपटादिद्रव्यक्षेत्रकालभावभावाभावसत्त्वासा-
त्त्वसामस्त्येऽपि न कश्चिद्विशेष इति प्रतिज्ञा घटपटघटान्तरेत्यादि द्रव्यक्षेत्रकालचातुर्विध्यस्य सदसत्त्वम-
सामस्त्येन भाविन सामस्त्येऽपि तथेति साध्यार्थः, वस्तुत्वादिति हेतुः, असामान्यवदिति दृष्टान्तः, यथैवेत्यादि 5
चातुर्विध्येन दृष्टान्तवर्णना गवाश्वौ यावद् गुणावृत्त्यनावृत्तिभेदाभ्यामिति, द्विगुणत्रिगुणकृष्णशुक्लत्वादिरावृत्तिः,
शुक्ल[ः]कृष्ण इत्यनावृत्तिः तत्रैकगुणसत्त्वं द्विगुणासत्त्व द्विगुणसत्त्वमेकगुणासत्त्वं शुक्लसत्त्व कृष्णासत्त्वं
कृष्णसत्त्वं शुक्लासत्त्वमित्यादिभावाभावात्मकत्वाविशेषे सामस्त्यासामस्त्यविशेष क इति चेदुच्यते–विषमया
चैव विशेष उभयोरपि सामस्त्यासामस्त्ययोः कस्मात्? तस्मात्–तद्भावस्यैव भावाभावत्व तथाभवत्वात्–
भावभावत्वात् विषमाविशेषादेवैव विशेषः, समस्तो घटोऽसमस्तः कण्ठकपालादिरित्यादिप्रागुक्त चातु 10
र्वर्ण्य सकलादेशवशाद्विकलादेशवशाच्च प्रतिपादनोपायत्वात् ।

एवं भावाभावात्मकत्वं सर्वस्य सकलादेशेन भावितम्, विकलादेशेन प्रत्येकं भावयिष्यामः, तत्र भावात्मकस्य तावत्—

तथा घटस्तावदस्त्येव, क्रियागुणव्यपदेशवत्त्वात्, पटरथवत् खपुष्पवैलक्षण्येन सर्वस-
र्वसमवायासत्त्वात्, योग्यस्यैव योग्येषु समवायात्, यथा रूपे घटोऽस्त्येव रूप वा तदाधारो 15

भेऽभयथा घटेऽस्त्येऽव प्रकृत्यर्थं घटादिसत्ता भवेद्भावाभावात्माऽपि घटादेः स्वविशेषः तथा च घटस्य योऽभयोऽप्रतिबद्धे
नित्य कस्य. तेनात्मना भवतीति यथात्मनो नान्यित्वे नित्य कथमन्यात्मना न भवतीति तेष्वभवत्सु परस्परत सत्त्वसत्त्व
चाभावविधे घटादेः भावाभावात्मकत्वस्य कथविद्भेदेन द्रव्येतरत्वधर्मेणापि सदसत्त्वेन तस्य सदसत्त्वम्, तथैव घटपटघटान्तरघटक-
मारैरेव घटादेः भावाभावात्मकत्वं केवलं न साध्यम् प्रकृतत्वं घटादिरूपेक्षत्वे भावाभावात्मकत्वपक्षेऽविशेषः स्यादिति
तात्पर्यं मत्वेति प्रतिभाति । एवं भावयति–तद्यथेति तस्मात् भावाभावात्मको घट इत्यर्थः तत्र प्रकारेण भावाभावात्मके 20
घट इति वा तत्प्रत्यायकेन भावाभावात्मके घट सामस्त्येन भावाभावात्मकत्वाभावे न भवति तेन भावाभावात्मकत्व एव
भवतीत्यर्थं । अस्यैवार्थस्यानुमानेन दर्शयति–तथा घटपटादीति यथा स्वद्रव्यक्षेत्रकालभावैः घटपटघटान्तर
पूर्वोत्तरपिण्डतद्भावादिरूपतद्विशिष्टव्यादिभिर्गुणादिभिर्भावाभावात्मकत्वं भावितं तथा सामस्त्येन घटोऽपि भावा
भावात्मकत्वेऽविशेषः वस्तुत्वात्, असामान्यवत्–विशेषवदित्यर्थः । रूपात्मना घटोऽस्ति रसाद्यात्मना नास्ति रूपादीनपि
घट शुक्लरूपेणास्ति कृष्णरूपेण नास्ति कृष्णरूपेण वाऽस्ति शुक्लरूपेण नास्ति, एकगुणोऽपि घट एकगुणत्वेनैवास्ति द्विगुण- 25
त्वादिना नास्ति, द्विगुणत्वेन नास्ति एकगुणत्वेन नास्तीत्येवं घटो भावाभावात्मा यथा तथा गवाश्वावपीति दृष्टान्तं धर्मानि-
चातुर्विध्येनेति द्रव्यक्षेत्रकालभावैरित्यर्थः । ननु गवाश्वादिष्वत्र च भावाभावात्मकत्वे यदि न कश्चिद्विशेषस्तर्हि सामस्त्यासा-
मस्त्ययोः कथमित्याह–विषमयेति यद्यपि सामान्यं विशेषोऽपि विशेष सामान्यमपीति न प्रतिनियतत्वं सामस्त्यासामस्त्ययो
एकगुणद्विगुणत्वात् तथापि विषमैव सामस्त्यासामस्त्यविशेष अयं घटः समस्तोऽयं कपालकण्ठादिरसमस्त इत्यादि परस्परा-
पेक्षया विषमायामेव तयो सामस्त्यासामस्त्यकल्पनात्, न देशान्तरे घट समस्त एव कपालादिरसमस्त एव अन्यापरापेक्षाया 30
तयोरपि समत्वाभ्युपगमात् सर्वस्यापि वस्तुनोऽनेकात्मात्मकत्वेन तत्स्वीकारस्य विषमायामवस्थायामेवाद सकलादेश विकला-
देशयो च वस्तुन प्रतिपादन एव तदुपयोगात्, तत्र प्रमाणप्रतिपाद्यानन्तधर्मात्मकवस्तुन एकधर्मावगमद्वारेण द्रव्यार्थिकाद्यन्यतमनय-
वशात् कालादिभिरभेदवृत्त्या पर्यायार्थिकाद्यन्यतमवशात् अभेदोपचारेण वा यौगपद्येन प्रतिपादकं वच सकलादेश भेदप्राधान्याद् भेदोपचाराद्वा
तथा प्रतिपादकं वचनं विकलादेश इति । अत्र विकलादेशेन प्रत्येकं घटादेर्भावाभावात्मकत्वं भावयत–तथा घट इति । घटस्तावदे-

वा एकैकस्मिन् वृत्तत्वात्, अथैव न स्यात्ततोऽत्यन्तसत्त्वेनैवापद्यते सिकतास्विवाविद्यमानं तैलम्, अनिष्टमेतच्चैवम् रूपादीनां प्रत्येकं सत्त्वात्, परस्परं व्यावृत्तात्मत्वाच्च रूपादयः सन्ति न च तथास्थितो घटो न भवति, तयोरितरेतराभूतयोराधारभूतस्य वा घटभावात् असामस्त्येन वा भावाभावात्मको घट इति ।

5 (तथेति) तथा भवत्यापन्नत्वेन, क्रियागुणव्यपदेशाभावात्–उदकाद्याहरणं क्रिया गुणो रूपादि व्यपदेशो लिङ्गं हेतुरपदेशो लिङ्गमित्यादि शब्दो वा घटत्वमविति भावात्मकत्वे दृष्टान्तः, वस्तुत्ववैलक्षण्येन–वैधर्म्येण सर्वसर्वसमवायासत्त्वादिति भावनाहेतुः, न हि सर्वं सर्वत्र समवैति तन्तुषु घटः कपालेषु वा पटः, तस्मात् सर्वसर्वसमवायासत्त्वात् योग्यस्यैव योग्येषु समवायात् अस्त्येवेति वर्तते, यथा रूपे घटः–गुणसमुदायभावदर्शनेन, रूपं चेति गुणमात्रभावे तदभावे चैकवचनविचारे, यथा
10 रूपे घटोऽस्त्येवेत्यादि तथा रसादिष्वपि भावनीयम्, एकैकस्मिन् वृत्तत्वात् अथ पुनरेव न स्यात्–घटत्वादिसाधर्म्येण वस्तुत्ववैलक्षण्येन एकैकस्मिन् सिकतास्विव तैलं ततोऽत्यन्तसत्त्वेनैवापद्यते किमिव ! सिकतास्विवाविद्यमानम्–यथा सिकतासु प्रत्येकं समुदायेऽपि तैलं नास्त्येव तथा घटो रूपादावेकैकस्मिन्नसत्त्वात् समस्तेऽपि अनिष्टमेतत् एवं सामस्त्येन घटापत्तित्वं रूपादीनां प्रत्येकं सत्त्वात्, इतरथा रूपघटोऽपि रूप स्यात् रूपादिसत्त्वात् न च रूपघटोऽपि रूपं भवति रूपं वा रसघटो भवति इष्यमित्थं
15 त्वात् यस्माद्रूपमेव रूपं रस एव रसो भवति नेतरभावमापद्यते तस्माद्रूपादयः सन्ति, एवं तर्हि रूपादिमात्रलाभ घट इति स्यादाशङ्का सा मा भूत्–न च तथास्थितो घटो न भवति–यथा परस्परव्यावृ

उदकाद्याहरणमिति उदकं क्रियागुणव्यपदेशानां सद्भावात् भावात्मकत्वम्, यदि वस्तुत्वं [illegible] क्रियागुणव्यपदेशाः सन्ति तस्मात् भावात्मकं तत्, कारणं क्रियावत्, तस्मात् ते सन्तीति भावः । ननु [illegible] भावात्मकता [illegible] सर्वैरात्मकत्वेन भावनामाह–सर्वसर्वेति [illegible] एव सर्वं सर्वत्र न समवैति, अत च [illegible] तथा एव योग्यं
20 योग्य एव समवैतीत्यत्र भावात्मकमिति भावः । एतमर्थेन निदर्शनमाह–यथा रूप इति, गुणसमुदायो द्रव्यमिति [illegible] द्रव्यलक्षणम् [illegible] एव [illegible] समुदायात्मा घटः [illegible] प्रत्येकं रूपादौ वर्तते तथा रसेऽपि रूपं न [illegible] [illegible] प्रत्येकं रूपादिषु [illegible] एवं [illegible] प्रत्येकं घट एव वर्तते एवं [illegible] [illegible] भावात्मकत्वं घटस्येति भावः । यदि प्रत्येकं [illegible] न वर्तते तदा [illegible] यथा सिकतासु तैलं प्रत्येकमसत्त्वात् [illegible] [illegible] [illegible] वस्तुत्ववैलक्षण्येन [illegible] प्रत्येकं तैलस्य [illegible] न विद्यते घटोऽपि तर्हि नासौ [illegible]
25 अथ पुनरिति यथा तैलं प्रत्येकं सिकतासु समुदाये च नास्ति तथा घटः प्रत्येकं रूपाद्यभावे समुदायेऽप्यसत्त्वान्नैव [illegible] प्रत्येकमिव [illegible], तस्मात् प्रत्येकमसत्त्वे एवं सामस्त्येन [illegible] भावः । एतमर्थमनन्यसामस्त्येन भावयति–एवमिति पुनः एवं सामस्त्येन घटापत्तित्वमनिष्टमित्याह रूपादीनामिति [illegible] रूपादयः प्रत्येकं [illegible] यदि हि ते प्रत्येकं [illegible] न भवेयुः तर्हि तथा [illegible] न स्यात् [illegible] न रूपस्य रूपत्वं कुतो रसस्यापि न [illegible] रूपस्य वा [illegible] । यथा च यथा रूपमेव रूपं भवति न रसः रस एव च रसो भवति न रूपमिति परस्पर
30 व्यावृत्तात्मनां [illegible] रूपादीनां [illegible] सत्त्वं भवति, रूपरसादीनां [illegible] भावात्, प्रत्येकं रूपादीनामेव वा [illegible] रूपादीनामाधारस्य वा घटत्वात्, तस्मात् रूपादिष्वपि प्रत्येकं घट एव [illegible] [illegible] [illegible] न [illegible] भावः । प्रत्येकमसत्त्वे दोषमाह–इतरथेति । एवं रूपस्य परस्परव्यावृत्तात्मत्वं प्रत्येकं [illegible] तथा [illegible]–न च तथास्थितावित्ति । तस्मात् असामस्त्येनापि घटो भावात्मक

घात्मत्वे सत्यपि रूपादयो भवन्तीति स्थितिः, तथा स्थितिः, एव स्थितौ तथा घटोऽपि भवति, न न भवति रूप-रसयोर्भेदाभावात् तयोरितरेतराभूतयोरेव घटत्वात् तयोराधारभूतयोर्वा घटत्वात्, तदुपनयति—प्रसामस्त्येन वा भावाभावात्मक एव घट इति ।

ननु घटरूपादिवत् पृथिव्यपि मृदादिर्विशेषः, यथा स्वाधारेषु घटो भवति रूपादय एव वा, न निर्मूलः तथा पृथिव्यपि मृदादिषु तदात्मिका वा तस्या एव ते विशेषाः, नाभावः, 5 इतरथा निर्मूलत्वाद्घटस्य रूपादीनाञ्चासत्त्वं खपुष्पवत्, न चैतदिष्टम्, तथा च रूपादयो मृदादयश्च भावविशेषा एव, एकभवनात्मकत्वात्, घटपटत्वात्मवत्, न चैवमविशेषः, तद्विशेष एव विशेषः पृथिवीसामान्ये तस्येयोर्द्ध्वविस्तृततरत्वादिः घटोऽपि मृदेकभवनात्मकाकारविशेषो भाव एव, न पटाद्यभाव इति ।

ननु घटेत्यादि, वैशेषिको विशेषं भावात्मकमेव वाञ्छन् न्यायस्था मक विशेष मिराकुर्वन्नाह—यथेत्यादि 10 त्यादि, स्वाधारेषु घटो भवति, रूपादय एव वा, सिद्धान्ताम्बरदर्शनेन, घटो न निर्मूलः तथा पृथिव्यपि मृदादिषु—मृदश्मसिकताशोषभस्मपुष्पगुल्मलतावनस्पतिवीरुधादिषु तदात्मिका[वा], तस्या एव ते विशेषाः रूपादय इव घटस्य, नाभावो विशेषः इतरथा निर्मूलत्वादभावविशेषत्वे घटस्य रूपादीनाञ्चासत्त्वमापन्नम्, खपुष्पवत्, न च तदिष्टम् एव न्यायात् रूपादयो मृदादयश्च घटस्य पृथिव्याश्च विशेषो भाव इत्युक्तम्, तथा चेमानि भावविशेषत्वमावनाम यो यावद् विस्तृततरत्वादिः, एकभवनात्मकत्वादिति हेतुः—एकमेव 15 भवनमेकस्यैव वा भवनमात्माऽस्येति विग्रहः, घटेकभवनात्मकं तथाभावविशेषः दृष्टान्तो घटपटत्वात्म वत्—यथा घट एव घटत्वात्मा नान्यत् खपुष्पादिवत् स्यान्मतमविशेषस्तर्हि प्राप्तः एकभवनात्मकत्वात् मृदादिरूपादीनाम् घटपटत्वात्मवत् अनिष्टञ्चैवमिति—अत्रोच्यते—न चैवमविशेषः घटत्वात्मन एव

एवं सर्वमपि—प्रसामस्त्येनैति । अत्र द्रव्यात्म एव पदार्थः, पृथिव्यादिभेदेन द्रव्याणि नव रूपादिभेदेन चतुर्विंशतिर्गुणा-स्तेषामन्यतीति एव द्रव्यादीनां वदन् वैशेषिको द्रव्यादीनामभ्यन्तरमेवान् भावरूपान् विशेषान् वाञ्छति न तु विशेषं व्यावृत्ति- 20 रूपम्, खपुष्पमिति यद्वा तन्मतमाशयमर्पयति—नन्विति । न्यायस्येति—वैशेषिक इति द्रव्यादयो न निराधारा भवन्ति खपुष्पादिवत्, किन्तु घटो यथा स्वाधारेषु भवति घटस्य स्व आधारः कुम्भकारकपालादी रूपादि गुणस्तद्द्रव्याद्योऽपि तथा समवायेन तु घटस्तो रूपादिरम्यो वा स्वाधारः तत्र भवति एवं द्रव्यस्याधारः पृथिव्यादिरेव पृथिव्याद्याधारो मृदादयः त एव तद्विशेषा न तु भावाभावो द्रव्यादेरभावो विशेषो भवितुमर्हति निर्मूलत्वप्रसङ्गात् द्रव्यादीनामप्यसत्त्वमापद्येत द्रव्यस्य मृदा-दिभावस्य भावत्व एव विशेषो नाभावरूप इति भाव । यथा घटस्य रूपादयो विशेषाः तथा पृथिव्या मृदादयो विशेषा 25 इत्याह—तस्या एवेति । यदि घटाभावो विशेष स्यात्तदा निर्मूलत्वाद्घटो न स्यात् खपुष्पादिवत्—इतरथेति । घटादीनां रूपादि भावरूपविशेषे हेतुमाह—एकभवनात्मकत्वादिति । एकमेकरूपत्वादभिन्नभवनात्मकत्वं द्वितीयस्तत्पुरुषस्तथा एकमनभिन्नभवनात्मकत्वं हेत्वर्थं घटत्वात्मवत्र भवन्ये हेतोर्विशेष्यान्तरत्र घटेत इति विशेषः । घटेति घटघटत्वात्मयोर्हि भवनं नान्यत् किं त्वेकमेवेति भावविशेष एव घटात्मा न तु खपुष्पादिवत्, एवं मृदादिरूपादीनामपि भाव । ननु एकभव-नात्मकौ घटघटत्वात्मानौ न परस्परं भिन्नौ किन्त्वेकौ तत्र एव च तयोर्न सामान्यविशेषतापि मृदादिरूपादीनामपि पृथिव्यादिव- 30 त्वाविशेषः प्रसज्यत इत्याशङ्कते—स्यान्मतमिति । समाधत्ते—न चैवमिति घटघटत्वात्मवदेकभवनात्मकत्वाविशेष्य-

1 सि क्ष. डे छा. यथा स्वाधिष्ठानेषु । २ सि. क्ष छा यथा निरधिष्ठानपिण्डादिः भव । ३ सि क्ष "रूपा-दतश्मीवरादिषु छा "रूपमत् तर्हि" । ४ सि क्ष एवम ।

वेषकालस्वरूपादिविशेषवशात्सम्येव भावविशेषदर्शनात्, अत आह–तद्विशेष एव विशेषो नाभावः, कोऽसौ पृथिव्यादिविशेष इति चेदुच्यते पृथिवीसामान्ये सत्येवाङ्कुरादिविशेषो नाभावः तथा घटोऽपि मृदेकभवनात्मकाकारविशेषो भाव एव न घटाभाव इति ।

अत्राचार्य आह तदभिमत भेदभवनात्मकस्य पृथिवीमूलेऽपि कुतो घटपटस्वात्मभावः ? कस्मात् ? तस्या अपि पृथिवीमूर्तेः–भूमिभवनस्य भावाभावात्मकत्वात्, तदभिदर्शयति–

ननु पृथिवीभवनमुदकाद्यभावभवनम्, एतदेवास्य मूलम्, तन्मूलत्वात् किमित्यस्या-सत्त्वापत्तिः ? ।

ननित्यादि पृथिवीभवनमुदकाद्यभावभवनं एतदेवास्य मूलं–अभावविशेषभवनम् तन्मूलत्वात् किमित्यस्यासत्त्वापत्तिः ? एवमभावविशेषरहितभावविशेषसिद्धौ मां प्रति न [1]विधिविधिदर्शनमतीत्यभिप्रायः ।

10 पर आह—

न तत्कोपन्यासवद्द्रव्यमिति भवनात् पृथिव्यादिद्रव्यभवनाविनाभावेनैव भवति, ननु द्रव्यमपि गुण इति न भवति, न सदिति भवनात्, सत्त्वभवनस्यास्याभावस्यैव विशेष इति पूर्ववत् यदि सविशेष भवति तर्हि सत्त्वाविशेषात् द्रव्यगुणकर्मणामव्यतिरेकात् कन विशेषहेतुना सदेव सर्वमिति भवति ? न द्रव्यमेव गुणकर्मणोरपि सद्भावात्, गुणकर्माभाव-15 द्रव्यं सदिति भवति गुणकर्मणी च तदभावात् भवतस्तु पटः ।

(भाति) न तत्कोपन्यासवत् द्रव्यमिति भवनात् पृथिवी द्रव्यभवनाविनाभावेनैव भवति, पृथिव्यु सर्वास्वपि पृथिव्युदकादिषु वा द्रव्यम् इतरथा निर्मूलत्वादित्यादिः स एव ग्रन्थो यथायोगं वाच्यः ।

एवमत विशेषस्य भावस्यैव सामान्यस्वात्मकत्वात् न हि तत्त्वो भिन्नम्, घटत्वस्यैव हि भावविशेषे पर्यायार्थत्वस्य लोकतस्तद्विशेषस्य स्वभावमात्रादेव घटत्वस्वभावस्यैव विशेषत्वाद्भावविशेष एव विशेषो भवति न त्वभावः पृथिव्यादिविशेषवि-20 त्वादिविशेषाभावेन भावविशेषत्वमिति भावः । घटोऽपि च भेदरूपत्वेन सामान्यस्योऽपि तु विशेषोऽभ्युपगत–तथा घटोऽपीति मृत्पृथिव्यादिसामान्यापेक्षया सामान्यमपि घटो घटो भावविशेष स्वस्वभावनियतभावस्वरूपत्वात्, न तु घटाभाव एव विशेष इति भावः । तदभिमतं मृद्भवनैकान्तरूपं तत् यतः पृथिवीभवनमेव न भवति कथं तर्हि घटपटस्वात्मभावः पृथिवीभवनं पृथिव्युदकाद्यभावभवनरूपमिति न पृथिव्याद्यभावभवनमन्तरेणेदं पृथिवीभवनमेवेति वाचितुं शक्यम्, तस्मात् पृथिवीभवनं उदकाद्यभावभवनं मूलं यस्य मूलं तस्य विशेषभवनमतो भाव एव विशेष इति कथं वक्तुं युक्तमित्यत्रैव आचार्योक्तं वैशेषिकमत-25 दूषणं दर्शयति तदभिमतमिति । व्याचष्टेऽपि प्रदर्शयति–नन्विति । अभावभवनस्यैव मूलत्वान्मूलस्याभावस्य विशेषे निर्मूलत्वादसत्त्वापत्तिरसत्त्वापत्तेः इति चेदुच्यते तथा तत्र युक्तम् अभावविशेषरहितभावस्य विशेषत्वासिद्धेः तदभिमतभावविशेषस्याभावविशेषात्मकत्वादिति भावः तद्दर्शयति–एतदेवेति । ननु विशेषस्य सामान्यभवनाविनाभावित्वेन एकभवनात्मकत्वात् विशेषाणां समुदायः तदात्मा तदाधारो वा द्रव्यं भवति यदि विशेषोऽभावः स्यात् तर्हि कथं द्रव्यं भाव न अभावसमुदायो-भावात्मा अभावाधारो वा द्रव्यं भवति तस्मान्निर्मूलत्वाभावो विशेष इति चाह–नेत्येतेति । एतदेव विवृणोति–नोत्कोपन्या-30 सवदिति । विशेषसामान्यरूपमेवाह–द्रव्यमिति अभावविशेषस्य द्रव्यस्य निर्मूलत्वं तु स्वात्मभावात्मकत्वान्न इति भावः । ननु द्रव्यमपि गुणो न भवतीत्यभवनरूपम्, अन्यथा गुण इति द्रव्यं न भवेत्, द्रव्यभवनम् तस्माद्द्रव्यभवनं गुणाभवनाविना-

---

1 मि ब. विधिविधिदर्शनमति ।

(न चेति) न च प्रधानेन विनोपसर्जनम्, अस्तीति वर्तते, भृत्यादिरिव स्वामिना, तस्मात्तद्- 8 भ्यनेयमपीति, स्वाम्यनुपकार्योपकारिभावेन विनापि भवति वस्त्विति, एतदपि न च प्रधानोपसर्जनभावे- नेत्यादि यावद्वस्तुप्रवृत्तिरिति, भोक्ता प्रधानं तदर्थं भोग्यमुपसर्जनम्, ओदनवर्द्धितकशरीरादिवत् आत्मनः शरीरमेव भोक्तृचेतनाधिष्ठितं तदर्थमुपसर्जनमाहारादि, आदिग्रहणात् वस्त्रशय्यासनगृहादि, आहारार्थं शस्यादि शस्यार्थं सलिलादि, यथैतद्भोक्तृभोग्यादि गुणप्रधानभावेनैव प्रवर्तते न विना तेनेति, दृश्यते च वस्तुनः प्रवृत्तिरिमप्रत्यक्षीकृतमिति तयोरेव–भावाभावयोः प्रधानोपसर्जनता–गुणप्रधानभावः, तृतीयस्य 10 त्वभावात्, इतिशब्दस्य हेत्वर्थत्वात्–एतस्मात् कारणादेवमवस्थिते कतरत् कर्म नियतमित्युभयनियम उच्यते तद्यथा–भवत् प्रधानं कर्तृसाधनं प्रत्ययार्थः, भाव उपसर्जनं भावसाधनं प्रकृत्यर्थः, को भवतीति चेदुच्यते– कर्ता–प्रकृत्यर्थविवक्षायामपि कर्त्रर्थप्राधान्यात् भावसाधनत्वेऽपि कर्त्रर्थ एवोच्यते, अतस्तत्प्रदर्शनार्थमाह– यथेन भूयते, किमुक्तं भवति ? विशेषः, स एव भवतीति भावः, प्रत्ययप्राधान्येन कर्तृवाचिना प्रत्ययेनोच्यते, पूर्वाप- पर्यायावस्थाभ्युत्पत्तिवत्, भवतीति चेदुच्यते–पयसौ भवति भवनमापद्यते भवनक्रियामनुभवति स्वरूपप्रतिलम्भे 15 गुणभूतं क्रियात्वं प्रतिपद्यमानोऽर्थो विपरिवर्तत इत्युक्तं भवति, किमिव ? नटपरमार्थनृपत्यवत्, यथा नटः परमार्थतो नट एव सन् राजवेषधारी राजक्रियाज्ञापनादिषु च वर्तमानो नटत्वप्रधानस्तद्विशेषपरमार्थः, एष घटाख्यो विशेषः जलधारणादिभवनेषु वर्तमानो घटत्वप्रधानः तद्विशेषपरमार्थो भवतीति ।

विना न पुरस्कर्तव्यस्योपसर्जनस्य प्रवृत्तिर्भवत्यतो, न चोपसर्जनत्वमिति वर्तमानी–न च प्रधानेनेति । उपकार्योपकारित्वमनुपकृतमनो- पसर्जनमन्ये न वस्तुत्वमापन्न एवमपक्ष समाचष्टे–स्वाम्यतमिति । उपकार्योपकारिभावमनुपकृतप्रधानोपसर्जनभावमन्तरेण वस्तु- 20 त्वमिति दर्शयन्तुं व्याख्यानपरम्परां दर्शयति–भोक्तेति भोक्ताऽऽत्मा प्रधानं शरीरमुपसर्जनं शरीरं प्रधानमाहारवस्त्रशय्यादिरुप- र्जनमाहारे प्रधाने धान्यादुपसर्जनं धान्यादि प्रधाने सलिलमुपसर्जनमित्येवं भावाभावयोर्गुणप्रधानभावेनैव प्रवृत्तिरर्थेनानुपकृता- मनुपकारत्वं वस्तुत्वं तच भावाभावरूपत्वाद् तद्व्यतिरिक्तवस्त्वभावादिति भावः । एवं प्रधानोपसर्जनभावत्वे सिद्धे प्रकृतिप्रत्ययार्थयो- रर्थवत्त्वं न तु पूर्वमवस्तुत्वमसाविति निरूपयति–कतरदिति । भवनक्रियया अनुभविता यो भावः स एव प्रधानभूतः प्रत्ययार्थः भविष्यद्रूपत्वं स भाव उपसर्जनं प्रकृत्यर्थ इति निरूपयति–भवदिति भवनक्रियाकर्ता भवतीति भाव इति व्युत्पत्तिविषयो भाव 25 इत्यत्र भूवात्वन्तरप्रत्ययार्थभूतो भावः प्रधानमिति भावः । भाव इति भवनक्रियाकर्तृत्वैकरूपं भूयत इति भवनमिति व्युत्पत्ति- विषयः भवनत्वं प्रतिपद्यमान एव सन् भवतीति भवति विशेषरूपतया भवतीति भवतीत्यस्मात् भूयत्वरूपो भाव उपसर्जनमिति भावः । एतमर्थमेव स्फुटीकरोति–को भवतीति । भावसाधनत्वेऽपि कर्तृत्वे व्याख्यानाह–नटेति । भवितैव भूयते न तु भवनेन

1 डा. सि. क डे वर्तितव्यत् घटिरामि । सि × × ।
द्वा न १० (१४)

भावना–

घटः कर्ता तेन कर्त्रा भवित्रा भूयते, स एव भवतीति भवति, न भवनेन कर्त्रा भूयते, उपसर्जनत्वात्, तेन भवनेन भूयते चेत् खपुष्पमपि भवेत्, यद्यभवन्नभवेत् खपुष्पमपि भवेत्, भवनस्य द्रव्यस्यापत्तेः।

5 (घट इति) घटः कर्ता तेन कर्त्रा भवित्रा भूयते, स एव भवतीति भवति, न भवनेन कर्त्रा भूयते–न भवनं घटो भवति उपसर्जनत्वात्–कर्तृ भवितुं न शक्नोति, तेन भवनेन भूयते चेत् खपुष्पमपि भवेत् यद्यभवन्नभवेत्–अभवित्रा भवनमनुभूयेत खपुष्पेणाप्यनुभूयेत, न ह्यभवितृत्वात् खपुष्पं भवनमनुभवति तथा भवनमभवितृत्वान्नानुभवतीत्यर्थः, कस्मान्नानुभवति भवनमिति चेदुच्यते–भवनस्य द्रव्यस्यापत्तेः द्रव्यशब्दस्य कर्तृप्रत्ययान्तत्वात्, द्रवतीति द्रव्य भव्यं 'कृत्यल्युटो बहुलम्' (पा० ३-३-११३)
10 कर्तरीति यत्प्रत्ययात् यदि भवति द्रव्यं स्यात्, अनिष्टं चैतदिति।

एवं तर्हि भवित्राऽप्यभवनात् खपुष्पवत् स्यादिति तुल्यमनिष्टापादनम्, यथा भवित्रा विना भवनं नास्ति तद्विशिष्टं दृष्टं तथा भवित्रापि भवनेन विना नास्ति तद्विशिष्टो दृष्टः, इत्येतच्च–

ननु भवनमविशेषं सामान्यमात्रं क्वचिदपि भवद् दृष्टम्, विशेषेण तु भवित्रा वशीकृत्य दृष्टम् सत्यमेतत्, वयमपि न ब्रूमो भवनं नास्त्येवेति, विशेषप्रधानं स्वोपसर्जनं तु दृष्टमिति।

15 (नन्विति) ननु भवनमविशेषं सामान्यमात्रं क्वचिदपि भवद् दृष्टम्, विशेषेण तु भवित्रा वशीकृतं दृष्टम् सत्यमेतत् वयमपि न ब्रूमो भवनं नास्त्येवेति, किं तर्हि? विशेषप्रधानं स्वोपसर्जनं तु दृष्टमिति न तुल्यत्वमनयोः।

क तद् दृश्यत इति चेदुच्यते–

क्रियापदवाचीह्विदेवदत्तादौ भ्रमरकम्पादिभूभ्रमविपाकादिभेदं भवनसामान्यं भेदप्रधानं
20 दृश्यते लोके विशेषेणेत्युभय नियम्यते सामान्यमुपसर्जनमेव विशेष एव प्रधानमिति, न यथा पूर्वम् इह स्वरूपं घटो विशेषो न पटादिभावः, स एव प्रधानं भावः, सामान्यं

भूयत इति भावना–घट इति। भाष्योक्ति–घटः कर्तेति भवितैव भवनमनुभवति प्रधानत्वात्, न तु भवनं भवितृ भवतु- पसर्जनत्वादिति भावः। भवितृभवनयोरित्यपि यदि भवनमनुभवेत् तर्हि खपुष्पमपि भवनमनुभवेदित्याह–तेन भवनेनेति। एतदेव व्याचष्टे–यदीति यदि भवनमपि भवनमनुभवेत् तर्हि तत्स्वमेव भवेत् द्रवतीति द्रव्यमिति कर्तृप्रत्ययान्तत्वात्।
25 भवितृत्वेऽपि सति–कस्मादिति। द्रव्यशब्दस्य कर्तृप्रत्ययान्तत्वे व्याकरणं प्रमाणयति–कृत्यल्युट इति। यथा भवनं भवतीति तद्वत् एवमभवनस्यापि भवितुर्भवनं न स्यादिति शङ्कते–एवं तर्हीति। व्याचष्टे यथा भवित्रेति, एवं भावाभावयोरुभयोरपि भावाभावाभ्यामिति पूर्वप्रस्तुतम् भवनं हि निर्विशेषं सामान्यमात्रं भवत् क्वचिदपि तु भवित्रा वशीकृतमेवेति न खपुष्पसमवायी भावः। व्याचष्टे–सत्यमेतदिति। सामान्यविशेषयोरुभयोः सामान्यविशेषतया निर्विशेषं विशिष्यते नियम्यते न तदा विशेषः विशेषो यदा विशिष्यते नियम्यते न तदा विशेषस्य प्राधान्यं स्यात्, न
30 चेदृशं सामान्यस्य प्राधान्यमित्याह–किं तर्हीति। विशेषस्यैव प्रधानत्वे दृष्टान्तमाह–क्रियापदेति। व्याची

क्रियाभवनं प्रकृत्यर्थ उपसर्जनमप्रधानम्, शिबिकावाहकयानेश्वरयानवदिति विशेषभवनमेव भावभवनमिति पर्यायनयभेदोऽयं सर्वद्रव्यार्थभवनप्रतिपक्षभूतः ।

क्रियाघटेत्यादि, क्रियायां कारक—कर्ता, घटे रूपादिः, मीढो मूषादिः, देवदत्तादौ पाण्यादिः, एते भेदा यस्य तद्भवनसामान्यं भेदप्रधान दृश्यते लोके विशेषेण—उपसर्जनीकृतमप्रधानेनेत्युभयम्, अस्मात् कारणात् विधिर्नियमश्च नियम्येते—सामान्यमुपसर्जनमेव विशेष एव प्रधानमिति विधिनियमौ नियतौ, न ५ यथा पूर्वत्र—उभयमेते व्यभिचारो वा, विधिर्विधीयते नियम्यते च, नियमो विधीयते नियम्यते चेति तुल्यकक्षौ, अनन्तरातीतनयमतवत् उभयथाऽभयं—भावोऽपि भावो भवत्यभावश्च, अभावोऽपि[अभावो]भावश्चेति, संकरदोषात्, इहेति, अस्मिन्नये तस्य घटो विशेषो न पटाद्यभावः, स एव—विशेषः प्रधानं भावः, सामान्यं क्रियाभवनं प्रकृत्यर्थं उपसर्जनमप्रधानम्, किमिव ? शिबिकावाहकयानेश्वरयानवत्—यथा शिबिकावाहकानां यानमीश्वरयानार्थत्वादप्रधानमतः शिबिकावाहका यान्तीति नोच्यन्ते तैरुह्यमान ईश्वर एव १० प्रधानत्वाद्यातीत्युच्यते तथा सामान्येन भवतापि अप्रधानेन भविता घट एव भवतीति प्राधान्यादुच्यते, तस्मान्निरूपितवस्तुस्वरूपमुपनयति—विशेषभवनमेव भावभवनमिति दार्ष्टान्तिकसर्वमित्यम्, पर्यायनयभेदोऽयम्, अस्य नयस्य पर्यायनयभेदत्वात् सर्वद्रव्यार्थभवनं प्रतिपक्षः तत्र विध्यादयो द्रव्यार्थभवनभेदा व्याख्याता दूषिताश्च 'समनन्तरानुलोमाः पूर्वविरुद्धाः निवृत्तिनिरनुशयाः' (　　) इति न्यायक्रमेण ते च द्रव्यार्थभेदाः । १५

नामस्थापनाद्रव्य[ार्थ]भवनयोरन्यान्याव्यपोर्व्याख्यानं कृत्वा दूषयिष्यति—

तत्र नामद्रव्यार्थभवनं तावत्—स्वरूपतो नमयति प्रह्वीकरोति सर्वमात्मस्वभावेनेति नाम कारणं द्रव्यं तदेव कार्यं नान्यत्, भवनात्मकत्वात्, स हि शब्दो भवनात्मकः, भवनान्यवस्थाविशेषाः, समादिवत् पुरुषस्य बालादिवत्ता, पिण्डादिरूपादिवत्ता घटस्य ।

क्रियायामिति क्रियाकारकाणां कारकस्य परिस्पन्दितेऽप्यपि विशिष्टत्वात् [illegible] कारकमेव एव प्रधानं क्रियासामान्यं २० उपसर्जनमेवेति भावः । अत एव सामान्यमुपसर्जनमेव विशेष एव तु प्रधानमिति नियम्यते न तु उभयमप्रधानं प्रधानमिति विधिनियमौ [illegible] निरूपयति—अस्मात्कारणादिति । अस्मिन्नय इति [illegible] घटो विशेषत्वेन रूपेण तथा [illegible] न विशेषत्वेन रूपेण [illegible] तत्रापि [illegible] एव प्रधानं तत्र सामान्यस्य [illegible] अत एव सामान्यमप्रधानं भविता विशेषेण [illegible] भावः । अत्र दृष्टान्तमाह शिबिकेति, [illegible] शिबिकावाहकानां [illegible] शिबिकावाहकानां [illegible] ते यान्तीति नोच्यन्ते [illegible] २५ ईश्वर एव यातीत्युच्यते तथा सामान्यं भवदपि अप्रधानत्वात् भवतीति नोच्यते किन्तु तेन भविता विशेष एव भवतीत्युच्यते प्राधान्यादिति भावः । निरूपितवस्तुस्वरूपं दार्ष्टान्तिकमर्थमित्युपनयतीत्याह—तस्मादिति । [illegible] प्राधान्येन प्रतिपत्तव्यः पर्यायनय[illegible] एव—पर्यायनयेति । एतस्य प्रतिपक्षभूतो द्रव्यार्थनयः । विध्यादयः, ते निरूपिता दूषिताश्चेत्याह—सर्वद्रव्यार्थेति । एतदभिधानं [illegible] चैतम् । नामस्थापनाद्रव्यभावरूपचतुर्विधभवनमध्ये नामस्थापनाद्रव्याणि द्रव्यार्थनयभेदरूपाणि तानि च न निरूपितानि निरूपितानि [illegible] अतस्तानि निरूपयति—तत्र ३०

१ सि क्ष. क्रियां घटेत्यादि । २ सि क्ष मना । ३ सि. क्ष [illegible] । ४ सि क्ष. °भवनं प्रतिपक्षभूतमिदा ।

(तयेति) तत्र नामद्रव्यार्थभवन तावत्—स्वरूपतो नमयति प्रह्वीकरोति सर्वमात्मतत्त्वभावेनेति नाम कारणं—करोतीति द्रव्यं—प्राग्व्याख्यातार्थं भवत एव भावव्यवनं तद्द्रव्यं कारणनामेत्युच्यते—भवनेन भवतव्यस्तिव विषयस्य कारणं प्रागुक्तपुरुषादिकारणवदेकमेव नाम–द्रव्यं, आह—करोतीति कारणमुक्तं कार्याभावात् किं क्रियते ? यत् कुर्वत् तत् कारणं स्यात्, तस्मात् कार्याभावात् कारणत्वाभावः, कारणत्वा-
5 भावात् तल्लक्षणाभावात् खपुष्पवदसदिति, उच्यते—तदेव कार्यं कारणमेव नाम कार्यं नासत्, कुतः ? भवनात्मकत्वात् स हि द्रव्यो भवनात्मकः, भवनात्मकत्वाविशेषाः, तत्प्रवितत् पुरुषस्य, वाह्यादिवाद, पिण्डादिरूपादिवाद घटस्य, तस्मात् स एव कारणं स्वात्मत्वाविशेषात्कार्यमिति ।

अनयोरिहस्य कार्यकारणभावस्य निदर्शनार्थमुदाहरणं घट घटस्य हीत्यारभ्यते—

घटस्य हि कुम्भकारचेतना कारणं, नामूर्तात्मा, ततः किं कुम्भकारशरीरं कर्तृत्वात्
10 मूर्तत्वात् मृदाधारमनस्त्वाद्घटस्य मूर्तस्य कारणं सम्भाव्येत ? यदस्तु तदस्तु कार्यं कारणं सर्वथा चैतन्यरहितस्य मूर्तद्रव्यस्य मूर्तिरहितस्यापि वा चेतनस्य कारणत्वासम्भवान्मूर्तचैतन्यात्मकः कुम्भकारः, सर्वमपि चैतन्यमेव ।

(घटस्य हीति) घटस्य हि कार्यस्य यस्मात् कुम्भकारचेतना कारणम्—कुम्भकारसमर्थशरीरसहिता, चेतनारहितस्याकारणत्वात्, आत्मा तर्हि कारणमस्तु चेतनत्वादिति चेत् तन्नामूर्तात्मा, अका-
15 रणत्वात्, ततः किं कुम्भकारशरीरं कर्तृत्वात् मूर्तत्वात् मृदाधारत्वात् घटस्य मूर्तस्य कारणं सम्भाव्येत ?—मूर्तत्वक्रियाधारमनस्त्वाद्घटस्य मूर्तत्वक्रियाधारकमेव कारणं सम्भाव्येत ?, यदस्तु तदस्तु कार्यं कारणं,

नामेति । व्याख्ये—स्वरूपत इति [illegible] नमयति तत् [illegible] कारणं द्रव्यं भवति [illegible] इत्यर्थः । [illegible] प्रागुक्तमिति [illegible] भवत एव [illegible] —प्राग्व्याख्यातार्थमिति । तत् कारणमेकमेव पुरुषादिवत् [illegible] —भवतस्येति । यदि [illegible]
20 नमयति तदा सर्वं नाम भवति, नाम चेदुच्यते तर्हि तत्कार्यं न भवेत् [illegible] कार्यनिरूपणाभावात्, तथा च किं कारणं तत् कारणं भवेत् तस्मात् कारणस्वरूपं नाम नास्ति खपुष्पवदित्याशङ्क्य—करोतीति । [illegible] तदेव सर्वं कार्यमूर्तं नाम भवति [illegible] तदेव भवनात् तत्कार्यमपीत्याह—तदेव कार्यमिति कारणमेव कार्यं भवनात्मकत्वादिति भावः । [illegible] स हीति एक एव द्रव्यो [illegible]
25 [illegible] भवति [illegible] । [illegible] वा सर्वं [illegible] —घटस्य हीति । व्याख्ये घटस्य हि कार्यस्येति [illegible] केवलं चेतना कारणं [illegible] न [illegible], चेतना विना कार्याभावात्, किन्तु कुम्भकारसमर्थशरीरसहिता चेतना कारणं [illegible] यथा च [illegible] कारणं परमाण्वादेरपि [illegible] भवति तदेव [illegible] कारणस्यापि [illegible] सर्वं [illegible] चेतनाचेतनं वा [illegible]
30 [illegible], तदेव [illegible] भावः । कारणमिति [illegible] कारणता प्रतिषिद्धा । [illegible] —अनेनामूर्तस्य मूर्ते प्रति कारणता प्रतिषिद्धा । मूर्तस्य मूर्तमेव कारणममूर्तस्य [illegible] सम्भाव्यते—कुम्भकारशरीरमिति । तदेवाह—यदस्तु तदस्त्विति ।

1 डा॰ [illegible] ।

सर्वथा चैतन्यरहितस्य मूर्तद्रव्यस्य घटसजातीयस्यापि मूर्तिरहितस्यापि वा चेतनस्यासजातीय[स्य]घटकारणत्वासम्भवात् मूर्तचैतन्यात्मकः कुम्भकारः—पृथिव्यप्तेजोवाय्वाकाशात्मानः संहत्य कुम्भकारात्मा भवन्ति; तच्च सर्वमपि चैतन्यमेव—शब्द एव, शब्दमयत्वं चैकस्य विपरिवर्तस्वरूपं पृथिव्यादिमूर्तामूर्तभेदप्रभेदं जगत्।

अपर आह—शब्दस्वतत्त्वमाकाशगुणो वा शब्दः श्रोत्रमात्रग्राह्यस्यार्थस्य शब्दसंज्ञत्वादिति केचि- 5
दविपश्चितः, तत्रोपपत्त्यसम्भवमुच्यते शब्द एव सर्वमित्यत्रोच्यते—

कुम्भकारो ह्यात्मा तत्सन्निविष्टशब्दानुविद्धचैतन्यस्वरूपत्वाच्छब्दात्मकः, तदनुरूपास्ता शब्दानुविद्धचैतन्यप्रेरितपिण्डशिवकाद्यनुक्रमप्रवृत्तयोऽपि तदात्मिकाः, तत्प्रवृत्तित्वात्, मृत्प्रवृत्त्यात्मकघटवत्, तद्भावे तद्भावात्, तदभावे न प्रवर्तते, तन्तुवायवत्।

कुम्भकारो हीत्यादि, हिशब्दो हेत्वर्थे, कुम्भकारस्तावदात्मा, तत्सन्निविष्टशब्दानुविद्धचैत- 10
न्यस्वरूपत्वाच्छब्दात्मकः, तदनुरूपास्ताःशब्दानुविद्धचैतन्यप्रेरितपिण्डशिवकाद्यनुक्रमप्रवृत्तयः—क्रिया अपि तदात्मिकाः, तत्प्रवृत्तित्वात्, मृत्प्रवृत्त्यात्मकघटवत्, तद्भावे भावात्, वैधर्म्येण तदभावे—तदनुरूपास्ताः सन्निविष्ट[शब्दानुविद्ध]चैतन्याभावे न प्रवर्तन्ते, तन्तुवायवत्।

साम्प्रतं तदनुरूपचैतन्यात्मकत्वमस्तु, प्रवृत्तेश्चैतन्याविनाभावात् शब्दात्मकत्वं तु साध्यमित्यत्रो-
च्यते, किमत्र साध्यम्? सिद्धमेवैतत्— 15

भावार्थमाह—सर्वथेति मूर्तत्वेन घटसजातीयस्यापि कुम्भकारशरीरमात्रस्य सजातीयस्य चेतनमात्रस्य घटकारणत्वासम्भवात् मूर्तचैतन्यात्मकः कुम्भकारः कारणम्, स च पृथिव्यप्तेजोवाय्वाकाशात्मक इति भावः। पृथिवीति अनेन वस्तुमात्रं प्रदर्शितं [illegible]। तच्च सर्वमपीति, पृथिव्यप्तेजोवाय्वाकाशस्वरूपं सर्वमपीत्यर्थः। [illegible] [illegible] इति भावः। भावार्थमाह—शब्देति। ननु सर्वं जगत् शब्दात्मकमित्ययुक्तम्, श्रोत्रे-
न्द्रियस्य [illegible] श्रोत्रेन्द्रियेण गृह्यते स एव शब्दः कथ्यते न सर्वं 20
[illegible] —कुम्भकारो हीति। [illegible]
[illegible]
[illegible]
[illegible]
कुम्भकारस्तावदिति [illegible] 25
[illegible] एव कुम्भकार इति भावः। [illegible]
[illegible]
[illegible]—तदनुरूपेति। [illegible] इति। [illegible]
[illegible]—साध्यमिति। [illegible]
[illegible] 30

---

१ सि क. डे का. [illegible] । २ सि. ×× । ३ सि. ×× ।

न हि काचिदपि चेतना अशब्दाऽस्ति, अनादिकालप्रवृत्तशब्दव्यवहाराभ्यासवासित- त्वाद्विज्ञानस्य, चैतन्यमेव हि पश्यन्त्यपरस्या मध्यमावैखर्योरवस्थयोरुत्थाने कारणं नामे- त्युच्यते, कारणात्मकत्वात् कार्याणाम्, यथोक्तं 'वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतद- द्भुतम्' (वाक्य० का० १ श्लो० १४२) इत्यादि।

5 (न हीति) न हि काचिदपि चेतना अशब्दाऽस्ति, अनादिकालप्रवृत्तशब्दव्यवहाराभ्यासवासि- तत्वात् विज्ञानस्य, चैतन्यमेव हि पश्यन्त्यपरस्यान मध्यमावैखर्योरवस्थयोरुत्थाने कारणं नामेत्युच्यते, कारणात्मकत्वात् कार्याणाम् यथोक्तं 'वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्' ।' (वाक्य० का० १ श्लो० १४१) इत्यादि।

अत्र च शब्दव्यवहारानभिज्ञेष्वव्यक्तचेतनेषु विज्ञानोत्थापितप्रवृत्तिसम्भवे व्यभिचारशङ्कायां 10 चेदमुच्यते—

येऽप्यव्यक्तचेतना जङ्गमाः स्थावराश्च तेऽपि शब्दाभ्यासवासनाजनितान्तर्निविष्टशब्दा- नुरूपचैतन्याः, हिताहितप्रवृत्तिव्यावृत्तिवृत्तत्वात्, कुम्भकारवत्।

येऽप्यव्यक्तचेतना इत्यादि, कृमिपिपीलिकादीनां जङ्गमानां वनस्पतित्रपुसीकर्णिकारादीनां स्थावराणां च शब्दाभ्यासवासनाजनितान्तर्निविष्टशब्दानुरूपचैतन्यास्तित्वं प्रतिज्ञायते, हिताहितप्रवृत्तिव्या- 15 वृत्तिवृत्तत्वात्, कुम्भकारवत्—हिताहितयोः प्रवृत्तिव्यावृत्ती निमित्तसप्तमी सम्बन्धषष्ठी वा, हिताहितप्र-

---

नादित चैतन्यस्य शब्दात्मकत्वादिशब्दमयेनोपदर्शयति—न हीति। व्याचष्टे—न हीति अत्रैव शब्दानुगमं विना ज्ञानं नास्ति [illegible] ज्ञानस्य सर्वं शब्दाकारानुविद्धम्, ज्ञानस्य च [illegible] तन्मयत्वे [illegible] न हि [illegible] चेतना [illegible] 20 [illegible] मध्यमावैखर्योः कार्यं [illegible] कार्याणां कारणात्मकत्वात् [illegible]—चैतन्यमेव हीति [illegible] [illegible] वैखर्या [illegible] 25 [illegible] ननु [illegible] व्यभिचारमाशङ्कते—व्याभ्यस्तमिति। व्याचष्टे—येऽपीति। व्याचष्टे—कृमीति। [illegible] एवं हि [illegible] 30 [illegible] हेतुं दर्शयति—हिताहितेति। हिताहितेति [illegible] हेत्वर्थमाह—निमित्तेति। [illegible]

१ सि क्ष. डे. [illegible]। २ सि. क्ष. ज. [illegible]।

चिन्त्याद्युत्पत्त्योर्युक्तत्वात्, इत्यमूर्त्तात्मना तृतीया वा हिताहितप्राप्तिपरिहारचिन्त्याद्यवस्था युक्तत्वात् तत्सम्भवात् नामो- पसर्गेण हितप्राप्तिप्रयुक्तत्वे गर्भोत्पत्तिमयादूर्ध्वं गमनमहितस्याप्राप्तिरुक्तत्वादेवेति सिद्धो हेतुर्वर्तनसत्त्वेऽपि, कुम्भादीनामुपादानसम्भवान्वितपलायितगत्यागतादिक्रिया मयापविनाभाविन्यः सिद्धा एवातो हिताहितप्राप्ति- चिन्त्याद्यविद्धत्वात् विद्यते शब्दानुविद्धचैतन्याविनाभाविनी यथा कुम्भकारे, तथा चेष्टमयेषु साध्यते, कुम्भ- कारादिषु तु बाह्यमेषु व्यक्तमेव पाणिप्रस्फोटनादिक्रियालिङ्गम्, तेन विज्ञानमविनाभावित्वात् सिद्धमेव, 5 शब्दानुविद्धत्वं तु साध्यम् इति ।

नैतत् स्वामिमतोपपत्तिमात्रमेव, किं तर्हि ?–

भगवदर्हद्वाक्यादपि तथोपश्रूयते–'सव्वजीवाण पि य णं अक्खरस्स अणंतभागो निच्चुग्घा- डिओ' (नंदी० सू० ५१) इत्यादि,

(भगवदिति) भगवद्वाक्यादपि तथोपश्रूयते–'सव्वजीवाणं पि' (नंदी० सू० ५१) इत्यादि, अक्ष- 10 रापक्षरश्रुतादिभेदेन श्रुतज्ञानप्ररूपणायामेकेन्द्रियादिस्वामिकमुक्तं सूत्रे तथा भाष्येऽपि 'त पि जति आवरिज्जेज्ज, तेण जीवो अजीवत्तं पावे, सुट्ठु वि मेहसमुदये होइ पहा चंदसूराणं' (   )

अतो यथैव कुम्भकारकरणशब्दचेतनादेश्चिन्त्याद्युपचारतत्त्वाभ्यासनसमुपहितरूपा घटता मात्मनः साक्षाद्भवति तथा तथा तत्प्रभवमेव कुम्भकारमनुष्यशरीरं मृदादि च, शब्दो- पयोगसम्बन्धात् योगचक्रादिसंवादनादेः, रूपादिमदर्थविरचनात्मकत्वात् कुम्भकारकार्य- 15 वत्, यथा हि घटपिठरादिकुण्डादिकार्यं तेन तेन मृन्मर्दनादिप्रकारेणान्तःसन्निविष्टशब्दा- नुविद्धकुम्भकारप्रवृत्त्या निर्वर्तितत्वात् तत्प्रभवं तदात्मकं रूपादिमदर्थविरचनात्मकत्वात् तथा कुम्भकारशरीरमृदाद्यपि ।

(अतो यथैवेत्यादि) उपचारोपसर्जनरूपेण तत्सम्बन्धे यावत्साक्षाद्भवति तथा तथेति, कुम्भ- कारः शब्दानुविद्धचैतन्यात्मकः तत्क्रियापि तदात्मिका विचित्रा पिण्डशिवकाद्यर्थपरिस्पन्दभेदा शब्दचेतनैव, 20 तथा वैचित्र्येण प्रवृत्तेस्तारतम्येनोत्तरोत्तरोत्कर्षपरम्परयाऽभ्यासनं, तेन समुपहितं रूपमस्या घटतायाः सा

चार–इत्यमूर्तेति   [illegible] [illegible] [illegible] [illegible]। पक्षे हेतुरिति दर्शयति–तत्सम्भवादीति । तत्सम्भ- [illegible] [illegible] [illegible] शब्दानुविद्धचैतन्याविनाभाविन्यः [illegible] [illegible] शब्दानुविद्धचैतन्य- [illegible] [illegible] [illegible] [illegible] [illegible] साध्यं स्पष्टयति–श्रुतेति । न केवलं [illegible] साध्यते किन्तु [illegible] साध्यं स्पष्टयति–भगवदिति । भाष्येऽपि–अक्खरेति । प्रोक्तमुपमाने [illegible] कुम्भकारवदिति 25 [illegible] [illegible] दर्शयति–अतो यथैवेति । तदेव व्याचष्टे–कुम्भकार इति शब्दानुविद्धचैतन्यात्मकस्य कुम्भकारस्य क्रियापि [illegible] [illegible] कुम्भकारप्रवृत्तिसमासाद [illegible] [illegible] [illegible] विचित्रकम्, [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । वैचित्र्येण प्रवृत्तेरिति [illegible] [illegible]

1 डा. भगवदर्हद्वा । 2 सि अवेतो ।

कुम्भकारकरणस्वरूपेणानन्यैव पिण्डशिवकादिस्वरूपापन्ना[त]नुरुदितरूपा घटता सा मायाकारो भवति यथा तथा—तेन तेन प्रकारेण पिण्डशिवकादि[ना]रूपादिगुणभाविना भवति दृष्टान्तः, दार्ष्टान्तिकार्थोऽधुना—तथा तत्त्वमसेय—शरदग्धननामभवमेव कुम्भकारमनुष्यशरीरं मृदादि—मृदिव मातापितृसम्बन्धशुक्रशोणितादि-बीजाद्यतिपक्वशरीरं आदिमदप्यन्तःसंयोगानुबन्धात्तिर्यग्शरीरं देवशरीरं नारकशरीरं, तद्भवति-¹कर्मोपयोगत्वादि,—अत्रात्मकः कायोगः कुम्भकारं व्यवस्थापयत् तदनन्यत्वात्, 'कायवाङ्मनःकर्म योगः [तत्त्वा० अ० ६ सू० १] शुभोऽशुभो वा, स आस्रवः [तत्त्वा० अ० ६ सू० २] 'पुण्यपापयोः पञ्चेन्द्रियादिजाति नाम्नः तिर्यग्भेदस्य [मनुष्यस्य] योगवक्रताविसंवादनम्, [तत्त्वा० अ० ६ सू० २१] तद्विपरीत योगावक्रत्वमविसंवादनं शुभस्य मनुष्यदेवपञ्चेन्द्रियजातिनाम्नः, आदिमदपि [योगवक्रत्व]विसंवादनमदृष्टात् आदेरिति पञ्चमीनिर्देशाद्धेतोरित्यर्थः, कुम्भकारशरीरमृदादि तथा तथा तत्त्वमसेयेति वर्तते, तदिदं भक्तिपयुक्त्या न पुनर्वेधुना तत्त्वानुविद्धचैतन्यात्मकत्वमिति चेत्तर्हि ब्रूमः—रूपादिमदर्थविरचनात्मकत्वात् रूपरसगन्धस्पर्शशब्दसंस्थानादयो रूपादयः, ते यस्य सन्ति सोऽर्थः रूपादिमदर्थः, तस्य विरचना—परस्परसम्बन्धानुकूल्येन घटना [मा]त्रात्मा यस्य स्वरूपं मनुष्यतिर्यग्योगाद्यात्मकस्य कुम्भकारशरीरस्याकारेणेति पार्थिवेन सम्पाद्यते कुम्भकारकार्यमिति दृष्टान्तः यथाहि घटपिठरादि कुम्भकर्म तेन तेन सम्यग्वर्णनादिप्रकारेणान्तःसमभिविष्टत्वानुविद्धकुम्भकारप्रवृत्त्या निर्वर्तितत्वात् तत्त्वमयं घटादि—कुम्भकारप्रवृत्त्यात्मकं रूपादिमदर्थविरचनात्मकत्वात् तथा कुम्भकारशरीरमृदाद्यप्यन्तःसमभिविष्टत्वानुविद्धचैतन्यप्रवृत्त्यात्मकमिति ।

रसस्य आरोपितत्वमेवाभिप्रेतमिति वाक्यस्य तात्पर्यमित्यभिप्रायेण इत्थमाह तथा च विशिष्टवाक्यस्य भावप्रदर्शनमिति घटितमित्यभिप्रायोऽत्र इति भावः । एवं दृष्टान्तार्थं व्याख्याय दार्ष्टान्तिकार्थमाह—तथा तत्त्वमसेयेति सम्बन्धः कुम्भकारमनुष्यशरीरं पृथिव्यादिनिर्मितशरीरं देवशरीरं नारकशरीरमेव भावः । किं दर्शयति कर्मोपयोगेति मनुष्यतिर्यग्-नारकाणां कर्मणां भवभवप्रवृत्तानन्तकर्मप्रायित्वात् । कायवागिति वीर्यान्तरायक्षयोपशमजन्यपर्यायविशेषः स्यात् तत्कायो योगः, कायादयोगो रुधिरादि पञ्चविधशरीरनिवृत्तिनामा च, काय शरीरं पुद्गलस्कन्धरचित आत्मना उपादत्तः तद्योगः जीवस्य वीर्यपरिणामः काययोगः भाषाभिनिर्वृत्तिसमर्थभाषापर्याप्तिकर्मोदयजनितः वाग्योगः एवमन्यत्रापि मनोयोगः शरीरनिर्वृत्तिसमर्था पर्याप्तिः मनोयोग्यपुद्गलसमर्थः मनस्ता यान्ति, तस्य मनःपर्याप्तियुक्तस्य मनोयोगः एते योगाः शुभाशुभभेदेन द्विविधाः एष त्रिविधोऽपि योगः पुण्यपापास्रवकारणं भवति तदेवेविधा-निमित्तस्य विपरीतत्वेऽशुभस्य पुण्यस्य शुभो योग आस्रवः पापस्य अशुभो योग आस्रव इति भावः । पुण्यपापास्रवे निर्वादिप्रतिपत्तिमाह—योगवक्रतेति अथवा योगवक्रतेति कौटिल्यमविसंवादनं विसंवादनमन्यथाप्रवर्तनं निन्दापरममशुभस्य नाम्नः इत्यर्थः । शुभनाम्नः आस्रवमाह—तद्विपरीतमिति । दार्ष्टान्तिकमाह—तत्त्वानुविद्धचैतन्यात्मकत्वं कुम्भकारशरीरादेरभिप्रायानुभावेन तदाह—रूपादिमदिति । किं व्याचष्टे—रूपरसेति । दार्ष्टान्तं भवति—यथा हीति स्पष्टम् । घटः घटाकारो भवतीत्युक्तं तदुक्तं भवत्येवमेवेति ज्ञानावरण-

---

१ लि ××। २ लि ॰ ॰ ॰ त्मकं ।

अत्राह—भवतु एव घटादिवद् बहिर्निमित्तादस्ते घटादिभिर्निर्वृत्तैः कथमिदमवधार्यते नाम्ना साक्षाद्भवति न घटादिभ्य इत्यत्रोच्यते—

नाम्न एव च प्रभावात् तदीरितप्रयत्नपरिस्पन्दजनितनिष्पत्तिवस्तुनो वस्तुत्वं लभ्यते न बहिर्निमित्तापेक्षम्, तत्प्रवृत्तीनामपि स्थाने स्थाने शब्दचेतननियोजितानामात्मलाभाच्च तदात्मत्वम्, इतरथा स्वरूपप्रवृत्तिरेव दुर्लभा, कुतो वस्तुत्वम्? तस्मात् सर्वकारकसान्निध्येऽपि कर्तुरौदासीन्ये तदभावे वा क्रियायाः कार्यस्य चाभावाच्छब्दप्रभावप्रभवं सकलं जगत्, तथा हि स्कन्दरुद्रेन्द्राः स्कन्दनरोदनेन्दननिमित्तानुपपत्तावपि जीवस्याजीवस्य वा निमित्तनिरपेक्षाः संज्ञाः क्रियन्ते।

नाम्न एव चेत्यादि, दण्डादीनां सतामप्यभिमतकरत्वाच्छब्दचेतन्यस्यैव प्रभावात् तदीरितप्रयत्नपरिस्पन्दजनितनिष्पत्तिपटाख्यस्य वस्तुनः तद्वस्तुत्वं पटत्वं नाम्न एव महिम्ना लभ्यते, न बहिर्निमित्तापेक्षम्, तत्प्रवृत्तीनामपि स्थाने स्थाने शब्दचेतननियोजितानामात्मलाभाच्च तदात्मत्वम्, इतरथा—तदात्मत्वाभावे स्वरूपप्रवृत्तिरेव दुर्लभा, कुतो पटस्य पटत्वं वस्तुत्वम्? तस्मात् सर्वकारकसान्निध्येऽपि कर्तुरौदासीन्ये तदभावे वा क्रियायाः कार्यस्य चाभावः पटोत्पत्त्यभावादेः अतः शब्दप्रभावप्रभवं सकलं जगदिति, तथा हीत्यादिना निरूपयति, दिक्षूक्तो निदर्शने—एतच्च कृत्वा स्कन्दरुद्रेन्द्राः—स्कन्दिर् शोषणे, रुदिर् अश्रुविमोचने, इदि परमैश्वर्ये इति स्कन्दनेन निमित्तेन स्कन्दः, रोदनेन रुद्रः, इन्दनेनेन्द्र इत्येतेषां निमित्ताना मनुपपत्तावपि गोपालपशुपालकादेर्जीवस्याजीवस्य वा काष्ठकुड्यपाषाणादेर्निमित्तनिरपेक्षा[ः]संज्ञा[ः]क्रियन्ते[1] स्कन्दो रुद्र इन्द्र इति, गोपालादीनामेव तैस्तैः धर्मैः धर्मोत्पत्त्याऽऽरोपवशाच्चोच्यते।

स्कन्दत भवतीति यदो रोदितीति रुद्रः इन्दतीति इन्द्र इति दैवतविशेषात्तन्निमित्तभूतार्थमात्रः सम्बन्धवशात् समयान्तरप्रसिद्धाः तत्सु[illegible]तरोपचारो भविष्यतीत्येवमाशुक्तम्—

सर्वमभिव्यक्ते—अत्राहेति। शब्दचैतन्यव्यतिरिक्तमात्मदर्शनेऽपि [illegible] एव [illegible] [illegible] मात्र एव चेति। [illegible]—दण्डादीनामिति [illegible] तदात्मत्वात्, यदि तेषां [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]—तत्प्रवृत्तीनामपीति [illegible] [illegible] [illegible] [illegible]—तेषामतदात्मत्व इति। अथ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]—तथा हीति [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible]—एतच्च कृत्वेति। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]—स्कन्दतमिति। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

1 सि. ध. का. भवापिर्मि । 2 सि. तज्जार्थे । 3 सि. ध. पे। 4 सि. ध. तत्सम्बन्धाद्रूपचारात्। का. सम्बन्धारोपणात्।

प्रत्यक्षत्वात् गोपालादय एव तद्भूता मुख्यया वृत्त्योच्यन्ते, ते तु भवत्कल्पितैकार्थाः समयान्तरप्रसिद्धसम्बन्धपरिकल्पनागम्या न सर्वलोकप्रसिद्धशब्दाभिधेयाः, तस्मात् एव तेषु प्रत्यक्षाः, येऽपि च ते स्कन्दादयस्तेष्वेकस्मिन्नितरयोरपि संज्ञयोः प्रवृत्तिनिमित्तसद्भावात् त्रयोऽपि परस्परसंज्ञानिर्देश्याः सङ्कीर्णाः स्युः, अन्यतमनिमित्तमात्रतत्त्वयाऽप्रभूतया संज्ञया 5 विवक्षितैकार्थव्यवहरणात्तु अन्तर्निविष्टशब्दानुविद्धचैतन्यनिमित्तः संज्ञाव्यवहारोऽभ्युपगतो न बहिर्निमित्तप्रत्यक्षम् ।

प्रत्यक्षत्वादित्यादि यावत् एव तेषु प्रत्यक्षाः, ते भवत्कल्पितैकार्थाः समयान्तरप्रसिद्धसम्बन्धपरिकल्पनागम्या न सर्वलोकप्रसिद्धशब्दाभिधेयाः यथा गोपालादयः प्रत्यक्षाः सर्वलोकप्रसिद्धशब्दाभिधेया इति, तेषां सत्त्वं तत्सम्बन्धाख्यकल्पनाप्रत्यक्षम् अन्यथारम्भकेभ्यः कारणेभ्यः तद्भूताः—स्कन्दादिशब्दभूताः, 10 प्रत्यक्षाश्च गोपालादयो मुख्यया च वृत्त्योच्यन्ते तस्मात् एव—ते गोपालादय एव स्कन्दादयो न समयान्तरपरिकल्पिताः सन्तीति, तस्मात्सम्बन्धाभिधानमात्रेण शब्दस्याभिधेयत्वं न निमित्तान्तरात्, अभ्युपेत्यापि समयान्तरपरिकल्पितानां स्कन्दादीनामस्तित्वं निमित्तमिदमभिधानमात्रेणोच्यते—येऽपि च ते इत्यादि स्कन्दोऽपि येनैनेन्धने [ततः] स रुद्र इन्द्रो वा किं न भवति ? तथा रुद्रेऽपि स्कन्दनेन्धने, ततः स इतर इतरश्च किं न भवति ? एकस्मिन्नितरयोरपि संज्ञयोः प्रवृत्तेर्निमित्तसत्त्वेन तस्मात् त्रयोऽपि परस्परसंज्ञानिर्देश्याः 15 सङ्कीर्णाः स्युः अथ मा भूदेष दोष इत्यन्यतमदेव निमित्तमेकं तत्त्वमिष्यतेऽसङ्कीर्णसंज्ञाव्यवहारार्थं स्कन्द एव न रुद्रो नेन्द्र इतीष्टार्थविवक्षया, एवं तर्ह्यन्यतमनिमित्तमात्रतत्त्वयाऽप्रभूतया संज्ञया विवक्षितैका-

---

समयान्तरप्रसिद्धसम्बन्धपरिकल्पनागम्या[illegible] ... स्कन्दादिशब्दभूता [illegible] प्रत्यक्षत्वादिति । व्याख्या—न हि शास्त्रान्तरेषु स्कन्दादिशब्दाभिधेया परिकल्प्यन्ते सन्ति [illegible] इति, न तु सर्वलोकप्रसि- द्धशब्दाभिधेया गोपालादिवत् सर्वलोकप्रसिद्धशब्दाभिधेयत्वं भवत्परिकल्पितानाम्, तस्मात् सर्वलोकप्रसिद्धशब्दाभिधे- 20 यत्वाभावात् प्रत्यक्षानुपपत्तेः गोपालादय एव स्कन्दादिशब्दभूता मुख्यया वृत्त्योच्यन्ते ते तैः शब्दैरिति भावः । स्कन्दादीनां सत्त्वं [illegible]—तेषां सत्त्वमिति, एतत् तु भवत्परिकल्पितः न सर्वलोक- प्रसिद्धशब्दाभिधेया [illegible] कारणेभ्यो न तद्भूता न वा स्कन्दादिशब्दैर्मुख्यया वृत्त्योच्यन्ते न सम्भवति सम्भवति—न सम्भवेति । [illegible] निमित्तान्तराभावे [illegible] अभ्युपेत्यापीति । 25 [illegible]—स्कन्दोऽपीति येन[illegible] स्कन्देऽपि सद्भावात् त [illegible] भाव । हेतुमाह—एकस्मिन्निति । व्याचष्टे—त्रयोऽपीति स्कन्दशब्दवाच्योऽपि [illegible] निर्देश्या [illegible] भाव । अथ स्कन्दादौ [illegible] सङ्कीर्णोऽपि स्कन्दस्यैव [illegible] [illegible] सङ्कीर्णसंज्ञाव्यवहारार्थमभ्युपगम्यत [illegible] तदाह—अथ मा भूदिति । एवं तर्हीति, [illegible] 30 [illegible] स्कन्दसंज्ञाव्यवहारे [illegible] भाव । [illegible]

1 सि क. येनैनं च क्रोध । 2 सि क डा. ते इतरश्च । 3 डा. संकमत्स्युः ।

र्वव्यवहरणादन्यनिर्विशिष्टशब्दानुविद्धचैतन्यनिमित्तः संज्ञाव्यवहारोऽभ्युपगतो [न] बहिर्निमित्त प्रत्ययमिति दोषः, मुख्यादिमिव्यसंपरिमाणेऽसागेव विशेषमपि ।

किञ्चान्यत्–

निमित्तप्रत्ययेन संज्ञाप्रवृत्तेश्च यावत् सम्भवं संज्ञासन्निवेशे सर्वव्यपदेशभाक्त्वात् भाव-कार्ययोऽपि ते प्राप्ताः, तथा च यावत् किञ्चित् भवननिमित्तमस्ति तस्य सर्वस्येन्द्रस्कन्दादिरर्थो, [5] वाचिनश्च पर्यायशब्दा एव, घटकुटशब्दवत्, एवं तावत्सर्वसर्वत्वमविशेषात् ।

निमित्तप्रत्ययेनेत्यादि, यदि स्पन्दनादिनिमित्तप्रत्ययेन संज्ञाप्रवृत्तिस्ततो यावत्सम्भव भाव-निमित्तानि भवनकरणशयनभाषणचङ्क्रमणवर्तनपरिणमनादीनि सम्भवन्ति तावद्भिर्निमित्तैः संज्ञासन्निवेशो ऽस्ति येनाद्युद्रो भवभाग्यो भावकः करणात् कारक इत्यादि सर्वव्यपदेशभाक्त्वात् भावकार्ययोऽपि ते प्राप्ताः तत्र–तथा च यावदित्यादि, यत्परिमाणमस्य–यावत्, यावदेव किञ्चिद्भवननिमित्तमस्ति सर्वमित्यर्थः, तस्य [10] सर्वस्य घटपटादेरिन्द्रस्कन्दादिरर्थः, सर्वभावैर्योनामन्वर्थत्वात् पर्यायः, तद्वाचिनश्च पर्यायशब्दा एव किमिव ? घटकुटशब्दवत्–सर्व एव सर्वः–घटः स्कन्दः, पटः स्कन्दः, वेदोऽपि स्कन्दः, एवं इन्द्रादयश्च, स्कन्दोऽपि घटः पट इत्यादि प्राप्तम्, एवं तावत् सर्वभावैर्नामन्वर्थत्वात् सर्वसर्वत्वमविशेषात् ।

किञ्चान्यत्–

विशेषतोऽपि सम्भवघटनादिस्कन्दनादित्वाच्च सर्वसर्वत्वम्, कतमद्द्रव्यं कतमेन निमि- [15] त्तेन नाभिधीयते ?,

(विशेषतोऽपीति) विशेषतोऽपि सम्भवघटनादिस्कन्दनादित्वाच्च सर्वसर्वत्वम्, चेष्टाचेटि त्वादभिसम्बन्धनमिसम्भिपूर्वकपरिसमाप्यर्थत्वात्–परिणामार्थत्वात् सर्वेषां ज्ञानगत्यर्थानां स्कन्दनशोषणविसर णोपनेभ्यगत्यम्बनापर्थानां यावतां यस्मिन्नर्थे सम्भवः तत्र तत्र तदर्थत्वे सर्वसर्वत्वं, यस्मात्स्तु

मुख्यादित्विति । यदि संज्ञाव्यवहारे बहिर्निमित्तापेक्षः स्यात्तर्हि निमित्तानां बहूनां सम्भवात् प्रतिनिमित्तं संज्ञासन्निवेशे भवितव्यम् [20] सर्वसंज्ञाव्यवसेयत्वं स्यादिति दोषान्तरमाह–निमित्तप्रत्ययेनेति । व्याचष्टे–यदीति यावन्निमित्तं नामविशब्दाः तैरर्थ-सम्बन्धोऽभिधेयस्य व्यवहारे यदि स्यादित्यर्थः । एकस्मिन् वस्तुनि नानानिमित्तानि दर्शयति भवनेति भावकत्वनिमित्तं भवनं करणत्वनिमित्तं करणं शयनत्वनिमित्तं शयनं भाषकत्वनिमित्तं भाषणं चङ्क्रमणत्वनिमित्तं चङ्क्रमणं वर्तनत्वनिमित्तं वर्तनं परिणामकत्वनिमित्तं परिणमनमित्येतानि निमित्तानि भवनवर्तिव्यादौ प्रत्येकं सम्भवन्तीति तत्तच्छब्दैरपि ते व्यपदिश्येरन्निति भावः । ततश्च को दोष इत्यत्राह–तथा चेति यत्किञ्चिद्भवनपदार्थस्येन्द्रस्कन्दादिरर्थः पर्यायः इन्द्रादिवाचकस्य संज्ञात्, [20] तद्वाचकशब्दानां पर्यायशब्दा भवेयुः एवञ्च घटः इन्द्रस्कन्दादिनिमित्तविशब्दवाच्यविषय स्यादेवं पदार्थमेऽपीति सर्वं सर्ववाच्यत्वमिति सर्वसर्वत्वं प्रसज्यत इति भावः । भवननिमित्तमस्तीति यावन्निमित्तं सम्भवति । सर्वभावनामां भवितव्यं अनुगतार्थत्वात् पर्यायमित्याह–सर्वेति । इन्द्रस्कन्दनभवनादेर्भावानामिन्द्रस्कन्दभवनादिशब्दा पर्यायाः एवेत्याह–तद्वाचिनश्चेति । व्याचष्टे–सर्व एवेति । एवमविशेषत्वेनोपचयं प्रदर्श्य विशेषतोऽपि तदापादयति–विशेषतोऽपीति ।

१ क्ष सर्वभावैर्योनामन्वर्थत्वात् । २ सि क्ष डे. सर्वभावानुगतार्थत्वात् । ३ सि क्ष डे. सम्भवन्ति च ।

मेव्यन्तां प्रथमस्याभासमात्रेणार्थत्वाच गतिनिवृत्तिपर्यायत्वं क्षेपधातुमात्रं वस्त्वर्थोनिवृत्तेः कथमन्य-कर्मेन निमित्तेन नाभिधीयते ? ततः सर्वसर्वत्वम् ।

आत्ममतमेवं तर्हि मुख्यप्रतिमत्सम्पादनद्वारेण त्वयैव सर्वस्य बहिर्निमित्तापेक्षस्य समर्थितम्, त्वत्पक्षेऽपि च सर्वसर्वाभिधानप्रसङ्गो दुर्निवार इत्येतदाशङ्क्याह एव–

एवमपि तु स्थिते सर्वसर्वाभिधानलक्षणाव्यवस्थाव्यावर्तनार्थं बहिर्निमित्तनिरपेक्ष-संज्ञामात्रसन्निवेशिनियतार्थाभिधायित्वम्यादित्वमभ्युपगन्तव्यम्, एवं हि सङ्केतमात्रतोऽन्य-व्यार्थसम्बन्धस्य मुख्यार्थाः सर्वविषमाणा इत्येतदप्रसिद्धम्, नियतनिरपेक्षत्वात् सङ्केतस्य, स्वोपयोगप्रतिपादनसमर्थत्वाच शब्दानाम्, डित्थादिवत्, अत एवेदमप्यभियुक्तानां स्मरण-मुपपन्नं 'अनेकार्था धातवः' इति इत्यवतामिति ।

एवमपि तु स्थित इत्यादि यावत् त्वम्यादित्वमभ्युपगन्तव्यमिति, अप्रतिविपादयिषितार्थ-प्रतिपादनार्थत्वाच्छब्दप्रयोगस्य प्रयत्नेऽपि सर्वसर्वत्वे सर्वसर्वाभिधानलक्षणाव्यवस्था प्राप्तैव स्य मा भूदिति तद्व्यावर्तनार्थं त्वम्यादिशब्दाः कस्मिंश्चिदर्थे बहिर्निमित्तनिरपेक्षाः संज्ञामात्रत्वेन सन्निवेशिताः सन्तो नियमेन तमेवार्थमभिदधतीति प्राप्तम्, इतरथा सर्वसर्वाभिधानाव्यवस्थाऽवश्यम्भाविनी, तस्मात् संज्ञा-सन्निवेशात् न मे कश्चिद्दोष इति तथापि पामात्मनेवत् समानत्वोपपत्ताविति, एवं हीत्यादि, अस्य व्याख्या व्याप्तिप्रदर्शनम्, एवम् कृत्वा सङ्केतमात्रतोऽन्यार्थसम्बन्धस्य मुख्यार्थाः सर्वविषमाणा इत्येतदप्र-सिद्धम्–घटः कुटः कुम्भः, क्षीरं पयः पाथि दुग्धम्, अभिनवपुरः किन्तु मङ्गल इत्यादीनाञ्च सङ्केतवशात् मिथिस्तिथैकार्थवाचित्वं सिद्धम् नियतनिरपेक्षत्वात् सङ्केतस्य, स्वोपयोगप्रतिपादनसमर्थत्वाच तेषां तेषां

ननु मां प्रति दोषं प्रतिसर्वनिपुणा भवतापि सर्वाभिधेयानां बहिर्निमित्तापेक्षत्वं समर्थितमेव एवं समर्थिते भवतोऽपि सर्वसर्वाभि-धानप्रसङ्गो दुर्वार इत्याशङ्क्य व्याप्तमतमिति । यद्यपि बहिर्निमित्ताभावेऽभिधानप्रवृत्तिरिष्टा मुख्यस्यैव, न शैवमनुपपन्नं व्यवस्थापेन किन्तु शब्दप्रमाणप्रमाणाभिधानपरिहार्यते इत्याशङ्क्योत्तरमाह–एवमपीति । यत्र हि परस्य सामर्थ्यविशेष-प्रतिपादनिर्नु व्याप्त्या नोऽनुपपन्नभिधानादि च न सम्प्रत्ययो यदि बहिर्निमित्तसापेक्षोऽर्थं प्रतिपादयेत् तर्हि सर्वसर्वत्वप्रस-ङ्गेऽवधीयता सर्वसर्वाभिधानलक्षणाऽव्यवस्था स्यादिति तद्व्यावर्तनाय नियतार्थाभिधायित्वं त्वम्यादीनामनुमेयम्, तत्र बहिर्निमित्तापेक्ष-व्यवहारमात्रेण शब्दैकप्रवृत्त्येन व्याप्ते सतीति । सम्प्रत्यये नियतार्थप्रतिपादनसामर्थ्यमनुसन्धेय दोषमाशङ्क्याह–इतरथेति । अन्यथा बहिर्निमित्तमपेक्ष्यैवाभिधाने संज्ञामात्रतया समनुपपन्नो मे न कश्चिद्दोष इत्याशङ्क्याह–तथापीति । यद्येवं सङ्केतमात्रेण शब्दानामर्थेषु प्रवृत्तिः निमित्तविशेषमनपेक्ष्यापि सङ्केतेन प्रवर्तनात् मुख्यार्थाभावप्रसङ्गेनेति अतोऽनुपपन्नमिदं व्यापकमाह–अस्य व्याप्यस्येति । नानात्वेऽप्येकस्यैव पदार्थस्याभिधानमभिधायकं घटः कुट इति । अन्यो-अर्थान्तरमाह–क्षीरं पय इति । अभिधानान्तरमाह–अभिनवपुर इति । अन्ये हि यथाऽभिधानमिदं तत्तु सङ्केतादेव प्रतिपादयन्ति, सङ्केतस्तु बहिर्निमित्तनिरपेक्षः नियत इति नियतनिरपेक्षत्वात् सङ्केतमात्रत एव तदर्थप्रतिपादकत्वमेषां प्रतिपाद-यितुं यत्न इत्याह नियतनिरपेक्षत्वादिति तत्सम्बन्धप्रतिपादने सङ्केतादिरूपार्थावबोधकत्वं नियतत्वादित्यर्थः । सङ्केतस्य

१ छ डे डा. यत्नुनी । २ डा. सर्वसर्वत्वे सर्वा ।

ख्यानाम्, हिंस्यादिवत्, इदमप्यभिमुखनामैव पद करणमुपपन्नम्—नान्यथा, यथा 'अनेकार्था धातवः' इति, गतार्थं यावद् दृश्यतामिति ।

चेतनाचेतनभेदस्यास्य जगतो भावकं नाम, तस्मादेव घटो भवति, घटस्य द्रव्यं कारणम्, घटं भावयति नाम, घटस्य ततो भवनात्, यद्यतो भवति तत्तस्य कारणं दृष्टम्, यथा मृत्, अनया यथा घटस्तथा नाम्ना, घटक्रियात्मकत्वं वा भावकत्वम्, तस्माद् घटं भावयति नाम, रूपाद्युपयोगभवनं वाऽन्तर्निविष्टशब्दानुषक्तम्, रूपणाद्रूपम्, रस्यत इति रसः घ्रायत इति गन्धः श्रोत्रग्रहणः शब्द इति लक्षणात् रूपादिरपि शब्दो भवति, तस्मान्नामद्रव्यस्यानुपसर्जनतैव ।

चेतनाचेतनेत्यादि, अनेन प्रकारेण यदुक्तं नाम तच्चेतनाचेतनभेदस्य कुम्भकारघटादेः पृथिव्यादिसमुत्पन्ननारकतिर्यक्सिद्धपरमाणुद्व्यणुकाकाशादेः समस्तस्यास्य जगतो भावकं नाम—समस्तं जगन्नाम्नो भवतीति भावितम्, तस्मादेव घटो भवति घटस्य द्रव्यं कारणं घटं भावयति नाम, ततो भवनात्, ततो भवतीति प्रतिपादितत्वात् सिद्धो हेतुः । यद्यतो भवति तत्तस्य कारणं दृष्टम्, यथा मृत्—मृदो भूतो घटस्य कारणं, तथा नाम घटस्य कारणमित्येतमर्थमुपनयति अनयेत्यादि, यथा घटस्य मृद्द्रव्यं भवति तथा नामेत्यर्थः, घटक्रियात्मकत्वं वा भावकत्वम्, नाम इति वर्तते, शब्दो द्रव्यं तावत् घटकरणात्मकत्वात् पूर्वोक्तात् प्रतिपद्यते, तस्माद् घटं भावयति नाम, नाम्नो घटो भवतीत्यर्थः, रूपाद्युपयोगेत्यादि, अथवा रूपाद्युपयोगो—रूपादिज्ञानं तस्य भवनमन्तर्निविष्टशब्दानुषक्तं शब्दव्यापारकं रूपणाद्रूपं रस्यत इति रसः, घ्राय

यथा मतेऽस्य च सर्वेष्वेषु शब्दार्थेष्वभिधायकत्वं [illegible]–इदमपीति । गतार्थमिति, अत्र मूलं मृग्यम् । अत्र कुम्भकारघटादिरस्तित्वेन जगत् [illegible] रूपादिसमस्तविकल्पात्मकत्वात् कुम्भकारघटादिरिति कर्तृत्वमुक्तं तदिदं नामेति दर्शयति—चेतनाचेतनेति । प्रकारे—अनेनेति । विशिष्टं वस्तु दर्शयति—कुम्भकारेति । नाम कुम्भकारादीन् भावयति जनयति परिणमयतीति भावकमिति दर्शयन्नाह—समस्तमिति । भावकत्वमेव स्फुटीकरोति—तस्मादेवेति, नाम एवेत्यर्थः । [illegible]–ततो भवतीति । अनुमेय व्याप्तिं दर्शयति—यद्यत इति । दृष्टान्तमाह—यथेति । नाम्न इति भावकस्य भावो भावकत्वमि[illegible]–घटक्रियात्मकत्वं वेति [illegible], [illegible] द्रव्यम्, न हि [illegible] प्रति [illegible] तस्माद् घटं भावयति नामेति भावः । किंच विज्ञानमात्रम् [illegible] तदनुविद्धं [illegible]–अथवेति रूपादिषु ज्ञानं [illegible] भासते निर्विकल्पकं सविकल्पकं वा, [illegible] भावः । रूपादिविषयं ज्ञानं यदा रूपमिति रूप्यते तदा तद्रूपमुच्यते यदा रस इति रस्यते तदा रस इति गन्ध इति [illegible] तदा [illegible] विज्ञानमात्रम्, [illegible] ज्ञानं शब्दानुविद्धा-[illegible] रूपादयोऽपि [illegible] श्रोत्रग्रहणत्वात् [illegible]–रूपणादिति ।

---

१ सि० क्ष० डे० भाव्यतेति नास्ति । २ सि० क्ष० भवो ।

इति गम्यः श्रोत्रग्राह्य शब्द इति श्रवणात् तस्योपयोगस्य शब्दात्मकत्वात् रूपादीनाम् तदात्मकत्वात् शब्दो रूपादिरपि भवति, तस्मान्नामद्रव्यस्यानुपसर्जनतैव—प्राधान्यमेवेत्यर्थः, एष नामद्रव्यार्थनयपूर्वपक्षः।

अथोत्तरमुभयनियमभङ्गः शब्दनयो वक्ष्यमाणः—

अस्यापि नियमः, प्राधान्येन तु विशेषो नियत इत्युक्तः, अर्थार्थत्वाच्छब्दप्रयोगस्यार्थः प्रधानं न शब्दः अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वात् ज्ञानमेव प्रधानम्, न च ज्ञानशब्दयो- रैक्यम्, प्रत्यक्षप्रतीतिविरोधाभ्याम्, प्रत्यक्षमेव हि न नाम्नो घटादिर्भवति, ततस्तु श्रोत्राभि- घात एवोत्पद्यते।

अस्यापि नियम इत्यादि, एषोऽपि नामद्रव्यार्थभावो नियतः उपसर्जनत्वेनेष्यते, न प्राधा- न्येन, प्राधान्येन तु विशेषो नियत इत्युक्तः, न भूमः शब्दो निमित्तमात्रव्यापृतो ज्ञानोपकारी नार्थोऽपि ज्ञानमेव प्रधानस्योपकारकत्वेन वर्तते, ज्ञानेनैव चोपचर्यते, अर्थप्रज्ञापनार्थत्वाच्छब्दप्रयोगस्य, तस्मात् अर्थार्थत्वाच्छब्दप्रयोगस्यार्थः प्रधानं न शब्दः, तस्माच्छब्दार्थत्वात् अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वात् ज्ञानमेव प्रधानम् न च ज्ञानशब्दयोरैक्यम्, प्रत्यक्षप्रतीतिविरोधाभ्याम्, यस्मात् प्रत्यक्षमेव न नाम्ना- ख्यात् श्रोत्राभिघातकत्वात् घटादिर्भवति—न शब्दः कारणं घटस्य ततोऽनुत्पत्तेः, ततस्तु—शब्दात् श्रोत्राभिघात एवोत्पद्यते, तस्माच्छब्दः श्रोत्राभिघाते हेतुर्न घटे न ज्ञाने।

15 तथा च यदि शब्दस्य घटोत्पत्तौ द्रव्यत्वं स्यात्ततो घटार्थिनो भवतु घट इति प्रब्रवीरन्, अरिविनाशार्थिनश्च राजानः परबलमेरितं मा भूदिति वा ब्रूयुः, तस्मात् प्रवृत्तिनिवृत्तिकारणम- र्थार्थिनाम् क्षायोपशमिको भावः, सोऽपि द्रव्यार्थतां हित्वा भवति, क्षणिकत्वात्, तेनापि

तदात्मकत्वादिति, तस्योपयोगस्य [illegible]। एवं शब्दप्राधान्यात् [illegible]—एष इति। [illegible] [illegible]—अस्यापीति। [illegible] न प्रधानम्, विशेषस्य
20 प्राधान्यात् [illegible]—एषोऽपीति। [illegible] नियत—न भूम इति। तर्हि [illegible] ज्ञानस्यैवेति। [illegible] [illegible] ज्ञानेनैवेति। [illegible] [illegible] [illegible]—तस्मादर्थार्थत्वादिति। [illegible]
25 [illegible]—न च ज्ञानशब्दयोरिति। [illegible]—यस्मादिति [illegible] [illegible] [illegible] [illegible]—तथा चेति। [illegible]

१ सि. क्ष. डे. नार्थोपि।

विशेषेणैव भूयते, उक्ता शब्दार्थव्युत्पत्तिर्वस्त्वर्थश्च, स हि भावागमः, ततः तस्याप्यते शब्दः, तस्मात्तच्छब्दो द्रव्यागमः, तथा चाहुः 'आगमतो आणए अणुवउत्ते दव्वसुयं' (अनु० १२ सू०) इति ।

तथाचेत्यादि यावत् प्रब्रवीरन्निष्टसिद्धापादनम्, यदि घटस्य घटोत्पत्तौ द्रव्यं न स्यात् ततो घटार्थिनो भवतु घट इति प्रब्रवीरन्, अरिविनाशार्थिनश्च राजानो विजिगीषवो न इत्यर्थं विभ्रमुः, 5 परचक्रमेति मा भूदिति वा भूयुः, न च तद् दृष्टमिष्टं वा, तस्मात् प्रवृत्तिनिवृत्तिकारणमर्थार्थिनाश्च क्षायोपशमिको भावः—ज्ञानावरणक्षयोपशमनिमित्तं ज्ञानमित्यर्थः, तत एव प्रवृत्तिनिवृत्तिदर्शनात्, सोऽपि द्रव्यपर्यायौ हित्वा—क्षायोपशमिको भावः क्षणे क्षणेऽन्यत्वात् द्रव्यपर्यायौ त्यक्त्वा भवति, क्षणिकत्वात्, तेनापि विशेषेणैव भूयते [सोऽपि] विशेष एव भवति, उक्त[ा]शब्दार्थव्युत्पत्तिः, भवति भवत् प्रधानं भाव इत्युपक्रम्य यावद्गामविशेषं इत्यत्र एवेत्यस्यार्थो गतः वस्त्वर्थश्च भावितः—सामान्यमुपसर्जनं विशेषः प्रधानं भावः, 10 शिबिकावाहकयानेश्वरयानवदिति स हि भावागमः—यस्मात् क्षायोपशमिको भावो ज्ञानं भावागमः उच्यते तस्मात् प्रधानं भवति, [आ]मर्यादया अभिविधिना [वा] गमोऽवबोधः ततः शब्दस्यागमत्वं तत एवाप्यते शब्दो ज्ञानात्, तस्मात्तच्छब्दो द्रव्यागमः, तथा चाहुरिति—शब्दद्रव्यागमत्वे ज्ञापकमार्षम् 'आगमतो जाणए अणुवउत्ते दव्वसुयं' (अनु० १२ सू०) इति ।

इतश्च ज्ञानमेव प्रधानम् 15

तत एव हि चास्योत्पत्तिः, प्रवृत्तोऽपि शब्दः परतन्त्रः, ज्ञानार्थत्वाच्छ्रोतरि प्रवृत्तेश्च, तादर्थ्येन ज्ञानं प्रधानं शिबिकावाहकयानेश्वरयानवत्, असत्स्वपुत्रिकवत् उपयोगविशेषभवनं प्रधानम्, तत्कार्यत्वाच्छब्दस्य ।

यदि शब्दश्चेति, यदि शब्दो ज्ञानार्थं स्यात् तर्हि प्रत्ययमात्रे घटो भवतीति शब्दप्रयोगादेव घट उत्पद्येत तदुत्पादककारणव्यवहारात्, परसैन्यविनाशश्च राजानः प्रभूतव्ययसाध्यचेष्टानपेक्षिततद्व्यतिरेकेण परचक्रं मा भूदिति शब्देनैव तद्विनाशं कुर्युः शब्दस्यैव 20 तत्कार्यकरणक्षमत्वादिति भावः । किं तर्हि कारणं प्रवृत्तौ निवृत्तौ चार्थक्रियाप्रवृत्त्यभिलाषात्—तस्मादिति शब्दस्य कारणत्वे विसंवादप्रसङ्गात् ज्ञानावरणक्षयोपशमजन्यज्ञानादेव प्रवृत्तिनिवृत्ती तत एव तयोर्दर्शनादिति भावः । तदपि हि ज्ञानं प्रवृत्तिनिवृत्ती च करोतीति द्रव्यं स्यात् तत्राप्रधानमेवेत्याशङ्कायामाह—सोऽपीति ज्ञानावरणक्षयोपशमजन्यो भावोऽपीत्यर्थः पर्यायत्वेन क्षणे क्षणेऽन्यत्वादुत्पत्तिमत्त्वाद् द्रव्यत्वं प्राप्नोति किन्तु विशेष एव भवतीति प्रधानमेवेति भावः । भवत् प्रधानं वर्तमानत्वं प्रधानं भाव इत्यर्थेन भावत्वं प्रधानं विशेष एव भवतीति भाव इत्यादि पूर्वग्रन्थेनैतद्वचनेनाविना शब्दार्थव्युत्पत्तिप्रधान- 25 त्वेन विशेषस्यैव प्राधान्यं प्रतिपादितमिति सूचयति—उक्तेति । एवेत्यस्य व्याख्यानं—भवतीति । भावार्थोऽपि 'इह बाह्ये घटो विशेषो न पदार्थः' स एव प्रधानं भावः सामान्यं विना भवनं प्रधानमुपसर्जनमप्रधानम् शिबिकावाहकयानेश्वरयान- वदिति भावित एवेत्यत्र—वस्त्वर्थश्चेति । सोऽयं क्षायोपशमिको भावो भावागम उच्यते तत्र ज्ञानं प्रधानम् सर्वेषामपराधानामपेक्षत्वात्, तस्मात् शब्दस्य परस्परोपकारेऽव्यवहारः शब्दो द्रव्यागमो भवति, ज्ञानस्य कारणत्वात्, तत्कार्यं श्रुत्वा हि परस्परबोधो भवति, तदकारणत्वं शब्द इति वा अप्रधानत्वमित्यर्थम्, एतदागमत्वेऽपि शब्दस्योपाधिरूपत्वेनाह स हीति । 30 व्याचष्टे—यस्मादिति । आ मर्यादयेति आकाराद्यक्षरसमुदायात्मकमर्यादयैव । अनुपयुक्तो ज्ञायको द्रव्यश्रुतमित्युपयुक्त उच्यते अन्यार्थे यथा प्रमाणतया शब्दस्याप्रधान्ये—तथा चाहुरिति । ततो ज्ञानेन परस्परितत्वं शब्दस्याप्यते इति शब्दो ज्ञान- केनाप्रधानः, श्रोतर्यपि शब्दो ज्ञानार्थं एवेत्यप्रधानम्, तस्मात् च ज्ञानमेव प्रधानमित्याह—तत एव हीति अस्यानमेवज्ञाना-

(तत एवेति) तस्मादेव एव आत्मोत्पत्तिः–शब्दस्य ज्ञानादेवोत्पत्तिः, बुद्ध्यानेनोत्पादितत्वात् ज्ञानमेव शब्दस्य कारणम्, प्रवृत्तोऽपि शब्दः परतन्त्रो ज्ञानार्थत्वात्–परतन्त्रो ज्ञानोपादानार्थत्वात् कोऽभिप्राय आह–मेघुतेम शाब्द्येन–तन्मूलोत्पत्तितदर्थत्वाभ्यां ज्ञानं प्रधानमित्येवमभिप्रायेण दृष्टान्तः–लिपिवत् ध्यानेश्वरवानवदिति वैशेषिकाणां पान घटामेरितैर्मेरेण प्रवृत्तं ईश्वरज्ञानार्थमतोऽपि लिप्यादि ईश्वर[ज्ञान]मात्र भवत् ज्ञानमाधान्यमिति, अतस्त्वयुक्तिपरित्यादि [उप] सामीप्येन सर्वात्मना योग उपयोगः–उपावर्ध समीपे सर्वात्मप्रदेशानां व्यवस्था, उभयो[प]योगात्मयोगनव्ययोः तिर्यङ्मनुष्यनामनिर्वर्तित भवति कुम्भप्रभृति च यथार्थस्य भवति रूपादिमवर्तिपरिणामसम्बन्धात् कुम्भकारादिकार्यवत् नान्यो भवति, 'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया' (पाणिनिशिक्षा का ६) इत्यादि सर्वं तदुपयोगपरि णामभुपयोगविशेषभवनप्राधान्यं साधयति, तत्कार्यत्वाच्छब्दस्य–उपयोगस्य शब्दः कार्यं स एव कारणमु- पयोगस्य कुम्भकारशरीरादेरिति तत्कारणं तथिति तथैव भाव्यभावितं विस्तरेणैवम् ।

अथोच्येत सामान्यमविशेषः तद्भवनमात्रम्, उभयोः परस्परकारणत्वाविशेषत्वादित्य- त्रोत्तरम्, अथ कस्मात् उपयोग एव नामत्वमापद्यते ? उपयोगत्वमात्रेणोक्तः सर्वत्र विशेष- प्रधानत्वम्, तस्यापि वा नामशब्दस्य तत्प्रभृति द्रव्यमिति नामद्रव्यार्थं हित्वा द्रव्यद्रव्या- र्थोऽङ्गीकृतः ततो मूर्तद्रव्यकारणत्वाभ्युपगमः ते विरोधाय आपद्यते, मूर्तममूर्तस्य हि द्रव्यं न भवति नामशब्दो मूर्तः कुड्यादि प्रतिहतगतित्वात्, यथा लोष्टादि, तन्नाम नोपयोगस्य द्रव्यम्, मूर्तत्वात्, मृद्वत्, वैधर्म्येणाकाशवत्, उक्तं हि 'न हि मूर्तममूर्तत्वं नामूर्तं याति मूर्तताम् । द्रव्ये भिन्नावपि कालेषु नात्मभावं जहाति हि' ॥

अथोच्यतेत्यादि पूर्वपक्षो गतार्थो यावदविशेषत्वादिति, सामान्यमविशेषः तद्भवनमात्रं न विशेष

[illegible] । न्याय्येति–पदार्थादिति शब्दस्य तत्प्रवृत्तिनिमित्तत्वं ज्ञानविशेषात् उपयोगात्मकमिति भावः । शाब्द्येनेति, शब्दमूलं हि शब्दस्योत्पत्तिज्ञानार्थत्वं चैति ज्ञानं प्रधानमिति भावः । शब्दस्य प्रधानत्वे ज्ञानस्य च प्रधान्ये [illegible] दृष्टान्तं दर्शयति लिपिवदिति [illegible] ईश्वर [illegible] [illegible] ईश्वरज्ञानं प्रधानं [illegible] ज्ञानं [illegible] भाव । कुम्भकारप्रयुक्तशरीरचेष्टादि [illegible] [illegible] [illegible] [illegible] भावयति–अतस्त्वयुक्तिपरिति। आत्मा हि [illegible] [illegible] तदा [illegible] [illegible] च ज्ञानमेव [illegible] भवतीति [illegible] [illegible] ज्ञानस्य [illegible] दर्शयति–आत्मेति । [illegible] दर्शयति–आत्मेति आत्मा बुद्ध्यादि [illegible] [illegible] विवक्षया मनो युङ्क्ते [illegible] [illegible] साधयतीत्याह–तत्कार्यत्वादिति । [illegible] [illegible] [illegible]

१ सि क्ष. डे. छा. [illegible] । २ सि क्ष. डे. छा. [illegible] । ३ सि क्ष. छा. [illegible] ।

इत्येतदापन्नमिति भावितार्थः, उभयोः परस्परकारणत्वाविशेषत्वादिति, अत्रोत्तरम्—अथ कस्मादित्यादि यावत् सर्वत्र विशेषप्रधानत्वमिति, उपयोग एव नामत्वमापद्यत इति [1] विशेषस्योपयोगस्य प्राधान्यम्, उपयोगस्य प्राप्तेर्नामः, तस्यापि वा नामशब्दस्येत्यादि, नामशब्द इति वीणावेणुमृदङ्गध्वनिभ्यो विशिष्यते, प्रकृतस्या वोपयोगित्वाच, तस्य उरःप्रभृतीत्यादि, नामद्रव्यार्थं हित्वा स्वया द्रव्यद्रव्यार्थोऽङ्गीकृतः तथोक्तम् 'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ मारुत- 5
स्तूरसि चरन् मन्द्रं जनयति स्वरम्' (पाणिनिशिक्षा श्लो० ६–७) इत्यादिना मूर्तद्रव्याभ्युपगमात् आर्षमपि ज्ञापकं 'नो आगमतो दव्व सरीरं मुक्क तयाणं—जस्स णं इमे ण सरीरसमुस्सयेण आयरियाए ति पद आघवियं पण्णवियं' (अनुयो० सू० १६) इत्यादि, तस्माच्छब्दकारणत्वत्यागेन मूर्तद्रव्यकारणत्वाभ्यु-पगमस्ते विरोधापादने, अत आह—मूर्तममूर्तस्य द्रव्यं न भवति—परिणामिकारणमित्यर्थः, यथा मूर्तम-मूर्तस्य कारणं न भवतीत्ययमभ्युपगमः तथा नामशब्दस्य मूर्तत्वादमूर्तोपयोगकारित्वं न युज्यते स्यान्मतं 10
कथं मूर्तः शब्दो यतोऽस्यामूर्तविज्ञानकारित्वं न भवेदित्यत्र ब्रूमः, नामशब्दो मूर्त इति प्रतिपद्यताम्, कुड्यादिप्रतिहतगतित्वात्—यस्य गतिः कुड्यादिभिः प्रतिहन्यते तन्मूर्तं दृष्टं यथा लोष्टादीति, तन्नाम नोप योगस्येत्यादि कार्यप्रदर्शनसाधन—उपयोगो न मूर्तद्रव्यहेतुकः, अमूर्तत्वादाकाशवत् न ह्याकाशं मृदादि पञ्चविमूर्तद्रव्यस्य कार्यमिति साधर्म्यदृष्टान्तः घटादिरिति वैधर्म्येण, अमूर्तद्रव्यहेतुकं न तन्मूर्तं यथा

[illegible] —आपोपयेते इति। [illegible] उभयोरिति शब्दोपयोगयोः परस्परमविशिष्टं कारणत्वम्, कार्ये- 15
दीनि कारणं द्रव्यं तदविशिष्टं सामान्येन शब्दोपयोगयोश्च परस्परकारणत्वे कारणधर्मानुसृतत्वेनोपयोगस्य [illegible] स्यात् यथा च भवदुक्तं तत्तथास्त्विति [illegible] भावः । समाधत्ते—अथ कस्मादिति उभयोः परस्परकारणत्वे उपयोग एव शब्द त्वमापद्यते न तु शब्द उपयोगत्वमिति न चात्र विशेषहेतुः [illegible] विशेषस्य प्राधान्यात् [illegible] इति भावः । किञ्च त्वन्मतेन शब्दस्य न नामद्रव्यत्वं सम्भवति, उरःप्रभृतिभ्यो [illegible] तथा च द्रव्यद्रव्यत्वं प्रसक्तमित्या-शयेनाह—तस्यापि वेति नामशब्दस्यापि वेत्यर्थः । शब्दे नामत्वविशेषणस्यावश्यकत्वमाह—नामशब्द इतीति । शब्दस्योरआदिभ्य 20
उत्पत्तिप्रदर्शकं पाणिनिशिक्षाप्रमाणमाह—तथोक्तमिति । आत्मेति अन्तःकरणावच्छिन्न आत्मा संस्काररूपेण [illegible] बुद्ध्या—धारणया समेत्य—एकबुद्धिविषयान् कृत्वा [illegible] मनो युङ्क्ते करोति, [illegible] कायाग्निमाहन्ति स [illegible] [illegible] मारुतम्, स [illegible] मारुत [illegible] [illegible] [illegible] इति भावार्थः । उरःप्रभृतिस्थानकारणेन [illegible] मूर्तद्रव्यात्मककारणमभ्युपगतं भवतीति नामद्रव्यार्थत्यागो [illegible]—मूर्तद्रव्येति । 25
[illegible] प्रमाणमाह—आर्षमपीति । [illegible] मूर्तत्वादमूर्तोपयोगस्य कारणं न भवतीत्याह—मूर्तममूर्तस्येति । परिणामीति [illegible] न भवति निमित्तकारणत्वादिति भावः । शब्दस्य मूर्तत्वं [illegible]—स्या-न्मतमिति [illegible] मूर्तत्वात् [illegible] अपि तु मूर्तः शब्दो हि कुड्यादिप्रतिहतगति [illegible] इति, [illegible] कुड्यादिना प्रतिहता भवति तन्मूर्तं दृष्टं यथा लोष्टादि, तथा शब्द इति, [illegible] नाम परिणामिकारणं [illegible]—तन्नाम नेति । [illegible] भवेत् नैतत् 30
[illegible] नाम [illegible] न [illegible] मूर्तद्रव्यात्मकः, [illegible]—उपयोग इति [illegible] नामशब्दं [illegible] द्रव्यमिति [illegible] न मूर्तद्रव्यहेतुकः [illegible] भावार्थ

---

१ सि. क्ष. दृष्टेरवन्तर् । २ सि. क्ष. डा. [illegible] । ३ सि. क्ष. डे. डा. [illegible] ।

भूतमिति, अथवा नामूर्तस्य द्रव्यं नामस्वभ्यः मूर्तत्वाभ्यासात्, यदमूर्तस्याकाशादेर्द्रव्यं न तन्मूर्तं यथाऽऽत्म-समिति चक्र ईहातं ज्ञापकमाह—न हि मूर्तममूर्तत्वं—धर्मैरिमस्तुद्रव्यम्य मूर्तं सदचर्मोपात्तकत्वममूर्तत्वं न गच्छति न तथा परिणमति जीवाकाशधर्माधर्मत्वं न याति, नामूर्तमेति मूर्तत्वं—नाप्याकाशाद्यमूर्तं मूर्तत्वं प्रयाति, द्रव्यं त्रिष्वपि—अतीतानागतवर्तमानेषु कालेषु न कदाचिदित्यर्थः यस्मात् नात्मभावं—नात्मद्रव्य-
5 भावी यो धर्मः स आत्मभावः, तमात्मभावं न कदाचित् परित्यजति द्रव्यमिति ।

अत्राह—

नन्वन्योन्यानुगतस्वरूपत्वात् निर्वृत्युपकरणेन्द्रियज्ञानतन्त्वात्मद्रव्यवत् घटाकाशवच्च, द्रव्यं कारणं ज्ञानस्य—द्रव्येन्द्रियं मूर्तममूर्तस्य ज्ञानस्य द्रव्यं शरीरादि कारणं भवान्तरात्मनः, घटश्च घटाकाशस्य ।

10 नन्वन्योन्यानुगतेत्यादि यावद्घटाकाशस्येति, नात्मभावं त्यजति पररूपं माप्नोतीत्युक्तं, अन्योन्यानुगतस्वरूपत्वात् क्षीरोदकवत् अन्योन्यानुगतस्वरूपत्वनिदर्शनं निर्वृत्तीत्यादि यावद् घटवत्, यत्करण निर्वृत्युपकरणेन्द्रियज्ञानवत् तन्त्वात्मद्रव्यवच्चेति प्रत्येकं परिसमाप्यते, द्रव्यं कारणं मूर्तममूर्तस्य ज्ञानस्य द्विविधं द्रव्येन्द्रियं निर्वृत्त्युपकरणञ्च निर्वृत्तिः पक्ष्मपुटकृष्णतारादिद्रव्यनिष्पत्तिः, निर्वृत्तिमुप-करोतीत्युपकरणं मसूरकाकारत्वसुषिरमध्यप्रदेशः [illegible]उपकरणानि, एतद्विविधमपि ज्ञानस्य द्रव्यं
15 रूपम् तस्य व्याख्यान—द्रव्येन्द्रियं मूर्तममूर्तस्य ज्ञानस्य द्रव्यम्, तथा तन्त्वात्म[द्रव्य]वदित्यस्य व्याख्या-शरीरादि कारणं भवान्तरात्मनः, घटश्च घटाकाशस्येति—मूर्तो घटोऽवगाहानुमेयस्याकाशस्याकाशात्मन इति ।

मूर्तमित्युक्ते तथोक्तं मूर्तममूर्तेनसाधनमिति । [illegible]—अथ चेति एतेन व्याख्यानेनैतेन मूर्तस्य अमूर्तस्य कारणं, अमूर्तस्य न मूर्तमन्योन्यमिति [illegible] आत्मा शरीरे मूर्तमिति—उक्तं हीति [illegible]
20 [illegible] सम्मतिटीकायां प्रथमकाण्डे ५१ गाथाव्याख्याने [illegible] 'नामूर्तं मूर्ततामेति मूर्तं नायात्यमूर्तताम्। द्रव्यं कालत्रयेऽपीत्थं [illegible] ॥' इति । अन्यथा [illegible]—धर्मादीति मूर्तममूर्तत्वेन न परिणमतीति भावः । अमूर्तमपि न मूर्ततया परिणमतीत्याह—नामूर्तमिति । कदाचिदपि द्रव्यं न स्वात्मभावमात्मीयं धर्मं त्यजतीत्याह—द्रव्यं त्रिष्व-पीति । ननु क्षीरे नीरमिव नीरे च क्षीरमिव परस्परं मूर्तामूर्तयोरन्योन्यानुगतस्वरूपत्वात् मूर्तममूर्तस्य कारणं [illegible]—मन्यमन्यस्येति । व्याख्ये—आत्मभावमिति । निर्वृत्त्युपकरणेन्द्रियज्ञान[illegible] इति निर्वृत्त्युपकरणेन्द्रियज्ञान-
25 तन्त्वात्मद्रव्यवदिति [illegible]—घटाकाशमिति । [illegible]—द्रव्यं कारणमिति । द्रव्येन्द्रियमुक्त्वा द्रव्येन्द्रियं तु निर्वृत्त्युपकरणरूपं [illegible] [illegible] निर्वृत्तिरुपकरणञ्च [illegible] [illegible] [illegible], [illegible] यथा [illegible], एतदुभयमपि द्रव्येन्द्रियं ज्ञानस्य द्रव्यं मूर्तममूर्तस्य मूर्तं कारणं [illegible] द्विविधमिति । द्वितीयं दृष्टान्तं व्याचष्टे—तन्त्वात्मद्रव्यवदिति शरीरादि [illegible] द्रव्यं [illegible]
30 [illegible] भवान्तरात्मनः—[illegible] आत्मा भवान्तरात्मा [illegible] इति भावः भवान्तरं [illegible] तस्य भवान्तरात्मन इति पाठे [illegible]। [illegible] घटश्चेति [illegible] द्रव्यं [illegible] भावः।

---

१ सि. क. डा. [illegible] । २ सि. क [illegible] ।

अत्रोच्यते—

आगतं सर्वेतयोऽर्थो द्रव्यं विशेषो वा योऽस्तु सोऽस्तु सर्वथाऽऽसावस्वतन्त्रो विशेषेण ज्ञानेन तथा तथा भाव्यते सर्वात्मनेति प्रधान विशेष एव भवतीति, तत्र यदि सेन्द्रियाणि ज्ञानानि तानीन्द्रियकृतत्वादज्ञानानि स्युः, केवलमेवैकं ज्ञानं स्यात्, आत्मानश्च चेतनत्वात् स्वतन्त्राः यदि तच्छरीरं स्वतंत्रश्च कर्ता, ततश्चाशरीरेण शुद्धेन सिद्धकेवलिना कृतं कर्मान्वेष्यं स्यात्, अनिष्टं च न रागिकृतम्, इष्टमपि स्यात्, आत्मनोऽनन्यत्वात्, तथाऽऽकाशघटयोरनाद्य-स्यानुत्पत्यात्मकयोरानुत्पत्त्यनाद्युत्पत्त्यात्मकघटाकाशभवने घटाकाशमिति स्यात् तत्तु त्वन्मतेनाका-शमेवामूर्तं तद्विपरीतो घट इति कुतो घटाकाशमुदाहरणं घटते? एवं द्रव्यस्य भवने दृष्टा-न्तस्य विपर्ययसाधनत्वात् कुतः साऽन्योऽन्यानुगमरूपता? द्रव्यस्य सदा रूपापरित्यागात्।

आगतं सर्वेतदित्यादि यावद्विशेष एव भवतीति, योऽर्थो द्रव्यं सामान्यं विशेषो वा—मकत्वर्थः प्रत्ययार्थो वा भवनं भाव इति योऽस्तु सोऽस्तु सर्वथाऽसौ अस्वतन्त्रो विशेषेण ज्ञानेन तथा तथा भाव्यते द्रव्येन्द्रियाणि तत्सर्वात्मना ज्ञानमात्मा, च विशेषः, स भावयति यद्यपि भवत्सामान्यं मायर्थतोऽप्युपसर्जनम्, विशेषः प्रधानमित्युक्तं भवति, तत्र यदीत्याद्यनिष्टापादनं परस्य, यावदेकं ज्ञानं स्यादिति, हेतुहेतुमद्भावेन गतार्थम्, सेन्द्रियाणि मतिश्रुतावधिमनःपर्यायज्ञानानि तानीन्द्रियकृतत्वादज्ञानानि स्युः, केवलज्ञानमेवैकं ज्ञानं स्यादिति, किञ्चान्यत्—आत्मानश्चेतानि, आत्मैव स्वतन्त्रश्चेतनत्वात्, यदि तच्छरीरम्, स्वतन्त्रश्च कर्ता ततश्चाशरीरेण शुद्धेन सिद्धकेवलिना कृतं कर्मान्वेष्यं स्यात्, तथाऽस्त्वदुष्टमम्, मुक्तसंसारप्रसङ्गात्, अनिष्टं चे न रागिभ्यागिकृतम् इष्टमपि स्यात् कर्म, तस्यैव संसारित्वेष्टेः पूर्ववद्धेतुहेतुमद्भावेनापादनं याव-दात्मनोऽ[न]न्यत्वात्, एवं भाव्योदाहरणार्थं व्यभिचारितम् तृतीयमपि—तथाऽऽकाशघटयोर्यथासंख्य-मनाद्युत्पत्त्यात्मकत्वादाकाशमाद्युत्पत्त्यात्मकघटीभवति, घटश्चानाद्युत्पत्त्यात्मकाऽऽकाशीभवत्याद्युत्पत्त्यात्मकः सन्,

20 परमाण्वादि तत्रव्याप्यनावेवि मानार्थः । तत्र हेतोर्व्यभिचारपादकते—चेतनेति क्षीरस्य दधिभवनम् परमाण्वादीनां चेतनाप्रवर्त्यं चेतनानधिष्ठितत्वेन दृष्टं तत्र तावत्स्वेषु क्षीरादिषु हेतो व्याप्यव्यभिचार इति भावः । त्रिविधा भावा लोके तत्रार्थं प्रसिद्धचेतनकर्तृकाः केचित् प्रासादप्रभृतयः केचित् प्रसिद्धचेतनकर्तृकविरहिता स्थिता परमाणुजलमात्रप्रभृतयः केचिच्च संदिग्धचेतनकर्तृकाः तनुकरणभुवनादिप्रभृतयः न हि तत्रानित्यचेतनकर्तृकत्वं सिद्धम्, न वा कर्तुं अनवाप्युपलब्धिमात्रेण भावः यत्नवतेऽप्यनुपलब्धम् तस्मात्तदृष्टकर्तृकं तनुकरणादिसंज्ञापि तत्कर्तृत्वं विशिष्टचेतनाधिष्ठितमिति प्रतिज्ञार्थाव्यतिरेकात्क्षीराद्यन्त-
25 र्भावयति—अदृष्टेति । अदृष्टकर्तृकत्वेन तन्वादीनामिव क्षीरादीनामपि प्रतिज्ञान्तर्भावत्वस्थितो न व्यभिचार इत्याह—तस्या इति । तमार्थे दृष्टान्तमाह—शब्देति । अनित्यः शब्दः कृतकत्वादिति प्रयोगे कश्चिदाह मूर्धान् निरन्तरं धूयमाने तत्रुत्तरं शब्दो दुर्लभैर्मिरन्तरबुधार्यमाणे शब्दविशेषे च कृतकत्वसत्त्वेऽपि नित्यत्वेन तस्याभासानव्यभिचार इति तदिदं वचनमनुत्तरम् यदि शब्दविशेषस्यानित्यत्वं प्रतिज्ञायते अपि तु श्रोत्रग्राह्यमात्रस्य शब्दत्वेन पक्षीकरणादपि पक्षान्तर्भावात् एकेकविशेषत्वं कृतकत्वाविनाभाव्येवेति भावः । वैसकाद्युदाहरणमाह—वैसेति । कोलाहलित्वविशिष्टे कृतकत्वं दर्शितम्, पुरुषेति अनेन च मिथो
30 कृतकत्वं दर्शितम्, तदेव वचन इति कृतकत्वमनैकान्तिकमिति भावः । तस्मात् सर्वेषां श्रोत्रग्राह्यत्वाविशेषात् शब्दत्वमेवेति शब्दोऽनित्य इति प्रतिज्ञायामन्तर्भूतत्वेनानित्यत्वं कृतकत्वाविनाभाव्येवेति भावः । तस्मात् तदुक्तमनुत्तरं नास्त्युत्तरं यस्य इत्यर्थ आपत इति अनुत्तरं चास्तीत्युक्तवते तस्मादनुत्तरमिति भावः । प्रकारान्तरेण व्यभिचारमभ्यस्य चेतनानधिष्ठितेश्वरेति चेतनाधिष्ठितत्वे साध्ये स्थित्वा प्रवृत्तिर्हेतुरीश्वरेऽनैकान्तिकः ईश्वरस्य स्थित्वा प्रवृत्तिमत्त्वात्, चेतनान्तरेण-

1–2 सि क. व्यभिच । ३ सि क. द्यमानिव । ४ सि क. °तुरनन्तर । ५ सि.क. °नान्तरेण ।

(स्थित्वेति) स्थित्वाप्रवृत्तिचेतनानधिष्ठितेश्वरस्यानेकान्त इति चेत्—स्यान्मतं यथेश्वरः स्वयं प्रागप्रवृत्तात् स्थित्वा प्रवर्तमानमपि चेतनान्तरेणानधिष्ठितः प्रवृत्तश्च तथा तन्त्वादीनि स्थित्वा प्रवृत्तानि स्युरित्यनेकान्तः, ईश्वरस्य वा चेतनाधिष्ठि[त]त्वादि, एवमनैकान्तिकत्वाभिच्छायां वा चेतनाधिष्ठितोऽप्यपीश्वरः प्राप्तः, स्थित्वा प्रवृत्तेः, अदृष्टाणुप्रधानादिवत्ततोऽन्येश्वरता, महाधिष्ठितबीपुरुषादिव तस्यापि चाधिष्ठातुरन्याधिष्ठितचेतनत्वस्य स्यादित्येतच्च न, चेतनाधिष्ठितप्रवृत्ति[म]त्त्वस्य साध्यधर्मत्वात् नैष दोषः, चेतनाधिष्ठितप्रवृत्ति[म]त्त्वं हि साध्यते धर्मः, स चाचेतनमेव तद्धर्मिविषयत्वात्, चेतनानां स्थितत्वात् प्रयोजनाभावाच्च, तनुकरणभुवनसाधनमदृष्टादृष्टाणुप्रधानानि अचेतनानि धर्मीणि चेतनाधिष्ठित[प्रवृत्तिमत्]त्वधर्मेण विशिष्टानि साध्यन्त इति प्रतिज्ञाविषयज्ञानादचोद्य इति ।

देवदत्तादेस्तर्हि चेतनेश्वराधिष्ठानं न प्राप्नोति, इष्यते च त्वया चेतनानामपीश्वराधिष्ठानम्, यथा पुरुषवादनिरसनाय—'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' ॥ इति (महाभारते वनपर्वे अ० ३० श्लो० २८) चेन्न, प्राण्यदृष्टबुद्धिचेतनप्रतिज्ञानात्, विशिष्टबुद्धित्वमपि चास्यार्थानामर्थक्रियायोग्यत्वेन सन्निवेशकत्वात् त्वष्टृवत् ।

(देवदत्तादेरिति) देवदत्तादेस्तर्हि चेतनेश्वराधिष्ठानं न प्राप्नोति, ततो देवदत्तादिषु चेतनानधिष्ठितानि तन्त्वादिसाधनानीव्यदृष्टाणुप्रधानादीनीत्यनेकान्तः, सोऽपि चेश्वरस्तद्वदचेतनान्तराधिष्ठित इति प्राप्तम्, इष्यते च त्वया—इष्यत एव त्वया चेतनानामपीश्वराधिष्ठानम्, यथा 'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' ॥ (महाभार० वन० अ० ३० श्लो० २८) पुरुषवादनिरसनायेति श्लोकवचनप्रयोजनमाह—मा भूत् पुरुषस्य स्वकारणभावप्रसङ्ग इत्यत्र स्वामात्र तन्त्वदृष्टप्रधानाण्वादीति, अत एव भवता 'अज्ञो जन्तुरनीशोऽय'मिति, अत्रोच्यते न प्राणि-

प्रतिविशिष्टत्वात् यदि तन्त्वादि चेतनैरचेतनाधिष्ठितत्वमाद्रियते तर्हि तन्त्वाद्यन्यस्य चेतनस्येतरचेतनेनाधिष्ठितत्वं दुरवधारणम् प्रसज्यते तन्त्वाद्यपेक्षयैवानवस्थेति परिहर्तुमिच्छवः । एवमेव व्याचष्टे—स्यान्मतमिति । अन्यथार्थं दर्शयति—एवमिति । व्याचष्टे—चेतनेति । चेतनाधिष्ठितप्रवृत्तिमत्त्वं हि साध्यम्, न तु चेतनान्तराधिष्ठितप्रवृत्तिमत्त्वम्, तथा च चेतनाधिष्ठितप्रवृत्तिमत्त्वधर्मोऽचेतन एवाऽऽपादि न तु चेतने, तत्र चेतनान्तराधिष्ठितप्रवृत्तिमत्त्वस्यैव प्रसङ्गात् अतश्च धर्मत्वेनाचेतनपक्षप्रतीतेश्च कथ्यते, न तु चेतनता प्रवृत्तिः तस्यचेतनाधिष्ठितत्वस्य स्थितत्वात् तत्वाधने प्रयोजनाभावात् एवं चेतनाधिष्ठितप्रवृत्तिमत्त्वविशिष्टाचेतनस्यैव प्रतिज्ञाविषयत्वादिति भावः । पूर्वोक्तानुमानेनाचेतनप्रवृत्तेरधिष्ठातृत्वेनेश्वरसिद्धावपि चेतनानामधिष्ठातृतया तत्सिद्धेश्चेतनानां प्रवृत्तेर्न चेश्वराधिष्ठितत्वेति तदनुपपन्नमित्येवः चेतनप्रवृत्तीनामपीश्वराधिष्ठितत्वमनुपपन्नत्वादिवाह—देवदत्तादेरिति । देवदत्तादय एवचेतनाधिष्ठातारोऽपि चेतनानधिष्ठिता इत्यु चेतनप्रवृत्तीनामपीश्वराधिष्ठाने ईश्वरस्यैतदपि चेतनान्तरेणाधिष्ठितत्वं स्यादित्यनवस्थेत्याह—तत इति । चेतनाचेतनानामीश्वराधिष्ठितत्वे पुराणवाक्यमादर्शयति—अज्ञ इति, प्राणी तथाविधज्ञानशक्त्यभावात् सुखदुःखयोः प्रभुर्न भवति तस्मात् ईश्वरप्रेरित एव तत्कर्मवशेन ईश्वरेण प्रेरितः सन् निजकर्मानुरूपं स्वर्गं सुखानुभवयोग्यं नरकं वा दुःखानुभवयोग्यं गतिविशेषं प्राप्नोतीत्यर्थः । पतिरेवं पुरुषस्यैव प्रयोजनमिति वदं प्रस्तावमाह—पुरुषवादनिरासायेति । व्याचष्टे—अत्रोच्यत इति, विशिष्टचेतनाधिष्ठितान्येव प्रवर्तन्त इति हि पूर्वं प्रतिज्ञातं न तु चेतनाधिष्ठितान्येव प्रवर्तन्त इति चेतनो विशिष्टबुद्धिमत्त्वेनैव साध्यत्वेनेति दर्शयति—प्राणीति ।

१ सि क. °त्वमेव । २ सि क. देवदत्तादेस्तर्हि । ३ सि क. प्रधानादीनाम । ४–५ सि क अज्ञो ।

शिष्टबुद्धिहेतुत्वप्रसिद्धानात्—प्रागस्माभिर्विशेषितं विशिष्टबुद्ध्यधिष्ठितानि तन्वादीनीति, विशिष्टबुद्धिस्व व्यापाराधीनं स्वार्थम्, कुतः सिद्धमिति चेदुच्यते—विशिष्टबुद्धिस्वमपि चास्मार्थानामर्थक्रियायोग्यत्वेन सन्निवेशकत्वात् तन्वादीनि विशिष्टबुद्धिपूर्वकाणि, अर्थक्रियायोग्यत्वेन सन्निविष्टावयवत्वात्, स्थान-गमनशयनासनाहारादिप्रयोजनानि हि तन्वादिषु क्रियन्ते, तत्क्रियायोग्यावयवसन्निवेशात्, स्थपतिबुद्धि 5 पूर्वकप्रासादवत्, समस्तार्थक्रियायोग्यत्वेनार्थानां सन्निवेशकः स स्थपतिवत् तस्माच्च विशिष्टबुद्धिरिति।

अनैकान्तिकत्वोद्भावनार्थमाह—

तन्वादीनि स्वभावेनैव प्रवृत्तानि न तु केनचिद्विशिष्टबुद्धिना, नीलोत्पलनालकण्टकमयूर चन्द्रिकादिवदिति चेन्न क्षीरदधिमेघादिवदुक्तोत्तरत्वात्।

तन्वादीनीत्यादि यावन्नीलोत्पलनालकण्टकमयूरचन्द्रिकादिवदिति, नहि प्रधानहुमवर्णगन्ध 10 रससर्वस्य स्वस्तीनिरुत्यस्य जलाशयावतरणस्य कमलस्य महत्यादरोपभोगसाधनभूतस्य लोके केनचित् असूयया मा ग्रहीत् कश्चिदिति कण्टकाः कृताः, नीलोत्पलनालादिष्वतिप्रसङ्गात्, न च मयूरचन्द्रका-ग्रामिन्द्रचापवर्णप्रतिसर्पिविचित्रवर्णता कृता कुड्यादिषु चित्रकारेणेव केनचिद्विशिष्टबुद्धिना, चित्रकर चेतनदानाद्यभावप्रसङ्गादिसत्त्रोच्यते, न, क्षीरदधिमेघादिवदुक्तोत्तरत्वात्, क्षीरदधिमेघादिवत् पद्मना-लकण्टकमयूरचन्द्रकादीनां तन्वादिवदात्मकर्तृकविषयप्रतिज्ञार्थव्यतिरेकादनैकान्तिकत्वाभाव इत्युक्तो-15 त्तरमेतत्, एवं तावत् सामान्येन विशिष्टबुद्धिपूर्वकत्वोक्ता।

प्रस्तुतप्रतिज्ञावापेक्षया चैव प्रतिज्ञायते—

लघुमध्यमबृहद्गुणस्मरणनियमादयः परस्परप्रत्यनीकाः विशिष्टबुद्धिपूर्वकाः संहत्यैककार्य-कारित्वात् पाचकाधिष्ठितानलोदकौदनसाधनवदिति।

ईदृशं चार्थमेतत् उक्त इव विशिष्टकार्यत्वम् समाधत्ते—कुत इति। विशिष्टबुद्धित्वमपीति तन्वादिष्वनर्थक्रियायोग्य—अवि-विशिष्टस्वरूपनियतस्वरूपावयवानां संयोजनं नान्तरेण विशिष्टबुद्धिचेतनव्यतिरेकेण न सम्भवति नहि स्वयमेवावयवसमवे 20 तत्पर्याप्तिप्रत्ययसमवायप्रत्ययस्वरूपप्रसिद्धत्वमात्राद्विशिष्टकार्योत्पत्तिसम्भवः उपलभ्यते तत्र तावदेव विशिष्ट-बुद्धिरिति च एव चेतनादेकस्मादिदानेव इति भाव। तन्वादीनां विशिष्टबुद्धिपूर्वकत्वं साधयति—तन्वादीनीति। ननु कमलादौ कण्टकादिमयूरचन्द्रकादौ विचित्रवर्णता न केनापि कृता दृश्यते किन्तु स्वभावत एव भवति तथा तन्वादयोऽपि स्वभावत एव भव-न्तीति विशिष्टबुद्धिपूर्वकत्वमात्रेण प्रोक्तो हेतुरनैकान्तिकत्वमापादयते—तन्वादीनीति तन्वादयः स्वभावतः प्रवर्तन्ते नैवान्यथाकारणं न प्रतीयते इति प्रश्नेष। न हीति नहि कमलस्य केनचित् कण्टकाः कृताः मा ग्रहीत् कश्चिदिति सम्भवन्ति। यदि 25 केनचित्कृताः स्युः नीलोत्पलस्य कुतो न कण्टकाः कृता इत्याह—नीलोत्पलेति। कुड्यादिषु चित्रकारेण यथा विचित्रवर्णता क्रियते नहि तथा केनचिद्विशिष्टबुद्धिना मयूरचन्द्रकादौ विचित्रवर्णता क्रियते—न चेति। यदि तासां विचित्रवर्णता केनचित् कृता तर्हि चित्रकारेण यथा चित्रे मयूरादेश्चैतन्यं न भवेत् तथा देवेनापि मयूरादेश्चैतन्यं न भवेत् इत्याशयेनाह—चित्रकरे-ति। क्षीरदधीति क्षीरादेः स्वभावत एव यदि भवेत् तर्हि तन्वादिसंयोगमपि नापेक्षेत तत्तासामपि स्वभावत उत्पद्यमानत्वात्, नहि तत्रापि क्षीरमक्षीरं यस्य दधिरूपेणादिपरिणामापेक्षयैव क्षीरादेर्दधिभावः सम्भव इति चेत् तर्हि विशिष्टबुद्ध्यधिष्ठितत्वेन क्षीरादेर्दधि-30 भावसम्पादनमिति कुतो नाङ्गीक्रियते विशिष्टसम्पादनात्, कर्ता न दृश्यत इति चेत् दृश्येन कारणे कारणं मन्तव्यमिति तत्कार्य-त्वेन क्षीरादावपि प्रतिज्ञानमङ्गीकर्तव्यमिति भावः। पुनरपि प्रधानकार्याधिष्ठायकमिति धर्मेवात्र संस्कारमपि पुनः कथं कार्यान्तर-सम्बन्धस्याभावात्परस्पर एवाधिष्ठान इत्याशयेन तत्तदगुणपरिणामाद्यनुमानमाह—लघुमध्यमेति परस्परप्रत्यनीका

1 वि क. पूर्वोक्तार्थप्रतिपादनपरं मा।

लघुप्रकाशेत्यादि यावत् पावकाधिष्ठितानन्नेदनैवमसाधनमिति, यथा परस्परमत्यनीकयो रम्बुदकयोरत्यनीकत्वविघातिना विशिष्टबुद्धिना पावकेनाधिष्ठितयोः सतोरपि मिथः प्रत्यनीकत्वे बहुवि धसवर्तिनोः संहत्यकारित्वादोदनसाधन दृष्टम्, तथा लघुगुरुणोः प्रकाशवरणयोः प्रवृत्तिनियमयोश्च मिथो विरुद्धयोरपि संहत्य महदादिभावेनैककार्यकारित्वाद्विशिष्टबुद्धिपूर्वकत्वेति ।

अन्योऽन्याभिभवमिथुनवृत्तित्वपरिणामादिति चेत्र परिणामस्यापि कार्यत्वात् धर्मा 5
न्तरैक्यादिपरिणामो हि धर्मान्तरनिषेधो धर्मान्तराविर्भवनञ्च, तद्रूप कार्यम्, पूर्ववत् प्रति ज्ञार्थाव्यतिरेकात्, विशिष्टबुद्धिमद्धिष्ठितम् ।

(अन्योऽन्येति) अन्योऽन्याभिभवमिथुनवृत्तित्वपरिणामादिति चेत्—स्यान्मत सत्त्वरजस्त मसामेवाङ्गाङ्गिभावः, पुरुषार्थमुद्दिश्य प्रवृत्तानां वैषम्यपरिणामान्महदादिसाधनम्, तेषां प्रयोक्त्रेवं तत्र न, परिणामस्यापि कार्यत्वात्, तद्व्याचष्टे धर्मान्तरैक्यादिपरिणामो हि धर्मान्तरनिषेधो धर्मान्तरावि- 10
र्भवनञ्च तद्रूपमूर्तं कार्यं, स तु परिणामः कार्यत्वात् पूर्ववत् प्रतिज्ञार्थाव्यतिरेकात् रथादिवत्, सोऽपि विशिष्टबुद्धिमदधिष्ठितम्, तस्मादयुक्तं सत एव परिणमन्ते सत्त्वादय इति ।

अन्याह 'एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्' ॥ (श्वेता० ६–१२)

अन्याह एक इति, जिनमतानुसारेण, एकोऽद्वितीयः प्रधानो वा, वशी—स्वतन्त्रः स्वाभाव्यात्मा, 15
निष्क्रियाणां—अस्वातन्त्र्याणाम्, परतंत्रा ह्यपि निष्क्रिया एव, बहूनां—अनन्तानां प्रधानादीनां कर्मक रणसम्प्रदानापादानाधिकरणप्रधानशक्तीनामनन्तानामपि प्रवर्तयितृत्वात् स्ववशीकर्तुं शक्त्वा[त्]शीति, एकं बीज—प्रधान महदादि विपरिणता बहुधा—महदादित्वेनात्मानन्तमेवमभिव्यक्तया यः करोति—सृजति-

कपालयो विशिष्टबुद्धिपूर्वकः संहत्यैककार्यकारित्वात् घनकोशकयोः पावकपूर्वकत्ववदिति प्रयोगः परस्परविरुद्धयोः संहत्यैव कैवल्येऽर्थं विशिष्टबुद्धि कारणं विना न भवेत् परस्परप्रत्यनीकयोर्न लघुगुरू प्रकाशावरणौ प्रवृत्तिनियमौ च तथापि विशिष्टबु- 20
द्ध्यधिष्ठितौ महदादि साधयत इति भावः । ननु सत्त्वरजस्तमसां प्रयोक्तृमत्त्वाद्गुणत्वेनान्योऽन्याभिभूयते यथा सत्त्वं रजस्तमसी अभिभूयात्मन शान्ता इति लभते एव रजस्तमसी अभिभूय घोरा तमश्च सत्त्वरजसी अभिभूय मूढामिति तथा सत्त्वाद् योऽन्योऽन्यमिथुनत्वात् सर्वस्य त्रिगुणात्मकत्वेन परस्परं मिथुनाः सर्वे सर्वत्रगाः एवमन्योन्यपरिणामा अन्यतमोऽन्यतममपेक्ष्य परिणमते तस्मात् सत्त्वरजस्तमसामङ्गाङ्गिभाव एव प्रयोक्तेत्याशङ्कते—अन्योऽन्येति अन्योऽन्याभिभवाश्रित्वात्, अन्योऽन्य- मिथुनवृत्तित्वात् अन्योऽन्यपरिणामात् महदादिसर्गः न तु विशिष्टबुद्धिपूर्वक इति भावः । अङ्गाङ्गिभावस्य नियमाहेत्वन्य भवतीत्या- शङ्कते—स्यान्मतमिति । तत्र हेतुमाह—पुरुषार्थमुद्दिश्येति सत्त्वादयः पुरुषार्थमुद्दिश्य वैषम्यपरिणाममङ्गाङ्गिभावमनुगम्य 25
महदादीन् साधयन्ति अतस्तेषां सत्त्वादीनां प्रयोक्त्रङ्गाङ्गिभाव एवेति भावः । अङ्गाङ्गिभावो हि तेषां वैषम्यलक्षणः परिणाम उच्यते तदपि कार्यमेव साम्यावस्थाभिन्नो हि वैषम्यपरिणामो भवति यदि साम्येनावस्थिताः सत्त्वादयोऽधिष्ठा तृणा वा अभिभूयन्ते तस्मात् परिणामस्य कार्यत्वात् घटान्तर्गतत्वेन विशिष्टबुद्धिपूर्वकत्वमेवेति समाधत्ते—परिणामस्या पीति । परिणामस्य कार्यत्वं समर्थयति—धर्मान्तरेति यथा तत्त्वान्तरावस्थायाः पूर्वधर्मे तिरोधाय सत्त्वादयस्तु धर्मा धर्मान्तरेणाविर्भवन्ति तदवस्थानं परिणाम उच्यते उक्तञ्च 'जहद्धर्मान्तरं पूर्वमुपादत्ते यदाऽपरम् । तत्त्वादप्रच्युतो धर्मी 30
परिणाम स उच्यते' इति । प्रधानादिवो महदादिसर्जनमपि विशिष्टबुद्धिमत्पूर्वकमेवेत्यौपनिषदं प्रमाणयति—अन्याहेति । अचेतनचेतना जीवा अपि परतन्त्रत्वान्निष्क्रिया एवेत्याह—परतन्त्रा इति । निष्क्रियाणामिति क्रियावत्त्वोऽपि मूर्तिमाः सर्वत्र

1 सि क °प्रधाने । २ सि क. °पावक । ३ सि क. °ोऽन्यमत्वी । ४ सि क. पावकेना । ५ सि क साम्यः । ६ सि क. एव ।

अविविक्तसामान्यप्रत्ययानुक्रमेण यथा यथा व्यवस्थापयति, तमीश्वरं सततो भिन्नस्य भाव्यमानस्य प्रमा-
णाविरोधस्य भावयितारं, ज्ञातस्य—आत्मनि स्थित शिलापषमूर्तिसर्वगत सर्वत्र तासां सद्भावात्, येऽनु
पश्यन्ति—तत्प्रसादादेव तच्छास्त्रानुसारेण योगाभ्यासप्रसादक्रमेण येऽनुपश्यन्ति धीराः—अविचलितयो
गसमाधयः, को योगः ? 'प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा । तर्कः समाधिरित्येषः षडङ्गो
5 योग उच्यते ॥ (अमृतनादोपनिषत् ६) तत्रेन्द्रियाणां विषयेभ्यो मनसश्च प्रत्याहरणं प्रत्याहारः,
प्राणायामस्त्रिविधः रेचकः कुम्भकः पूरक इति, तत्र रेचक आन्तरं वायुं बहिर्निःश्वासयति नासिका
द्वारेण, पूरको बाह्यमन्तःप्रवेश्य पूरयति कुम्भकः पूर्णकुम्भवदवस्थाप्य वायुं सामीप्येनावस्थापयति,
ध्यानं हृत्प्रदेशगावस्थितं वा धारणा यथाऽभ्यासं हृदयादिषु प्रदेशेषु मनसोऽवस्थापनम्, यथा पूर्वं नाभौ
ततो हृदये कण्ठे नासिकाग्रे भ्रुवोर्मध्ये ब्रह्मरन्ध्रमूर्धनीति । तर्कः शून्यागारगिरिकन्दरादेकान्ते शुचौ देशे
10 स्थिरे सुखाऽऽसनं यथासुखं निवेशेन सम्भाव्य पश्यद्वृक्षस्थितवीरासनादासन समपादादिलाभ चाऽऽ-
स्थाय ध्यायतो मे समाधिर्भवतीति तर्कयेत अनेनैवं कृते क्रियाविशेषेणाऽऽहारविहारसाम्ययायिमा
ध्यानसमाधिर्भवतीति तदुपायविचार ऊहस्तर्कः ध्यानयोगादिरपिः समाधिरित्येषः षडङ्गो योगः ।

सर्वमन्येऽप्य भावु स्थितत्वादयोगे यतो ध्यानस्य कथ्यत इति भाव । कस्य [illegible] भक्तिमनोभाव
मधुवक्त परमप्रेमास्पदे [illegible] योगिन्ये मत्वाऽभिमुखीभूतस्य [illegible] महाविकार-तत्प्रसादादे
15 वेति तत्कर्म हि [illegible] पुराणानि तदनुसारेण तपोध्यानयोगाभ्यासादिसाधनक्रमेण वै योगिनः परमात्मानं
विजानन्तीति भाव । तत्र योगमाह—को योग इति योगविपत्तिनिरोध तदङ्गानि षट् प्रत्याहारादीनि, चित्तस्थैर्य
करत्वात् । तत्र प्रत्याहारमाचष्टे—तत्रेति पञ्चमस्य इन्द्रियविषयासम्प्रयोगकाले इन्द्रियाणां चित्तस्वरूपानुकारिता
प्रत्याहार इति पातञ्जले विजितेन्द्रियस्य हि [illegible] भवन्ति, अजितेन्द्रियस्य तु चित्तस्थैर्यं [illegible] भवति ।
आसनजये इति [illegible] प्राणायाम स च रेचकपूरककुम्भकभेदात् त्रैविध्यं प्राणायाममाह—प्राणायाम
20 इति यत्र कोष्ठ्ये वायुर्निःश्वस्य बहिर्निःसरेत्सौ [illegible] रेचक प्राणायाम यत्र बाह्यो वायुरन्तर्[illegible]
[illegible] पूरक प्राणायामः [illegible] वायुं [illegible] कुम्भक प्राणायाम
इत्यादयोक्तम्—तत्र रेचक इति । प्रत्याहारानन्तरं [illegible] ध्यानविचार-
ध्यानमिति । यत्र [illegible] चिन्तयेत् तत्र चित्तस्थापनं स्थापने धारणेत्याह—धारणेति । [illegible]
पर्येति तदुक्तं 'आद्यानाभ्यां हृदये भवन्त्यन्तौ च तथोरसि । कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्धसु । किञ्चित्तस्मात् परस्मिंश्च
25 धारणा दश कीर्तिता' ॥ इति । विचारात्मकं तर्कमाह—तर्क इति [illegible]
[illegible] प्रतिष्ठा भवति तदथ समाधिविषये प्रवर्तते तथा [illegible] शुचौ देशे [illegible]
[illegible] विचार ध्यानतः समाधि-
र्भवतीति चिन्तयति तथा तदनुष्ठानेन ध्यानसमाधिर्भवतीति विचारस्तर्क इति भाव । ध्यानमेव यदा ध्येयमात्रालम्ब-
[illegible] भवति [illegible] ध्यानं तदेव समाधिरुच्यत
30 इत्याह ध्यानेति ध्यानस्य [illegible] सर्ववृत्तिनिरोधरूपः समाधिरित्यर्थः । समाधिर्द्वि
विधो भवति सम्प्रज्ञातोऽसम्प्रज्ञातश्चेति, वितर्कविचारानन्दास्मितानुगतः समाधिः सम्प्रज्ञात निरोधचित्तस्य समाधिर
सम्प्रज्ञात [illegible] द्वितीयो निरालम्बनः सम्प्रज्ञातश्च वितर्कविचारानुगतः विचारानन्दास्मितानुगतः [illegible]

---

१ सि. क. धारणा ।

अनेन योगेन सर्वत्र क्षित्यादिमूर्तमीश्वरं दृष्ट्वा पश्चाद्भावितात्मा तमात्मसमेव पश्यति—यदत्र मम शरीरे कठिनं सा पृथिवी परमेश्वरमूर्तिः, यदत्र उष्णमूष्मा तेजः, यश्च वायुः सुषिरमाकाशम्, यश्चैतस्य स यज-मानः, चक्षुः सूर्यो जिह्वा सोमो यमो वरुणः इत्येवमवयवेषु यथासम्भवं येऽनुपश्यन्ति ते धीराः शाश्वतीं शान्तिमाप्नुवन्ति ते एवम्परेण सायुज्यं निर्वाणं मोक्षमित्यर्थः नेतरे प्रधानपुरुषनियत्यादिकारणिन इति ।

नयस्वरूपज्ञानायमाह—　　5

अयं विधेरुभयभाक्, विधिर्व्याख्यातः पूर्वमनपवादप्रवृत्तिः तस्योत्सर्गाद्विधानात्मा विधिर्विधीयते सर्वसर्वात्मकत्वात्, नियमः सन्निधिप्रयोज्यसतोरप्रवृत्तेरसत्त्वम्, तयोरसत्त्वात्, स्वतन्त्रस्य कर्तुरीश्वरस्यैव भवनात् तस्मान्नियम्यते च ।

(अयमिति) अयं विधेरुभयभाक्—उभयं विधिं नियमञ्च भजत इत्युभयभाक् विधिर्व्याख्यातो लोकवदिति पूर्वमिति स्मारयति, पुनः संक्षेपेण व्याचष्टे—अनपवादप्रवृत्तिः—न कश्चिदपवादः [प] इरति 10 किं न यतेन ? यदि सामान्यं यदि विशेषः इत्यादि, तस्य विधेरुत्सर्गाद्विधानात्मा विधिर्विधीयते, कस्मात् ? सर्वसर्वात्मकत्वान्निरपवादः प्रवर्तत एव प्रवर्तते न क्वचिद् व्याहन्यते, अयं हि नयः सर्व-सर्वात्मकमिति वाच्छति, यथा सूचितं, क्व ? सन्निध्यापत्तिव्याख्याने तदेवात्रापि गद्यते, नियमः सन्निधि-प्रयोज्यसतोरप्रवृत्तेः—यावत्तावदनन्तरोक्तौ सन्निधिमत् [न] व्यापद्विमदनसंहायौ ईश्वर [:] प्रवर्त्यौ वा प्रयोज्यप्रधानादयोऽभावः तयोर्द्वयोरप्यप्रवृत्तेरसत्त्वम्, किं कारणं ? तयोरसत्त्वात् तदुभयं असदेव 15 तदुच्यते, स्वतन्त्रस्य कर्तुरीश्वरस्य भवनात् तद्विलक्षणस्याभवनादसत्त्वात् खपुष्पवत्, तस्मा-न्नियमश्चेति विधिर्विधीयते नियम्यते चेति, ततोऽयं विधिरुभयभागिति ।

शब्दार्थोऽधुना—

सादृश्यं सामान्यञ्च शब्दार्थः, ननु सामान्यमविकल्पत्वात् पुरुषनियत्यादि, सर्वसर्वात्मक-त्वादिति पूर्ववादप्रसङ्ग इति चेन्न सर्वसर्वात्मकत्वेऽपि च सूक्ष्मार्थत्वात्, अभिहितन्यायेन 20 सत्त्वादिशब्दादितन्त्रादिविकल्पप्रत्ययस्य सत्यार्थत्वात् अद्वैतप्रत्ययस्यासत्यार्थत्वात् ।

इत्यनुमता अस्मिन्नमानमेवेति यद्विपर्ये तत्र प्रमाणमभिधायेमाह—अनेन योगेनेति । नयस्वरूपोपसंहारमाह— अयमिति अयं विधेरुभयमागिति नयोऽयं विधिनियमे विधानं नियमश्च मन्यते सर्वसर्वात्मकत्वानुपपत्तेः यदि पूर्वमपवादं प्रवर्तनात् विधिमुत्सर्गेणैव विधीयत एव स्वतन्त्रकर्तृत्वेनैव भवननियमनादिभ्यश्चोभयोरप्युभयभागिति भावः । अमुमेव भावं स्फुटयति—विधिर्व्याख्यात इति प्रकृतेऽर्थे इति भावः । सन्निधिमदनस्य ईश्वरः व्यापत्तिमदनस्य ईश्वर 25 प्रवर्त्यं प्रधानोऽभावः । एतयोर्द्वयोरप्यभाव एव अनापत्तस्य सन्निधिमदनस्याभावात् तदभावादेव च प्रधानादीनामप्य-भावः भाव्यमानत्वात् भावविकारमन्तरेण भाव्यत्वानुपपत्तेरित्याशयेनाह—नियम इति । भेदोऽस्य नये शब्दार्थं दर्शयति— सादृश्यं सामान्यञ्चेति तत्समशब्दजनितं सामान्यं शब्दार्थो न व्यक्ति न चान्यापोहः न पुनरयं अयं नयो विधे-रुभयभाक् तथा शब्दार्थोऽपि सादृश्यात्मकं सामान्यमिति भाव सामान्यमत्र न वैशेषिकाभिमतं व्यक्तिभिन्नं जातिरूपं नियमितम्, किन्तु वस्तुनो व्यापकतया व्यक्तिभ्यो भिन्नाभिन्नं वस्तुव्यक्तिविधायकं सादृश्यं सामान्यमिति तत्र व्यवस्था 30

१ सि क. तथैव । २ सि क. विशयम । ३ सि. क. क्वचित् । ४ सि क. शब्दार्थः ।

(सारूप्यमिति) सादृश्य सामान्यमित्यर्थः वाक्यार्थस्य वक्ष्यमाणत्वात् पदार्थ इति गम्यते, सदृशैः समानमानैर्मीयत इति समानम्, समानं दृक् यत्र बुद्ध्या तत् सदृशं, सदृशं समान समानभावः सामान्य जातिलिङ्गप्रत्ययाभिधायकमिति, नान्यापोहो न समानवस्त्वतिरिक्तवस्त्वपि वा, तदनुपपत्तेः, पदस्य सामान्यं इत्यर्थः । ननु सामान्यमविकल्पस्य पुरुषनियत्यादि सर्वसर्वात्मकत्वादिति पूर्ववादमतम्
5 इति चेदेतदुच्यते सर्वसर्वात्मकत्वेऽपि च तत्पर्यवसानात्–जगत्सृष्टिप्रलयोत्सर्गव्यापित्वात् तदर्थपदत्वात्स्य नयस्य नाविकल्प इति संगतत्वे प्रकृतत्वमित्यर्थः, अभिहितन्यायेन सत्त्वादिवस्त्वादि तन्त्वादिविकल्पप्रत्ययस्य सत्यार्थत्वात्तदैकमत्यस्यासत्यार्थत्वादिति पदार्थं वक्ष्ये ।

वाक्यार्थोऽधुना—

वाक्यमपि च पृथक् सर्वं पदम्, यथा देवदत्त ! गामभ्याज शुक्लामित्येकैकं पदं
10 वाक्यम्, तस्मादेव, दवदत्तोऽपि हि गवात्मकोऽभ्याजात्मकश्च तथाप्रवर्तनात्तथापत्तेः, ताभ्यपि तथापत्तेरिति ।

(वाक्यमपि चेति) वाक्यमपि च पृथक् सर्वं पदमिति, वाक्येऽप्यपारिते तदवधारण सौकर्यात्, 'आख्यातः शब्दसंघातो जातिः संघातवर्तिनी' [वाक्यप का २ श्लो० १] इत्यादिषु वाक्यलक्षणविकल्पेष्वस्य नयस्य मतेन पृथक् सर्वं पद वाक्यं, वाक्यार्थः पृथक् पृथक् सर्वपदार्थ
15 इति, यथा देवदत्त ! गामभ्याज शुक्ला' (महाभा० अ० १ पा० १ सूत्रे १) मित्येकैकं पद वाक्यम्, किं कारणं ? तस्मात्–सर्वसर्वात्मकत्वादेव, यस्माद्देवदत्तोऽपि गवात्मकोऽभ्याजात्मकश्च तथाप्रवर्तनात् तथापत्तेः ताभ्यपि तथेति तस्मात् सर्वसर्वात्मकत्वात् पृथक् पृथक् सर्वं पद वाक्यमिति ।

एतस्य विध्युभयनयस्य शब्दार्थभेदोऽर्थः, पूर्वविकल्पस्थाश्रयानाम्, सद्भूतदेशसा-

20 [illegible] ... सामान्यं भवतीति तात्पर्यम् । व्याचष्टेपद–नान्यापोह इति न तावद् यथान्यापोहोऽर्थो बौद्धस्य मतः ... इत्यर्थः । न समानेति ... सामान्यस्य ... तदनुपपत्तेरिति । ननु यदि सामान्यं ... पूर्वपक्षीयमिदं ... जात्यादिरूपे–सर्वमिति,
25 सामान्यमिदं ... तदपि ... सर्वसर्वात्मकत्वेऽपीति सामान्यस्य ... भावः । ... सत्त्वादीति । ये वाक्यार्थ इति ... वाक्यमेव ... वाक्यमपीति ... वाक्येऽप्यपारित इति । यथेति देवदत्त ! गामभ्याज शुक्लामित्यादौ ... वाक्यम्, ... पूर्वस्यसामान्यवत्त्वात्
30 ... वाक्यमनेन स्यात्, ... तदपि न ... वाक्यार्थस्य ... इति चेन्न ... वाक्यार्थस्य ... पृथक् ... भावः ... ननु ... पूर्वसत्त्वमत ... विध्युभयस्य

द्रव्यार्थः, द्रव्यमपि गुणसन्द्रावः, विध्युभयनयत्वात् सन्निहितताद्विधसकीश्वराप्रृथक्त्वाद्रूपा-दीनां तदेकैकसर्वात्मकत्वाच्च तेनापि तद्वशित्वात् ।

(एतस्येति) एतस्य विध्युभयनयस्य द्रव्यार्थभेदोऽयं, पूर्वविरुद्धत्वाभयानाम्, अविकल्पाद्या-द्विविधविधिनयाद्विकल्पार्थद्रव्यार्थता भिद्यते, अयोव्यानां नयानां कस्मिन्नन्तर्भाव इत्यत आह सङ्ग्रहदेशत्वाद्द्रव्यार्थः, सङ्ग्रहनयस्यापि प्रथमा भेदात्तद्देशः तदेकदेशः द्रव्यसद्व्यार्थः, कथमस्मिन् 5 विग्रह इति चेदुच्यते द्रव्यमपि गुणसन्द्रावः, तद्व्याख्या सम् एकीभावे द्रु गतौ तस्माद्गुणानामेकीभावेन द्रवणम्, कारणे कार्यस्य सत्त्वात्, तत्रैव सुखादीनां रूपादीनां पृथक् पृथक् सन्निहितानामैक्य गमनाज्जीवपरिणामः, सङ्गमनमाह–विध्युभयनयत्वात् सन्निहिततद्विधस्तकीश्वराप्रृथक्त्वाद्रूपादीनां तदेकैकसर्वात्मकत्वाच्च, तेषां भवत्वेकीभावो मा भूदीश्वरस्येति [चेत्] नेत्युच्यते तेनापि तद्वशित्वात्–सन्निहिततत्कर्तृकिनापि तदीश्वरेणैकीभावे तत्कर्तृकत्वस्यैवानन्यमेति, तत एव चास्य नयस्यावैषम्यादीरः । 10

आह–

किं स्वमनीषिकया तदुच्यते ? न, उपनिबन्धनमस्य 'दुविहा पण्णवणा पण्णत्ता जीव-पण्णवणा अजीवपण्णवणा चे' ति, अथवा 'किमिदं लोएत्ति पवुच्चई ? गोयमा ! जीवा चेव अजीवा चेव, एवं रयणप्पभा जाव ईसीपब्भारा समयावलियादि' ॥

(किमिति) किं स्वमनीषिकया तदुच्यते ? आहोस्विदस्त्यस्य किञ्चिदुपनिबन्धनमापमपीति ? 15 अस्तीत्युच्यते–उपनिबन्धनमस्य 'दुविहा पण्णवणा पण्णत्ता, जीवपण्णवणा अजीवपण्णवणा चे'ति, (पण्ण० सू० १) अथवा 'किमिदं लोएत्ति पवुच्चई ? गोयमा ! जीवा चेव अजीवा चेव, एव रयणप्पभा जाव ईसीपब्भारा समयावलियादि' (स्था० २ ४ ४) ॥

इति विध्युभयारस्तृतीयो नयचक्रस्य ॥

द्रव्यसार्थता भिद्यतेति भावः । अत एवाह–पूर्वविरुद्धत्वादिति । द्रव्यार्थे कस्मिन्नन्तर्भाव इत्यत्राह–सङ्ग्रहदेशत्वा 20 दिति । केन विग्रहेण द्रव्यार्थोऽयमित्यत्राह द्रव्यमपीति सत्त्वरजस्तमांसि गुणास्तत्परिणामरूपाच्च तदात्मक एव सत्त्वादयः एव गुणा तत्सङ्घातरूपत्व व्यतिरिक्तम्, न तु तदतिरिक्तमवयविद्रव्यमस्ति भिन्नत्वैकीभावेन द्रवणमेव द्रव्यमित्याशयेनाह–तद्व्याख्येति । ननु ईश्वरव्यतिरिक्तस्य प्रधानात्मादेः प्रत्येकं सर्वात्मकत्वस्यैकीभावेन तत्परमक्षरं द्रव्यत्वं स्यात्, नत्वीश्वरस्य तदात्मकत्वाभावादित्यत्राह–तेषामिति ईश्वरो हि न सर्वत्र प्रधानात्मादीनां तत्पत्वाभिनिवेशतः सन्निहितत्वाभावात् एव प्रधानात्मादीनां यद् एकीभावं गच्छति तदेव प्रधानात्मादीनामीश्वरस्य च घटित एकीभवति, नान्यथेति तथाप्येकी- 25 भावोऽस्त्वेवैकत्वेन समाचरते–तेनापीति । उपपादितनयस्यार्थं निबन्धनमाह–किमिति । दुविहा इति, द्विविधा प्रज्ञापना प्रज्ञप्ता जीवप्रज्ञापना अजीवप्रज्ञापना चेति, । तथा किमिदं लोक इति प्रोच्यते ? गौतम ! जीवाश्चैव अजीवाश्चैव एवं रत्नप्रभा यावत् ईषत्प्राग्भारा समयावलिकादि, इति छाया ।

इत्याचार्यसिंहसूरिगणिवादिक्षमाश्रमणकृते द्वादशारनयचक्रस्य विषमपदविवेचने तृतीयो विध्युभयारः ॥

चतुर्थो विधिनियमारः ।

मन्वेवं लघुका एवोपपत्तयः प्रत्येकं सर्वप्राणीश्वरत्वं साधयन्ति, बाह्याध्यात्मिकसुख-दुःखमोहमात्रत्वाज्जगतः, सदसद्वेद्यमोहान्तरायभेदानां सुखादित्रयविपाकफलत्वानतिवृत्तेश्च दृश्यसंवेद्यलक्षणत्वात् कर्मणः, सुखादिसंवेदनेनैव हि लक्ष्यते, अतः कारणे कार्यस्य सत्त्वात् कार्ये कारणोपचारात् सुखादयः कर्म, अन्नप्राणत्ववत् ।

मन्वेवमित्यादि, पूर्ववदस्मिन् दर्शने न परितुष्यथः तस्यामित्यभिसम्बन्धः, नन्वित्यनुमा-पने, नन्वेवं लघुका एवोपपत्तयः प्रत्येकं सर्वप्राणीश्वरत्वं साधयन्ति, बाह्याध्यात्मिकसुखदुःखमोह-मात्रत्वाज्जगतः, सदसद्वेद्यमोहान्तरायभेदानां सुखादित्रयविपाकफलत्वानतिवृत्तेश्च दृश्यसंवेद्यलक्षणत्वात् कर्मणः, सुखादिसंवेदनेनैव हि—तत्कार्येण फलेन लक्ष्यते—अनुमीयते सामान्यतो दृष्टानुमानेन देशा-न्तरप्राप्तेरिवाऽऽदित्यगतिः, अतः कारणे कार्यस्य सत्त्वात् कार्ये कारणोपचारात् सुखादयः कर्म, अन्नप्राणत्ववत्, अदृष्टं धर्माधर्माख्यं परैरिष्टमेव कर्मेति ।

आत्मापि कर्म ततः सुखादि, पुनरपि सुखाद्यागादिफलं ततः पुनः कर्म ततः सुखादि फलम्, तच्च जीवपरिणामात्मसात्कृतकार्मणयोग्यपरिणामपरमाणुसमूहः एवात्मत्वमेकीभूतत्वा-त्मना, तच्च संवेद्यम्, कर्तुः संवेदनात्, प्राक् प्रतिपादितं हि द्व्यणुकत्र्यणुकादिसंयोगैः पृथिव्युदकज्वलनकुण्डलादिपरिवृत्तिरूपेणात्मनस्तेषामेकत्वं सर्वसर्वात्मकत्वात्, तस्मात् कर्मकारणां जगत्प्रवृत्तिं साधयन्ति लघुका एवोपपत्तयः ।

(आत्मापीति) आत्मापि कर्म, यथादृष्टमात्मनो रागादिकर्मविपाकपरिणतैकत्वस्य प्रयोग-

एतदपि प्रकृतिपुरुषयोः परस्परप्रत्यासत्तौ कर्मसम्बन्धाभावे संसारमोक्षाद्यनुपपत्तेरीश्वरस्यापि न प्रवर्तकत्वमस्मी-त्यत आत्मकर्मकारणं कार्मकारणत्वात् एवं सर्वं सर्वात्मकमिति विधिनियमवादविधिनियमपक्षोऽयमिति मत्वाऽयं पूर्वव-त्पक्षिद्वयारम्भते—नन्वेवमिति । चतुर्थो नयाराधनायां प्रत्यक्षरार्थत्वाद्यनन्तता बोध्या । यथा पूर्वं विध्यादिनयेन परितोषाद्विधिविध्यादिनयान्तरारम्भः तथात्रापि विधिनियमनये परितोषाभावाद्विधिनियमनयारम्भ इति दर्शयति दर्शनमिति—पूर्वव-दिति । सर्वप्राणीश्वरत्वं साधयन्तीत्यादौ कर्मैकत्वं जगत् साधयन्ति—बाह्याध्यात्मिकेति बाह्याध्यात्मिकलक्षणं जगत् सुखदुःखमोहात्मकम्, तच्च सुखादि सदसद्वेद्यमोहान्तरायकर्मणां फलभूतम्, सदसत् सुखदुःखवेद्यं यत्र मोहान्तरायाख्या-मात्मसंवेद्यत्वमोहस्य मोहयतीति भावः । ननु सदसद्वेद्यादिकर्मचतुष्के किं मानमित्यत्र—तत्रादिति प्रत्यक्ष-स्य परोक्षत्वेन हि कर्मणो लक्षणम्, तथा च कार्यविनाभावात् कारणानुमानं भवतीति भावः । पूर्वोक्तमेव समर्थयते सामिति विधिनियमानुमानेषु केवलानुमानमाह—सामान्यत इति यथा देशान्तरप्राप्त्या आदित्यस्य देशान्तरप्राप्तिः तथा सूर्योदीनां समानेन देशान्तरप्राप्त्या गतिरनुमीयते तत्र देशान्तरप्राप्तिः कार्यं कारणानुमानवदिहापि सुखदुःखादिकार्येण कारणं कर्मानुमीयत इति भावः । अत्रे कारणे कार्यस्य सत्त्वोपचारात् कर्म प्राण इति यथा व्यपदिश्यते तथेहापि सुखादय कर्मोच्यन्ते कर्मसु कारणेषु सुखादीनां सद्भावात्, कर्मैव सुखादौ कारणस्य कर्मण उपचारमेवाह—अन्न इति । परैरपि कर्मसद्भावोऽभिमत एवेत्याह—अदृष्टमिति तदपि बाह्याध्यात्मिकं जगत् कर्मेति सिद्धमिति भावः । न केवलमचेतनं जगदेव कर्म अपि तु चेतनमपीत्याशयेनाह—आत्मापीति । तस्योपयोगपरिणामात्मकत्वात्मनः प्रयोगपरिणामात् कर्मतामा-पन्नः सुखादिरूपत्वादात्मापि कर्मेत्याह—तथेति तत्साद् कर्मणः पूर्वं सुखादयः तस्मात् कर्म ततश्च सुखादिफलमित्येवं

१ सि. क. कर्मफलं । २ सि. क. °...त्र ।

परिणामात् कर्मतामापन्नम्, [ततः सुखादि] पुनरपि सुखाद्यागामिफल—फलादि, ततः पुनः कर्म ततः सुखादिफलं तत्र जीवपरिणामात्मसात्कृतकार्मणयोग्यपरिणामपरमाणुसमूह एवात्मसमनेकीभूतश्चा त्मना। यथोक्तम् 'योगैः सकृत् स्वयोगात्म्यभूतः सत्त्वायमर्यमात्रके। आत्तस्य चानुभवन भव्य प्रवि स च ततोऽनन्यः ॥' (   ) तत्र संवेद्यम्, कर्तुः संवेदनात्, ततः संविपलक्षणत्वात्

कर्मणः 'सर्वप्राणीश्वरतेति सम्मतत्वात्, कर्म हि प्रतिप्राणि नियतकर्तृकञ्च विपाकसुखादित्वेन संवेद्यते, 5
नाणूनामेव कर्मपरिणामापन्नानामात्मैकीभावेन वेदनं संवेदनम्, तेन च पुरुषेण तेषां तथा प्रयोजनात् कर्तृत्वम्, अतः सुखाद्यवस्थाणूनामपि च कर्मत्वादित्याह—प्राक् प्रतिपादितं हि द्व्यणुकत्र्यणुकादिसंयोगैः पृथिव्युदकज्योतिरङ्कुरादिपरिवृद्धिरूपेणात्मनः तेषाञ्चैकत्वं सर्वसर्वात्मकत्वाच्च, तस्मात् कर्मकारणो जगत्प्रवृत्तिं साधयन्ति त्वदुक्ता एवोपपत्तयः।

इतश्च कर्मपूर्वकं जगत्, कर्मप्रवर्तनाभ्युपगमात् सर्वप्राणिनाम्, कर्तृत्वात् कर्तुरेव 10
भवितृत्वाभ्युपगमात् तस्यैव भवितुश्च प्रयोजनात्।

(इतश्चेति) इतश्च कर्मपूर्वकं जगत्, कर्मप्रवर्तनाभ्युपगमात् सर्वप्राणिनाम्—कर्मवशादेव हि प्राणिनः शुभाशुभजातिकुलरूपायुष्कर्मोपकर्माः, यथोक्तम् 'स्वेकर्मणा युक्त एव सर्वोऽप्युत्पद्यते जनः। स तथाऽऽकृष्यते तेन न यथा स्वयमिच्छति ॥' (सूत्रकृ० टी० पृ० २१०) 'यथाऽऽहारः काले परिणतिविशेषक्रमवशात् सुखं पथ्योऽपथ्योऽसुखमिह विधत्ते तनुभृताम्। तथा धर्मोऽधर्मोऽपि 15

यत्र प्रवर्तते वस्तुनिताऽऽत्मप्रारम्भ स एव संसार इत्याद्यनेनाह—पुनरपीति। रागादिपरिणामोपात्त... स्पर्शोऽन्यामोषिव्यापारपरिणतिर्भवति तथाविधसामर्थ्य कर्मणशरीरपरिणाम असमीभवात् योगरूपमपरिणतिसुखेऽपि कर्मणोऽस्य पुद्गलस्य आत्मघातरूपे एकत्वपरिणामापादने समर्थो भवति तदेवमात्मसमानपूर्वकर्मयोग्यपरमाणुसमूह एव कर्मोच्यत इत्याशयेनाह—तत्रेति। तत्र सुखादिफलमित्यस्य सुखादीनामेषां पौद्गलिकत्वात् धर्मकारणयोरभेदात्वेति भावः तत्र सुखादिमिदं कर्म कर्ता संवेदनात् संवेद्यमतस्तस्य सर्वेश्वरत्वमित्याह—ततेति सुखादात्मकर्मात्मत्वं। अथवा कर्ममात्रस्य कर्मवदात्मसं- 20
वेदकत्वात् सर्वेकात्मना संवेद्यता कर्माभ्यन्तरैक्यपरिणामात् कर्मिणो जगत्त्व तेनात्मनोऽपि जगत्कर्तृत्वमीश्वरत्वमिति सर्वप्राणि- नामीश्वरत्वमित्याशयेनाह—ततः संविपलक्षणत्वादिति। एतदेवोपपादयति—कर्म हीति कर्मत्वपरिणतानणूनाश्रित्य वेदितं न अपि तु सर्वं सुखादि कर्मवाणून् प्रयोजयति सुखादीनामपि पौद्गलिकत्वात्सर्वकर्तृत्वमिति भावः। सर्वसर्वात्मकत्वं पूर्वप्रतिपा- दितं स्मारयति—प्रागिति तथा च कर्मात्मनामेव द्व्यणुकादिक्रमेण जगद्रूपेण सुखादात्मना च भवते कर्मपूर्वकं जगदिति भावः। कर्मैश्वर्यादिनिरुपणार्थं जगदीश्वरव्यवस्थाम्, तत्कर्तृत्व आत्मा सोऽपि न सविधियानरुचिः किन्तु तथा तथा भविता अन्यथा 25 कर्मैव एव कर्तृत्वात् तद्योपभोग आत्मनो न स्यात्, अकर्तुर्भोक्तृत्वेऽकृताभ्यागमकृतविप्रणाशदोषौ भवत इत्याशयेनाह—इत- श्चेति। कर्मैव एव हेतोर्जगत् शुभाशुभादिरूपसर्वप्रकर्षो भवत इत्याह—कर्मवशादेव हीति। कर्मप्रधान्ये कर्मप्रमाणत्वं प्रमाणयति—स्वकर्मेति। आगमयोपात्तविपाकितकर्मयुक्त एव सकलं प्राणी गत्यादिभावेनोत्पद्यते कर्मैव जीवं सुखी दुःखी वा धर्मीयोऽधर्मी वा सुखं दुःखे वा क्रियते न त्वसौ जीवो यथेच्छति तथा भवितुं शक्नोतीति प्रमाणप्रदर्शनार्थः। यथाऽऽहार इति यथाऽऽहारकाले आहृतोऽऽहारः परिणतिविशेषक्रमवशात् रसासृग्मांसाद्यावस्थापरम्पर्येण परिणति 30 मानयति तथा रागाद्यध्यवसायवशेनात्मकर्मपरमाण्वेकत्वं यदा भवति तदा कर्मप्रधानस्वेनैव कारणत्वेनावस्थितानां कर्मत्वमिह

---

१ सि. क. पर्वेष। २ सि.क. °कर्तृकाख। ३ सि. पदमिदं नास्ति। ४ सि. क. स्वकर्मयुक्त एवायं सर्वोऽप्युत्पद्यते नरः। स तथा क्रियते तेन न यथा स्वयमिच्छति।

द्विगतयक्त्रामपि कर्ता कच भोक्तु नेमे विषमविषमेगसवयिन ॥' (   ) किञ्चा-
न्यत्—कर्तृत्वात्, प्राणिनामिति वर्तते, मा भूत् अकृताभ्यागमकृतप्रणाशकर्मान्तरफलसंक्रान्त्या-
दयो दोषा इति सदसद्व्यापाराः प्राणिन एव कर्तारो मोक्षस्याभ्युपगन्तव्याः, अन्यथा हिता-
हितप्राप्तिपरिहारार्थानां शास्त्राणामानर्थक्यप्रसङ्गात्, ततः कर्तुरेव भवितृत्वाभ्युपगमात्, कः
5 कर्ता ? यः सर्वज्ञः, यः सर्वज्ञो भवितापि स एव । स्वान्मतं भव्यीभूतः प्रयोक्तृत्वात् कर्तेत्युच्यम्
नेत्युच्यते—तस्यैव भवितुश्च प्रयोजनात्—सर्वः प्राणी प्रत्येकं भविता प्रयोजयत्यात्मनाऽऽत्मानं स्वकृत-
कर्मविपाकसमकालागतोपमयगौरवादिभिर्मचोदितः । यथोक्तम् 'प्रयत एवापरजन्मजाऽव सूर्योदयः प्राक्
जनमपाराः । व्यसरपवामेव हि दैवसिद्धिसुखार्थिनं श्रीमजते मनुष्यम् ॥' (   ) इति । तस्मात्
सत्त्वाविप्रभावाण्वादिषु सत्स्वपि प्रवर्तकेषु तेषामेव कर्मसाद्भूतानां प्राणिनां भवितृत्वात्तदुपपत्तेः सर्व
10 प्राणिनां साधर्म्यात् कर्मवत्समेरितकार्यकरणभावेन सततभवनात् तथाप्रवर्तकस्यैकैकस्य सर्वात्मकत्वात्
सर्वेश्वरतेति साधूक्तम् ।

इदानीं त्वविशेषेश्वरकारणत्वे तु दोषा उच्यन्ते—

ईश्वरात्तु कर्मणः प्रवर्तनं किं सतः ? असतो वा ? तद्यदभूतस्य तदुक्तमद्वैतम्, तस्यापि
तदात्मकत्वात्, भूतस्य चेत् प्रागपि तत्कर्मास्ति कारणे कार्यस्य सत्त्वात्, तथेश्वरात्मैव,
15 तदनुकरणादिभाष्यवत् तथापि सुतरामद्वैतम्, तदात्मकत्वादेव पुरुषादस्यावत्, ईश्वरो भाष्यः
तदात्मकमपीति भवनवद्वा ।

ईश्वरात्त्वित्यादि, इदं चिन्त्यं ईश्वरात् कर्मणः प्रवर्तनं किं सतोऽसतो[वा], किञ्चातः ?
तद्यदभूतस्य कर्मण ईश्वरः प्रवर्तकः तदुक्तमेव पुरुषाद्विवादवत् प्राप्तम्, तस्यापि तदात्मकत्वात्
कर्मणोऽपीश्वरात्मकत्वात् ईश्वरस्यैव कर्मत्वेनोपपत्तेः । भूतस्य चेत्—अथ भूतस्य कर्मण ईश्वरात्
20 प्रवृत्तिस्तत एवाग्रे प्रागपि तत्कर्मास्ति कारणे कार्यस्य सत्त्वात् तथेश्वरात्मैव तदनुकरणादि भाष्यवत्,

---

[illegible]

---

१ सि. क. प. । २ सि च सत्ता ।

तथाभूतेस्तथाप्रवृत्तेस्तत्रापत्तेरित्यादिभिर्युक्तिभिः, तथापि सुतरामद्वैत तदात्मकत्वादेव पुरुषावस्थावत्, ईश्वरो माभ्यः तदात्मकार्यादिभवनवत् ।

अथ यस्मै प्रवर्त्यते यथा तेन तत्तत्प्राण्यात्मकं तदित्यत्रोच्यते तस्मात्तर्हि तत्तथाभूतं प्रत्येक प्राणिनः कारणात् तद्वशात्तयेश्वरप्रवृत्तेः कृतं त्वदिष्टेनेश्वरात्म्येन, अथ तत् कृतमपि पुरुषकारराजप्रसादवदीश्वरापेक्षं प्रवर्तत इत्यत्रोच्यते कर्तृता प्रति स्वातन्त्र्यं सिद्धं 5 तस्यैव, पुरुषकर्मजन्यप्रसादराजवदस्य ईश्वरस्याप्यन्यतरपुरुषकृतकर्मप्रत्ययप्रसादोत्पादनात् कर्मस्वातन्त्र्य प्रवृत्तौ फले वा ।

(अथेति) अथ यस्मै प्रवर्त्यते यथा—अथाऽऽपद्यीया न कर्मेश्वरात्मकम्, किं तर्हि ? यस्मै प्राणिने शुभमशुभं वा नरकतिर्यगमर[नर]विचित्रभेदरूपेण येन येन प्रकारेण प्रवर्त्यते तेनेश्वरेण तत्तत्प्राण्यात्मकं तदित्यत्रोच्यते, तस्मात्तर्हि तत्तथाभूतं प्रत्येक प्राणिनः कारणात् तस्मात्तस्मात्तथा तथा 10 भूतमित्यर्थः, तद्वशात्तयेश्वरप्रवृत्तस्तत्तस्य प्रवचने स यदेश्वरः कृतं त्वदिष्टेनेश्वरात्म्येन, आत्मवशेन तथाप्रवर्तयतस्तस्य तस्य प्राणिन ईश्वरस्य नेश्वरस्य, तथाप्रवर्त्यत्वात्, कर्मकरवत् । अथ तत्कृतमपि पुरुषकारराजप्रसादवदीश्वरापेक्षं प्रवर्तते—अथ मत प्राणिभिः कृतमपि कर्मेश्वरकृतमेव, ईश्वरवशात् प्रवर्तमानत्वात्, तद्यथा द्वयोः पुरुषयोस्तुल्यपुरुषकारयोरपि राजा एकस्यैव प्रसीदति नेतरस्येति फलं राजवशेन दृष्टं न पुरुषकर्मवशेन, तथेश्वरवशात्तत्कर्मप्रवृत्तिरित्यत्रोच्यते, कर्तृतां प्रति तावत् 15 स्वातन्त्र्यं सिद्धं तस्यैव—प्राणिनोऽपीश्वरेण प्राप्यगुणेयकर्मप्रत्ययप्रसादोत्पत्तेः, तत्र च राज्ञो निमित्तमात्रत्वात्, पुरुषकृतकर्मजन्यप्रसादराजवदेव ईश्वरस्याप्यन्यतरपुरुषकृतकर्मप्रत्ययप्रसादोत्पादनात् कर्मस्वातन्त्र्यं तत्कृत हि कर्मैवेश्वरप्रसादमुत्पादयति, अन्यतरेण कृतं नेश्वरेणेत्यर्थः, अन्यतरपुरुषकृतकर्मप्रत्ययस्येश्वरप्रसादस्य तेनोत्पादितत्वात्, तस्मात् पुरुषकर्मापेक्षत्वादीश्वरप्रवृत्तेः कर्मप्राधान्यं प्रवृत्तौ फले वेति । 20

---

१ पुरुषकृतत्वात् पुरुष एव सर्वं तथाप्रवर्तयतीति भावः । अथवा ईश्वरात्मकाः प्रधानाव्याकृतपुरुषादयो माभ्यात्मकेश्वरोऽपि माभ्य स्यात् तथा च माधव्यन्तरापेक्षाप्रसङ्गस्तेनापत्त्येनाह—ईश्वर इति । ननु कर्मेश्वरमेव किन्तु न तदीश्वरात्मकम्, यस्मै प्राणिने येन येन प्रकारेणेश्वरेण कर्म प्रवर्त्यते तत्तदात्मकं तदित्याशङ्कते—अथेति । प्राणिभिर्हि यथा कर्म कृतं तथा कर्मोदीरणाधी प्रवर्तत इति कल्पितमेव तदीश्वर एव प्रवर्तः प्रवर्तकः कर्मेति कर्मेव एवेश्वरत्वमित्युपदर्शयति—तस्मात्तर्हीति । आत्मवशेनेति कर्मवशेन वाऽऽहो वा कर्मोत्पत्त्यमिन इवेश्वरं प्रवर्तयन्तीति सर्वे प्राणिन ईश्वरास्तथाता इति भावः । यथा 25 राजा प्रवर्त्यं कर्मकरो नेश्वरः पराधीनत्वात्तथेश्वरोऽपीत्याह—कर्मकरवदिति । ननु प्राणिभिः कृतमपि कर्म राजप्रसादवदीश्वरेण प्रवर्तित एव प्रवर्तत इति मतमुत्थापयति—अथेति । दृष्टान्तं व्यनक्ति—तद्यथेति । समाधत्ते—कर्तृतामिति जीव एव कर्मकर्ता स्वतन्त्र इति स्वगुणिष एव सिद्धः प्राणिकृतकर्मणा तत्फलदे ईश्वरं प्रत्यनुग्रहिकर्मोत्पत्तौ प्रवृत्तौ स्वातन्त्र्यमुपगमात्, कर्मकरकर्मसु राज्ञो निमित्तत्ववत् प्राणिभिः स्वातन्त्र्येण कृतेषु कर्मसु निमित्तत्वमेवेश्वरस्य न स्वातन्त्र्यमिति प्रकृतवया सिद्धमिति भावः । तत्र च कर्मैव एव स्वातन्त्र्यमीश्वरस्य प्रवर्तने फलदाने च यथा कर्म तथैवेश्वरेण फलदानात्, न 30 तेनकर्मसापेक्षेणाह—तत्कृतं हीति । प्राणिकृतं तीर्त्वं । अन्यतरेणेति । यदि कर्म अन्यतरेणैव पुरुषयोर्द्वयोः कृतं नेश्वरेण

---

१ सि० क० सर्वं त्वमिदमीश्वरात्मकम् । २ सि० क० प्रसादवदीश्वर । ३ सि० क० कृतं । ४ सि० क० नेश्वरेणेत्यर्थः ।

स्यान्मतं राजवदेव कर्मणः प्रवृत्तौ फलप्रदाने वा ईश्वरापेक्षत्वात् प्रधानं कारणमित्येतच्च न, यस्मात्—

द्रव्यादिपञ्चकापेक्षं हि कर्म प्रवृत्तौ फलदाने वा स्वतन्त्रम्, सेवादिक्रियाफलप्रत्ययवत्।

द्रव्यादिपञ्चकेत्यादि यावत् प्रत्ययवत्, द्रव्यं क्षेत्रं कालं भावं भवञ्चापेक्ष्य हि कर्मणो
5 प्रवृत्तिः, इदानीं च फलं प्रत्ययत उपलभ्यते, स एव पुरुषः कर्ता द्रव्यं, दाता देवो वा द्रव्यं वस्त्वनुपर्याति, क्षेत्रं ग्रामनगरारण्यभूम्यादि यत्र लभ्यते फलम्, कालः कस्मिंश्चित् काले दिवा रात्रौ पूर्वाह्णेऽपराह्णे सन्ध्ययोरिति, भावः प्रसन्नः कुपित इत्यादि, भवः इहलोकपरलोकयोः शरीराद्यनुरूपाहार भूषणादिदानमिति, अत्र प्रयोगः परत्रापि प्राणिकृतफलं प्रतिनियतद्रव्याद्यपेक्षम्, सुखादिक्रियायाः फलत्वात् द्रव्यादिपञ्चकापेक्षसेवादिफलवत् तस्माद् द्रव्यादिपञ्चकापेक्षमपि कर्म फलदाने स्वतन्त्रम्-
10 [प्रति]नाम्नि नियतेः प्रधानम् नेश्वरं तत्कर्मोऽपेक्षते परतन्त्रत्वादस्येति।

त्वदभिमतेश्वरस्तु यदि स्वतन्त्रः प्रधानादि वर्तयति ततः प्रतिपुरुषनियामककर्मान-पेक्षायां प्राणिगणस्य स्थानविग्रहेन्द्रियोपभोगलक्षणाविशेषः, तद्विशेषहेतोरीश्वरस्य समानत्वात्, स तु विशेषो द्रव्यक्षेत्रकालभावभवापेक्षकर्मनियतेः स्यात् तस्मात् कर्मापेक्षमीश्वरत्वं सर्वप्राणिनाम्।

15 त्वदभिमतेश्वरस्त्वित्यादि, अस्तु तावदीश्वरस्य स्वातन्त्र्यं कर्मानपेक्षा च तस्य जगदुत्पत्त्यर्थं प्रधानादि वर्तयतः प्राणिनो कर्मकारणस्यैतदनपेक्षायाञ्च दोष उच्यते तद्यथा ततः प्रतिपुरुषेत्यादि, पुरुषं पुरुषं प्रति द्रव्यादिपञ्चकत्वेन नियामकं नियतं यदि कर्म न स्यादीश्वर एवाविशिष्टो हेतुः स्यात्, ईश्वरात्मनः कारणस्याविशिष्टत्वादविशेषः स्यात् कस्य? देवमानुषतैर्यग्योनात्मप्राणिगणस्य, कीदृग-विशेष इति चेदुच्यते स्थानविग्रहेन्द्रियोपभोगलक्षणो विशेषो न स्यात् कस्मात्? तद्विशेषहेतोरी-
20 श्वरात्मनः समानत्वात् स तु विशेषो द्रव्यक्षेत्रकालभावभवापेक्ष[कर्म]नियतेः प्रतिपुरुषञ्च नियामके

फलमित्यर्थः। नन्वीश्वरानपेक्षं कारणमेव हि प्रधानमुच्यते कर्म चेश्वरमपेक्ष्य प्रवर्तते फलं प्रयच्छतीति कर्म प्रधानमित्यत आह द्रव्यादिपञ्चकापेक्षमपि कर्म स्वतन्त्रमेवेत्याह द्रव्यादीति। द्रव्यं प्रदर्शयति—स एवेति यत्कृते वा सेवां करोति स एव कर्ता पुरुषो द्रव्यं भवति तथा च यत्र ददाति राजादि स दाता एवं देवो वस्त्वनुपर्याति तदपि द्रव्यमिति भावः। भाव इति प्रसन्नतायां वा कुपितो न दद्यादित्यर्थः। भव इति जन्मान्तरसम्बन्धो शरीराद्यनुरूपेण यथाऽऽहारभूषणादीनां प्रदानमिति।
25 इदमेव दर्शयति—अत्र प्रयोग इति। परत्रापि परजन्मन्यपि अपि चैतज्जन्मन्यपीति सूच्यते, अत एव प्राणिकृत प्रतिनियत-द्रव्याद्यपेक्षत्वं साध्यते प्रतिनियतद्रव्याद्यपेक्षत्वमप्रतिनियतं सुखादिक्रियाप्रयोजनफलत्वादिति हेतुः द्रव्यादिपञ्चकापेक्ष-सेवादि तज्जन्यफलमिति दृष्टान्तः। सुखादिफलस्य सेवादिक्रियाफलस्य प्रतिनियत सेवादिक्रियायाः द्रव्याद्यपेक्षिण्याः फलं यथा जन्यते उपलभ्यते तथा प्रत्येतव्यमिति भावः। ईश्वरस्येतरानपेक्षस्वतन्त्रकारणत्वे दोषमभिधित्सुराह त्वदभिमतेश्वरस्येति। यदि कर्म न स्यादिति द्रव्यादिपञ्चकापेक्षं हि कर्म प्रतिपुरुषं वर्तते नियामकमनियामकम्-
30 नियतम्, तदपि ईश्वरेण नापेक्ष्यते तत एव जगदुत्पत्त्यर्थं प्रधानादीन् प्रवर्तयति, तत्राविशिष्टकारणत्वात्तस्य भिन्नता प्राणिनां स्यात्, अविशिष्टेन कारणेन विशिष्टकार्योत्पादायोगात् इष्यते च प्राणिगणस्य वैचित्र्यमिति भावः। समानेति स्थानं कर्मभूम्यादि राजगृहकुलादि इत्यादि विग्रहं देवमनुष्यतिर्यग्योन्यादिशरीरं सुरूपकुरूपादि शरीरं वा इन्द्रियं न्यूनाधिकेन्द्रियादि तारतम्यविशिष्टमिन्द्रियं विषयग्रहणसमर्थं वा उपभोगेन सुखदुःखादि, एतेषां विशेषो न स्यादिति भावः। कस्मात् विशेष उपपद्यत इत्यत आह—स तु विशेष इति नियामकत्वात् विशिष्टकर्मणः प्राणिगणस्य

कर्मणि तत्सम्प्रदापेक्षविपाके सति स्यात्, दृष्टश्च सोऽस्मदादीष्टप्रतिनियतद्रव्यादिविपाककर्मप्राणिगणे सत्त्वे सति सुखत्वे केपाञ्चिद्दुःखत्वम् केपाञ्चित् प्रत्यवायः केपाञ्चिदपवर्ग इति । अत्र प्रयोगः अनुपपन्नध्यानविमहेन्द्रियोपभोगाभ्युदयप्रत्यवायापवर्गादिविशेषमिदं जगत् स्यात् तुल्यकारणत्वात् पटतान्तवत्ववत्, यथा पटत्वमतुल्यकारणत्वाविशेषात्तान्तवो न मार्तिकः सौवर्णो वेति जात्याकृतिवर्णो-पविनिष्टत्वपर जगत् स्यात्, न तु भवति तस्मादयुक्तम् । अथवा प्रतिनियतद्रव्याद्यपेक्षविपाक्यत्ने केश्वरकारणपूर्वकमेवेदं जगत् प्रतिविशिष्टजात्याकृतिवर्णादिमत्त्वात्, घटपटादिवत्, तस्मात् कर्मापेक्ष मीश्वरत्वं सर्वप्राणिनामिति ।　5

अभ्युपेत्यापि कर्मानपेक्षां तत्र दोषं ब्रूमः—

अनपेक्षा च कर्मणः किं सतोऽसतो वा ? यद्यसत एव क्रियाविलोपः, इष्यन्ते च ताः यस्मादुक्तं च शास्त्रे 'योगं साधयिष्यसिष्यादि यावन्निद्रातन्द्राप्रमादालस्यरहितश्च स्या'दि-　10
त्यादि, कर्माभावे च सर्वप्राणिमुक्तः तन्निन्द्रियविषयसम्बन्धाभावेन सन्त्यादिसृष्टिरीश्वरस्या नर्थिका, ततश्च भाव्यभावकभेदाभावादीश्वरकर्मप्रधानाद्यादिद्वैतकल्पनानिर्मूलता ।

अनपेक्षा चेत्यादि, किमिममीश्वरस्य धर्माधर्मलक्षणस्य कर्मणोऽनपेक्षा सतोऽसतो, वा किमिति प्रश्नः, किञ्चातः ? यद्यसत एव धर्माधर्मयोरसतोरेवानपेक्षा, ततः किमिति चेदुच्यते क्रियाविलोपः—असतोर्हि तयोः खपुष्पखरविषाणयोरिव काऽपेक्षा, ततश्च हिताहितप्राप्तिपरिहारार्थाः　15
सर्वाः क्रिया विलुप्येरन्, इष्यन्ते च ताः, यस्मादुक्तं च शास्त्रे 'योगं साधयिष्यसित्यादि गतान् यावत् निद्रातन्द्राप्रमादालस्यरहितश्च स्या'दित्यादि' (　　　　　) इत्याचारविधायिग्रन्थ-प्रारम्भ । किञ्चान्यत् कर्माभावे चेत्यादि यावन्निर्मूलता, अकर्मत्वात् प्राणिनः सदा मुक्ताः स्युः, ततश्च तन्निन्द्रियविषयसम्बन्धिनो न भवन्ति ततश्च तन्वादिसृष्टिरीश्वरस्यानर्थिका, ततश्च भाव्यभावक-

---

च पाकेऽनुभावे एव एतच्च कर्मविपाकश्च द्रव्यादिपाकापेक्षा कर्मैकत्वात् विपाके जनयति विपाकेऽपि पाकापेक्षः स्यात्　20
विश्वादि जगति, यथा जगतो वैचित्र्यमुपपद्यते न तु केवलतन्त्रेश्वराधीनमिति भावः । कर्मापेक्षानुमानेन साधयति- अत्र प्रयोग इति अथ पक्षीकृतानुपपन्नध्यानविशिष्टजात्याकृतिवर्णादिमत्त्वं साध्यते तुल्यकारणत्वादिति हेतुः सूत्रानुसारेण- परमिदमनुमानमाह—अथ वेति । तत्र जगत् पक्षः प्रतिनियतद्रव्याद्यपेक्षविपाककर्मवदीश्वरकारणपूर्वकत्वं साध्यधर्मः घटपटवदिति प्रतिविशिष्टजात्याकृतिवर्णादिमत्त्व न दोषलेशः जातिरात्मकर्मणादि पाकस्य प्रतिनियतद्रव्याद्यपेक्षविपाककर्मेश्वर पूर्वक इत्यनुमानसमानत्वं प्रयोगपदैरेव बलात्मीति भावः । तस्मात् कारणकर्मविशेषापेक्ष एव सर्वे प्राणिन ईश्वरा इत्युप-　25
संहरति—तस्मादिति । अभ्युपेत्य कि विचार्य कर्म नापेक्षते अनभिमतमपि चेति विकल्पोऽयमत्र दोषमाह—अनपेक्षा चेति । यद्यपरोक्षमिथ्यात्वमपि कर्म नापेक्षते तर्हि क्रिया सर्वा हिताहितप्राप्तिपरिहारार्थकत्व शास्त्रोदिता एव भवेयुरित्याह— यद्यसत एवेति । शास्त्रमेव दर्शयति—उक्तञ्च वा शास्त्र इति । निद्रादिनिरोधकत्वं योगं साधयिष्यन् साधको यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीन् अनुतिष्ठेत् निद्रादिरहितश्च भवेदिति परिहरेदिति तदर्थं स्यात् । दोषान्तरमाह—कर्माभावे चेति ईश्वरेच्छामात्रत्वात् वैचित्र्यस्य कर्मणोऽभावे प्राणिनां सुखदुःखादिभोगाभावस्तथा　30

---

१ सि क. कर्मणि विशिष्टे स्यात् । २ सि क. विपाककर्मकेश्वर । ३ सि क. कर्मैव साध्यं भाति । ४ सि. क. 'किमिति प्रश्नः' इति दृश्यते । ५ सि क. °त्यादिरिया ।

सेद्याभावः, तस्मात्साम्यभावकर्मेश्वराभावादीश्वरकर्मप्रधानात्मादिचैतन्यस्य नानिर्मूल्यता, एवं तावदसतः कर्मणोऽनपेक्षा न युक्ता ।

अथ तु सदपि नापेक्षते सः स्वतंत्रत्वादिति मन्यते तत्र आ क्षीणोदितकर्माशय च धर्मोऽधर्माभ्यामकृताभ्यागमकृतप्रणाशौ स्याताम् धर्माधर्मनिरपेक्षत्वात्, स्वभावपुरुषादिवादि ५ भववत् ।

(अथ स्थिति) अथ तु विद्यमानावेव धर्माधर्मावभ्युदयमत्सयापनिःश्रेयसक्रियायां नापेक्षते स ईश्वरः स्वतन्त्रत्वात् प्रयोजनाभावाच्च तयोः, विद्वत्त्वात्स्यानादिक्रियासु चक्षीवर्दानपेक्षणवदिति मन्यते ततोऽकृताभ्यागमकृतप्रणाशौ दोषौ स्याताम्, कथं ? यथासंख्यमा क्षीणोदितकर्माशयधर्म मोक्षाभ्यां—यावत्क्षीणकर्मणोऽपि जन्माभ्युदयप्रत्यवायसम्बन्धकृताभ्यागमः स्यात्, कुतः ? धर्माधर्म- १० निरपेक्षत्वात् स्वभावपुरुषादिवादिमतवत्, उदितानन्ताशुभकर्माशयस्य भारकादेरपि सुखसम्बन्ध सम्बन्धी कृतप्रणाशः स्यात् धर्माधर्मनिरपेक्षत्वात्, स्वभावपुरुषादिवादिमतवदेव, अनिष्टं चैतत्, एवं तावदीश्वरस्य कर्मानपेक्षाऽनिष्टापत्तेरयुक्ता ।

अथैवं कर्मापेक्षः प्रवर्तत इति मन्यसे ततस्तान्येव कर्माणि कर्तृणि भवितृणि ईश्वराणि, तेषां तस्यापि तथाभावयितृत्वात्, न स तानि तथाभावयति तथाभाव्यमानत्वात्, यथा च १५ पृथिव्युदकादीन् व्रीहिरेव तथाभावयति, पृथिव्याद्यपेक्षोऽपि तथापत्तेः, न पृथिव्यादयस्य याऽन्नापत्तेः तेषामसत्त्वात् असत्त्वज्ञानापत्तस्यासत्त्वात् खरविषाणवत् अस्वतंत्रत्वाच्छब्दादि वत् भवति कर्ता स्वतंत्रः सर्वः पुरुषः प्रवर्तनपूर्वत्वात्, प्रवर्तयति कारणं तथाभावमापद्यते घटादि, तथाभवनप्रवृत्तत्वात् प्रवर्तयितारमन्तरेणाभवनादवृत्तत्वात् तन्तुपटवत् ।

(अथैवमिति) अथैव विधानिष्टापत्तिभ्यामुद्धरणं कर्मापेक्षः प्रवर्तत इति मन्यसे ततस्तान्येव २० कर्माणि कर्तृणि स्वतंत्राणि भवितृणीश्वराणि, कस्माद्धेतोः ? तेषां तस्यापि तथाभावयितृत्वात्—यथाय- मधीश्वरं तेन तेन प्रकारेण भवन्तु तान्येव कर्माणि, न स तानि कर्माणि तथाभावयति, कुतः ?

भाव्यमानत्वभावेन साम्यभावकर्मेश्वराभावादीश्वरमोक्षस्य तस्मादीश्वरस्य तथाभिमिति साम्यभावकर्मेशत्वाभावे स्वकर्मैवेति भावः। विद्यमानस्यापि कर्मणोऽनपेक्षायां दोषमाविष्करोति—अथ स्थिति । धर्माधर्माविति धर्मस्य फलमभ्युदयो निःश्रेयसञ्च अधर्मस्य २५ फलं प्रत्यवायः … धर्माधर्मावित्र कर्म यदि नापेक्षते तर्हि तथिदत्वेन स्यादिति भावः । निरपेक्षत्वेन च दोषोऽपि तु … प्रत्यवायः … कृताभ्यागम दोषौ स्यातामित्याह—तत इति । क्षीणकर्मणोऽप्यभ्युदयप्रत्यवाय… तदुक्तौ कृताभ्यागमः … उदितानन्ताशुभकर्माशयस्य सुखैरभ्युदयस्य च सम्बन्धेन … कृतप्रणाश इति भावः । अथ … कर्मापेक्ष ईश्वरः प्रवर्तत इति मन्यते तर्हि कर्माण्येव … ईश्वराणि … ३० कर्माणीति … तथाभावयितृत्वेन … तथाभाव्यमानत्वेन … । न स तानीति

---

१ मि. क. तथाच ।

तथाभाव्यमानत्वात्, प्रधानेन शब्दादिवदिति वक्ष्यमाणदृष्टान्तत्वात्, यथा च पृथिव्युदकादीन् व्रीहिरेव तथाभावयति, पृथिव्याद्यपेक्षोऽपि तथाऽऽपत्तेः, न पृथिव्यादयः, तथानापत्तेः, एवं कर्माण्येवेश्वरादीनि, तथाभावयितृत्वात्, न त्वधिष्ठेश्वरः, तथाभाव्यमानत्वादिति स्यान्मतम् पृथिव्युदकादीन्यपि भावयन्त्येव व्रीहित्वेन[व्रीहि]मनापन्नान्यपीत्येतदयुक्तम् तेषामसत्त्वात्, असत्त्वञ्चानापन्नस्यासत्त्वात्, खरविषाणवदिति सन्निधिभवनरूपणे प्रक्रान्तमेव न्यायं वर्त्तयति, अस्वतन्त्रत्वाच्छब्दादिवदिति, एष दृष्टान्तः सर्वत्र प्रधानकारणत्वसाधर्म्येणोपात्तः कापिलान् प्रति, यथा प्रधान[स्य] स्वातन्त्र्या-त्सकारणत्वं गमयति शब्दाद्यात्मीयकारणस्याभावप्राप्तास्वातन्त्र्यात्तेषामिति नाव्यक्तस्य व्यक्तस्यैव यथा तथा भवतीति यथा त्वयैवोक्तं तथैवेश्वरोऽस्वतन्त्रत्वात् कर्मापेक्षत्वादकारणं तान्येव कारणानीति गमयति ताभिरेव त्वदुक्ताभिरुपपत्तिभिरतो यदुक्तं त्वदुक्ता एवोपपत्तयः सर्वस्यापीश्वरतां साधयन्तीति तत्साधु, तद्व्याचष्टे—भवति कर्त्तेत्यादि, प्राग्व्याख्यातान्येव सर्वज्ञैककार्यपदानि यावत्तन्तुपटवदिति, यथा तन्तव एव पटनिष्पादनेन भवन्तः तथाप्रवचनयुक्तत्वात् पटकारणानि तथा पुरुषा एव कर्त्तार इति ।

ईश्वरस्यापि च तन्त्वंश्वादिवत् पूर्वपूर्वशक्ततारतम्येन प्रवर्त्तकाः सर्व एव पुरुषाः, कर्माणि पुनः सत्त्वातिशयप्रकर्षस्य, सन्निहिततद्विषयशक्तिः प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रियः, स च स्वतन्त्रः, तत्प्रवृत्त्यापत्तेः, आ ईश्वरात् प्रवर्त्तयितृत्वात् ।

ईश्वरे च तानि कर्माणि तथाभावयतीत्यर्थः । प्रधानेन शब्दादिवदिति अनुपदमेवासौ दृष्टान्तः सम्पत्स्यतेऽस्वतन्त्रत्वाच्छब्दादिवदिति । यथा चेति यथा हि पृथिव्याद्यपेक्षोऽपि व्रीहित्वेन तेन प्रकारेण भवन् पृथिव्यादीन् भावयति व्रीहिरेव हि अङ्कुरादिरूपेणापद्यते न तु पृथिव्यादयो व्रीहिं भावयन्ति पृथिव्यादीनामङ्कुरादित्वेनानापत्तेः एवं कर्माण्येव तेन तेन प्रकारेण भवन्तमीश्वरं भावयन्ति तस्य भावयितृत्वात् कार्यत्वात्, कर्माण्येवेश्वरादीनि न त्वीश्वरः कर्माणि भावयति भाव्यमानत्वादिति भाव्यत्वादीश्वर इति भावः । ननु भावान्तरतामनापन्ना अपि पृथिव्यादयः सन्निधानमात्रेण भावयन्त्येवेत्याशङ्कते स्यान्मतमिति । एवं सति पृथिव्यादयो न सन्त्येव अनापन्नत्वात् अद्यापि अनुत्पन्नत्वादिति सन्निधिमात्रभवनमिदं करणापसरे त्वयैवोक्ते न्यायेऽस्य प्रवर्त्तनमुच्यते–तेषामसत्त्वादिति । स्वभावेन कर्तृत्वनिवृत्त्यैश्वर्येषु हेत्वन्तरमाह–अस्वतन्त्रत्वादिति । सर्वधर्मेषु प्रधानमेव कारणं तदेव सत्त्वरजस्तमोमयत्वात्, न तु भूतादीन् प्रति सन्निहितमपि शब्दादि कारणमस्वतन्त्रत्वादिति सांख्यैर्वर्ण्यते तथैव प्रधानमपि च कर्मसापेक्षत्वात्, तथाकारणतयोऽन्येन प्रधानेन प्रधानमप्यन्येन व्यापारयितृ-शक्तेव भाव्यते इति व्यक्तस्य शब्दादिरिवाव्यक्तस्य प्रधानस्यापि तथाऽस्वतन्त्रता त्वयैवोक्ता तथैवेश्वरोऽपि कर्मविकृतैश्वर्या-कर्त्तत्वात् प्रधानं कारणमपि तु कर्माण्येवेति भावः । तथैवं सर्वेषामीश्वरत्वं कर्मानुरूपताः प्रतिनियतोऽपीश्वर एकैकापेक्षेण सर्वस्या-पीश्वरत्वं पूर्वोक्तं स्मारयति–यदुक्तमिति । सर्वस्येश्वरत्वमेवेश्वरत्वापत्तिसिद्धे साधयति–भवति कर्त्तेति वा मुक्तश्च एव भवति यत्र कर्ता च एव मुक्तः सोऽसौ कर्ता च एव कर्ता कर्ता एव हि प्रवर्त्तयितृत्वेन वर्त्तते प्रवर्त्तयति कारणं तद्व्याख्यातमापद्यते यथा प्रवर्त्तनकारणं प्रधानं शब्दादिभावमापद्यते स्वयमेव प्रवर्त्तमानत्वेन पटभवनेन प्रवृत्तत्वस्था तन्तवः पटकारणं भवन्ति तन्तुकार्यं तन्तुभिः प्रवर्त्तितत्वात्, न च पटभवनं प्रवर्त्तयितारमन्तरेण भवति, तथैवेश्वरोऽपि प्रवर्त्तमानत्वेन भवनात् प्रवर्त्तयिता कर्माख्या सर्वे पुरुष एवेति सर्वप्रवर्त्तिनामीश्वरत्वमिति भावः । ईश्वरप्रधाने प्रेक्ष्य अन्या अनुसरती सर्वप्रधानपक्षेऽपि अस्ति ईश्वरस्यापि चेति । यथा धर्माधर्मोन्त्यादीनामपि च तन्त्वंश्वादिवत् पूर्वपूर्वशक्त-तारतम्येश्वराः प्रवर्त्तकाः तथा तथा विशिष्टशक्ति सन्निहितशक्ति प्रतिविशिष्टबुद्धिताद्वयेश्वरस्यापि प्रवर्त्तनं कर्म तदेव आपद्य-माना तथा विविधेभ्यो सन्निहितशक्तिमत् कर्मनिमित्तस्य कर्मविशेषत्वात् पुरुषोऽपि कर्माख्यत्वात् तथाविध इति भावः ।

---

१ सि. क. यान्यकमिव व्यक्तस्यैव वा । २ सि. क. पश्यपथि । ३ सि. क. भवनेकाधिकार्थं ।

ईश्वरस्यापि चेत्यादि, तासामेवोपपत्तीनामितो मुक्तानां भावयन्ननेनापि प्रयत्नेन, यथा त्वया प्रागुपपादित मुक्ता पूर्वपूर्वग्रन्थतारतम्येन सन्निहिततद्विषयशक्तिर्विशिष्टबुद्धिरिति तथेहापि ताभिरेवो-
पपत्तिभिस्तैरेव तत्स्वभावादिभिर्दृष्टान्तैः कर्मणि वृत्तेः—कर्मनिष्ठत्वात् उत्कर्षापकर्षयोः, कर्मणो पुरुषत्वात् सर्व एव पुरुषः सन्निहिततद्विषयशक्तिः प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रियः—प्रतिविशिष्टबुद्धिना तेनैव
5 नरेण मन्येन शास्त्रकारैर्विवरणकृद्भिरपि प्रमाणीकृत[क्रियः]तत्क्रियाफलपरिज्ञानार्थत्वाच्छास्त्रकारप्रवृत्ती-
नाम् सिद्धशास्त्रप्रामाण्यविशेषत्वात्, स च स्वतन्त्रः तत्प्रवृत्त्यापत्तेः तेन प्रकारेण कर्मप्राप्तिप्रवृत्तिवदीश्व-
रस्यापि प्रवृत्त्यापत्तेः [मा]ईश्वरात् प्रवर्तयितृत्वादिति—मा ईश्वरात् यावदीश्वरत्वावत् प्रवर्तयितृत्वात्
ईश्वरस्य प्रवर्त्यत्वात् कारणानि सर्वपुरुषाः ।

शक्तिमत्त्वप्रवृत्तीत्यादि यावत्सत्त्वादिवदिति पूर्ववत् सर्वस्य शक्तिप्रवृत्त्यात्मकत्वादस्य सर्व-
10 मूर्तिता एवमेव चास्य पृथिव्याद्यष्टमूर्तितोच्यते, तासु तस्यैव निमित्तत्वात्, प्रवृत्तिफल-
प्रकर्षाभावप्रसङ्गात् कर्म एव कारणं नेश्वरादि, इतरथा ईश्वरादेः प्रधानादेर्वा प्रवृत्तयः फलं
वा सुखादि तत्रैकरूपत्वादुत्कर्षापकर्षौ न स्यातां, दृष्टौ च तौ न निर्बीजेश्वरकर्मकारणात्,
अतोऽन्यप्रसिद्धमर्वधर्मं कारणमस्तीति ।

शक्तिमत्त्वप्रवृत्तीत्यादि, ईश्वरस्यापि तेषामेव शक्तिमतां पुरुषाणां शक्तिसाकल्य[सन्निध्य]-
15 सन्निध्योः प्रवृत्त्यप्रवृत्तिदर्शनादिति तदेवोपपत्तिजातं स्मारयति यावत्सत्त्वादिवदिति आदिग्रहणाद्बोधवत्
प्रवृत्तिवत्त्वादि पूर्ववदेव ग्रन्थं चा[ति]दिशति यावदेवास्य सर्वत्वात् सर्वमूर्तिता, एवमेव चास्य
पृथिव्याद्यष्टमूर्तितोच्यत इत्येतस्मादेवारातीयो ग्रन्थः सर्वो द्रष्टव्यः, ताभिरेवोपपत्तिभिः सर्वप्राणीश्वरत्वे
तदर्थेवेति पुनरपि चोत्कर्षापकर्षदर्शनादित्यादिरीश्वरसर्गबाधनार्थो ग्रन्थः प्रवृत्तसुखदुःखफलेत्यादि तदेव
यावत् पुरुषादप्रवृत्तेरेवोत्कर्षापकर्षौ न निर्बीजेश्वरकर्मकारणादिति कर्मकारणार्थो गतार्थः, तस्मात्
20 कर्मापेक्षत्वात् सर्वसर्वात्मकत्वात् सर्वेश्वरतेति ।

एतदेव व्याख्यानयति—तथेहापीति । प्रतिविशिष्टेति तदेव्यरेण नरेणापि [illegible] शास्त्रकारैः क्रियायाः प्रमाणीकृतत्वात्, प्रतिविशिष्टबुद्धिभिः प्रमाणीकृता क्रिया यस्य सर्वपुरुषस्य प्रतिविशिष्टबुद्धिप्रमाणीकृतक्रिय इति विग्रहः । ईश्वरोऽपेक्ष्येव सर्वं प्रवर्तत इति प्रमाणमस्यैव प्रेरक एव कर्मोपेक्ष एवेश्वरः प्रवर्तत इति प्रवर्तकत्वं चेतयन् इति दर्शयन्नाह—शक्तिमदिति तत्र चेश्वरस्यापि प्रवर्तिका कर्मकारण पुरुषाणामिव तदभावे तत्कारणत्वाभावात् न हि कार्यप्रवर्तकत्वमपेक्षा पुरुषे
25 स्वातन्त्र्ययुक्ते अपेक्षते चेश्वर पुरुषशक्तितोऽर्थो तथा प्रवर्तयति कर्मतया पुरुषस्यैवेश्वरत्वात् तस्य एव प्रवर्तकत्वम्, तस्मात् प्रधानप्रवर्तितसामर्थ्येऽपि तस्य एव यथा प्रवर्तकत्वं तथा कर्मेव एव प्रवर्तकत्वं तदपेक्षत्वात्तयोः मान्यः । सर्वेषां प्राणिनां प्रवृत्तौ कर्मैव एव कारणम्, समस्तान्तर्विनिविष्टत्वात् सर्वेण सर्वत्रापि कर्मेव एव निमित्तत्वात् सर्वमूर्तित्व तस्यैव क्षित्यादिरूपतयाष्टमूर्तित्वमपि तासु तस्यैव निमित्तत्वादिति पूर्ववदेव सर्वेषां सम्भवति—यथा सर्वेश्वरादिति ।
एवमेव पूर्वं ईश्वरकारणत्वप्रतिपादनपरग्रन्थं कर्मकारणपरतया नेय इत्याह—इत्येतस्मादेवेति । तदर्थेवेति ईश्वरकारणवादसम-
30 र्थनेन कर्मकारणत्वसमर्थनं कर्तव्यमिति भाव । ईश्वरकारणत्वे न प्रवृत्तिफलप्रकर्षाभावप्रसङ्ग उक्त इति स एव कर्मकारणत्वे ईश्वरकारणत्वबाधकत्वेन प्रत्यवस्थापयति इत्याह—पुनरपि चेति अत्र कर्मेव पूर्वग्रन्थानुसारेणैव व्याख्येयमित्यर्थः, कर्मोपकल्प्यमानप्रवृत्त्यादिनियमनविषयेव पूर्वग्रन्थानुसारेण तत्र व्याख्यातुमित्यत्वात् । कर्मापेक्ष्यपुरुषत्वेऽपीश्वरस्य कारणत्वाभाव-

1 सि क. प्रमाणीकृतम । 2 सि क. प्रवृत्तिर्मतो ।

कर्मापेक्षत्वेऽपि न व्यर्थमीश्वरकारणत्वं तदभावे प्रवृत्त्यभावात्, दार्वपेक्षरथकार-कारणत्ववदिति चेन्न, इतरत्रापि तुल्यत्वात्, ईश्वरापेक्षत्वेऽपि न कर्मवैयर्थ्यं तत एव हेतोः, रथकारापेक्षरथदारुवदिति, प्रवर्त्तयितृत्वादीश्वरस्य दासस्य स्वामिवत् तच्च कर्मणः सिद्धम्, प्रवर्त्त्यत्वञ्चेश्वरस्य, तथाप्रवर्त्तकं कर्मेति पुरुष एवेश्वरः सर्व इति ।

कर्मापेक्षत्वे इत्यादि यावद्रथकार[कारण]त्ववदिति चेत्—स्यान्मतं कर्मापेक्षत्वेऽपि न 5 व्यर्थमीश्वरकारणत्वं तदभावे प्रवृत्त्यभावात् यत्र यदभावे प्रवृत्त्यभाव प्रवर्त्तकस्य तत्रेश्वरस्यापि अवैयर्थ्यं दृष्टम्, यथा रथकारप्रवृत्तौ रथार्थं दार्वाद्यपेक्षणमिति चेन्मन्यसे तन्न, इतरत्रापि तुल्यत्वात् तस्कथ मिति चेत् प्रयोगत एव दर्श्यते विपर्ययसिद्धिः तद्यथा—ईश्वरापेक्षत्वेऽपि न कर्मवैयर्थ्यम् तत एव हेतोः, रथकारापेक्षरथदारुवदिति विरुद्धैकान्तिकः, तदुपसंहृत्याह प्रवर्त्तयितृत्वादीश्वरस्येत्यादि यावत् पुरुष एवेश्वर[ः सर्व] इति—प्रवर्त्तयिता हीश्वरो दासस्य स्वामिवत्, तच्च—प्रवर्त्तयितृत्वं कर्मणः सिद्धमुक्त- 10 विधिना प्रवर्त्त्यत्वं चेश्वरस्य तथा प्रवर्त्तकं कर्म, कर्मणा पुरुषः प्रवर्त्त्यते इति प्रकृतत्वाद्गम्यते, इति-शब्दो हेत्वर्थे, तस्मात् पुरुष एवेश्वरः सर्व इति, एवं कर्मेश्वरत्वापि तु यथैव तयोस्तत्र भावयिष्यते, पुरुषस्य तावत् सर्वस्येश्वरत्वमुक्तमिति ।

एवं प्रतिघातप्रसङ्गोऽपि सापेक्षप्रवृत्तित्वाद्रथकारवत्, यथा रथकार उपादानोपक-रणानामसामर्थ्यवैकल्ययोः प्रतिघातस्तथाऽपचितकुशलमनुजिघृक्षतः तद्विपरीतञ्चोपजि 15 घत्सत ईश्वरस्य यत्प्रतिघातः स्यात् स्यात् स्वातन्त्र्यम्, न तु भवति पुरुषकर्मप्रत्ययनेश्वर प्रवृत्तेः प्रतिघातदर्शनात्, अन्यथा शुभकर्माणं दुःखेनेतरञ्च सुखेन योजयेत् तच्च नेष्ट मित्यनीश्वरः सः ।

स्वपक्षेऽप्याशङ्कते—कर्मापेक्षत्वेऽपीति । कर्मेश्वरस्य कर्मापेक्षप्रवृत्तिमत्त्वेऽपीश्वरकारणता न व्यर्था ईश्वराभावे कर्मणामचेतनत्वे प्रवृत्त्यभावात्, यथा रथकारो रथनिर्माणाय दार्वाद्यपेक्षप्रवृत्तिमानपि तदभावे दार्वादीनां प्रवृत्त्यभावात् रथकारस्य वैयर्थ्यं प्रवर्त्तकता- 20 दपेक्षयोऽपि प्रवर्त्तक इति शङ्कते—स्यान्मतमिति । ईश्वर एव प्रवर्त्तयिता न कर्मेत्यत्र विनिगमकाभावात्तत्तुल्यन्यायतुल्येन कर्मैव प्रवर्त्तयितृत्वमिति साम्यतो दर्शयति—इतरत्रापीति । तदुक्ते हेतुरनैकान्तिकः साधयन् तं विरुद्धो भवतीत्याशयेनाह—प्रयोगत एवेति अपिशब्दस्येश्वरापेक्षा नास्त्येवेति सूच्यते तत एवेति । तदभावे प्रवृत्त्यभावादिति हेतोरित्यर्थः । रथ-कारापेक्षत्वेऽपि न हि दारोर्वैयर्थ्यमिति दृष्टान्तमाह—रथकारेति । ईश्वरस्य प्रवर्त्तयितृत्वं कर्मणः पूर्वोक्तविधिना सिद्धस्त त्वेश्वरत्वमिति कर्मात्मा पुरुष एवेश्वरो दासस्य स्वामिवदिति तथेश्वरो नेश्वरः कर्मेव प्रवर्त्तकत्वादित्युपसंहरति—प्रवर्त्तयितृ 25 त्वादेवेति । यो हि प्रवर्त्तयिता स एवेश्वर यथा दासस्य स्वामिवत् कर्म च प्रवर्त्तयितृ ततः स एवेश्वर तदीश्वरस्तु प्रवर्त्त्य इति भावः । ईश्वरस्यानीश्वरत्वं प्रकारान्तरेणाह—एवमिति । परापेक्षप्रवृत्तीनां कदाचिदपि प्रतिघातो दृश्यते यथा रथकारेऽ-समर्थमुपादानं विकलानि चोपकरणानि परिणामे प्रतिघातो दृष्टः तथेश्वरोऽपि कर्मापेक्षप्रवृत्तेः कुशलं चिकीर्षुं विपाकं परिपाक-यितुमिच्छन्नपि कदाचित् प्रतिहन्यत एवेति नासौ स्वतन्त्रः तदिच्छाविघातात् तदभिघाते हि तस्य स्वातन्त्र्यं स्यात्, न चैवं दृश्यते सापेक्षप्रवृत्तेः प्रतिघातस्याप्यत्वात्, ईश्वरो हि पुरुषकृतकर्मापेक्षं प्रवर्त्तते यदि तु स्वतन्त्रः प्रवर्त्तेत तर्हि शुभकर्माणं 30 दुःखेनाशुभकर्माणं सुखेन योजयेत् न चैवमस्ति तस्मात् परापेक्षत्वादस्वतन्त्रत्वादनीश्वर एवेति भावः । इदमेव व्याकरोति—

---

१ सि. क. अवैयर्थ्यं । २ सि. क. कर्मेव पुरुषः प्रवर्त्यते ।

एव प्रतिघातप्रसङ्गोऽपीत्यादि, किञ्चान्यत् प्रतिहन्यते च त्वदभिमतेश्वरः सापेक्षप्रवृत्तित्वात् रथकारवत् अस्य साधनस्य व्याख्या यथा रथकार इत्यादि, उपादानं दारु, उपकरणानि वास्यादीनि तेषामसामर्थ्यं वैगुण्यं सततमेव, वैकल्यं साकल्यमभाव एव तत्र प्रतिघातः दृष्ट इति वाक्यशेषः, तथेहापि दार्ष्टान्तिके सापेक्षप्रवृत्तिसाधर्म्यानुगमेनोपनयनमीश्वरे व्यर्थम्, वैधर्म्येण तु दर्शयति
5 अपचितकुशलमनुजिघृक्षत इत्यादिना, पुरुषमपचितशुभकर्माणमनुग्रहीतुमिच्छतस्तद्विपरीतव्यापदमु-मिच्छतश्चेश्वरस्य वधप्रतिघातः स्यात् स्यात् ख्यातव्यम्, न तु भवति, अपेक्ष्यस्य कर्मणः सुकृतकर्मणः प्रक्षयेन तदपेक्षेणेश्वरस्य प्रवृत्ति[प्रति]घातदर्शनात् न चेदेवमिष्यते शुभकर्माणं दुःखेन इतरञ्च सुखेन योजयेत् यथा चाकृताभ्यागमकृतप्रणाशौ स्यातामित्युक्तम् तच्च नेष्टम् तस्मात् पुरुषकर्मप्रक्षयेनेश्वरप्रवृत्तिप्रतिघातोऽस्ति, प्रवृत्तिप्रतिघाताच्च नैश्वर्यम् तस्य प्रतिघातत्वात्, पृथग्
10 न[र]वदित्यनीश्वरः स इति ।

यदुच्यते सर्गादौ धर्माधर्मविकलानां शरीरेन्द्रियविषयोत्पादने निरपेक्षोऽप्रतिहतस्व शक्तिवशादेव शरीरादीनुत्पाद्य बुद्धानां धर्माधर्ममर्यादामुपदिशति, तपोदानयज्ञादि कुरुत ! हिंसां मा कार्ष्टेति मध्यकाले च तेषां प्राणिनां यथास्वं धर्माधर्ममर्यादामनुतिष्ठतामनुष्ठानानु रूपेण फलेनानुग्रहं करोति यदा तदा सापेक्षोऽप्रतिहतस्वशक्तिवशादेव, ये पुनस्तदुपदिष्ट
15 मोक्षमार्गप्रस्थितास्तांश्च सायुज्यं गमयति, पुनरन्तकाले च शरीरेन्द्रियप्रसूतयत् तेषां धर्मा-धर्मावपि संहृत्य तान् दिवससंव्यापारपरिश्रमाभिभूतान् बालकान् पुत्रकानिव पिता प्रलयक्ष-पायां स्वापयतीत्यन्तेऽपि निरपेक्षाप्रतिहतस्वातन्त्र्यः स एवेष्ट इति ।

यदुच्यत इत्यादि यावत् प्रलयक्षपायां स्वापयतीति, कालभेदेन सापेक्षनिरपेक्षप्रवृत्तिपक्षयो-रभ्युपगमादुभयथापि प्रवृत्तिप्रतिघातासम्भवाददोषः तद्यथा सर्गादौ धर्माधर्मविकलानां शरीरेन्द्रिय-
20 विषयोत्पादने निरपेक्षोऽप्रतिहतस्वशक्तिवशादेव शरीरादीनुत्पादयति, तांश्चोत्पाद्य बुद्धानां—प्रबोधितानां धर्माधर्ममर्यादामुपदिशति—तपोदानयज्ञादि कुरुत हिंसां मा कार्ष्ट—हिंसानृतस्तेयागम्यागमनादीनीति तयोश्च धर्माधर्मयोः सीमाच्छेदेन व्यवस्थां मर्यादामुपदेशेन व्यवस्थापयति, मध्यकाले च तेषां प्राणिनां यथास्वं धर्माधर्ममर्यादामनुतिष्ठतामनुष्ठानानुरूपेण फलेनेष्टेनानिष्टेन वा विषयोपभोगलक्षणेनानुग्रहं

किञ्चान्यदिति । रथकारे यथा दृष्टान्ते उपनीते तथेश्वरेऽप्युक्तो दार्ष्टान्त—तथेहापीति ननु यदतः प्रतिपक्षेऽन्यथा
20 श्वरस्य निरपेक्षा प्रवृत्तिरप्रतिहता चास्ति तस्मात् प्रतिघात मध्यकाले च पुरुषकर्मानुरूप्येण तस्य प्रवृत्तेर्यदि तथापि प्रतिघात इत्याशङ्कते—यदुच्यत इति सामान्येन पूर्वपक्षं दर्शयति—कालभेदेनेति । धर्माधर्मेति धर्माधर्मविकलानां [illegible] सर्गादौ धर्मांशमात्रेण प्राणिनां [illegible] न निरपेक्षत्वमीश्वरस्य इति [illegible] तस्य [illegible] भावः । [illegible] शरीरेन्द्रियविषयान् [illegible] तेषां धर्माधर्मौ [illegible]—शरीरादीनीति । मध्यकाले तत्कर्मानुसारात् मध्यकाले चेति [illegible]

१ सि क. किञ्चान्य । २ सि क. विशेषः । ३ सि क. के । ४ सि क. रथकारे । ५ सि क. चक्रेश्वर । ६ सि क. धर्मेश्वर । ७ सि क. दर्शयति । सि क. विषयोपयोग० ।

करोति यदा यदा सापेक्षोऽप्रतिहतसकलशक्तित्वात्, आन्मतं धर्मानुष्ठानफलोपभोगेनेष्टेनानुग्रहो युज्यते, कथमधर्मानुष्ठानफलोपभोगेनानिष्टेन युक्त इत्यत्रोच्यते अयमनुग्रह एव तेषाम्, तदृणमोक्षणादिति । ये पुनस्त्वदुपदिष्टमोक्षमार्गप्रस्थिताः ताँश्च मोक्षमार्गोपसेविनः सायुज्यं गमयति, कोऽसौ मोक्षमार्गः? माहेश्वरो योगविधिः, तानात्मना सह युक्त इति सयुक्, तद्भावः सायुज्यं तेषामीश्वरसाद्भावः, तं गमयति नयति, एवं मध्ये सापेक्षमैश्वर्यम् । पुनरप्यन्तकाले च शरीरेन्द्रियभूतवत् यथा 5 शरीरेन्द्रियाणि भूतान्यपि च विषयानुपसंहरति तथा कल्पकालक्षये तेषां धर्माधर्मावपि संहृत्य तान् पुरुषान् सर्गाहनि संसृजतः तेन धर्माधर्मफलेनेष्टानिष्टोपभोगात्मकेन दिवससंध्यायां परिश्रमाभिभूतान् बालकान् पुत्रकानिव पिता सर्वपुरुषान् संसारहेतुभूतधर्माधर्मावुपसंहृत्य प्रलयशयनपार्श्वे स्वापयतीत्यन्तेऽपि निरपेक्षाप्रतिहतसामर्थ्यः स एवेष्टः, तस्मादुभयथाऽप्यपेक्ष्यानपेक्ष्य च तदैश्वर्यसिद्धेरदोष एव दोषाभिमता त्वयोद्भाविता परपक्ष इति । 10

अत्र वयं ब्रूमः कर्मणामेव तन्निरपेक्ष्य प्रवृत्तौ तस्य प्रतिघातादपरिहृतपूर्वदोषत्वाच्च किञ्चिदेतत्, तत्कारित्वात्तज्ज्ञत्वमिति यत्सर्वज्ञत्वमाकाङ्क्ष्यते तदपि नैव, अस्यानर्थकार्यप्रवृत्तत्वात् बालादिप्रवृत्तिवत्, धर्माधर्ममर्यादोपदेशप्रवृत्तेरनर्थकार्यविषयत्वात्, न च धर्माधर्मयोः शरीरादिकारणत्वम्, कारणलक्षणाभावात्, यस्याभावे यस्याभावो यस्य च भावे यस्य ध्रुवो भावस्तत्कारणमितरत् कार्यमिति हि कारणलक्षणम्, न च धर्माद्यभावे शरीराद्यभावः, सर्गादौ 15 तदभावेऽपि प्रभुसृष्टेः शरीरादिनिर्वृत्त्यभ्युपगमात्, धर्मादिभावेऽपि प्रलयकाले शरीराद्यभावाभ्युपगमाच्च, तस्योपदेशसाफल्यानभिज्ञत्वाच्च निष्कारणशरीरेन्द्रियादिसर्जनादादिकाले, प्रदत्तफलकुशलाकुशलसंहारादन्तकाले च ।

(अत्रेति) अत्र वयं ब्रूमः, कर्मणामेव तन्निरपेक्ष्य प्रवृत्तौ तस्य प्रतिघातादनैश्वर्यम्, सह-भाविसंसारकाले सर्गाद्यन्तयोश्चाकृताभ्यागमकृतविप्रणाशादिदोषाः तदवस्था एवेत्यपरिहृतदोषत्वाच्च 20 किञ्चिदेतत्, अन्योऽपि च दोषः—तत्कारित्वात्तज्ज्ञत्वमिति यत्सर्वज्ञत्वमाकाङ्क्ष्यते तदपि नैव, यदपि

धर्माधर्मफलोपभोगे कथं पुरुषस्यानुग्रह इत्याशङ्कायामाह—आन्मतमिति युक्त इति, भवतश्च इत्यादि । तेषामनुग्रहो यतो ह्यनेनाप्यधर्मापादितं तेऽधर्मस्य [illegible] भवेयु [illegible], तदृणात्स्वेन मोचयितुं तत्फलाप्तेनानुग्रहं करोतीत्याशयेनाह—अयमनुग्रह एवेति । माहेश्वरो योगविधिरिति महेश्वरसम्बन्धियोगविधानमित्यर्थः [illegible] च भगवति सर्वकर्मार्पणबुद्धेर्भावनाविशेष स च भक्तिविशेष [illegible] परमप्रेमास्पदे भगवति 25 समर्पितात्मभावो विधिस्तेन निरन्तरमात्मनि भगवद्ध्यानमनुभवन् तत्सायुज्यमभिव्यनक्तीति सोऽयं भक्तिविशेषो माहेश्वरो योग उच्यत इति भावः । सायुज्यपदं व्याचष्टे—तानात्मनेति मोक्षमार्गोपसेविनस्तान् आत्मसद्भावं गमयतीति भावः । अन्तकाले शरीरेन्द्रियभूतानि यथोपसंहरति लोकस्था तथैव सर्वेषां धर्माधर्मावप्युपसंहरतीत्याह—पुनरपीति । एवमुभयथापि परमेश्वरस्यैव दोषाभावदोषे दोषत्वेन भवताऽभिहितस्य [illegible]—तस्मादिति । एतेषां प्रवृत्तीनां कर्मैव [illegible] [illegible] कर्मपेक्षत्वे च [illegible] 30 प्रलयकाले च [illegible] दुःखेनैतेषां सुखेन योजनात्तत्कर्मानपेक्षत्वे [illegible] पूर्वोक्ताभिहितानामनवस्थापरिहारानुभवमपि दोषप्रसञ्जनं निरवकाशमिति दर्शयति—अत्र वयं ब्रूम इति । दोषान्तरमप्याह—अन्योऽपीति तस्य कर्तृत्वं तत्कारित्वं तज्ज्ञत्वम्, यो यत्करोति स तज्जानातीति व्याप्तिः [illegible] करोतीति सर्वोऽसावपि [illegible]।

व्याख्यायते तस्य सर्वज्ञत्वं सर्वकारित्वात्, करणस्य ज्ञानाभावात् सर्वज्ञत्वं कर्तृत्वाच्च सर्वमसौ वेत्तीति सर्वकारित्वात् सर्वज्ञ इति तदपि नैवोपपद्यते, असामर्थ्यकार्यप्रवृत्तत्वात् बालवदिष्टप्रवृत्तिवत् अज्ञक्रियासाधर्म्याद्वाऽसौ, बालाभिमतसमीक्षितप्रवृत्तित्वाविशेषदर्शनया कल्पनयाऽस्माकं त्वया प्रत्यभी-क्रियते, किं कारणं ? धर्माधर्ममर्यादोपदेशप्रवृत्तेरनर्थकार्यविषयत्वात्—अनर्थको धर्माधर्मावधी तस्य

5 धर्माधर्ममर्यादोपदेशस्य न च तयोर्धर्माधर्मयोः शरीरादिकारणत्वम्, विनापि धर्माधर्ममर्यादया सर्गादौ प्रसृतेः शरीरादिनिर्वृत्त्यभ्युपगमात्, धर्माधर्ममर्यादायां सत्यामेव च प्रलयकाले शरीराद्यभावाभ्युपगमाच्च ईश्वरसामर्थ्यादेव, तस्मात्तयोर्नास्ति कारणता करणत्वस्यायोगात्, कथं तद्योग इति चेदुच्यते, न च धर्मोपभाव इत्यादिना ग्रन्थेन, तयोः कारणाभिमतयोरभावेऽपि शरीरादेः कार्यस्य भावं भावेऽपि चाभावमुपदेशसाफल्याभिमतत्वात् दर्शयति भावव्यतिरेकाभ्यामन्वयव्यतिरेकाभ्यां वा इति गत्वार्थ-

10 त्वान्न विविच्यतेऽस्माभिः ।

किञ्चान्यत्—

यथा चोपदेशानभिज्ञत्वं तस्य तथा प्राणिनामनुग्रहक्रियाया अपि, यदा सर्वैवं व्याप्तु-मैव स्थितानां प्राणिनां भूतकवत् तेषां शरीरमुत्पादयामि धर्माधर्ममर्यादां प्रणयामि तत्र प्रवर्तयामि तत्फलैरनुबध्नामि तान् फलानुरूपमुपभोगं विधास्यानुगृह्णीयामीत्याद्युपभोगविभाज-

15 नानुग्रहक्रियायामस्मिन्नीश्वरे किमिति वर्तते इत्यत्यन्तपरवशत्वमेवैश्वर्यम् ।

यथा चोपदेश इति बालक्रियाया अपि अनभिज्ञत्वमिति वर्तते, न केवलमुपदेशानभि-ज्ञत्वमेव तस्य, किं तर्हि ? प्राणिनामनुग्रहक्रियानभिज्ञतामीति तदतिदिशति, तत् कथं ज्ञायत इति चेदुच्यते—यदा सर्वैवं व्याप्तुमैवेत्यादि भावनामन्त्रः यावदुपभोगविभाजनानुग्रहक्रियाय[म]स्मिन्नीश्वरे किमिति वर्तते—तस्मिन् हि काले प्राणिनां भूतकवत् प्रवृत्तेरीश्वरस्यैव, तेषां शरीरमुत्पादयामि, धर्मा-

20 धर्मप्रणयति—अनुकेति कस्मिंस्तु कर्मण्यसौ प्रवर्तते तस्मात्तस्य प्रवृत्तिर्बालक्रियाविशिष्टत्वात् अविशिष्ट प्रवृत्तमिति भावः । धर्माधर्मोपदेशादिसदसज्ज्ञानस्य सर्वकारित्वात् सर्वज्ञत्वं चेतनत्वात्—अज्ञक्रियेति । अनर्थकधर्ममर्यादस्य धर्मोप-देशाद् धर्माधर्मेति धर्माधर्मयोर्नैरर्थक्यं दर्शयति ... प्रवृत्ति ... धर्माधर्मयोरनर्थकत्वं शरीरादिका-रिकारणत्वायोगात् करणत्वाभावात् अन्वयव्यतिरेकव्यभिचारादिति भावः । व्यतिरेकव्यभिचारं दर्शयति—विनापीति । अन्वयव्यभिचारमाह—धर्माधर्मेति । अन्वयव्यभिचारं चेदयति—कारणत्वाभावेति । चोपदेशस्य ...

25 न चानर्थकत्वात्—उपदेशसाफल्येति तयोरानर्थक्यादि इष्यते ... कार्यानुपपत्तेः तस्य ... न चेति सर्गकाले धर्माधर्माभावेऽपि तत्फलप्रसवात्, प्रलयकाले च ... धर्माद्युपसंहारादिति भावः । प्रलयकाले च तेषां प्राणिनां ... धर्माधर्ममर्यादामनुतिष्ठतामनुग्रहमेव ... करोतीति ... उपपद्यत—यथा चेति । ... साधारणत्वेन ... तयोरभिमताधिकारत्वं ... तथा ... निरन्तरमविशिष्ट ... प्रभिन्नस्याप्यनुग्रहकर्मधर्ममिति ... इत्यभिधानम् ...

30 ... भावः । प्राणिनां ... विनाभिरतो ... तेषां शरीरमिति । यदा सर्वैवमिति यस्मिन् काले प्राणिनः ... कल्पयति ... हि ... प्राणिनामभिज्ञस्य ... ईश्वरस्यानुग्रह ... एव ... उपभोगमधिपत्योपभोग्य धारयति प्राणिनः ... उपभोगस्य च ...

१–१ सि. क. धर्माधर्मोपदेश । २ सि क. विधीयन्ते । ३ सि क. प्राणिनामनुग्रह ।

धर्ममर्यादां प्रणयामि, तत्र प्रवर्तयामि, तत्फलैरनुगृह्णामि, ताम् प्राणिनः फलानुरूपमिष्टमनिष्टं चोपभोग विधा[य]मनुगृह्णामि, एवमादिक्रियाऽनुग्रहक्रियया क्लिश्यमानस्यानेकपुरुषाधीनसुखदुःखजननसाधारणस्येव भृत्यकस्यापि क्लेशः, इति: हेत्वर्थे, तस्मादक्लिष्टस्यात्यन्तपरवशत्वमेवैश्वर्यं शीतलिकापर्यायशब्दाभिधेय तावदुच्यत इति ।

किञ्चान्यत्— 5

अनुग्रहोऽपि विपर्ययेणोच्यते दुःखहेतुदुःखात्मकाभ्यामिष्टानिष्टोपभोगस्य, विषकृत भोजनक्लेशनवत्, यथोक्तं दुःखमपि तारणमोक्षणवदनुग्रह एवेत्येतदप्ययुक्तम्, संसारमोचक व्याधघण्टाकालादिमारितसत्त्वानुग्रहप्रसङ्गात्, सत्त्वनिकायकलिकलुषकृत्वात्मोपनिपातेनाऽऽज्ञा-भावे सत्त्वानुग्रहवदज्ञानप्रसङ्गाच्च, तत्सायुज्यगमनेऽप्येवम् ।

(अनुग्रहोऽपीति) अनुग्रहोऽपि विपर्ययेणोच्यते—अननुग्रह एव सन्ननुग्रह इति, किं कारणं ? 10 दुःखहेतुदुःखात्मकाभ्यां दुःखहेतुत्वादिष्टोपभोगस्य हिंसाद्यधर्मभोऽर्थमरणभयसङ्कटोपे दुःखात्मक-त्वाच्च, अनिष्टोपभोगस्य दुःखात्मकत्वाच्चानुग्रह एवासौ, दृष्टान्तः—विषकृतभोजनक्लेशनवत्, यथा कश्चित् क्रूरमूर्खनृपतिः सपत्नान् भृत्यान् विषमिश्रमाहारं भोजयन्ननुगृह्णामि च इति ब्रूयात्तथा त्वदभि मतेश्वरोऽपीति । यथोक्तं दुःखमपि तारणमोक्षणवदनुग्रह एवेत्येतदप्ययुक्तम्, संसारमोचकव्याधघा-ण्टाकालादिमारितसत्त्वानुग्रहप्रसङ्गात्, सत्त्वनिकायकलिकलुषकृत्वात्मोपनिपातनेनाऽऽज्ञाभावे सत्त्वानुग्रह 15 वदज्ञानप्रसङ्गाच्च । तत्सायुज्यगमनेऽप्येवम्, ईश्वरेण किल सायुज्यं मोक्षः, स्वात्मना सायुज्य गम यत्यसौ प्राणिगणमक्लिष्टसमाचनमेव करोति, क्लिष्टसंसारक्लिष्टेश्वरत्वसोऽत्यन्तक्षणस्यामोक्षसम्प्राप्तिमिवेप-त्वात्, अक्लैश्वर्येण मोक्षेण च तादृशा सदा सर्वपुरुषव्यापारोद्वहनाऽऽयासात्मना, तदुत्तमास्साधीन-मपेक्ष्येदं दौर्गत्यमपीति ।

एवमत्र तवाभ्युपगते स्वयाऽऽपन्नपरिमाणिना मन्येन जिनेश्वरेण क्लिष्टे दोषा इतीदृशे 20 सहापीश्वरेण तथैव भवन्तीति तदर्थमाह—

आपन्नत्वमध्येऽपि धर्माधर्मक्रियाः प्राणिना न स्युः, फलाभावात्, ईश्वरवशादेवाऽऽ-पन्नत्वमध्येषु फलसङ्करात्, ततश्च सर्वप्राणिनां निर्मोक्षः सर्वानिर्मोक्षो वा प्रसक्तः, तत्प्रसक्तौ क्रियाविलोपः, ईश्वरप्राधान्यात् ।

स्वतया तदर्थमात्मनोऽक्लेशसम्भवेन च दुःखहेतुत्वम् अनिष्टोपभोगस्य साक्षाद्दुःखस्य एव तदनिष्टोपभोगस्य दुःखात्मक- 25 त्वं स्यात् यस्तुतोऽननुग्रह एवेत्याशयेनाह—अनुग्रहोऽपीति अनापर्यनगसौ हिंसादिसम्बन्धेन सुखोपभोगे दुःखहेतु वर्जितस्यापि रागे तु यं दृष्टिमपि कर्मिसदुःखमिष्टोपभोगो दुःखहेतुं दुःखात्मकत्वेनाह—दुःखहेत्विति । अनिष्टोपभोगस्य दुःखात्मक एवेत्याह—अनिष्टेति । जन्मोपनतदुःखाभ्यागमे योऽनुग्रहः तदा योऽपि न युक्त इत्याह—यथोक्तमिति । सायु-ज्यमिति । आपन्नत्वमिति पूर्वोक्ते प्रत्ययमध्ये चेश्वरस्य यथा निरपेक्षा प्रवृत्तिस्तथा मध्यमध्येऽपि निरपेक्षप्रवृत्तिप्रसङ्गेन प्राणिनां धर्माधर्मक्रिया न स्युः फलोपभोगाभावात्, ईश्वरवशादेवापन्नत्वमध्येषु फलप्राप्तिसम्भवात् ततश्च सर्वप्राणिनां निर्मोक्षः प्रसज्यते 30 ईश्वरवशात्तु तथा कदापि कस्यापि मोक्षो न स्यादेव यतो हि धर्माधर्मयोरनिमित्तत्वाम्, सर्वेश्वरस्यैव प्राधान्यमिति ।

आर्यन्तमपि इत्यादि तत्स्वनन्तरदोषाच गतार्थं हेतुहेतुमद्भावमतिपादनक्रमेण यावतत्सत्त्वे क्रियाविलोपः, कुतः ? ईश्वरप्राधान्यात्, तत्स्वनन्तरदोषापत्तेरिति धर्माधर्मक्रियाः प्राणिनां न स्युः, फलभावा दीश्वरवशादेव आत्मन्यभ्येषु फलसङ्करात्, ततश्च सर्वप्राणिनां निर्मोक्षः–निःशेषमोक्षः तत्प्रसङ्गेन सर्वानिर्मोक्षो वा प्रसक्त इति ।

5 यत्तु सर्वेशाख्यार्थनियमनापायादनुध्यानाद्धर्माधर्मापेक्षः स एव स्वशक्तितो जगत्सर्जनाय व्याप्रियते ततश्च प्राणिगणं धर्माधर्ममर्यादामुपविश्य मध्ये तत्परिपालयन् ब्रह्मादीनामधिकारिणान् विनियुङ्क्ते, अन्ते च शारीरेन्द्रियविषयाननुपसंहृत्य प्राणिगणं कुशलाकुशलकर्मफलं स्थापयतीति ।

यत्तु सर्वथाक्षेत्यादि पर्वदोषपरिहारार्थं कर्माद्युपसर्जनत्वेश्वरप्राधान्यकारणे मोक्षे, कथ
10 मिति ? तत्प्रकरणस्तुत्तरेण ग्रन्थेन–आद्यो स एव स्वशक्त्या इत्यादिना यावच्छरीरादिक[त]कुशलाकुशलकर्मफलं स्थापयतीति गतार्थः पूर्वपक्षः, धर्माधर्ममर्यादायाः परिपालयन् ब्रह्मादीनामधिकारिणान् विनियुङ्क्ते इति[सि]शेषः ।

अत्रोत्तरमाहाचार्यः—

इदमन्यपर्येवोद्भासते ईश्वरकर्मणोः प्रधानोपसर्जनभावाभ्युपगमाद्वैतम्, भाष्यतेऽन्यथा,
15 स एव स्वशक्त्या एवात्मनिरपेक्ष इत्यवधारणाद्द्वैतार्थभावनात् एवंनियमनापेक्षमपि भावना तदनुध्यानात् पुण्यमुत्पाद्येत्येवाऽन्यद्वैतभावनैव, यत्तुपसंह्रियते तु द्वैताद्वैते द्वे अपि त्यक्त्वा ।

इदमन्यपर्येवोद्भासत इत्यादि, अन्यथा तावत् प्रतिज्ञायते ईश्वरकर्मणोः प्रधानोपसर्जनभावाभ्युपगमाद्वैतम् भाष्यते–शास्त्रहेतुभ्यासनार्थं क्रियतेऽन्यथा–कथमिति चेत् स एव स्वशक्त्या एवात्मनिरपेक्ष इत्यवधारणाद्द्वैतार्थभावनात्–ब्रह्मादीनां तत्कर्मणात्मा कर्तो व्यतिरिक्तानां निरासेन
20 साक्षादेवाप्रयोजनेन कस्यचित् किञ्चिदप्यन्यप्रयोजनता साक्षात् स्वशक्त्या एवेत्यवधारणता चाद्वै

हेतुहेतुमद्भावेनेति । धर्माधर्मक्रियाभावे निरपेक्षेश्वरप्रवर्तितेऽपि फलभावो वा फलाभावे हेतुरीश्वरत्वात् फलसङ्करः, निर्मोक्षानिर्मोक्षयोः प्रसङ्गो धर्माधर्मक्रियाभावात् ईश्वरवशेन फलसङ्करो वा हेतुरिति भाव्यम् । ननु क्रियाविलोपो नास्ति ईश्वरस्य धर्माधर्मयोः कर्तृत्वात्, तदभावे हि सर्वे तेनैवाशुभमूलके न च धर्मफलस्य कर्तृत्वं युज्यते तस्मात् स एव कर्ता अन्यथा तदपि ब्रह्माद्यर्थमपि न भवेत्, न हि तस्मात्स्वतो भवेत् प्राप्तमात् तथाविशेषेणमियामि
25 शक्तामि तपयोरस्य, ईश्वरस्य पूर्वपूर्वेऽनुकर्मापेक्षया प्राणिनो धर्माधर्मौ प्रवर्तेयाति न तु प्रयत्नतरकाल इव प्रवर्तयति तस्मात् धर्मापेक्षवैश्वरस्य प्रधानभावत्वमिति पूर्वपक्षाशयो भाति अत एवोक्तम्–पर्वदोषपरिहारार्थमित्यादि । आद्ये स एव स्वशक्त्या एवैकाकिनोऽसत्त्व कृतप्रधानत्वमिति विशेषम् । सर्वासत्कार्यत्वापेक्षयैव धर्मापेक्षेश्वरप्रवर्तिता प्रतिज्ञाय, आद्ये स एवैकाकिना तु स्वीकृतेन साधितम्, तदर्थमिदं च प्राणिगणं कुशलाकुशलकर्मफलं स्थापयतीति तस्मात् प्रतिज्ञामात्र मोक्षदाता परस्परविरुद्धार्थं दर्शयन्–इदमन्यपर्येवेति प्रतिवचनं धर्माधर्मापेक्षया जगत्कर्तृत्वेनेश्वरस्य द्वैतं प्रतिज्ञायते, स एव
30 स्वशक्त्या इत्यादिना त्वद्वैतं साधितमित्यन्योन्याह इत्याह–अन्यथा तावदिति । अद्वैतमेव प्रयोजनमित्याद्युपसंहारादीनामिति

---

१ सि. क. सर्वेशेत्यादि । २ सि. क. मोक्ष इति ।

तमेव भाव्यते भवता, पुनरप्याह—एवनियमनायेति—अद्वैतनियमनायेयमपि भावना, कतमा सा भावनेति चेत्तदनुष्ठानात् पुण्यमुत्पाद्यतेऽपाप्याद्वैतभावनेनेति, एवं तावत् प्रसिद्धाव द्वैतमद्वैत भावितमित्युक्तम्, प्रत्युपसंह्रियते तु द्वैताद्वैते द्वे अपि त्यक्तव्येति—प्रतिभावभाविते द्वैताद्वैते अपि त्यक्ते।

तत्राद्वैतस्य त्यागस्तावत् धर्माधर्ममर्यादास्थापनवचनेन, मर्यादा नामानतिक्रमस्थानं विषयतस्तु सुखदुःखप्रवृत्तिसीमा, इयति विषये सुखमियति विषये दुःखमिति धर्माधर्मयोः 5 सीमनि स्वके स्वके व्यवस्थापनम्, ततश्च सर्गादौ स्थानाद्यात्मके अपि न स्याताम्, अनियतविषयत्वात्, प्रलयवत्, अन्ते च स्यातामनियतविषयत्वात्, मध्यकालवत्, अथवा नियतविषयत्वात्तदापि स्याताम्, मध्यकालवत् मध्ये वा न स्यातामन्त्यवदिति।

(तत्रेति) तत्राद्वैतस्य त्यागस्तावत्—धर्माधर्ममर्यादास्थापनवचनेन, कथ इति वाक्यशेषः, का मर्यादा? उच्यते—मर्यादा नामानतिक्रमस्थानमिति मर्यादालक्षणमाह विषयतस्तु सुखदुःखप्रवृत्ति 10 सीमा—इयति विषये सुखमियति दुःखमिति धर्माधर्मयोः सीमनि स्वके स्वके व्यवस्थापनम्—धर्मस्य दुःखप्रवृत्ति[व्यव]च्छेदेनाधर्मस्य सुखप्रवृत्ति[व्यव]च्छेदेनायमस्यारम्भोऽयमितरस्यारम्भ इति सीमाविभागः, ततः किमिति चेत् ततश्च सर्गादौ स्थानादीति—स्थानविमोहेन्द्रियविषयाः स्थानादयः तदात्मके सुखदुःखे अपि न स्याताम्, कस्मात्? अनियतविषयत्वात्—अनियतौ हि विषयौ तदा, सुखदुःखयोरविद्यमानस्थानादित्वात्, अविद्यमानधर्माधर्मादित्वाच्च, दृष्टान्तः प्रलयवत्—यथा प्रलये 15 [धर्मा]धर्माभावादेवानियतविषये सुखदुःखे तत्रासती, तद्वत् सर्गादावपि स्यातामिति। किञ्चान्यत्—अन्ते च स्याताम्, सुखदुःखे इति वर्तते, कुतः? अनियतविषयत्वात्—विषयानियमोऽपि रूपादिपञ्चकस्यापचयादुपसंहरणकाले, मध्यकालवत्, अथवा नियतविषयत्वात्—व्यवस्थापितधर्माधर्ममर्याद

अनुष्ठानक्रमेणापि प्राणिनामय पूर्वसिद्धिमत्वेन धर्माधर्मानुचिन्तनक्रमोपलक्षणात्तमेव भावितमित्याह—एवं नियमनायेति अद्वैतनिष्पन्ननियमनाय पूर्वसिद्धसम्बन्धिधर्माधर्मानुचिन्तनप्रतिपादनादित्यर्थो द्वैपरस्माद्द्वास्यमाद्वैतमिति भावः। एवं 20 यस्य भावयं पुण्यं पापं वाऽऽश्रीयतेवैतयोरनुष्ठाय इत्यर्थमित्यमेवाह—पुण्यमुत्पाद्येति। प्रत्युपसंह्रियत इति अन्ते वैनापि ना प्रत्येकेति शेषः। अथ भाविनस्याद्वैतस्य त्यागं दर्शयति—तत्राद्वैतस्येति, इत्याभिमो हि मर्यादा अर्थैवस्यात्र स्थानं भावोऽप्यवास स्थितिरित्यनतिक्रमस्थानं मर्यादेत्याशयेनाह—का मर्यादेति, इयं स्थानविमोहेन्द्रियार्थ भेदा। नियममवाप्याह—विषयतस्त्विति। स्वके स्वके व्यवस्थापनमिति व्याचष्टे—धर्मस्येति धर्मे दुःखादिप्रवृत्तिव्यवच्छेदेनाधर्मे च सुखादिप्रवृत्तिव्यवच्छेदेन तयोः परस्परं पार्थक्येन व्यवस्थापनमित्यर्थः। एवञ्च स्थानविमोहे- 25 न्द्रियविषयात्मके एव व्यवस्थापनाप्यवस्था अपि सुखदुःखयोः धर्माधर्माधीनत्वाद्वैतस्याम इति भावः। ततश्च चेत्याह—ततश्चेति सर्गे आरम्भे स्थानाद्यात्मके सुखदुःखे न स्याताम्, अनियतविषयत्वात्, प्रलयकालवत् सुखदुःखयोर्हि विषया भावकः प्रलयकाल इव तदानीमपि नास्ति अत एव न सुखदुःखे स्त इति भावः। अनियतत्वे हेतुमाह—सुखदुःखयोरिति स्थानादयो हि सुखदुःखयोराश्रयाः तान् प्रत्येव ते च सुखदुःखयोरुद्भवनात्। धर्मादिरपि तदानीं नास्ति धर्माधर्मयोरप्यभावानुपपन्नमित्याह—अविद्यमानेति। अथानियतविषयत्वेऽपि यदि सर्गादौ सुखदुःखे अभ्युपगम्येते तर्हि सर्गान्तकालेऽपि 30 स्यातामित्याह—किञ्चान्यदिति रूपादीति प्रथमं पञ्चभूतानां पृथिव्यादीनामुपसंहरणात् तत्सम्बन्धसर्वभूतानां पञ्चविषयानुपपत्तिरिति भावः। मध्यकाले यावन्ते तावन्नैव तत्त्वात्तदुपयुक्तं हेतुमाह—अथ चेति। ननु धर्माधर्ममर्यादा न

---

१ सि क. सुखप्रवृत्ति । २ सि. क दुःखप्रवृत्ति । ३ सि क. स्थानादीत्यर्थमिति।

स्यात्, सुखदुःखे यदा नियतविषये तस्मात्तदापि स्याताम्, अन्यकालवत्—सुखदुःखकालविलये, तद्विपर्ययेण वा साधनम्—अन्ये वा न स्याताम्—सुखदुःखे नियतविषयत्वादिति वर्तते, अन्यवदिति ।

अथोच्येत अत एव न सुखादिप्रवर्तनात्मिका धर्माधर्ममर्यादा, ईश्वरस्यैव सुखदुःखयोः प्रवर्तकत्वात्, यदि सा न प्रवर्तयति किमर्थमसौ तां व्यवस्थापयतीति चेदुच्यते, अयं
5 धर्मोऽयमधर्म इत्येतावदुपदेशेन स्वरूपसंज्ञाव्यवस्थापनमसौ करोतीति ।

अथोच्येतेत्यादि, यावद्धर्मोऽयमिति, साम्प्रतमत एवेश्वरस्यैव कारणत्वान् सुखादिप्रवर्तनात्मिका धर्माधर्ममर्यादा—धर्मवचनासमर्थेत्यर्थः, ईश्वरस्यैव सुखदुःखयोः प्रवर्तकत्वात्, यदि सा न प्रवर्तयति सुखदुःखे धर्माधर्ममर्यादा किमर्थमसौ तां व्यवस्थापयतीति चेदुच्यते स्वरूपसंज्ञाव्यवस्थापनमसौ तयोर्लोकव्यवहारार्थं करोतीत्यत आह—किं तदिदं अयं धर्मोऽयमधर्म इत्येतावदुपदेशेन ।

10 अत्रापाय उत्तरमाह—

एतदपि तुल्यं पूर्वेण, असत्त्वात्, धारणाद्दानाद्वा धर्म इति निरुक्तेः, एतस्यार्थस्याभावे कथमसौ धर्म उच्यते तद्विपर्ययो वा कथमधर्म इति, धर्माधर्मावित्येते सुखदुःखकारणे अभ्यभिधीयेते, तस्मादयुक्तं संज्ञाकरणमात्रेण मर्यादेति ।

(एतदपीति) एतदपि तुल्यं पूर्वेणासत्त्वात् सुखादावन्यवत् स्यातामनियतविषयत्वादन्ये च
15 स्याताम् नियतविषयत्वाद्वा अन्यवत्, अन्ये वा न स्यातामन्यवदिति, इदमेव दोषजातं प्राप्तम्, किं कारणं? धारणाद्दानाद्वा धर्म इति निरुक्तेः, यदि मर्यादां धारयति प्राणिनाम्, सुखे चैनां दधे ततो धर्म इति एतस्यार्थस्याभावे कथमसौ धर्म उच्यते तद्विपर्ययो वा कथमधर्म इति तद्विपरीतार्थाभावे, तस्मात् सुखस्यानादिधारणाद्धर्मः सुखकारणं तदभिधीयत इष्यते, यस्याभावे यस्याभावो यस्य च भावे यस्य भावोऽभावस्तत्कारणमितरत् कार्यमिति कारणस्य धर्मस्य कार्यस्य सुखस्याभिधानम्,
20 एवमधर्मेऽपि व्याख्या विपरीतार्था कार्या, तस्मादयुक्तं संज्ञाकरणमात्रेण मर्यादेति ।

अथ तु तस्यैव रूपेण सुखं दुःखं वा, न धारणदानप्रवृत्त्यात्मकत्वाद्धर्मस्यातत्त्व वा, उच्यते

[illegible]

25 [illegible]

30 [illegible]

---

१ [illegible] । २ [illegible] ।

धर्माधर्ममर्यादावचनस्यानर्थकत्वात्, यदुक्तं प्रतिबुद्धानां प्राणिनां धर्माधर्ममर्यादामुपदिश्योत्तरकाल स्वमर्यादानुष्ठानानुरूप्येणेत्यादि तत्सर्वमनर्थकम्, सदैवेश्वरशक्तिमात्रवशादेव यथा तथा सुखस्य दुःखस्य वा यस्य कस्यचित् सिद्धेर्धर्माधर्माकारणत्वादाद्यन्तवचन्मर्यादावचनमनर्थकमिति ।

अथ त्वित्यादि आत्मन एवैष-ईश्वरस्य स्वैरेच्छातः सुखं दुःखं वा न धारणधाम 5
प्रवृत्त्यारम्भकत्वात् धर्मस्य अधर्मस्य वा कस्यचिदिति, अत्रोच्यते धर्माधर्ममर्यादावचनमनर्थकम् । यदुक्तं
प्रतिबुद्धानां प्राणिनां धर्माधर्ममर्यादामुपदिश्योत्तरकाल स्वमर्यादानुष्ठानानुरूप्येणेत्यादि तत्सर्वमनर्थकं संवृत्तम्, तत्साधनार्थं हेतुमाह सदाद्यन्त-सदैवेत्यादि यावदस्य कस्यचित् सिद्धेराद्यन्तवदिति, सर्गस्यादौ मध्येऽवसाने च सदैव-सर्वकालमीश्वरशक्तिमात्रवशादेवान्यस्य कारणस्याभावेऽपि यथा तथा—येन वा तेन प्रकारेण सुखस्य दुःखस्य चेष्टानिष्टशरीरादेरनियमेन यस्य कस्यचित्-मारकस्य हिंसकस्य वा सिद्धेः 10
धर्माधर्माकारणत्वम्, तदकारणत्वादाद्यन्तवत्-प्रथमावसानकालयोरिव तन्मर्यादावचनमनर्थकमिति, एष तावद्द्वैतत्यागः ।

न केवलमद्वैतत्याग एव किं तर्हि—

तथा द्वैतमपि त्यक्तम्, साक्षाद्व्यापारवचनात् तद्व्यापृतस्य सर्वथा सर्वदा सर्वत्र चाऽव्याहतवृत्तित्वात् किं धर्मादिना ? किं स्थानविग्रहेन्द्रियविषयैः प्राणिभिर्वा ? किमाधिकारिकैः ? 15
अथ मन्यसे तैर्विना व्यक्तिर्नाभिव्यज्यते तस्य तर्ह्यस्य व्याहतशक्तित्वात्तु अनीश्वरता कार्यान्तरापेक्षः प्रमाता, इतरवत् ।

(तथेति) तथा द्वैतमपि त्यक्तम्, कुतः ? साक्षाद्व्यापारवचनादित्यादि यावत् किमाधिकारिकैरिति, साक्षाद्व्यापारो हैश्वर्यम्, तद्व्यापृते तस्मात्तद्व्यापृतेत्यस्य सर्वैः प्रकारैः सर्वकालं सर्वदेशे चाऽव्याहता वृत्तिरस्य, अतस्तदव्याहतवृत्तित्वात् किं धर्मादिना ? आदिग्रहणादधर्मेण, किं स्थानविग्रहेन्द्रियविषयैर्वा ? 20
प्राणिनां सुखदुःखाश्रयैः, प्राणिभिर्वा किं क्रियते न किञ्चिदित्यभिप्रायः किमाधिकारिकैः ? अथ मन्यसे इत्यादि—

धर्मे: सर्वत्राप्यव्याहतत्वादीश्वरेच्छयैव धर्माधर्मौ सुखदुःखकारकयोरभावेऽपीश्वरानिच्छया शरीरादेरधार्मिकस्य धार्मिकस्य वा प्रयोगेण धर्माधर्मयोरनर्थकत्वमित्याह यदुक्तमिति स्पष्टमन्यत् । सिद्धेरिति मारकस्य हिंसकस्य वा यथा तथा मध्यकालेऽपि सुखस्य दुःखस्य चेश्वरशक्तिमात्रवशादेवान्यकारणमन्तरेण सिद्धेर्धर्माधर्मयोरकारणत्वात्तन्मर्यादावचनमनर्थकमिति भावः । अथ कस्यचित् एवेश्वरस्याद्वैते प्रतिज्ञाते द्वैतमपि त्यक्तमित्याह—तथेति धर्माधर्ममर्यादायाः प्राणिभेदविभागकत्वेन तत्त्यागात् 25
द्वैतत्याग इति भावः । साक्षाद्व्यापारवचनादिति आदौ कस्यचित् एवेति वचनात् तदव्यापृतानां कारणानां प्रयोजनस्य च निरुक्तेन साक्षात्तस्यैव व्यापारमभ्युपगमात्, यदाहुः 'सर्वकर्ता सर्वशक्तिः सर्वज्ञः सर्वव्यापी नित्यः । कर्तृत्वादिविशिष्टविधिः सर्वाणुरादि महेश्वरस्य' । ईश्वरस्याव्याहतशक्तिमत्त्वमेवैश्वर्यमित्यभ्युपगमात् धर्मादिव्यापारस्य वैयर्थ्यमित्याह—तस्मादिति तदव्यापृते धर्मादिव्यापारेऽपि ईश्वरव्यापारेणैवासत्त्वेन धर्मादिना तदन्यसुखदुःखाश्रयस्थानविग्रहादिना प्राणिभिरधिकारिकपुरुषैर्वा किं प्रयोजनमिति भावः । अथ मन्यसे धर्मादीनपेक्षते तर्हि तदपेक्षितत्वेन -तदन्तर- 30

निमित्तैर्मौपर्ममर्यादापाम्नार्थं विनियुक्तमनेनेति, अथ मन्यसे तैर्विना शक्तिर्न्योऽन्यथै तस्येश्वरस्य सत्कर्मस्य व्याहतशक्तित्वात्स्वेच्छमीश्वरता कार्योन्मुखत्वसक्तेः प्रमाद्य इवरमिति पृथग्जनविमर्शः।

ननु प्रधानोपसर्जनद्वैतमुत्प्राप्य तदर्थसंवादेनोपसर्जनेन विनापि प्रधानस्य प्रवृत्तिसम्भवात् चित्राचार्यस्येव शिष्येण विनापि सर्गादौ तथाऽदृष्टाद्यभावेऽपि प्राधान्यात्, भाष्यत्वादिति

5 चेन्न, भाविकृतस्य कर्तृत्वात्, अभ्यस्यमानप्रकारव्यक्तिरादिः, आदानात्, आदित्योदया दित्यवत्, तत्प्रयोजनपरमार्थत्वात्प्रवृत्तत्वस्य, यः प्रयोजयति परमार्थतः स कर्ता भविता न प्रयोज्यो भृकुट्योः सर्वथात्वर्थत्वात्।

ननु प्रधानोपसर्जनेत्यादि यावत्तथाऽदृष्टाद्यभावेऽपीश्वरस्येति, आह द्वैतमेवोत्प्राप्य भावितं मत्युपसंहृतत्र नान्यथोत्प्रादभावनोपसंहारः, कथं ? प्रधानमुपसर्जनत्र द्वैतं प्रतिज्ञातं तस्येवार्थस्य संवा-

10 देनेश्वरः प्रधानं न कर्मेत्येवमावमार्थं सर्गस्यादौ साक्षात्क्रियः स एव साक्षात्त्वाभिप्राय इत्युच्यते, कस्मात् ? उपसर्जनेन विनापि प्रधानस्य प्रवृत्तिसम्भवात्, चित्राचार्यस्येव शिष्येण विनापीति यथा शिष्यमभ्यासं माहयित्वा चित्रकर्म माहयित्वा वा प्रधानोऽयं तेन विना सह वा चित्रकर्मणि चित्राचार्यः प्रवर्तते, एवं स्वभावस्यात् साभिप्रायासाभिप्राययोरपि शिष्यस्य प्रवर्तकत्वात्, एवमीश्वरोऽप्यदृष्टादिसाभिप्रायासाभिप्रायो प्रवर्तते प्रधानत्वादिति भाष्यत्वादिति भाष्यत्वात्तत्प्रतिपत्तिवानुरूपभावनोपसंहारसम्भवात् कश्चिद्दोषः

15 इत्येवं च, भाविकृतस्य कर्तृत्वात् भाविकृतोभाविकृतः, स एव च कर्ता, तस्यैव कर्तृत्वात् कोऽसावा-विरिति चेदुच्यते अभ्यस्यमानप्रकारव्यक्तिरादिः तत्र प्रधानसाम्यतस्य केनचित् प्रकारेण व्यक्ति-रादिः, कुतः ? आदानात् आदानमादिरित्यक्षरार्थमित्यभिप्रायमाह, द्वैतो दृष्टान्तश्च आदित्योदयादित्यवदिति यथाऽऽदित्यस्योदयमभ्यागतमयत्वप्रकारेण दिवसादिविभागानां दिवसमानानां व्यक्तिरेवम् तत्र प्रयो-

---

प्रयोजन् प्रतिपत्तिविशेषमीश्वर एव सार्थिकाह–अथ मन्यस इति। तत्र दृष्टान्तं दर्शयति–कार्योन्मुखत्वसक्तेरिति अपरकर्म

20 प्रयोजनात् प्रमाद्य तामाम्यः कश्चित् कर्मकरव्यापारौ प्रवर्तते कर्म प्रति यथाऽयोपरो भवति तद्वदिति भावः। अत एव उपसर्जन-प्रधानमीश्वर इति वस्तुतत्त्वमुत्प्राप्येश्वरस्य भावाभ्यनुज्ञानसमावाऽऽदौ कथञ्चित् प्रमाणानुपपत्तिरिदम् प्रधानं हि उपसर्जनं तदपि कर्म कर्तृमुपपद्यते अन्यथा प्रधानाप्रधानभेदानुपपत्तेः। यद्युपसर्जनभूतशिष्यव्यतिरेकेणापि चित्राचार्यचित्रे प्रवर्तते इत्याशङ्कते–ननु प्रधानेति उपक्रम भावनोपसंहाराच्च न वैयर्थ्यमित्यत्रोक्तमपि द्वैतमेवेति। न एव तत्पक्षिण इति नार्थितं भावितमपि तु प्रधानद्वैतस्य मार्मिकेनाह–तस्यैवार्थस्येति प्रतिज्ञातार्थस्यैवार्थः। इति भाष्यत्वादित्यत्र भावार्थकर्मभावनागत्वमनुपपत्ताप-

25 त्तिरर्थं। तेन न द्वैतभावस्य वा साम्य इति भावः। न एवासौ करोति न एव कर्ता कर्मनिरपेक्ष कर्तारौ यदि करोति तर्हि न एव कर्ता स्यादित्युपपादयति–भाविकृतस्येति। भाविपदार्थमनभिव्यक्तप्रकारव्यक्तिरूपं दर्शयति अभ्यस्यमानेति। भाविरूप-मुत्पत्तिमाह–आदानमिति उपादानं प्रकारस्येति भावः। दृष्टान्तमाह–आदित्येति उदयादिव्यापारेण आदित्योऽपि एव तत्कर्तृत्वमिति भावः। यत्र वस्तुतः प्रयोजयति स एव कर्ता भविता न प्रयोजकनिमित्तानि विशेषविभागत्वात्, भृकुट्योः कार्यव्यक्तिमात्रत्वात् तावत्प्रयत्नातिरेकेण विशेषस्याभावात् भृकुट्योः सर्वथात्वर्थत्वमुपपन्नं तथा न प्रयोक्ता प्रयोजनस्य सर्वथासमर्थो

30 कर्ता भविता चेत्याह–तथेति। एवम् सर्वथात्वादिप्रयत्नमिवाह–एतदुक्तं भवतीति सर्वाणि वस्तूनि कल्पितरूपाणि

---

१ सि. क. तृष्णाभावाव्रे। २ सि. भावसानि। ३ सि. क. चित्रापीति। ४ सि. क. प्रत्येकं। ५ सि. क. प्रवर्तितः। ६ क. 'हित्वोत्थाप्य। ७ सि. क. द्वैतमत्राभिप्रायो।

तत्परमार्थत्वात्प्रवृत्तेश्च, यः प्रयोजयति परमार्थतः स कर्ता भविता, भूम्योः सर्वघात्यर्थत्वात्, न प्रयोज्य इत्यस्मात् कारणात् य आदिकरः स कर्ता यश्च कर्ता स भवति, भूम्योः सर्वघात्यर्थव्यापित्वात्, एवमुक्तं भवति यतः प्रकारान्तरेणाभिव्यञ्जयन्नन्यत्रस्यादिकरत्वाद्भवति वस्तु तत एवैकैकस्य सर्वत्वं सर्वस्यैकस्य परस्परापेक्षाभिव्यञ्जनेनादिकरत्वादिति ।

अस्मिन्नर्थे व्यापकं दृष्टान्तमाह स्फुटीकरणार्थम्— 5

आदिकरत्वञ्च यथा व्रीहौ सम्भाव्यते, अव्रीहेर्मृदादेर्व्रीहित्वेनादिकरत्वात्, तथा प्रागप्यादिकरत्वं तथा पश्चादपि, तदादित्वाद्व्रीहेस्तेषामादिकरत्वं तथाभिव्यक्तेः तत्प्रयुक्तत्वाच्च, ते ह्यस्य प्रयोक्तारः ।

आदिकरत्वञ्च यथा व्रीहौ सम्भाव्यत इति, तद्व्याख्या—अव्रीहेर्मृदादेर्व्रीहित्वेनादिकरत्वादिति—मृत्सलिलभूम्याद्याकाशानामव्रीहीणां व्रीहिप्रकारेणाभिव्यक्तिं कुर्वन् व्रीहिरादिकरः, एतमर्थं 10 हेतुत्वेन व्यापारयति सिद्धं कृत्वा पञ्चम्या—[1]व्रीहित्वेनादिकरत्वादिति, तथा प्रागित्यादि—एवञ्च कृत्वा व्रीहित्वात् प्रागपि पृथिव्याद्याकाशान्तानामप्यादिकरत्वं पश्चादपि, तेन प्रकारेण तथा, व्रीहिरिवेत्थं तदादित्वाद्व्रीहेः, ते आदिः पृथिव्यादिः यस्य व्रीहेः प्राक् पश्चाच्चेति, तेषामादिकरत्वं, तेन प्रकारेणाभिव्यक्तेः, किञ्चान्यत्—तत्प्रयुक्तत्वाद्व्रीहेः, ते ह्यस्य प्रयोक्तारः, यो यस्य प्रयोक्ता स तस्य कर्ता, यथाऽऽदित्योदयादित्यवदित्युक्तम् । 15

आह—

तत्प्रयुक्तो व्रीहिः, पृथिव्याद्येव न भूतो व्रीहिः, आदिकरत्वादादित्योदयादित्यवदित्य-भिप्रेत्य को वा ब्रवीति पृथिवी न भूता, तदन्यदिव व्रीहिरिति तत्प्रयुक्तत्वाद्व्रीह्यादि वा पृथिव्यादि न भूतमिति, तत्प्रयुक्तत्वाद्व्रीहिरपि पृथिव्याद्याकाशादि भवति पृथिव्युदक-वाय्वाकाशाद्यपि च व्रीहिप्रयोजकत्वादि भवति, तत्कृताकारोऽपि पृथिव्यादि व्रीह्यादि, 20 पृथिव्याद्यपि तत्कृताकार इत्यन्यथेति सर्वस्यैकैकस्य तदात्मकत्वात्तत्त्वेन ।

प्रकारत्वं प्रकारान्तराद्यादिकराणि तेषां तथाभवनात्, वस्तुमात्रस्य परस्परापेक्षया प्रकारान्तराभिव्यञ्जनादेकैकस्य सर्वत्वं सर्वस्य चैकत्वमिति भावः । एतदेव दृष्टान्तेन भावयति—आदिकरत्वञ्चेति अव्रीहिस्वभावानां मृदम्बाद्याकाशानां व्रीहित्वेनादि करत्वात् व्रीहिरादिकरः तेषां तद्रूपे हि व्रीहिर्भवतीति भावः । व्रीहिरादौ वर्तते स च मृदादीन् व्रीहित्वेनाभिव्यञ्जयतीति व्रीहेः प्रथमव्याख्यानपक्षं सिद्धत्वेन हेतूकृतं व्रीहेरादिकरत्वे इत्याह—एतमर्थमिति । पृथिव्यादयोऽपि व्रीहित्वेनाऽऽदिकराः तेन 25 प्रकारेणाभिव्यक्तेरिति व्रीहेः पूर्वापरभूतपृथिव्यादीनामादिकरत्वं प्रकाशयति—तथा प्रागित्यादिनेति । तेनेति व्रीहिप्रकारेणाभिव्यक्तेरिति भावः । हेत्वन्तरमाह—तत्प्रयुक्तत्वादिति मृदादिभिः प्रयुज्यते व्रीहिः यस्य प्रयोजकः स कर्तेति पृथ्व्यादय आदिकरा इति भावः । ननु पृथिव्यादयो व्रीहेः प्रयोक्तारो भवन्तु नाम किन्तु तत्प्रयुक्तत्वात् आदिकरत्वेनादित्यवदादिकरत्वात् पृथिव्यादिरेव व्रीहिर्भवतीति न ब्रूम इत्याशङ्कते—तत्प्रयुक्तो व्रीहिरिति । अथवा तत्प्रयुक्तत्वादिकरत्वादादित्यवत् आदिकरत्वं पृथिव्या-दीनां भवतु नाम किन्तु पृथिव्यादिरेव व्रीहिर्भूत इति तु न न हासिम तदयमभ्युपगमविषयमितिमात्रकत्वे वदतीत्याह– 30

---

1 सि. क. व्रीहित्वेनादीति । 2 सि. क. पार्थेदेः ।

(तत्प्रयुक्त इति) तत्प्रयुक्तो व्रीहिः, कस्मात्? पृथिव्येव न भूतो व्रीहिः, पृथिव्येवोदकमेव वायुरेव वाऽऽकाशमेव वा तत्प्रयुक्तत्वात्तद्विकारत्वात्तद्विलोदयादित्यवमिति, अथोच्यते को वा भवीति पृथिवी न भूतः तत्कार्येण व्रीहिरिति, तत्प्रयुक्तत्वाद्व्रीह्यादि वा पृथिव्यादि न भूतमिति, तत्प्रयुक्तत्वा व्रीहिरपि पृथिव्यवाप्याकाशादि भवति, पृथिव्युदकवाय्वाकाशाद्यपि च व्रीहिमापाद्यमानत्वाद्भवति, तत्कृताहारोऽपि पृथिव्यादि व्रीह्यादि, पृथिव्याद्यपि तत्कृताहार:-तत्कृताहारशरीरेन्द्रियमनुष्यादि-तत्कृतमनुष्यविषमारकल्पेणादि च तत्कृताहारव्रीह्यादि, पृथिव्यादि च तत्कृताहारशरीरेन्द्रियपुरुषमनुष्यादि सर्वं परस्परतः सर्वात्मकं भवति तत्प्रयुक्तत्वात् यथाऽभिव्यक्तेस्तद्विकारत्वादिहेतुभिः, किञ्चोपादीयते, व्यापकत्वात् व्यापित्वात् सर्वं चतुरुदाहरणमेव विश्वात्मकसर्वार्थनार्थमाह-इत्थमेवमेति यदि व्रीहितो व्रीहेरविकारत्वमथ पृथिव्यादितः पृथिव्यादेरविकारत्वमिति तान्येवोदाहरणानि, एवं तत्कृताहारशरीरेन्द्रियादिष्वपि द्रष्टव्यम् सर्वस्यैकैकस्य सर्वात्मकत्वात्तत आह-तदात्मकत्वात्तदव्यतिरिक्तत्वात्तदेवेति तस्य तस्य प्रकारस्य हेतुत्वं व्याख्यातत्वादिति ।

एवं दृष्टान्तभूतं प्रत्यक्षव्यवहारसाधितं सर्वसर्वात्मकत्ववादं प्रकटितत्वा दार्ष्टान्तिकं पुरुषकर्मणा कर्मीश्वरकारणनिराकरणमाह—

पुरुषकर्मत्वस्यैवमेव, पुरुषः कर्ता कर्मयोग्यानां पुद्गलानां कर्मत्वेनाविकरः, तथाविधोपयोगगतेः ।

पुरुषकर्मत्वस्यैवमेवेत्यादि, पुरुषः कर्ता कर्मयोग्यानां पुद्गलानां कर्मत्वेनाविकरः, कर्मयोग्याः पुद्गला उच्यन्ते-समानजातीयानामेकत्वो पुद्गलाऽवस्थापितानां पिण्डो वर्गणा, कुविकर्मकर्मीरसकर्मगोपिण्डवत्, परमाणुवर्गणा [1]द्व्यणुकवर्गणाः-त्रिप्रदेशवर्गणा एवं द्व्यणुके

पृथिव्येव न भूत इति । पृथिव्याद्यपि तथा तथा भवतीत्याह-को वा भवतीति पृथिवी व्रीहिर्भूतः तत्कार्येण व्रीहिर्भूत इति के वा भवतीति योजना व्रीहिः पृथिव्यादि भवति तत्प्रयुक्तत्वात् पृथिव्यादिरपि व्रीह्यादिर्भवति तत्प्रयुक्तत्वादेवमन्योन्यभवनमाह-तत्प्रयुक्तत्वादिति । तत्कृतेति व्रीह्यादिरत्रेवार्थः एवं च तत्प्रयुक्तत्वव्यभिव्यक्तिसद्भावविकारत्वादिहेतुभिः सर्वं सर्वात्मकं भवतीत्युपसंहरति-तत्प्रयुक्तत्वादिति । तदाह्यत्वे हेतुमाह-तदात्मकत्वादिति पृथिव्यादेर्व्रीह्यादित्वाद्व्रीह्यादिव्यतिरिक्तत्वात् व्रीह्यादिरेवेत्यर्थः, अथ दार्ष्टान्तिकं पुरुषकर्मत्वमुपपादयति-पुरुषेति पुरुषो हि कर्ता कर्मपुद्गलान् योग्यान् कर्मत्वेनाभिव्यनक्ति अतोऽसौ कर्मत्वेनाभिव्यञ्जकत्वादविकरः पुरुषस्य कषायकर्मस्वपरिणामात् पुद्गलानामभवनस्वविकार्यत्वेनपरिणामापत्तेरविकार्यं एवं पुरुषोऽप्यविकारः कर्मपरिणामयोग्यपुद्गलान् कर्मत्वेन परिणमयति तथाऽसौ तेषां भवोपग्रहयोजकः स्वयं च तत्र कर्मत्वादविकारः स इति भावः । तत्र हेतुमाह-तथाविधेति, कषाययोगपरिणामपुद्गलद्रव्यसद्भावपरिणतिग्रहणयोग्यपरिणामापत्तेः पुद्गलस्वेवं कर्मयोग्या इति ये कर्मयोग्याः पुद्गलाः इत्यादयस्ते अनुक्रमेण दर्शयति । समानेति समानजातीयानां पुद्गलानामवस्थानं वर्गणाऽवसरे वर्गं इत्येवं निरुपणीयत्वात् पुद्गला जीवभेदेन व्यवस्थापितानां पुद्गलानां समूहो वर्गणा । कुविकर्मेति । भरतक्षेत्रेऽस्मिन् प्रसिद्धो [illegible] कुविकर्मो नाम [illegible] तदीयं, स तासां गवामतिकुशलात् तदर्थादिसंख्यापरिमितानां पृथक् पृथक् अनुरागमर्यादं प्रकृताम् योजयत्येते ते ताश्च रक्तं निर्मितानु [illegible] [illegible] वर्णतः समूहो भिन्नं वर्णसमयपूर्णं, तत्र तथाऽन्योन्यं विपरिणामपुद्गलवर्गणा हेतुमात्रोदयेन सम्प्रयुक्तत्वात् कर्मादिसमुदायविभागं यथा [illegible] समानजातीयत्वेनैकपुद्गलवर्गणा भिन्ना भिन्ना वर्गणा व्यवस्थापिताः तथा जीवस्वतन्त्रपुद्गलसमूहवर्गणो नानुयोग्या [illegible] परमाणुरूपाणां पुद्गलविशेषाणां तदयोग्यानां परमाण्वादिपर्यन्तानामभिधानं निरूपितमिति व्याख्यातार्थाः [illegible] । ता एव वर्गणा आह-परमाणुवर्गणेति

1 नि. क. अमद्व्यणुकवर्गणा इत्यधिकं दृश्यते ।

णादि संख्येयप्रदेशवर्गणाः, अनन्तप्रदेशवर्गणा अपि काश्चिद्ग्रहणयोग्याः काश्चिदग्रहणयोग्याः, ग्रहणयोग्या-योग्यत्वञ्चातिस्थूलसूक्ष्मत्वात्, सर्वे इमे परमाणुस्कन्धाः [अयोग्यत्वात्] योग्यत्वाच्च मध्यमपरिमाणानाम्, तत्र या ग्रहणयोग्याः पुद्गलास्ता वर्गणास्तत्र मानेन सिद्धानामनन्ततमो भागः, अभव्यसिद्धाना-मनन्तगुणाः, एवं तावदौदारिकयोग्यस्य जघन्यस्य विधिः, तदुपर्येकपरमाणौ प्रक्षिप्ते द्वितीयाऽप्यौदारिकयोग्या, एवमेकैकवृद्ध्याऽनन्तानन्तानि स्थानान्यौदारिकाकारत्वेन ग्रहणयोग्यानि, जघन्यादुत्कर्षस्या- 5
नमसंख्येयगुणम्, यस्मात् परम्परोपनिधया प्रथमस्थानादारभ्यानन्तस्थानेषु[ग]तेषु द्विगुणता भवति तस्मादसंख्यगुणं संख्येयगुणं वा, अनन्तरोपनिधया तु रूपाधिकमेव, तस्मिन्नुत्कृष्टौदारिकयोग्यद्रव्ये रूपे प्रक्षिप्ते जघन्यं वैक्रियशरीरस्याग्रहणयोग्यम्, एवं रूपाधिकवृद्ध्या तान्यप्यनन्तानन्तानि स्थानानि पूर्ववत्, जघन्यादुत्कृष्टमसंख्येयगुणम्, को गुणकारः ? श्रेण्यसंख्येयतमभागः, तेषामग्रहणानामुपरि वैक्रियस्य जघन्यं ग्रहणयोग्यम्, तान्यपि स्थानानि पूर्ववदनन्तानन्तानि, पुनराहारकाग्रहण[योग्या]नि, 10
तथा तदुपरि तद्ग्रहणयोग्यानि तथैव, औदारिकशरीरयोग्येभ्यो वैक्रियशरीरयोग्यान्यसंख्येयगुणानि, ततोऽसंख्येयगुणान्याहारकयोग्यानि तावदसंख्येयगुणानि ग्रहणाग्रहणानि, पूर्वस्मात् पूर्वस्मात्तदुपर्याहारकोत्कृष्टे रूपे प्रक्षिप्ते जघन्यमग्रहणं तैजसस्य, जघन्यादुत्कृष्टमनन्तगुणम्, को गुणकारः ? अभव्येभ्योऽनन्तगुणः, सिद्धानामनन्ततमभागः, तदुपरि रूपाधिके तैजसशरीरयोग्य जघन्यादुत्कृष्टमन-न्तगुणम्, को गुणकारः ? सिद्धानामनन्ततमभागः, अभव्येभ्योऽनन्तगुणः, अनेन विधिनोत्तरेषां 15

एकस्मिन्नाकाशप्रदेशवर्तिनामेकैकपरमाणूनां समुदायः सजातीयत्वादेका परमाणुवर्गणा ततः एकाकाशवर्तिनां द्विप्रदेशिकस्कन्धानां द्वितीया वर्गणा ततः त्रिप्रदेशिकानां एकस्थानामपि स्कन्धानां तृतीया वर्गणा एवमेकैकपरमाणुवृद्ध्या संख्येयप्रदेशिकानां स्कन्धानां संख्याता वर्गणाः असंख्यातप्रदेशिकानां स्कन्धानामेकैकपरमाणुवृद्धानामसंख्येया वर्गणाः अनन्तपरमाणुनिष्पन्नस्कन्धानामनन्ता वर्गणाः अनन्तानन्तप्रादेशिकानां स्कन्धानामनन्तानन्तवर्गणाः सर्वा अप्येता अल्पपरमाणुकत्वेन स्थूलपरिमाणतया न स्वभावजीवानां ग्रहे न समागच्छन्तीत्यग्रहणवर्गणा एताः सर्वा अणुमात्रा इति भावः । 20
तत्र ग्रहणयोग्यायोग्यत्वे हेतुमाह-ग्रहणयोग्येति यतः परमाणुस्कन्धा इव या अतिसूक्ष्मा अतिस्थूलाश्च ता अग्रहणयोग्या मध्यमपरिमाणाश्च ग्रहणयोग्या इति भावः । परमाण्वित्यिति परमाणुरतिसूक्ष्मत्वात् सर्वे अतिस्थूलत्वादयोग्या इति भावः, तत्रेति औदारिकशरीरादेरग्रहणयोग्या वर्गणा यतो एकस्मिन्नाकाशप्रदेशे सिद्धानन्तभागमात्रैरपि परमाणुभिर्निष्पन्नैः स्कन्धैरारब्धा ग्रहणयोग्या जघन्यौदारिकवर्गणा भवन्तीति तथा स्कन्धानामपि तत्रैव मानमिति भावः । अभव्यसिद्धानामिति भव्यत्वेन सिद्धा ये न भवन्ति तेऽभव्यसिद्धास्तेषामित्यर्थः । पुद्गलस्कन्धानां हि यथा यथा प्रभूतपरमाणुनिचयः सम्पद्यते तथा तथा सूक्ष्मसूक्ष्मतरः परिणामः सम्पद्यते तत्रौदारिकाग्रहणवर्गणाः औदारिकग्रहणवर्गणाः अग्रहणवर्गणाः 25
वैक्रियग्रहणवर्गणाः अग्रहणवर्गणा आहारकवर्गणा अग्रहणवर्गणा तैजसग्रहणवर्गणाः अग्रहणवर्गणा भाषावर्गणा अग्रहणवर्गणा आनपानवर्गणा अग्रहणवर्गणा मनोवर्गणा अग्रहणवर्गणाः कार्मणग्रहणवर्गणा इत्येवमौदारिकाद्याः कार्मणग्रहणवर्गणान्ता वर्गणाः पूर्वपूर्वस्मादुत्तरोत्तरा सूक्ष्मा विज्ञेया । तत्रौदारिकस्य ग्रहणयोग्याजघन्यायोग्यता वर्गणा स्वल्पपरमाणुनिष्पन्नत्वात् स्थूलपरिणामत्वाच्च तत्सदृशत्वाग्रहणयोग्या औदारिकग्रहणयोग्योत्कृष्टपरमाणूपरिवर्तनी वर्गणा प्रभूतपरमाणुनिष्पन्नत्वात् सूक्ष्मपरिणामत्वाच्च तस्याग्रहणयोग्या एवं वैक्रियादीनामपि विज्ञेया । अनन्तानन्तानीति अनन्ते राशौ 30
भूयोऽनन्तगुणकाद्वेऽप्यनन्तानन्त इति भण्यते । औदारिकजघन्यस्थानादसंख्येयोत्कर्षस्थानत्वाद्...-यस्मादिति परम्परया भवेयुः ... स्थानानि गुणना तत अनन्तगुणिता-मार्गणे विचारणे परम्परोपनिधा

---

१ सि. क. °सूक्ष्मायोग्यत्वात्। २ सि. क. औदारिक। ३ क. श्रेण्यसंख्येयसंख्यतम ।

भाषाप्राणापानमनःकर्मयोग्यानामग्रहणान्तरितानां भाषाप्राणापानमनःकर्मयोग्यानामप्युत्तरोत्तरानन्तगुण[त्व]मानेयम्, अनन्त-
रेषु भाषाणां जघन्योत्कृष्टो विशेषाधिकः सर्वत्र को विशेषः ? तस्यैवानन्तभागः, अग्राह्याणां
जघन्याद्युत्कृष्टोऽनन्तगुणः, को गुणकारः ? सिद्धानामनन्ततमभागः, अभव्येभ्योऽनन्तगुणः एवंविधैः
पुद्गलैः सर्वत्र लोकेऽवगाढनिचिते कर्मतया परिणमनयोग्यान् कायवाङ्मनःकर्मकारणानां त्रयाणां
5 योगानां काययोगेन गृह्णाति, तेनैव कर्मणा शरीरतया परिणमयति, पुनः स्ववीर्येण योग्यानेव
वाङ्मनःप्राणापानतया परिणमय्य काययोगेनैव वाङ्मनःप्राणापानतयाऽवलम्ब्य विसृजति, यथो-
क्तम् 'जोगेहिं तयणुरूवं परिणमयति गेण्हिऊण पञ्च तणू । पाउग्गे वा खंधति भासाणमणत्तणे खंधे ॥'
(कर्मप्र. श्लो. १७) तथा 'मनसा वाचा कायेन वाऽपि युक्तस्य वीर्यपरिणामः । जीवस्यात्मनि
यः प्रभुः स योगसंज्ञो जिनैर्दृष्टः ॥' (तत्त्वार्थटी० अ० ७ पृ० ७०) 'तेजोयोगाद्यग्रहणत्वा-
10 द्विर्येदस्य परिणामः । जीवकरणमयोगे वीर्यमपि तथाऽऽत्मपरिणामः ॥ ( ) इति । किं कारणं ?
तथाविधोपयोगगतेः,—ग्रहणयोग्यपरिणामापन्नपुद्गलग्रहणमग्रहणपरिणतग्रहणयोगपरिणामापत्तेः पुद्गलो
ग्रहः, यथोक्तं 'ऊष्मगुणः सन् दीपः स्नेहं वर्त्या यथा समादत्ते । आदाय शरीरतया परिणमयति
चापि तं स्नेहम् ॥ तद्वद्रागादिगुणः स्वयोगवर्त्याऽऽत्मदीप आदत्ते । स्कन्धानादाय तथा परिणमयति
तांश्च कर्मतया ॥' (तत्त्वार्थटी० अ० ५ पृ० ३४३) 'स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम्
15 वा । रागद्वेषस्नेहाभ्यक्तस्य तथा श्लिष्यति कर्म ॥ ( ) स्पृशति स्पृशतो मृदु वसन् शिवति च
रम्यतः पुंसा । औदारिकोऽपि देहो भाववशात् परिणमत्येवम् ॥' (प्रज्ञा० टी० पृ० ४५५)

एवं विधेरिति इति। पुद्गलैः सर्वो लोकोऽवगाढः आचितः तत्र निचिते व्याप्ते जीवश्च यत्रावगाढस्तत्रैव ये
कर्मयोग्याः पुद्गलास्तान् कर्मतया परिणमय्य आत्मना सह बन्धं याति कर्माणि विविधविशेषाः नैरयिकादयः
जीवतीर्थकरदेवमनुष्यादयः एव योगा पञ्चमे तेषां मध्ये काययोगेन गृह्णाति तैश्च च कर्मणा शरीरतया परिणमयति जीवादि।
20 विशेषमभ्याह—पुनश्च इति । कायादिकरणोपादानमन्ये वीर्यपरिणतिर्भवति तथाविधैव परिणतिः । तत्र ग्रहणाद्य-
दर्शयति जोगेहिं इति योगैर्वाक्कायमनोभिरात्मनः योगानुरूपं पञ्चशरीरानुरूपं वा पुद्गलग्रहणम्, गृह्णाति तदेव हि
परिणामान्तरमापादयति वीर्यं भवति तेन योगेन औदारिकादिशरीरप्रयोग्यान् पुद्गलान् प्रथमतो गृह्णाति गृहीत्वा औदा-
रिकादितया परिणमयति तथा भाषाप्राणापानमनोयोग्यान् पुद्गलान् प्रथमतो गृह्णाति गृहीत्वा च भाषाप्राणापानादितया
परिणमयति परिणमय्य च तन्निमित्तसामर्थ्यविशेषमिच्छते तान् पुद्गलस्कन्धानवलम्बते, ततस्तदवलम्बते वाङ्सामर्थ्य-
25 विशेष तत् विसृजतीत्यर्थः । तथापीह कारिकान्तरं योगत्रयस्वरूपं दर्शयति मनसा वाचेति अत्र
योगस्य मूलभूता वाचा सामान्यस्य तृतीयस्वामिप्रतिपत्त्यनुकूलं दृश्यते 'मनसा वयसा काएण वा वि जुत्तस्स वीरिय
परिणामो । जीवस्स अप्पणिज्जो स जोगसण्णो जिणक्खाओ' ॥ तथा तेजोयोगादित्यपि तत्रैव- तेजो योगेन जहा रत्तत्तं
घडस्स परिणामो । जीवकरणप्पओगे वीरियमवि अप्पपरिणामो ॥' इति । योऽयं वीर्यपरिणामो जीवस्यैवात्मपरिणति-
तेजोयोगादिति यथा घटस्याग्निसंयोगात् तथाविधपरिणतिर्भवति तथा जीवस्य कायादिकरणयोगाद्वीर्यपरिणति-
30 रात्मन एव प्रादुर्भवति न तु अन्यस्येति भावः । अत्र हेतुमाह—तथाविधेति यथा च दीप ऊष्मगुणोपेतः
स्नेहमादाय वर्तिरेव परिणमयति तथा रागादिगुणयोगात् आत्मैव योगवर्त्याऽऽत्मदीपः स्कन्धानादाय कर्मतया
परिणमयति तस्य परिणतिं च सर्वदा ऊष्मगुण इति । यथा च स्नेहाभ्यक्ते वपुषि रजांसि श्लिष्यन्ति तथा रागादि
स्नेहवति च तथा रागादिस्नेहाभ्यक्तस्य कर्माणि शरीरादिपरिणामोऽपूर्वकर्मादेः योगात्तदात्मवशीभवत्यर्थितां याति

१ सि० क्ष० 'ग्रहणानुयोग्यान्। २ सि० क्ष० 'ग्रहणा। ३ जीवप्रयोगजनित इति पाठान्तरम्। ४ सि० क्ष० ग्रहणाति।
५ सि० क्ष० ग्रहण तत्। ६ सि० क्ष० बहुशः। ७ सि० क्ष० 'मयनिरपेक्षत्वम्।

तस्मादात्मा करणयुक्तः कर्मत्वेनादिकरः, तदपि च कर्म आदिकरम्, बाह्यमपि घटादिकं सर्वमादिकरम् ।

(तस्मादिति) तस्मादात्मा करणयुक्तः कर्मत्वेनादिकरः, पूर्ववत् प्रयोजनपरमार्थत्वात् भवितृत्वस्य, क्रियात्मैवाऽऽदिकरः । नेत्युच्यते तदपि च कर्माऽऽदिकरम्– तदपि च ज्ञानावरणादिकर्मग्रहणयोग्यमौदारिकादिशरीरभेदादिविपाकं पुद्गलम्, किं भवति ? नरनारकदेवतिर्यगादिसद्गृहभवनवास्यादिनेकप्रभेदसर्वात्मशरीराणां तत्सम्बद्धात्मनां चाऽऽदिकरं भवति, यथोक्तं 'जीवपरिणामहेउं कम्मत्ता पोग्गला परिणमंति । पोग्गलकम्मणिमित्तं जीवोवि तहेव परिणमइ' ॥ [प्रज्ञा-टी-पृष्ठ. ४५५] इति, न केवलमाध्यात्मिककर्मैवादिकरम्, किं तर्हि ? बाह्यमपि घटादिकं सर्वमादिकरम् ।

विपर्ययेणापि भावयितुकाम आह—

यथा चात्माऽकर्मणां कर्मत्वेनादिकरस्तथा प्राक् पश्चादपि कर्माऽऽदिकरम्, तदादित्वादात्मनः तथाऽभिव्यक्तेस्तत्प्रयुक्तत्वाच्च, आदित्योदयादित्यवत् । तत्प्रयुक्तं कर्म, आत्मैव न कर्मभूता, आदित्योदयादित्यवदित्यत्रोच्यते, को वा ब्रवीति न कर्मभूतोऽसौ, कर्माणि चात्मभूतानि नेति, आत्मापि कर्म भवति, कर्माण्यात्मा भवति तथाविधोपयोगगतेस्तत्प्रयुक्तत्वादित्यादिभिर्हेतुभिः, तस्मात् सर्वसर्वात्मकत्वात् कोऽन्य ईश्वरः, का वाऽन्या प्रकृतिरिति ।

यथा चात्माऽकर्मणामित्यादि पूर्ववत् तचोद्यपरिहारं गतार्थम् यावत् को वा ब्रवीति न कर्मभूतोऽसौ, कर्माणि चात्मभूतानि नेति, तथाविधोपयोगगतेस्तत्प्रयुक्तत्वादिभिर्हेतुभिः, तस्मात् सर्वसर्वात्मकत्वात् कोऽन्य ईश्वरः, का वाऽन्या प्रकृतिरिति ।

इतश्चान्योन्यादिकरता कर्मकर्मिणोः, अचेतनज्ञानावरणकर्मप्रयुक्तत्वादात्मनः ।

(इतश्चेति) इतश्चान्योन्यादिकरता, आदिकरत्वात् कर्मकर्मिणोः सर्वसर्वात्मकत्वेति, कारणमाह–अचेतनज्ञानावरणेत्यादि, अचेतनानि ज्ञानदर्शनावरणवेदनीयमोहायुर्नामगोत्रान्तरायाख्यानि

कारणमाह–देहात्मकत्वेति । तस्मादिति, तथाविधोपयोगप्रयुक्तेः करणात्मककर्मयोगात् पुद्गलानां कर्मत्वेनादिकर इत्यर्थः । तत्रैव कारणमाह–पूर्ववदिति यो हि प्रयोजयति परमार्थेन स कर्ता भविता मुख्यः सर्वकारणत्वात् न प्रयोज्यः कर्ता भविता भवति न आदिकरः न कर्ता मम कर्ता न भवतीति भाव । कर्मणोऽप्यादिकरत्वमाह क्रियात्मैवेति । ज्ञानेति ज्ञानावरणादिकर्मग्रहणयोग्यं पुद्गलमत्र कर्मपदेन ग्राह्यम्, तद् औदारिकादिविपाकशरीराऽऽत्मनामादिकरमेव भवतीति भावः । तद् केषामादिकरमित्यत्राह–नरनारकेति नरादिरूपेणा पद्गले येषु भवनवास्यनेकप्रभेदसर्वात्मशरीरेषु तेषां तथाविधशरीराणां तदैक्यतया तत्सम्बद्धात्मनां चाऽऽदिकरमित्यर्थः । जीवकर्मणोरन्योन्यादिकरत्वे प्रमाणं दर्शयति–जीवपरिणामहेउं इति । न केवलमाध्यात्मिकम् एव कर्मपुद्गलम् आदिकरम् अपि तु बाह्यमपि सर्वमित्याह–न केवलमिति । आत्मकर्मणोरन्योन्यादिकरत्वं साधयति–यथा चेति तदेव कर्मैवादिकरमात्माऽकर्मा तद्गताऽऽदित्यादित्वादात्मनः कर्मैव हि आत्मा भवति अन्यथा तथाभिव्यक्तिर्नैव स्यात् तदसम्भावे आदित्यादिनिदर्शनाभिव्यक्तेस्तत्र एवाविरोध यथाऽऽदिकरतथाऽऽत्मनोऽपि कर्म एवमपि आत्मप्रयुक्तमेव कर्म स्यात् आत्मा कर्मैव इति कथं यदि सर्वात्मकत्वमित्यत्र इत्यत्राह–तत्प्रयुक्तं कर्मेति । कर्मात्मनोरुभयोरप्यन्योऽन्यरूपत्वमाह–को वा ब्रवीतीति । पुनरन्योऽन्यादिकरत्वं साधयति–इतश्चेति ।

---

१ सि क. तदपीत्यर्थं दर्शयति । २ सि. क. °न्योऽन्यादिकारितामिकरत्वात् । ३ सि क °त्वानि, अचेतनानि-ज्ञानावरणेत्यादि ।

गत्यभेदानि कर्माणि पुद्गलात्मकानि दर्शनाद्यन्यात्मनोऽन्तरानन्ततमभागमुपयोगस्यामात्राद्यावृण्वन्ति येन कर्माण्यनावृण्वन्ति न्यक्रियन्निगोदसूक्ष्मापर्याप्तदर्शनम्, कर्मणां क्षयोपशमवैचित्र्यात् । 'सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो णिच्चुग्घाडिओ चिट्ठइ जइ पुण सो वि आवरिज्जा तेण जीवो अजीवत्तं पाविज्जा, सुट्ठु वि मेहसमुदए होइ पभा चंदसूराणं' (नंदी० सू० ४२) तथा 'स्वर्णं रजो

५ [...] मनः करोमि ... इति, तस्मात् कर्मधर्मिणोरन्योन्यापरि-
णामः ... तथापि ... सिद्धम्, सिद्धो कर्म-
धर्मनिर्मुक्त ... अनन्तविज्ञानादिकत्वम् ।

१० नन्वात्मपुद्गलयोरप्यविरचनादेव वा भेदप्रतीतेः स्वरूपनविरोध इत्यत्राह, पाठान्तरेण पुद्गलात् निरुक्तिमहत्त्वप्रदर्शनपरत्वात् । अथैवं नन्वस्य सतो नैरात्म्यात् पश्यत कर्मणा, ततश्च तत्सम्भूतं शुभाशुभं मुच्यते, विमुच्यत्वात्, मुक्तत्वात्, मुक्तो वा भण्यते, तत एव तद्वत् ।

(नन्विति) ... भेदप्रतीतेः ... इत्येतत्, कस्मात् ?
पुद्गलस्य पुद्गलत्वात् ... [पूरणं] ...
१५ ... पुद्गलः पूरणी गल् ... पूरण इति पुद्गलः पुद्गलं
निरुक्तौ ... इति पुद्गलः ... इति निरुक्तिभेदोऽप्यर्थवत्वात् [पुद्गल]

पुद्गलकर्मणोरिन्द्रियस्कन्ध[स्कन्ध]वदेककार्यत्वाददोषः । तथैवं नेष्यते—यथा मयोक्तं कर्मकर्मिणोरन्योन्याधिकरत्वं यदि न स्यात्, ईश्वरवशात् स्वभावादेः प्रकृत्यादेर्वा कुतश्चित् संसारवैचित्र्यं स्यादितीष्यते ततो नैवात्मा बध्येत कर्मणा—संसारबीजभूतेन शुभाशुभेन, ततश्च तत्फलभूतैः शरीरेन्द्रियस्थानविषयैः शुभाशुभैर्न युज्येत, विकर्मत्वान्मुक्तवत्, मुक्तो वा बध्येत, तत एव तद्वत् । स्यान्मतं मुक्तामुक्तविकल्पसम्भव एव परमार्थतः, सृष्टिप्रलयव्यवस्थानादिति, तदपि नोपपद्यते प्रकृतीश्वरादिसृष्टिवशादेव न बध्येत तनुकरणादिभिः, न मुच्येत मुक्तेन च, अमूर्तत्वादाकाशवत्, आकाशं वा बध्येत मुच्येत तनुकरणादिभिः, तत एव त्वदभिमतपुरुष इव, अनिष्टश्चैवमेतदिमव[त्वं] इति ।

किञ्चान्यत्—

यदि स्वदृष्टाभावेऽप्यसावीश्वरः ततस्ते मुक्तानामपि तनुकरणानि भुवनानि च कुर्यात्, ईश्वरत्वात् सर्गादिवत्, प्रलयकालेऽपि सर्वेषां कुर्यात् तत एव तद्वत्, मध्ये वा न कुर्यात्, ईश्वरत्वात् प्रलयकालवत्, अनिष्टं चैतत्, अस्मात् कर्मैक्यात् सर्वसर्वात्मकत्वात् सर्वेश्वरता, अत एव चाद्युत एव सुखादयः, तस्माददृष्टादितः सृष्टिरिति वादान्तरपरिकल्पितं स्वपक्षाऽसदभ्युपगमोऽवश्यम्भावी, तस्मात् सम्भूयकारित्वाचेतनत्वस्थित्वाप्रवृत्तीनामपक्षधर्मता, पक्षत्वात् ।

यदि स्वदृष्टाभावेऽपीत्यादि, मया तावन्नित्यमदृष्टाख्यकर्मत्वापन्नसर्वपुरुषेश्वरत्वमुक्तम्, तस्य तस्य तत्तत्स्वाधिकरत्वात्, तच्च नेदिष्यमाधिकरत्वमिच्छसि ततोऽपि स्वपक्षानुवृत्त्याऽभ्युपगतेऽप्यदृष्टाख्यकर्माभावेऽपि मया दोष उच्यते—असावीश्वरस्ततस्ते मुक्तानामप्यमूर्तत्वादिधर्महेतुकर्मणां तनुकरणानि भुवनानि चासौ कुर्यात्, ईश्वरत्वात्, सर्गादिवत्, तथा प्रलयकालेऽपि सर्वेषां कुर्यात् तत एव तद्वत्, मध्ये वा न कुर्यात्, ईश्वरत्वात्, प्रलयकालवत्, अनिष्टं चैतत्, अस्माच्चानिष्टात् कर्मात्मैक्यात् सर्वसर्वात्मकत्वात् सर्वेश्वरता, अत एव चेत्यादि, कर्मात्मैक्यसर्वेश्वरत्वाभ्यामणुत एव—कर्मत एव सुखादयः, तस्माददृष्टात् सृष्टिः प्रधानात् सृष्टिः पृथगणुभ्योऽदृष्टयोगितेभ्यो वा सृष्टिरिति

तथैव पुद्गलः पुरुषाद्भव्यास्य संस्कारमात्रत्वात्, निर्वर्तिनिमित्तत्वादेव मिथ्यात्वमेवः । अथान्योन्याधिकरत्वं कर्मकर्मिणोरनभ्युपगम्यैवमपरिकल्प्य संसारवैचित्र्याभ्युपगमे कर्मिकर्मणोर्बन्धमोक्षयोरसम्भवप्रसङ्गः—अपीदमिति । अथ कर्मात्मपुरुषाभ्युपगमेनेश्वरस्य सृष्टिसामर्थ्येऽभ्युपगम्यमाने दोषमावर्जयति—यदि स्वेति पूर्वं वोक्तस्य बन्धमोक्षानुपपत्तिश्च ततुश्वरो मुक्तानामपि संसारित्वं संसारिणां मुक्तत्वं कुर्यादित्युक्तम् इति भेदः । अमूर्तेति संसारित्वहेतुभूतानि कर्माणि तेषां न मूर्तानि तेषामिति । अविशेषात्सर्गादिवत् प्रलयकालेऽपि कुतो न करोति, यदि प्रलयकाले न करोति तर्हि मध्यकालेऽपि न कुर्यात् ईश्वरत्वाविशेषात्—तथा प्रलयकालेऽपीति । तस्मात् कर्मैव ईश्वरः तदात्मा जीवोऽपीति सर्वेश्वरत्वाभ्युपगम एव युक्तः—अस्माच्चेति । अथ प्रधानेश्वरत्वस्य भावस्य इत्याह—कर्मात्मैक्येनेति । एवञ्च तनुकरणादीनां कर्मत्वात् सर्वसर्वेश्वरत्वाच्च न सम्भूयकारित्वं कर्मात्मैक्येन द्वितीयाभावात्, केन सह भवन्, अचेतनत्वमपि नास्ति तेषाम् चैतन्यादेव पुरुषात्मकत्वात्पुद्गलादिधर्माणां निरन्तरं प्रवृत्तेश्च न स्थित्यादिरपि परमात्मात्मनः परस्परमप्रत्यनीकतयादिषु

---

१ सि क. मुक्तेनच । २ सि क. वामिमच । ३ सि क. तस्माच्चानि° । ४ सि क. °मप्यमूर्तत्वानिधर्महेतुकर्म-मैर्वा । ५ सि क. मतम ।

तावान्तरपरिकल्पितं नत्वाऽमयुक्तकर्मैकैक्यसर्वसर्वात्मक[त्व]सर्वेश्वरत्वाभ्युपगमोऽस्मदभ्यासी
तस्मात्तपोऽसम्भूयैककार्यकारित्वाचेतनत्वक्षित्यादीनामपक्षधर्मता, एकत्वात्, कस्य द्वितीयस्य केन सह
सम्भूयैककार्यकारिता ? किं तदचेतनं चेतनात् पृथग्भूतं ? तदवस्थमद्रव्यपूरणपालनगमनपुरुषत्वादिधर्मत्वाच
का क्रिया प्रवृत्तिः ? इत्यसिद्धार्थत्वादिविशिष्टचेतनाप्रतिषिद्धत्वं तन्त्वादीनां न साधयितुमलमिति, यदपि
5 विशिष्टोक्तं मिथः प्रत्यनीकसम्भूयैककार्यकारित्वादिति तदसत्त्वं तु पूर्वोक्तमेव, 'मिच्छत्तसो सम्मतं'
इत्यादिगाथया, तस्मात्तेश्वरपूर्विका एषिः, किन्त्वनेकेश्वरपूर्विकेति विशेषः।

एवञ्च कृत्वा कर्मैकान्तवादवोपप्रकाशनमपि कृतं वेदितव्यम्, असम्बद्धत्वात्तस्य,
पुरुषकारं निराकुर्वन्तः कर्म समर्पयन्तस्तत इत्यमाहुः यदि प्रवर्तयितृत्वात् पुरुषकारः कारणं
न कर्मापीति चेत्तत इदमनिष्टं ते प्राप्तम्, तत्कर्तृत्वपुरुषकारैकत्वात्, प्रधानमप्यप्रधानम-
10 मेदमिभाः पुरुषकारा न स्युः ततश्च तत्फलभूताः सम्पदो [illegible] सिद्धयोऽसिद्धयश्च नाना
जातीया न स्युरव्यतिरिक्तकारणत्वात्, तुल्यतन्तुपटवत्।

एवञ्च कृत्वेत्यादि, अनेनैकान्तेश्वरपूर्वक[त्व]वादवोपप्रकाशनेन कर्मैकान्तवाददोषप्रकाशन-
मपि कृतं वेदितव्यम्, असम्बद्धत्वात्तस्य—कर्मैकान्तवादस्य कथं पुनस्ते कर्मैकान्तवादिन आहुः कथं
वा ते असम्बद्धाः इत्यतः तदसम्बद्धार्थत्वात् पुरुषकारं निराकुर्वन्तः कर्म समर्पयन्त एवमाहुरिति
15 तदुपपत्तीर्दर्शयति यथा—यदि प्रवर्तयितृत्वात् पुरुष [कारः] कारणं स्यादिति—पुरुषकार एव कारणं
न कर्मापीति चेन्मन्यसे इत्येकान्तं सूचयति—तत इदमनिष्टं ते प्राप्तं—पुरुषकारकारणैकान्तिनस्ते
प्राप्तम् कथमनिष्ट ? उच्यते प्रधानमप्यप्रधान [मेद] मिभाः सिद्धयोऽसिद्धयो वा नाना न स्युः,
तत्र दृष्टाः न हि दृष्टातिरिक्तमन्यत् प्रमाणमस्ति, कस्मान्नाना न स्युरिति चेदुच्यते—तत्कर्तृत्वैकारे
कत्वात्—आत्मोत्कर्षार्थी पुरुष एव कारणं न कर्मापि कारणमिति पुरुषकारकारणैकान्तवादमाश्रित्ये—
20 पुरुषकारैकत्वं—तत्कर्तृत्वपुरुषकारैकत्वं—तत्कर्तृत्विनः पुरुषस्य क्रिया-कारः तदेकत्वात् प्रधानम
प्यप्रधानमभेदमिभाः- अयाकारपुरुषकारनिष्फलसाफल्या लोकप्रसिद्धाः पुरुषकारा न सिद्ध्यन्ति, एक एवो-

तदर्थं प्रत्येतव्यम्—तस्मात्तपोऽसेति इदम् एककर्तृताः तपस्यात्तामुत्पत्ते विशेषम्। अत्र अविकल्पत्वापेक्षया यथा
न्यमाला भवन्ति, देशतोऽप्यन्यमेवमादे तेषामभवनम्, यथा क्षणभेदे प्रथमक्षणेऽन्यद्रूपं द्वितीयक्षणेऽन्यदिति गृह्यते येन रूपं नाम किञ्चित् स्यात् तदेतस्य भवतः रूपग्रहणाभावसम्बन्धाभावादिसमभवनात्मका रूपादयः स्युः, आदिग्रहणाद् गन्धभेदेनैकगुणद्विगुणत्रिगुणकृष्णादिभेदेनागृह्यमाणस्यादविशिष्टस्य सामान्यस्यैव ग्रहणात्, ततः किं? अभवनात्मकत्वान्निर्वस्तुत्वापत्तिर्वन्ध्यापुत्रवत् ततश्च निर्वस्तुत्वापत्तेरे-तत्प्रतिपत्तव्यं द्रव्यमेव तथा तथा भवनलक्षणं सत्त्वं न रूपादयो नाम केचिदिति, तथा तथेति रूपर- 5
सप्रकारेण भवति श्यामरक्तत्वादितद्भेदप्रकारेण चेति, द्रव्यमेव भव्ये भवति द्रवतीति । कथं पुनरद्र-व्यमभिन्नं सत् रूपादिभेदेन भवतीति चेत् चक्षुरादिप्रत्ययोपयोगापेक्षेन भवति, चक्षुरादिप्रत्यया इति अधिपत्यालम्बनहेतुसमनन्तरप्रत्ययाः, तदपेक्षेन रूपादि भवति ज्ञानापेक्षेन—चक्षूरूपादिप्रत्ययेनेत्यर्थः, यथोक्तं 'रूपालोकमनस्कारचक्षुर्भ्यः सम्प्रवर्तते । विज्ञानं मणिसूर्यांशुगोशकृद्भ्य इवानलः ॥' इति ( ) दृष्टान्तो भागिनेयाद्यपेक्षाविशिष्टैकत्वसत्पुरुषवत्—यथैक एव पुरुषोऽनेकसम्बन्धि- 10
स्त्रीपुरुषापेक्षापेक्षाविशिष्टो भागिनेयो मातुलो भ्राता पतिः पिता देवरः श्वशुरः पुत्रो भ्रातीय इत्यादि-र्भवति देवदत्त एक इत्येव च सत्त्वतया द्रव्यमेकमेव रूपादि भवति चक्षुराद्यपेक्षादिति साधूक्त-मेकमेव सर्वात्मकमिति, एवमुपयोगात्मकस्य पुद्गलस्य रूपादिप्रभेदवत्त्वोक्तम् ।

इदानीमुपयोगस्यापि पौद्गलत्वमुच्यते—

यश्चोपयोगस्तत्त्वं मन्यावि तदपि पुद्गलात्मतत्त्वम् रूपाद्यात्मकत्वात् घटादिवत्, स हि 15
उपयोगलक्षण आत्मा परमाणुद्व्यणुकत्र्यणुकादिषु रूपाद्यात्मकेषु पुद्गलेषूपयुज्यते कृत्स्नो व्याप्रियते, तत्प्रदेशस्यापि रूपाद्यात्मकत्वमात्मनोऽभ्युपगम्यते तदुपयोगात्तत्परिणामात्तदेव तदिति न्यायाच्च, यद्येवं ततोऽसंख्यातप्रदेशोऽपि सर्वात्मना सर्वैः प्रदेशैर्भावे उपयोग यायात्, मृत्पिण्डः शिवकादिभावमिव, उपयोगमगच्छन्ननुपयुज्यमानोऽचेतन एव, यद्यनुपयुक्तघटा-दिवत्, चेतनो ह्युपयोगलक्षणस्तदभावादचेतनः स्यादिति । 20

इति । भवतोऽभवनमाह—तथा क्षणमेव इति । अरूपमाह—तदेवस्येति । भवतोऽभवनमाह—आदिग्रहणादिति । एवं रूपादीनामभवनात्मकत्वेनावस्तुत्वाद्वन्ध्येव स्यादित्यवता एतत् इत्याह—ततश्चेति तथा तथा भवनलक्षणत्वात् भवत न रूपादयो नाम केचित् सन्तीति भावः । अभिन्नं द्रव्यमेव चक्षुर्ग्रहणाभावाय रूपमिति रसनेन्द्रियग्रहणाय रस इति घ्राण-ग्रहणाय गन्ध इति स्पर्शनग्रहणाय स्पर्श इति व्यपदिश्यत इत्याह—चक्षुरादीति । चक्षुरादिप्रत्ययापेक्षेणोपयोगेनेत्यन्य-थापेक्षेण चैतत् । अभिप्रायमाह एतदेवाह—चक्षुरादिप्रत्यया इति, तत्राधिपत्यालम्बनौ प्रत्ययौ अधिपत्यालम्बन 25
[illegible] सर्व एव धर्मा आलम्बनप्रत्ययाः [illegible] एव हेतवो हेतुप्रत्ययाः [illegible] समनन्तरप्रत्यया इति बौद्धदर्शने प्रसिद्धा एते एतेषामपेक्षेण ज्ञानापेक्षेण चाभिन्नं द्रव्यं रूपादिभेदेन भवतीत्यर्थः अत्रैव बौद्धसम्मतिं व्याचष्टे—यथोक्तमिति [illegible] चक्षुर्विज्ञानमुत्पद्यते चक्षुर्निमित्तत्वेन इति बौद्धसिद्धान्तात्, तथापि आधिपत्येन चक्षुषा व्यपदिश्यते चक्षुर्विज्ञानमिति यथाऽग्निः [illegible] सूर्यकान्तमणिसूर्यांशुगोशकृद्भ्यो भवतीति तदर्थः । एकस्यैव 30
द्रव्यस्य निमित्तविशेषयोगेन नानाव्यपदेशभागिति निदर्शयति—भागिनेयादीति । एवं पुद्गलस्योपयोगात्मकत्वमुक्त्वो-पयोगस्यापि पुद्गलात्मत्वमुच्यते—यश्चोपयोगस्तत्त्वमिति [illegible] तत्सम्बन्धी भावः, उपयोगलक्षणो

1 सि क. व्याप्रियते ।
द्वा० न० ३३ (३१)

(यथेति) यथोपयोगलक्षणस्य मत्यादि तदपि पुद्गलात्मतत्त्वमिति पक्षः, कस्मात् ? रूपाद्यात्मकत्वात् घटादिवत्, स ह्युपयोगलक्षण आत्मा परमाणुद्व्यणुकत्र्यणुकादिषु रूपाद्यात्मकेषु पुद्गलेषूपयुज्यते कृत्स्नो व्याप्रियते-सार्वात्म्येन व्याप्त उपयुक्तः समाप्त इत्यर्थः, तेष्वेकस्यापि रूपाद्यात्मकत्वमात्मनोऽभ्युपगम्यते, असंख्यातप्रदेशोऽपि रूपाद्यात्मक एव प्रदेशसंख्येयासंख्येयानन्तप्रदेशपुद्गलवत् तदुपयोगा-

5 त्परिणामाद्वेव तदिति पूर्वोक्तन्यायात्, यथैवं रूपादिमदेकद्व्योपयोगवतस्तस्य मात्रे यातीति ततोऽसंख्यातप्रदेशोऽपि सर्वात्मना सार्वात्म्येन सर्वैः प्रदेशैर्मात्रे द्रव्ये उपयोगमयात्, उपयोगमगच्छन्नुपयुज्यमानोऽचेतन एव, पटाद्युपयुक्तघटादिवत्, व्याप्रियते सर्वत्र्यते, कथं पुनरुपयोगं यायात् ? मृत्पिण्डः शिवकादिभावमिव यथा मृत्पिण्डः कृत्स्नः शिवकादिभावे सार्वात्म्येन व्यापारं गच्छति तैथा यदि न गच्छेदात्मा मात्रे तत्तादात्म्यमप्रतिपद्यमानः सोऽचे[त]न एव स्यात् पटेऽनुपयुज्यमानघटादिव

10 दिति व्यापकं वैधर्म्येण साधर्म्येण च दृष्टान्तौ, चेतनो ह्युपयोगलक्षणत्वमाधारचेतनः स्यादिति, एष दोषो रूपाद्यात्मकत्वाभावे स्वात्मन उपयोगलक्षणस्य, तस्मात् सिद्धं रूपाद्यात्मकत्वमात्मन उपयोगात्मकत्वात्, अतः पुद्गलतत्त्वमेव मत्यादीति साधूक्तम् ।

इत्थमात्मा पुद्गलतत्त्व एव—

आत्मतत्त्वतत्त्वज्ञानावरणाद्युदयप्रवृत्त्यव्यतिरिक्तरूपत्वादात्मा पुद्गलतत्त्व एव तादा-

15 त्म्यप्रतिपत्तेः ।

मात्रे मत्यादि: त च भावरित्यते [illegible] प्रवृत्तव्यवती [illegible] परमाणुद्व्यणुकादिरूपाद्येषु व्याप्रियते व्यप्रियमाणत्वादि [illegible] उपयोगात्मनोरभेदात्मनोऽसंख्यातप्रदेशात्मकत्वेऽपि व्याप्रियते इत्याह-स हीति उपयोगः [illegible] [illegible] अभिमुखता तेन आत्मा [illegible] उपयुक्तोऽनेन आत्मा त [illegible] शीरोदकवत् [illegible] प्रतिपद्यत इति भाव । प्रदेशोति परमनिकृष्टोऽया प्रदेश एकप्रदेशपरमाणोरारभ्य

20 संख्यातासंख्यातानन्तप्रदेशा पुद्गला यथा [illegible] रूपाद्यात्मकाः, न केवलोऽपि प्रदेशो रूपाद्यात्मको भवति तथाऽप्रदेशा अपि सर्वे रूपाद्युपयुक्ताः रूपाद्यात्मका एव शरीरमात्मा च सर्वमयम्, तदसंख्यातमनुपरमार्थत्वात् तदस्वरूपवत् एवं कथं [illegible] एव तत्त्वम्, उपयोगात्मकत्वात् [illegible] पूर्वोक्तन्यायादिति भाव । यदा यात्मा [illegible] व्याप्रियते [illegible] उपयुक्तो भवति तदा सर्वात्मप्रदेश[illegible] तादात्म्येनो-पयुक्त एव यथा मृत्पिण्ड। शिवकादिभावं सर्वात्मनायातीति न तु [illegible], यदि सर्वात्मप्रदेश[illegible] तादात्म्येनो-

25 पयुक्तो न भवेत्तर्हि तत्प्रदेश[illegible] एव स्यात् यथा [illegible] उपयुज्यमानो [illegible] तदुपयोगाभावात् [illegible], तस्मात् [illegible] रूपाद्यात्मक एव [illegible]-यथेवमिति । वैधर्म्य दृष्टान्तमाह-यदेति । साधर्म्यदृष्टान्तमाह-मृत्पिण्ड इति । उपसंहरति-तस्मादिति । [illegible] पुद्गलतत्त्व इति व्याचष्टे-आत्मतत्त्वेति [illegible] [illegible] तानि च [illegible] [illegible] [illegible] [illegible] [illegible]

30 [illegible] परिणामविशेषा आत्मैव [illegible] अन्योन्यानुगतौ [illegible] क्षीरोदकयोरिव तस्मात् [illegible] भावा [illegible] [illegible]

---

१ सि क. [illegible] । २ सि क. [illegible] । ३ सि क. [illegible] । ४ सि. क. [illegible] । ५ सि क. [illegible] । ६ सि क. [illegible] । सि क. यथा । ८ सि क. [illegible] ।

आत्मस्वतत्त्वेत्यादि यावद्ग्राह्यमव्यतिरिक्तरूपत्वात्, आत्मनः स्वतत्त्वमौदयिको भावः, उदयेन भव औदयिकः कस्य कर्मणः? ज्ञानावरणीयादेरष्टविधस्यापि स च तदुदयप्रवृत्तितोऽपृथग्भूतोऽव्यतिरिक्तो भावः स्वतत्त्वमात्मनः तदव्यतिरिक्तरूपश्चात्मा, तस्मादात्मस्वतत्त्वज्ञानावरणाद्युदयभूतस्याव्यतिरिक्तरूपत्वादात्मा पुद्गलात्मस्वतत्त्व एव, तादात्म्यप्रतिपत्तेः रूपाद्यात्मकपरमाण्वा[त्मकता]-विसर्पः ।

आह—

नन्वेवं पुद्गला एवात्मा प्राप्तः, तस्योपयोगात्मनः पुद्गलत्वात्, योऽयं पुद्गलोपयोगः स आत्मोपयोग एव, उपयोगाव्यतिरिक्तरूपादेरभावात्, तस्मात् कुतोऽस्य रूपाद्यात्मकतेति, एतच्च, उपयोगात्मकत्वादेव रूपादीनामप्युक्तवत्, अनेन सर्वमपि सर्वात्मकम्, आत्मपुद्गलयोरितरेतरात्मकत्वात्, एवञ्च कर्मैव कारणं पुरुषकार एव कारणमित्येकान्तमसम्बद्धमिति

नन्वेवमित्यादि यावत् कुतोऽस्य रूपाद्यात्म[क]तेति, ननु भोः! त्वदुक्तेन विधिना एवं नैव पुद्गला एवात्मा प्राप्तः तस्योपयोगात्मनः पुद्गलत्वात्, योऽयं पुद्गलोपयोगो रूपं रस इत्यादिविज्ञानात्मनः स चात्मोपयोग एव, उपयोगाव्यतिरिक्तरूपादेरभावात्, उपयोगस्य रूपाद्यात्मकत्वादुपयोगरूपत्वाच्च रूपादीनां, तस्मात् कुतोऽस्यात्मनो रूपाद्यात्मकतेति प्रस्तुतस्योपयोगस्य मत्यादेः पुद्गलात्मत्वमुपपत्तिः एष विचार इत्यत्रोच्यते एतच्च, उपयोगात्मकत्वादेव रूपादीनामपि, उक्तवत् नै[व यो] यो रूपाद्यात्मनो रूपादीनाञ्चोपयोगात्मकता, यस्मादुपयोगात्मकत्वं रूपादीनामप्यनन्तरमेवोक्तम् तस्माद्रूपादीनामप्युपयोगात्मकत्वादुक्तवत् पुद्गलोऽप्यात्मा, आत्मापि पुद्गल एवेति रूपाद्यात्मकत्वमतो न दोषाय, अनेन सर्वमपीत्यादि यावदितरेतरात्मकत्वात्, एवञ्च कृत्वा पुरुषस्य रूपादिमत्पुद्गलात्मकत्वात् पुद्गलस्यापि उपयोगात्मकपुरुषात्मकत्वात् यदुच्यते कर्मैव कारणं पुरुषकार एव कारणमित्यवधारितम् उभयमप्येकान्तमसम्बद्धं योऽयमित्युभयोः पक्षयोः सदोषोक्तिरेषा ।

इदानीं तु प्रत्येकमयुक्तिसाधनादिक्, कर्मैकान्तवादमयुक्तिदिक् तावत् प्रवर्तयिष्यत्यात् पुरुषस्य कारणमुत्कर्षार्थी, तस्यैवोक्तवत् सर्वत्वात्, असावेव पुरुषः प्राणादिमांश्चेतनः कर्मापि,

---

पुद्गलस्वतत्त्व एव स इति भावः । एवमेव व्याचष्टे आत्मन इति ननु पूर्वमुक्ता सर्वात्मकसर्वात्मना पुद्गलेषु व्यावृत्ते पुद्गलोपयोगमात्मोपयोगमव्यतिरेकात्मन एव तद्रूपाद्यात्मकत्वमात्मनो न भवतीत्याशङ्कते—नन्वेवमिति । प्रकृतेन प्रकारेण तावन्नैव पुद्गलेष्वात्मनो व्यावृत्तत्वेन पुद्गला एवात्मा प्राप्तः ज्ञानावरणपरमाण्वात्मनो योऽयं पुद्गलोपयोगः स आत्मोपयोग एव वस्तुतः यद्यपि रूपादि किञ्चिदुपयोगाव्यतिरिक्तमस्ति रूपादेरुपयोगस्य चान्योऽन्यमेकत्वात्तथा न रूपादेरात्म[illegible] नैरात्म्यतादात्म्यवत्सम्बन्धाद्युपयोगमतत्त्वतः मत्यादेः कथं पुद्गलात्मकतेत्याशङ्कते ननु भो इति । रूपादय उपयोगात्मका एवेति [illegible] उपयोगस्य रूपात्मकत्वात्तथा अपि प्रतिपादितत्वादित्याशयेन—उपयोगात्मकत्वादेवेति । एवमात्मपुद्गलयोः परस्परात्मकत्वादेव सर्वं सर्वात्मकमित्याह—अनेनेति । अथ प्रस्तुतमाह—एवञ्च कृत्वेति । पुरुषस्य [illegible] कर्मैकान्तवादः पुरुषकारैकान्तवादश्च युक्त एवेति [illegible] दोष आपतित इति भावः । सम्प्रति प्रत्येकपक्षस्य निराकरणं मानयति [illegible] इदानीमित्यादि । [illegible] निराकरण-

---

१ सि क. सोऽभ्युपगतो ।

अस्मिन् पक्षे कर्मादिसर्वसर्वत्वात् किं तदन्यत् कर्मेति, तस्यैव कर्मतापि, तस्मादेव पुरुषकाराणां तत्साध्यानाञ्च सिद्धयोऽसिद्धयश्च नाना स्युरेव तत्कर्षपरम्पराया बहुप्रभेदाया अपि आमुक्तेः पुरुषस्यैवाव्यतिरिक्तभिन्नकारणत्वात्, अहिभोगविस्तरणाकुञ्चनवत्, तथाऽनतिरेकातिरेकवत् कर्मापि प्रवर्तयितृ ।

5 (इदानीमिति) इदानीं[तु]प्रत्येकप्रसुप्तिभावनानिष्ठ, युगपत्प्रसुप्तिविशेषणार्थः, युगपत् प्रसुप्तिनिष्ठः प्रत्येकप्रसुप्तिविनिक्षिप्यते कर्मैकमन्यथाप्रसुप्तिनिष्ठ तावत् प्रवर्तयितृत्वात् पुरुषश्च कारणमुत्कर्षोर्मी, अथान्यात् कर्म चेत्येकान्तप्रतिषेधस्य वक्ष्यमाणत्वात् तत्कर्षप्रवर्तवतीसुत्कर्षोर्मी, उत्कर्ष प्[ब]ार्थः सोऽस्यास्तीति 'अर्शआदिभ्योऽच्' (पा० ५ २ १२७ सूत्रे वा०) इति इनिः स चोत्कर्षो बाह्यो धनधान्यमित्रभूम्यादिसम्पत्, आभ्यन्तरस्त्वारोग्यप्रज्ञानादिसम्पत्, तदर्थस्य तदवारम्भोपरमात्, 10 असमिहितार्थोऽर्थीति कस्मात् पुरुषश्च कारणमिति चेदुच्यते तत्स्वैपोत्कर्षवत् सर्वत्वात् प्रीहिरेव व्रीहिः क्रियत इत्यादिभ्यापोत्कर्षवत् असावेव पुरुषः प्राणादिर्माध्येयमः कर्मापि, अपिशब्दान्नोकर्मापि भाषाप्राणभाषामनोद्रव्यादि पुद्गल आध्यात्मिको बाह्योऽपि रूपादिपुद्गलभेदतो यस्मात्तस्मात् स एव प्रवर्तयिता तस्यैव अस्मिन् पक्षे कर्मादिसर्वसर्वत्वात् किं तदन्यत् कर्मेति तस्यैव कर्मतापि अपिशब्दात् पुरुषतापि पुद्गलतापि, तस्मादेव प्रयुक्तं प्रधानमप्रधानमप्रमाः पुरुषकाराणेषाञ्च सिद्धयोऽसिद्धयश्च प्रधानमप्रधानमप्रमा 15 नाना च स्युरिति यदनुक्तमुक्तम्, पुरुषकाराणाञ्च तत्साध्यानाञ्च सिद्धयोऽसिद्धयश्च नाना स्युरेव[1] किं कारणम् ? तत्कर्षपरम्पराया बहुप्रभेदाया आमुक्तेः पुरुषस्यैवाव्यतिरिक्तभिन्नकारणत्वात्-स एवाव्यतिरिक्तो भिन्नश्च कारणं तस्यैव सर्वप्रभेदात्मकत्वात् भिन्नत्वं तेषाञ्च कर्मणां बाह्यरूपादिभेदपुद्गलानां पुरुषोपभोगात्मकत्वादव्यतिरिक्तत्वम्, तस्मात् पुरुष कारणानात्म तत्साध्यसिद्ध्यसिद्धिनानात्वानि च स्युरेव, स चैक एव कारणम् आदेर्व को दृष्टान्तः ? अहिभोगविस्तरणाकुञ्चनवत्, यथाऽहिः स्वस्फटोपसङ्कोच- 20 णलीकरणायुगपद्व्यवस्थायिधर्मैः रूपादिभिर्युगपदवस्थायिभिश्च भिन्नोऽप्यव्यतिरिक्तोऽहित्वसत्ता तैर

आवत्या प्रदर्शिता तत प्रत्येकप्रमितात्मभावना निक्षिप्यते युगपत्तार्थं अवतरति-युगपदिति । कर्मैकमन्यथापरिमाणं तावदाह-कर्मैकमन्येति न कर्मैव कारणं किन्तूत्कर्षोर्मी पुरुषोऽपीति प्रमुखत्वकथनार्थं दर्शयति-अथान्यादिति । कर्म च कारणं प्रत्यक्षेऽनादिपुद्गलमयेति भावः । प्रत्येकप्रसुप्तार्थमर्थयति, अन्यत्वात् अतो चोत्कर्षे आरम्भादिनिर्धनेऽस्य [illegible] पुरुषो न नहि[illegible]-स चोत्कर्ष इति । पुरुषस्योत्कर्षोर्मित्वेन प्रवर्तयितृत्वात् पुद्गल- 25 योरेकैव सर्वपर्यायत्वमन्योऽन्यानुप्रवेशात् प्रवर्तयितृत्वात् पेक्षा कर्मापीत्याह-तस्यैवेति नोकर्मापीति प्रत्येकप्र- [illegible] कर्मापि नोकर्मापीत्यर्थं प्रत्यपादयति-भाषाप्राणेति सर्वसर्वात्मकत्वपक्षे भावना कर्मादिसर्वात्मकत्वात् पुरुषस्य पुद्गलतापीत्याह अस्मिन् पक्ष इति । केवलपुरुषपरिणामवादे कर्मैकमन्यथात्वेन प्रदर्शितं योजयति-तस्मादेवेति पुरुषकारसाध्यासिद्धयोर्भेदव्यवस्थानं पूर्वोक्तम् [illegible] नाप्रोति भावः । पुरुषकाराणाञ्चेति । व्यापारपुरुषकाराणां सेवाकृष्यादीनां तत्साध्यानाञ्च शुभाशुभानां प्रधानप्रधानानां 30 निष्पत्तयो भवन्ति । पुरुषस्य सर्वप्रभेदात्मकत्वात् सर्वप्रभेदानाञ्च पुरुषोपभोग्यत्वादव्यतिरिक्तभेदात्मकः पुरुष एव कारणमिति पर्यवसानं भवेदेव दर्शयति-तत्कर्षपरम्परया इति । अव्यतिरिक्तभिन्नकारणत्वे दृष्टान्तमाह-अहिभोगेति ।

1 सि. क. स्युरेव न स्यु । 2 सि. क. °विस्तरणादिव । 3 क. तत्स्वैपोत्कर्ष ।

व्यतिरिक्तमिश्रकारणत्वात् प्रवर्त्तयिता तथा पाण्यादिसंघातसहवर्त्तिपुरुष उपयोगात्मा गत्याद्युत्क्षेपार्थी तेषु युगपद्भावेषु पुरुष एव सत्त्व इति । तथाऽनतिरेकातिरेकवत् कर्मापि प्रवर्त्तयितृ, यथा पुरुषः पुद्गलस्कन्धकर्मधर्मप्रमेयभिन्नोऽप्यव्यतिरिक्तः प्रवर्त्तयिता तथा कर्मापि तदनतिरिक्तातिरिक्तकारणत्वात् प्रवर्त्तयितृ ।

किञ्च—

चेतनाचेतनपरमार्थत्वाच्च पुरुषस्य, इष्टानिष्टविधिव्याम्रियमाणत्वात्, अथैव नेष्यते 5 तथा ततोऽसौ भवेत् पशुवन्मनुष्यत्वेनापि गम्यागम्यभक्ष्याभक्ष्याद्यविशेषज्ञः तद्वत् पशुरपि वा विशेषज्ञः ।

(चेतनेति) चेतनाचेतनपरमार्थत्वाच्च पुरुषस्येष्टानिष्टविधिं प्रति व्यापारः, स एव हि पुरुषश्चेतनोऽचेतनश्च, कुतः ? इष्टानिष्टविधिव्याम्रियमाणत्वात्—उत्कर्षापकर्षौ इष्टानिष्टौ तयोर्विधिः—तत्प्राप्त्युपायः प्रमादाप्रमादौ च दृश्येते, तस्मादयं पुरुषश्चेतनोऽचेतनश्च, प्रमादाप्रमादयोरिष्टानिष्टविध्योः 10 व्याम्रियमाणत्वात्, अतोऽचेतनकर्मानुभावोपलम्भात् चेतनपुरुषानुभावोपलम्भाच्चेति तद्रूप परमार्थः, तस्माच्च कर्मापि प्रवर्त्तयितृ । अथैवं नेष्यते तथा यदि च पुरुषश्चेतनशक्तिरेव मोच्यते ततोऽसौ भवेत् पशुवन्मनुष्यत्वेनापि गम्यागम्यभक्ष्याभक्ष्याद्यविशेषज्ञः—यथा पशुर्भवत्यचेतनस्तथा मनुष्यस्तैपि भवेत्, स्वकर्मपरवाक्यार्थप्रत्यायनसमर्थशब्दोच्चारणादिविशिष्टश्च मनुष्यस्तद्वत् पशुरपि भवेत् कृम्यादिवन्मनुष्योऽप्यज्ञः स्यात्, मनुष्यवत् कृमिरपि पण्डितः स्यादित्यादि, तस्मात् कथञ्चित् चेतनः 15 पुरुषोऽपि अचेतनः तदोभयमविभक्तमिति भावः ।

एवञ्च कृत्वा तस्यैव सत्त्वविस्तरवदविभक्तात्मकतायां द्विविधः प्रवृत्तिप्रबन्धः फलपरिणामप्रबन्धः प्राग्भवीयकर्मात्मपुरुषकारस्य साध्योऽसाध्यश्च, तीव्रमन्दादिहेतूपसेवनसञ्चितत्वात् साध्यासाध्यव्याधिवत्, चलनीयोऽविचाल्यश्च बद्धाबद्धमूलत्वात् वृक्षद्वयवत्, निकाचितानिकाचितावबद्धत्वात्, भयत्राणाकालकालापवत् । 20

पुरुषस्य कर्मापि व्यतिरिक्तमिश्रकारणत्वात् प्रवर्त्तयितृ यदि कारणभेदापेक्षया पुरुषापेक्षया भिन्नमपि सत् कर्मातीव्यापारवाऽव्यतिरिक्तमतस्तदपि प्रवर्त्तयितृत्याह—तथाऽनतिरेकातिरेकवदिति । अथ चेतनमनुकम्प्येपलम्भात् पुरुषस्य चेतनत्वमचेतनमनुपलम्भेऽचेतनत्वं वास्तविकमतः पुरुषः कर्मापि प्रवर्त्तयितृत्याह—चेतनाचेतनेति प्रमादाप्रमादाविह हेतू व्याम्रियते प्रमादौ यस्मिन्, प्रमादश्च यथाऽप्रमादिस्तो भावः तेन मिथ्यादर्शनमपायमयानि तत्र च प्रवृत्तमोक्षनिवृत्तिविकल्पेन विपरीतज्ञानदर्शनचरणादीनां तत्त्वादर्शनं चलनमचेतनत्वमेवेति तस्याचेतनत्वं परमार्थः अप्रमादस्य तु ज्ञानदर्शनचारित्र 25 तपोपशमादिसम्यग्भावविपरीतज्ञानत्वादस्य चैतन्यं परमार्थं इत्याशयेन हेतुं दर्शयति—इष्टानिष्टेति । शुभगतिस्थानोऽप्रमादः अशुभगतिहेतुश्च प्रमादः एतयोश्च चैतन्याचैतन्यस्वभावत्वं तथाविधकर्मोपलम्भादिति भावः । यदि पुरुषस्य चेतनत्वमेव परमार्थो न त्वचेतनत्वम्, तदा पशुश्चेतनोऽपि सन् भक्ष्याभक्ष्यादिविवेकं न जानाति यथा मनुष्योऽपि जानाति तथा हस्ते—अयोऽथमिति । पशोरिव भयमनोयाभिरेव न भवतोर्मत्रिमभ्यसादरक्तोस्यं चेत् उभेति निर्दिष्टं विचार्य नास्ति तथा मनुष्यस्यापि न जानीति भावः । मनुष्यवदा पशुरपि विशेषज्ञः स्याचेतनत्वादित्याह—तद्वदेति । एवञ्च द्वयं परमार्थं पुरुषस्यैवेत्यत्र 30 इत्याह—तस्मादिति । एवं पुरुषस्याविभक्ततया चेतनाचेतनत्वसमर्थनायां न किञ्चिदनुपपन्नं इत्याशयवति—एवञ्च कृत्वेति । प्रवृत्तिप्रबन्धः फलपरिणामप्रबन्धश्च कर्मात्मपुरुषकारस्य साध्योऽसाध्यश्चेति द्वैविध्यं पुरुषस्य चेतनाचेतनत्वैकस्वभावात्वेन

१ सि क. तथाऽनतिरेकवत् कर्मापि । २ सि क. °विधाम्रियमाणत्वात् ।

(एव कृत्वेति) एवं[च]कृत्वा तस्यैव तत्तदितरपदविभक्त्यात्मकव्यापारभेदमात्रेणैवाङ्गतायां सत्यां द्विविधः प्रवृत्तिप्रबन्धः फलपरिणामप्रबन्धः प्राक्तनीयकर्मोत्थपुरुषकारस्य साध्योऽसाध्यश्च तत्तत्प्रयत्नहेतुभूतोपादानफलपरिणामवैचित्र्यात् तद्दर्शयति–तीव्रमन्दादिहेतूपसेवनसञ्चितत्वादिति[1]–तीव्रयोगपरिणामेन सञ्चितं कर्म तीव्रानुभावं स्थितिप्रदेशबन्धदृढनिकाचितं सुदृढं दुष्करमुपक्रमितुमकृत्य-

5 स्यादसाध्यमवन्ध्यं विपच्यते, मन्देन तु सञ्चितं मन्दानुभावादि शक्यत्वादुपक्रम्यम्, साध्यासाध्यव्याधिवत्–यथा व्याधिर्ज्वरातिसारादिः निदानमन्दतीव्रत्वाभ्यां साध्योऽसाध्यश्च भवति, तथा कर्मोत्थपुरुषकारप्रवृत्तिप्रबन्धः साध्यासाध्यत्वभावव्याख्यानश्च–यत्नीयोऽविषयश्च यत्नावद्मूलत्वात् द्रुमवद्रुमवत्–यथार्द्रस्य साध्यमस्तित्वस्य इतरोऽविषयत्वात् न कल्पयितव्यः प्रथमो यत्नमूलो द्रुमवत्, द्वितीयो दृढतरमूलः, दुःखविशेषेषु सुखविशेषेष्वर्थः, निकाचितानिकाचितभावपरत्वात्–निकाचिताः

10 कर्मभेदास्तीव्रप्रयोगपरिणामेन अनिकाचिता मन्दपरिणामेन किमिव ? अयःशलाकाकलापवत् यथा सूत्रमात्रोपनिबद्धा अयःशलाकाः पक्षतत्काषकरणमात्रप्रयासेन सर्वाः प्रत्यवस्थे प्रतप्तसम्पृक्ताः संपर्कजाते न शक्याः पृथक् कर्तुं तथा कर्मविधिः ।

परिणमनमपि च तस्यापि पूर्वकर्मणः पुरुषकारस्य विषयो न विषयः कश्चित्, अप्राप्तप्राप्तविपरिणामापन्नत्वात् पुष्पगुग्गुलफलवत् यश्च क्रियासहायश्च स फलं प्रयच्छति, क्रियास-

15 हायस्य फलप्रदानमापक्षानपक्षशक्तित्वात्, भारोत्पाटवत् ।

परिणमनमपि चेत्यादि यावत् पुष्पगुग्गुलफलवत्, तस्यापि पूर्वकर्मणस्तीव्रमन्दहेतूपसेवनसञ्चितस्य फलदानमित्थंपुरुषकारस्य [illegible] विषयो न विषयः कश्चिदिति, अप्राप्तप्राप्तविपरिणामापन्नत्वात्–यथार्द्रस्य [illegible] अप्राप्तपरिणामापन्नं पुरुषकारविपरिणम्यं पुरुषकारेण

[illegible] । तत्तत्प्रयत्नेति । [illegible] ।

20 [illegible]–तीव्रमन्दादि । [illegible]

[illegible]

[illegible]

[illegible]

25 [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

30 [illegible] । एवं [illegible]

[illegible] परिणमनमपि चेति [illegible]

[illegible]

[illegible]

1 [illegible]

विपाच्यते—विपक्वमानीयते—उदीरणाकरणेनोदीर्यते, प्राप्तपरिणामावस्थन्तु वैयर्थ्यान्न विपाकीक्रियते—पुरुषकारेण न विपाच्यते—नोदीर्यते, स्वयमेव विपक्वत्वात्, किमिव ? पुष्पतुदरफलवत्—पुष्पतोकं दरफलञ्च यथासंख्यं दृष्टान्तौ—यथा दरफलं स्वयमेव विपच्यमानं न पाच्यते पुरुषकारेण, पुष्पतोकन्तु वृक्षायुर्वेदविधिना विपाच्यते, अथवा पुष्पतोकस्यैवोत्पन्नस्य दर फलस्य भावीति दरफलं तादृक् यस्यैवोत्पन्नमिति तस्यैव भवति, तदुत्पत्तिविरहितस्य न भवतीति, अप्राप्तपाकमपक्वं फलकालादिफलं 5
कोद्रवपलालादिवेष्टितं निधाय वा पार्श्वभूमाग्निभिर्विपाच्यते, नेतरत्स्वयं विनाशीति, अथवा अप्राप्तवि-परिणामावस्थं पुष्पतोकमतिमृदुत्वादुपक्रमेणापि न पाच्यते, पाचनायोग्यत्वात्, कुथ्यति विलीयते वा, दरफलं तु पाचनयोग्यं प्राप्तकालत्वात् पाच्यते, एवञ्च कृत्वा क्रियासहायश्च स फलं प्रयच्छति, सहा-यीभूतायाः क्रियाया अपि तदुत्पत्तिमात्रत्वात्, क्रियासहायस्य पुरुषकारस्य फलप्रदाने सापेक्षानपे-क्षत्वात् भारोत्पाटवत्, यथा भारमुत्पाटयन् कश्चित् पुरुषः स्वयमेवोत्पाटयति कश्चित् पुनः सहा- 10
यापेक्षः, एवं पुरुषकारोऽपि फलप्रदाने सहायां क्रियामपेक्षते कश्चिन्नेति ।

सोपक्रमस्य क्रियापेक्षा न निरुपक्रमस्य, तत्र सोपक्रमस्य कर्मात्मनः पुरुषात्मनैकीभूतस्योदयोपशमक्षयोपशमक्षया अवस्थाः सापेक्षा भवन्ति, मदनफलाग्नमनवत् मलपटलाच्छ-भास्विवत्, दरविध्यातवह्निप्रज्वलनवत्, तृणदाहवच्च ।

(सोपक्रमस्येति) सोपक्रमस्य क्रियापेक्षा न निरुपक्रमस्य, तत्र सोपक्रमस्य कर्मात्मन इत्यादि 15
यावत्तृणदाहवच्चेति, तस्यैव सहैकीभूतस्यात्मनश्चेतनाचेतनस्येन पुरुषात्मनेमा इमा सापेक्षा उदयोपश-मक्षयोपशमक्षयानवस्था विशेषेण दर्शयति सोदाहरणाः ।

एवमनयैव दिशा पुरुषकारैकान्तवादः प्रतिषेध्य[1] तद्यथा—कर्म च कारणं प्रवर्तयितृत्वात् सुखदुःखोत्कर्षापकर्षविकल्पानुभवावश्यंभावितस्य नैकस्यैवोक्तवत् सर्वोपयोगत्वात् पुरुषस्यापी-त्यादि सर्वमदोषं योजनीयम्, अनेकस्य स्वातन्त्र्यं तत्तत्प्रदर्शितवत्त्वस्येतरस्यापीति भावनीयम्, 20

मानीयते [illegible] कर्मदलिकानां प्रचारः [illegible] वा योगविशेषेण वीर्यविशेषेण [illegible] [illegible] स्वयमेवोदीर्यते प्राप्तपरिणामावस्थन्तु नोदीर्यते वैयर्थ्यात्, अत एवोक्तं [illegible] भावः । दृष्टान्तमाह—पुष्पतुदिरेति पुष्पमित्थं दरफलं नालिकेरादिफलम् [illegible] । एवञ्च पुरुषकारः क्रियासहायः कर्म तथापि पुरुषस्य [illegible] एवं सहायापेक्ष [illegible] निरपेक्ष [illegible] भारोत्पाटने पुरुषस्य [illegible] [illegible]—एवञ्च कृत्वेति । सोपक्रमस्येति अत्र मूलं सम्पादनयैवोद्धृतं [illegible] विज्ञायते । पुरुषकर्मैकता- 25
[illegible] अवस्थाः सम्भवन्ति [illegible] यथा मदनफलस्य [illegible] पित्तस्य [illegible] भवति कर्मणोऽनुदयस्य उपशमः [illegible], [illegible] दरविध्यातवह्निज्वालनवत्, कर्मणामशेषं विनाश [illegible] यथा तृणदाहः यथा परितोऽपि पुञ्जिताः [illegible] यदा तु विरलिताः [illegible] तदा कर्मणोऽप्यनुभव यदा कर्म [illegible] भवति [illegible] विरल [illegible] 30
[illegible] इति पुरुषकारस्यापेक्षत्वात् कर्मैकान्तवादः प्रतिक्षिप्तः । अथ पुरुषकारस्य एकान्तेन कारणत्वं प्रतिक्षेप्तुमाह—एवमनयैव दिशेति कर्मैकान्तवादप्रतिक्षेपदिशा । विपर्ययं दर्शयति—तद्यथेति ।

---

१ सि क. °वैयर्थ्यान्न । २ सि क. कर्मात्मन ।

यथा चात्र तत्त्वं कर्मात्मनोः सर्वप्रभेदेषु वृत्तं भावितमस्माभिस्तथाऽवगाहादिलक्षणैरस्तिकायैः सह, कर्मात्मविचारोत्थात् प्रवर्तकप्रवर्त्यैन्यायात् ।

एवमनयेत्यादि यावद्भावनीयमिति, एवं तावद् द्व्यात्मकतयाऽऽत्मकर्मणोरन्वयात्मसुप्रसिद्धिरिति प्रदर्शिता, अनयैव दिशा अनयैव पुरुषकार इत्यादयोऽभ्यायेन तदेव वस्तु कर्म संज्ञामात्रेण भावयित्वा
5 पुरुषकारैकान्तवादः प्रतिषेध्यः, तद्यथा—कर्म च कारणं प्रवर्तयितृत्वात् सुखदुःखोत्कर्षापकर्षविकल्पानुभवनादर्थमाचितमेकस्यैवोभयत् सर्वोपयोगत्वात्, पुरुषतापीश्वरादि सर्वमक्षेपं योजनीयम्, यत् परे नाभ्युपगतमन्यतरविरतं तदितरस्मिन्नापादयम्, तत आह—अत्रैकस्य सार्वात्म्यं तदन्यसर्वविषयत्वेतरत्रापि भावनीयमिति भावमोपायं प्रदर्शयति सामान्येन, तथा विशेषेण भावितमेवास्माभिरिति, न केवलं कर्मात्मनोरेवाभिमतैक्यम, किं तर्हि ? यथा चात्र तत्त्वं कर्मात्मनोः सर्वप्रभेदेषु वृत्त भावितमस्माभि-
10 तथाऽवगाहादिलक्षणैरस्तिकायैः—अवगाहगतिस्थितिलक्षणैराकाशधर्माधर्मास्तिकायैः सह कर्मात्मविचारोत्थात् प्रवर्तकप्रवर्त्यैन्यायात् भावनीयमिति वर्तते, यथा प्रवर्तक एव प्रवर्त्यं इत्युक्तं तथाऽवगाहादि प्रवर्तकं प्रवर्त्यञ्चोभयमेकमेव कर्मात्मवदिति ।

पुनरपि तत्साधनार्थमाह—

तद्रूप्यत्वात्, पृथिव्यादिप्रीत्यादिपृथिव्यादिवत्, तद्रूप्यत्वमसिद्धमिति चेन्न, अवगाह-
15 देव द्रव्यं यथा वियदादि एवमात्मादयोऽपि, तस्यैव तथाभूतेः, तदकादिप्रीतिविशिष्टवद्विवटत्ववत् ।

ननु पुरुषकारस्यैव कारणत्वे [illegible] न [illegible] कर्मैवेति [illegible] कारणं कर्मैव पुरुषकारस्यापि [illegible] भवतीति । प्रतिषेधोपायं दिशा दर्शयति—तद्यथेति । कर्म कारणं प्रवर्तयितृत्वादिति कर्मैकान्तिकवचनं [illegible] च कारणं प्रवर्तयितृत्वादिति विशेष्यं [illegible] पुरुषस्य [illegible]
20 [illegible] माहुत्वादिभावेन [illegible] च [illegible] तदैवेदं [illegible] तदेव [illegible] भाव । यद्यपि [illegible] प्रकार—अत्रैकस्येति [illegible] पुरुषकारस्यापि [illegible] तथा पुरुषकारस्य [illegible] भाव । यथा च कर्मात्मनोरभेदः [illegible] भावनीयमित्यत्र—न केवलमिति । अवगाहादिलक्षणैरिति [illegible]
25 [illegible] धर्माधर्मपुद्गल[illegible] [illegible] । पठितता नये [illegible] धर्माधर्मौ [illegible] प्रतिपादयति [illegible] । यथा च [illegible] तथाऽऽत्मा[illegible] भावनीयमिति दर्शयति—यथा प्रवर्तक एवेति तथा [illegible] अवगाहादि धर्माधर्मौ [illegible] तथा[illegible]
30 [illegible] एव [illegible] एवं [illegible] भावनीयमिति भावः । [illegible] तद्रूप्यत्वादिति तथा [illegible] एवं हि [illegible] पृथिव्यादि [illegible] भावः । तदेवाह

1 सि क. भावनीयमिति ।

(तद्रूपत्वादिति) तद्भव्यत्वात्—यद्द्रव्यं तत्तथा यथा प्राग्भावित पृथिव्यादिव्रीह्यादि पृथिव्यादिवत्, तद्भव्यत्वमसिद्धमिति चेन्नेत्युच्यते, अवगाहादेव द्रव्य यथा वियदादि एवमात्मादयपि, यथाऽवगाहोपकारगुणमाकाशं गतिस्थित्युपकारगुणौ धर्माधर्मावेवमात्मपरमाण्वादिद्रव्यमपि, कुतो हेतोः ? तस्यैव तथाभूतेः—तदेव ह्यात्मपुद्गलद्रव्यं तथा तथाऽवगाह[गति]स्थितिरूपेण भवति, किमिव ? यत्कादिव्रीहिस्थासशिवकादिघटत्ववत्—यथोदकपृथिव्याकाशवातबीजाङ्कुरादय एव व्रीहीभवन्ति युगपद्भाविनो भावाः, यथा च क्रमभाविनः शिवकस्थासककुशूलकादय एव घटीभवन्ति तथाऽऽत्माद्यवगाहादि, अवगाहादि वियदादि, वियदादि अवगाहादि, अवगाहादि आत्मादि च भवतीति तस्य तस्य तद्भव्यत्वं तद्भव्यत्वात् प्रवर्तकप्रवर्त्यैक्यन्यायोऽयमितः, तस्मादात्मपुद्गलाकाशधर्माधर्मास्तिकाया एवं तत्त्वं सर्वमभेदवृत्तमिति ।

किञ्चान्यत्—

अविभक्तावगाहस्यात्मादेरविभक्तमवगाह्यमप्याकाशमित्येकमेवेदं भवनम्, तत्पुनरन्यथा मिथ्याग्रहोत्पादितनानाप्रभेदं विकल्पितम्, तान् प्रति सर्वगतेतराभिमतद्रव्यस्वरूपमुत्क्षेपणादि, तदव्यतिरिक्तत्वात्, घटपटभवनवत्, यथा घट एव घटभवनं न ततोऽन्यत् ततस्तदव्यतिरिक्तम्, यद्यन्यत् स्यात् घटो न भवेत् भवनादन्यत्वात्, खपुष्पवत्, भवनं वा तस्य न स्यात् ततोऽन्यत्वात् पटभवनवदिति ।

अविभक्तेत्यादि यावदेकमेवेदं भवनम्, अवगाहोऽवगाहमानादात्मादेरविभक्तः, अवगाह्य-

---

यद्द्रव्यमिति । यथा व्रीहिः पृथिव्यादिद्रव्यं तथाऽवगाहो धर्मादिद्रव्यमात्मस्वरूपमेवमाकाशादि अवगाहादितो द्रव्यं भवति तत्स्वरूपस्यापरित्यागात्—अवगाहादेवेति । अवगाहो हि स्वरूपमाकाशस्य तथात्वेन तदनन्यत्वात् स्वस्वरूपपरिणतित्वात् तत्स्वमेव परिणामकादितो धर्माधर्मौ एवमात्मपरमाण्वादितोऽपि अवगाहोऽनुप्रवेशो नाम संयोगविशेषः गति स्थिति परिणामविशेषौ एतौ जीवपुद्गलयोः परिणामपरिणामिनोरैक्यात्तद्रूपत्वेन तयोरुपकारका आकाशधर्माधर्माः स्वपरयोरुपकारकत्वैक्यात् जीवपुद्गलयोरपि आकाशादित्वता तथा च जीवपुद्गलौ अवगाहकत्वौ अवगाह्यात्मकत्वस्य इति तेषामेकद्रव्यत्वमिति भावः । एतत्स्य हेतुप्रदर्शनाय—तस्यैव तथाभूतेरिति तस्यैव जीवादेरवगाहादिरूपेण भवनात्, तत्र आकाशादिरूपतादिति भावः । दृष्टान्तमाह—यत्कादीति । यत्कपृथिव्यादिभिरूपेण भवनादिति युगपद्भाविनामङ्कुरकपृथिव्यादीनां तथाभवने दृष्टान्तता शिवकादेरैकत्वमिति अनुपपन्नानां शिवकस्थासकादीनां तथाभवने दृष्टान्तेति दर्शयति—यथोदकेति । आत्मादेरवगाहकस्य अवगाहादिरूपत्वस्य, पुनः आकाशादेरवगाहादिरूपः अवगाहादिरात्मादिरूप इति तस्य तस्य तद्भव्यत्वमित्यन्योन्यभव्यत्वमिति दर्शयति—आत्मादयपीति आदिना पुद्गलधर्माधर्मौ अवगाहादिशब्दादिना गतिस्थिती विवक्षिते आदिना धर्माधर्मौ ग्राह्यौ । एवमात्मपुद्गलाकाशधर्माधर्माः सर्वमभेदेन वृत्तमेकं तत्त्वमिति दर्शयति-तस्मादेवेति । अथ अविभक्तविभक्तस्य अविभक्त एव भवनस्वरूपमस्तं पारमार्थिकं भवतीत्याह दर्शयति—अविभक्तेति । तदेव दर्शयति—अवगाह इति आत्मादीनां अवगाहो भवति अवगाहमानादेरात्मादेः परिणामः परिणामपरिणामिनोरभेदात् आत्मादेरवगाहस्याविभक्तता अवगाह्यमवगम्यत्वाऽऽकाशस्य भवनता योगोपकारकयोरभेदादवगाहावगाह्यमविभक्तता एवमात्मपुद्गलधर्माधर्माणां द्रव्यता भवनरूपस्य अविशिष्टत्वेन प्रतिविशेषेण न भवति [illegible] द्रव्यमेवेदं, [illegible] तदात्मनैकत्वम्, यथा द्रव्यमेव हि रूपादितया [illegible] इति न [illegible] द्रव्यार्थनयाभि

१ भि क. °गुर्वैर् । २ सि क. °धात्मादेर ।

भव्याकाशमवगाह्यमर्मस्य सलिलस्य पृथगसिद्धेरवगाह्यकाशविभक्तम्, द्रव्यार्थविवक्षायां पर्यायवक्तव्यतया
तथापेक्ष्यमेवेदं भवनमिति साधूक्तम् तत्पुनरन्यत्र प्रतिवादिमते मिथ्याग्रहोऽव्यापित्वेत्यादि यावत् सर्व-
गतेतरादिभिन्नद्रव्यमिति, कार्यद्रव्यं पटादि कारणद्रव्यात्तन्त्वादेरन्यत्, तन्त्वादि च कार्यादन्यत्, एवं
गुणाः पटरूपत्वादयः पटात् कारणकार्याभ्यां परस्परतश्च कर्मोत्क्षेपणादिभिन्नाः द्रव्यसमवेताः
5 सर्वगतासर्वगतद्रव्याणि गुणेभ्यः परस्परतश्च, द्रव्यगुणकर्मभ्यः, परस्परतश्चान्ये सामान्यविशेषसमवा-
या इतीदमभेदं तदेवासद्युक्तं भवन मिथ्याग्रहोऽव्यापित्व केचित्, येषामेवं विकल्पितं तान् प्रति सर्वगते-
तरादिभिन्नद्रव्यस्वरूपमुत्क्षेपणादि आदिमत्त्वादपरत्वादिगुणाः सामान्यविशेषसमवायाश्च, तत्
सर्वगतासर्वगतद्रव्यस्वरूपमात्रमिति प्रतिज्ञार्थः, तदव्यतिरिक्तत्वादिति हेतुः, अनन्यत्वोपपत्तिभिश्च च
तदव्यतिरिक्तत्वं सिद्धम्, तत्स्वरूपमात्रं तदव्यतिरिक्तमनयोः कोऽर्थभेद इति चेत् न कश्चिदेतदवबोधनेन,
10 अपरस्तु द्रव्यगुणादिभेदमिच्छतीति तन्मतापेक्षयैतदुक्तम्, दृष्टान्तो पटपटभवनवत् यथा पट एव भ-
वनं न ततोऽन्यत् तदतदव्यतिरिक्तम्, यद्यन्यत् स्यात् पटो न भवेद्भवनादन्यत्वात्—भवनव्यति-
रिक्तत्वात्, खपुष्पवत्, भवनं वा तस्य न स्यात् ततोऽन्यत्वात् पटभवनवदित्यतो पटमात्रं पट-
भवनं तदव्यतिरिक्तं च एव सर्वगतेतरद्रव्यमात्रमुत्क्षेपणादीति ।

एवं यथिक्रियापि कथिद्भवनतिरूयस्वद्रव्यस्वरूपा उत्क्षेपणादिवदेव पृथिव्यादिकादपि
15 द्रव्यमात्रं भवनमेव, स च भावः पुरुषादिनियतचेतनाचेतनविकल्पद्वैतविशेषणविनिर्मुक्त
सर्वात्मकः यथा यथापि पटो भवति शीतीभवदुदकं मनुष्यो नभो धर्माधर्मादि वा पटोऽपि पटो
शीतिरुदकादीत्यविशेषेण सर्वं भवत्येवैकम् ।

एवं यथिक्रियापीत्यादि काष्ठादिपृथिव्यादिशतस्य प्रतिनियता यथिक्रियाया दृष्टिः पूर्वोक्त-

प्रतीत्यर्थं प्रश्नस्य प्रतिवाक्यमिदमाह—द्रव्यार्थविवक्षायामिति । [illegible]
20 मिथ्यामतीभिरेकान्तेन द्रव्यगुणक्रियाधाराभावाः कार्यकारणानां परस्परतो द्रव्याणां गुणानां कर्मणां चान्यत्वोऽभ्युपगमाः
तान् प्रति [illegible]—तत्पुनरन्यत्रेति । येषां मतं केवलं मिथ्याग्रहत्वेनेष्टं न तु प्रमा-
णत्वेनेति एतदपि मिथ्याग्रहोऽव्यापित्व इति । अन्यत्वेन दर्शयति—कार्यद्रव्यमिति । [illegible]
प्रतिज्ञामाहेत्यर्थः—तान् प्रतीति । [illegible]
[illegible] नास्तित्व हेतोरित्याह भवनत्वेति । ननु [illegible]
25 येन इत्याह—तत्स्वरूपमात्रमिति । [illegible]
पुरुषादीति [illegible] चेतावति भाव । [illegible]
[illegible]
[illegible] न स्यात् भवनमेव [illegible]
[illegible]—यथा पट एवेति । दृष्टान्ते [illegible]—यद्यन्यदिति । [illegible]
30 [illegible]—एवं यथिक्रियापीति । [illegible]
काष्ठादीति । [illegible]

१ सि [illegible] । क. [illegible] । २ सि
क. तथा ।

सर्वपरिणत्याऽव्यति[रिक्त]रूपत्वाद्भ्योऽन्यस्वरूपापत्तेश्च तेषामैक्यापत्तिश्च, अनतिक्रान्त द्रव्यस्य स्वरूप देशे काले वा यया पचिक्रियया सा कश्चिद्भ्यनतिक्रान्तद्रव्यस्वरूपा सा चोत्क्षेपणादिवदेव द्रविडया दिकाद्यादिद्रव्यमात्र भवनमेव, भवन भावोऽस्तित्वमिति पर्यायाः, तच्च भवनं येद्दशो भवति स च स्वभावो न ततोऽन्यः 'स्वभावसम्बन्धार्थस्तु पञ्चपदेशः कल्पयत्यचेतस' ? इति वचनात् (　　　　)
स्वार्थाभिधायिन्येवाभेदे कर्तृलक्षणा षष्ठी द्रव्यस्य भवन द्रव्यमेव भवतीति, स च भावः पुरुषादिभिर्ये- 5
दचेतनाचेतनविकल्पद्वैतविशेषणविनिर्मुक्तः—पुरुष एवेद नियतिरेव काल एवेत्यादि चेतनमचेतनं भवती त्यनेन विकल्पेन द्वैतमिदं मनुष्यादि घटादि चेति विशिष्यते, पत्पुरुषादिवादे आत्मस्वभावस्वाभेदेन क्रमयौगपद्यादिभेदेन वा, तेन विशेषणेन विनिर्मुक्तः स भावो निर्विशेषण एव सर्वात्मकः, यथा घटादि घटो भवति व्रीहिरङ्कुरो मनुष्यो नैमो धर्माधर्माविति, घटोऽपि व्रीह्यङ्कुरादि इत्यादिविशेषेण सर्वं भवत्येवैकैकमिति । 10

तदेव हि भवन यत्सर्वात्मकमसङ्ख्याव्यापकरूपम् न ह्यसम्भाव्य किञ्चिदस्ति, अनेन हि प्रवर्तयितृत्वात् सर्वप्रभेदेन भूयते न न भूयतेऽपि सदात्मानतिरिक्तत्वात्, बालकुमारादिवत्, अन्यथाऽभावत्वापत्तेः ।

(तदेवेति) तदेव हि भवन यत्सर्वात्मकमसङ्ख्याव्यापकरूपम्, न ह्यसम्भाव्य किञ्चिदस्ति, किं कारणं ? यस्मादनेन प्रवर्तयितृत्वात् सर्वप्रभेदेन—व्रीह्यङ्कुरकाण्डशाखादिना भूयते न न भूयतेऽपीति—द्विः प्रतिषेधा- 15 त्प्रकृतमेवानवगत्या व्यावृत्त्या नियम्यते भवत्येव न च न भवतीति, केन पुनर्न भवति असावेव—भावभावा- दिना ?, अस्मिन् हि नये न केनचित्प्रकारेण किञ्चिन्न भवतीति प्रागुक्तसर्वसाम्योऽन्यात्मत्वाभावः सर्वस्यैव, कुतः? सदात्मानतिरिक्तत्वात्—स स आत्मा सदात्मा तस्यात्मा तदात्मा ततोऽनतिरिक्तत्वात्, यथा यदात्मानतिरिक्त तस्य तस्य भागभावाभावेनात्मात्मना भवत्येवेत्यर्थः, किमिव ? बालकुमारादिवत् ।

यथा भिन्नेऽपीति एतत् यथा चक्षुर्मस्तकादिविषयतमाभावे तदेव द्रव्यं रूपादिव्यपदेशमासादयति तथा कर्मापि क्रियाप्रयोगपाधिकं 20 द्रव्यपरिणामो द्रव्यादव्यतिरिक्तं, द्रव्यस्य भवनत्वात् स्वपर्यायपरिणतेर्मन्यत्वात् तथा च द्रव्यं भवनलक्षणम्, द्रव्यं भवनं मूर्तिमान् पर्यायिपर्यायत्वादिति भावः । मयूराण्डकरसवदविभक्तसर्वभेदं देशकालापेक्षभेदत्वं भवनमेव द्रव्यस्य स्वभावः न तु द्रव्यभवनयोः कश्चिद्भेदोऽस्ति द्रव्यस्य भवनमिति षष्ठ्यपि स्वभावस्वभाववत्सम्बन्धार्थैवेत्याशयेनाह तच्च भवनमिति । अयं भाव पुरुष एवेति नियतिरेवेति काल एवेति चेतनस्याचेतनस्य वा व्यावर्तनेन विशेषणेन विनिर्मुक्त पुरुष एव भवती- त्युक्ते हि अचेतनस्य व्यावृत्तिः स्यात् नियतिरेव काल एवेत्युक्ते च चेतनस्य व्यावृत्तिः स्यात् भाव एवेत्युक्ते तु न चेतनस्या- 25 चेतनस्य वा व्यावृत्तिरित्याशयेनाह—स च भाव इति । तथा च भाव एव प्रत्येकं सर्वात्मको भवतीत्याह—यथेति । तदिदं भवनन्तु व्यापकलक्षणम् भवनस्य सर्वात्मकतया तत एव प्रवर्तयितृत्वात् न हीदं किञ्चिदपूर्वं भवति येनाप्रयाम किञ्चिद्भवेदि- त्याह—तदेव हीति । भवनमिदं व्रीह्यादिरूपेण भवति न पुनरतिरिक्तेन भावाभावादिना भवनस्य पर्यायत्वात्, सर्वेषां हि भवनमेवात्मा अत एव प्रतिषेधद्वयोऽभावे भावस्यैवेत्याशयेनाह—केन पुनरिति । प्रथमाभावादीनां वस्तुनतिरिक्तत्वेन तथाऽ त्मना भवनमेव प्रथमाभावादिना भवनमित्याशयेनाह—सदात्मेति प्रथमाभावादिकस्यानतिरिक्तत्वात्प्रागभाव प्रध्वंसाभावेऽभावस्य 30 वानतिरिक्तत्वादित्यर्थः तथानतिरिक्तेन प्रथमाभावादिरूपेणात्मना वस्तु न भवतीति भावः । दृष्टान्तमाह—बालकुमारादिव दिति कुमारादीनां भावकाले हि देवदत्त कुमारादिभावोत्पादात् प्रागकुमारादेरभावः देवदत्त एवनाविर्भूतकुमारादिरूपः

१ सि क तद्दशो न भवति । २ सि °नियम । ३ सि क. यद्धे । ४ सि क. °भावा न स ।

यथा बालः कुमारो युवा मध्यमः स्थविरो चेति देवदत्त एव तेन तेन प्रकारेण भवति, बालकाले कौमाराभावेन कौमारे बालाभावेन यौवनाद्यन्योऽन्याभावेन खरविषाणात्यन्ताभावेन च एवं सर्वदा सर्वत्र सर्वथा च भवति स एव देवदत्तव्यपदेशभाक् तथा सर्वद्रव्यभवनमित्यभूत्वा न भवति भूत्वा च भवतीति मृत्पिण्डकाले न न भवति घट[स्त]दव्यतिरिक्तात्मकत्वात्, देवदत्तबालकुमारादिवत्, कपालकाले[न] न भवति घटः तदव्यतिरिक्तात्मकत्वात्, देवदत्तबालकुमारादिवत्, कस्मात्? अन्यथाऽभावत्वापत्तेः,—असत्त्वापत्तेः ।

यद्येवं नेष्यते त्वया प्रागभावादिनापि भवत्येवेति, ततस्तस्य देवदत्तस्य बालकुमारादि सर्वावस्थात्मपरित्यागे किं तद्देवदत्ताख्यं वस्तु? व्यस्तास्तदव्यतिरिक्ता बालाद्यवस्थाः? इत्यभाव आपद्यते ।

(यद्येवमिति) यद्येव नेष्यते त्वया प्रागभावादिनापि भवत्येवेति, ततस्तस्य देवदत्तादेर्वस्तुनो बालकुमारादिसर्वावस्थात्मपरित्यागे किं तद्देवदत्ताख्यं वस्तु? तदव्यतिरिक्ता बालाद्यवस्था इत्यभाव आपद्यते, न संभवन्त्यः परस्परसम्बन्धाभावात् वन्ध्यापुत्रवत्, नास्त्यवस्थावत् अवस्थाव्यतिरेकेणानवधारणात् वन्ध्यापुत्रवत् ।

अत्राह—

न चेतनोऽचेतन इति नञा प्रतिषेधवाचिना सम्बन्धादचेतनरूपेण चेतनस्य भावाभावात्मभाव इत्यत्र ब्रूमः, अचेतन इति चेतनादन्य आत्मैवोक्तः स्पर्शास्पर्शादिधर्मकस्तस्यैवोपयोगाद्यस्पर्शरूपादन्येन रूपेण स एव स्पर्शादिमान् ज्ञानावरणादिकर्मरूप आत्मा ।

(नेति) न चेतनोऽचेतन इति नञा प्रतिषेधवाचिना सम्बन्धादचेतनरूपेण चेतनस्य भावाभावा[द]भाव इत्यत्र ब्रूमः अचेतन इति चेतनादन्य आत्मैवोक्तः, पर्युदासवाचित्वान्नञः, नास्त्या-

चैतन्याद्यवस्थान्तरगमनेन पूर्वावस्थातिरोभूतं पूर्वावस्थाविनाश उच्यते न हि किंचित्तत्र निरन्वयमभावीभूतम् [illegible] परस्परेतरेतरात्मकत्वमन्योन्याभावः [illegible] देवदत्त एव [illegible] इति [illegible] देवदत्तो भवत्येव तथा भवन्नपि नहि भवनमभूत्वा भवति भूत्वा वा विनश्यति [illegible] इत्येवं [illegible] पुनर्भवनम् [illegible] अन्यथा ते भावा न भवेयुः [illegible] इष्यते अन्यथा त्वभावापत्तिरिति । [illegible]—यद्येवमिति [illegible] प्रागभावादिनापि देवदत्तादे[illegible] किं वस्तु स्यात् [illegible]—यद्येवं नेष्यत इति । [illegible] प्रागभावादिनापि देवदत्तो भवत्येवेति यदि नेष्यत इति भावः । ननु न चेतनोऽचेतन इति [illegible]—न चेतन इति, [illegible] भावः । [illegible]—अचेतन इति । [illegible]

१ गि० क० भूत्वा भवत्यभूत्वा च भवतीति ।

मावबाधित्वात्, स कोऽन्यश्चेतनात्, अन्य आत्मैवेति चेदुच्यते स्पर्शास्पर्शादिधर्मणः तस्यैवोपयोगाय स्पर्शरूपादन्येन रूपेण स एव स्पर्शादिमान् ज्ञानावरणादिकर्मरूप आत्मा, तेन चेतनादन्येनाचेतन इति चेतन एवोक्तः ।

न तु भवन्मतात्यन्तचेतनाभावरूपेण चेतनो न भवत्यचेतन इति चेतना न भवत्यचेतनेति ज्ञानादि न भवतीत्यज्ञानादि चोच्यते किन्तु चेतनाया अन्याऽचेतना स्पर्शादि, ज्ञाना 5 देरन्यदज्ञानादीति, प्रसज्यप्रतिषेधस्तु नेष्यते यथा चेतनो न भवत्यचेतन इत्यादिरिष्यते त्वया ततस्तथा सर्वतो व्यावृत्तेश्चेतनाचेतनयोर्व्यावृत्तिः स्यात्, निर्विशेषव्यावृत्त्यर्थत्वात्प्रसज्यः स्वतोऽपि व्यावृत्तेः खपुष्पवदसत्त्वादन्यस्याश्च सत्यमेव चेतना ।

(न त्विति) न तु भवन्मतात्यन्तचेतनाभावरूपेण प्रसज्यप्रतिषेधात्मक विकल्पान्तरत्वामा-वादुच्यते चेतनो न भवत्यचेतन इति, तथा चेतना न भवत्यचेतनेति नोच्यते, किं तर्हि ? चेतनाया 10 अन्याऽचेतना, का सा ? स्पर्शादीति, तथा ज्ञानादि-[ज्ञानदर्शनवीर्याणि] न भवत्यज्ञानादि [इति] नोच्यते किं तर्हि ज्ञानादेरन्यदज्ञानादि स्पर्शादेव, अचेतनाज्ञानयोर्भूय उदाहरणं चेतनात्मनो द्रव्यस्य निर्देशेनाप रिच्छस्य परस्य तदभिप्रेतपर्यायनिर्देशेन प्रतिपाद्यमार्यमज्ञानादि चेति, कियती चोदाहरणमात्रा क्रियते चोऽप्यज्ञानसंशयविपर्ययज्ञानादिज्ञानादिन इत्यभिमतो धर्मकलापः सोऽपि ज्ञानाज्ञानात्सर्वस्मादेरभिन्न एवेति ज्ञानादिरूपेणोच्यत इति, यदेव को न्यायो नेष्यतेऽन्यः?, स प्रसज्यप्रतिषेध आख्यायते। चेतनो 15 न भवत्यचेतन इत्यादिरिष्यते त्वया तत एवं सति तथा—तेन प्रकारेण सर्वतो व्यावृत्तिः घटः घटो न भवति इति घटोऽपि घटो न भवतीति परस्परव्यावृत्तिवत् सर्वभावव्यावृत्तेश्चेतनाचेतनयोर्व्यावृत्तिः ततश्च सर्वतो व्यावृत्तेरयुक्तः प्रसज्यप्रतिषेधः निर्विशेषव्यावृत्त्यर्थत्वाच्च इति । स्यान्मत तदस्तु

वाद्ये-स कोऽन्य इति । चिदचिद्वैतन्यगुणविशिष्टात्मनोऽन्यः । चिदचिद्वैतन्यगुणविशिष्ट आत्मैवाचेतन इति सर्वमति-स्पर्शास्पर्शादीति आत्मा हि पूर्वोक्तरीत्या पुद्गलात्मरूपोऽत एव स्पर्शास्पर्शादिधर्मा तथा चोपयोगलक्षणात्स्पर्शादि- 20 गुणविशिष्टात्मनोऽन्यः स्पर्शादिगुणविशिष्टः ज्ञानावरणादिकर्मात्म आत्मैवाचेतन उच्यत इति भावः । चेतनादन्योऽचेतन इत्येवोच्यते न तु चेतनो न भवतीत्यचेतन इत्युच्यते पुद्गलपरमर्माणामात्मना परिणम्यमानत्वात् साधितत्वात् सर्वेषां चेतनस्येव भवनात्र तावत् कश्चिदपि नचेतनो न भवतीत्यचेतनः स्यादित्याशयेनाह-न त्विति । ननः प्रसज्यप्रतिषेधः पर्युदासश्चेत्यर्थद्वये प्रसज्यप्रतिषेधस्यात्यन्ताभावरूपस्यानुपपत्त्याभ्युपगमात्मकत्वेन भवन्मतेऽत्यन्ताभावप्रतिषेधार्थे चेतनो न भवतीत्यचेतनः चेतना न भवतीत्यचेतना ज्ञानादि न भवतीत्यज्ञानादीति [illegible] न [illegible]-र्थंमति-न तु भवन्मतेति । पर्युदासश्चोक्तं स्वाभिमतं [illegible]—चेतनाया इति नन्वुक्तमित्युक्ताभिमतम् 25 [illegible] इति भावः । चेतना न भवत्य चेतना ज्ञानादि न भवत्यज्ञानादिरुदाहरणत्वेन द्रव्यान्तरमुपपत्त्यर्थं पर्यायवाचिनं प्रतिपाद्य—अचेतनेति । प्रसज्य प्रतिषेधपक्षे दोषमाह—चेतनो न भवतीति अत्र यथा चेतनत्वसामान्यप्रतिषेधे सर्वव्यावृत्तिचेतनाचेतनयोरैक्यात् तथा घटः घटो न भवतीत्यत्रापि घटव्यावृत्तिसर्वव्यावृत्तिः स्यात् घटस्यापि सर्वात्मकत्वात् तस्मान्निर्विशेषं व्यावृत्तिः स्यादिति जगत् [illegible] भाव । ननु घटः घटो न भवतीत्यत्र यथा घटव्यतिरिक्तप्रतिषेधे इति तत्प्रकारेण पदार्थनिर्देशे च 30

---

१ सि क. °व्यावृत्त्य । २ सि क. नोच्यते ज्ञानादि-ज्ञानदर्शनवीर्याणि न भवत्यज्ञानादि इत्यधिकं दृश्यते । ३ सि क. °तत्ज्ञान । ४ सि क °ज्ञानादिर्भिन्न । ५ सि क. °प्रतिषेधस्याते ।

अस्माद्व्यावृत्तिर्भविष्यति घटवत् [इति] चेदुच्यते, अतोऽपि व्यावृत्तेः—अतोऽपि तर्हि व्यावृत्त तत एवमिकस्मिन्नं वस्तु प्राप्नोति सर्वतो व्यावृत्तत्वात् खपुष्पवत्, तस्मादवस्तुत्वं सर्वतो व्यावृत्तत्वात् खपुष्पवदेवेति, ततः आह—असत्त्वादिति, तस्मात् किंचिदेवसत्त्वप्रसङ्गात् प्रसज्यप्रतिषेधाभावात् प्रागभावादिव्यावृत्तेरन्यत्वसमर्थो बालः कुमारो न भवतीत्यादिषु, तत उपसंह्रियते भूत एव—अन्यत्वात्
5 तत्त्वमेव—प्रागभावादिव्यावृत्तेर्बालकुमारादिरूपादिवत्तत्त्वमेव चेतनेति ।

सा पुनरिदानीं चेतना किं स्वरूपा वाच्या ? उच्यते—

ज्ञानदर्शनादिसंवेदना सापि च निर्वृत्त्युपकरणलब्धितस्य उपयोगात्मा, अतो रूपादि महद्भ्यात्मा, चेतनत्वात् अभिमतात्मवत्, तथैव तथाभूतत्वात् एवञ्च कृत्वा ज्ञानमज्ञानं पुद्गलात्मकत्वात् रूपादिवत्, अज्ञानमपि च ज्ञानं सत एव तद्वत्, चेतनोऽचेतनः, अचेतन-
10 श्चेतन इत्यादि सर्वत्र सर्वसर्वात्मकत्वं भावनीयमिति ।

(ज्ञानेति) ज्ञानदर्शनादिसंवेदना—साकारानाकारोपयोगौ सप्रभेदौ ज्ञानदर्शनग्रहणेन गृहीतौ, आदिग्रहणेन सुखदुःखरागद्वेषभयादिसंवेदना गृहीता, सापि च निर्वृत्त्युपकरणलब्धितस्य उपयोगात्मा—इन्द्रियाणां चक्षुरादीनां निर्वृत्तिः पक्ष्मपुटकृष्णतारादित्वेन निष्पत्तिः, उपकरणन्तु मसूरकातिमुक्त-कचन्द्रप्रायमेवाकारतया भवेद्धानां निष्पत्तिः, पदार्थसमर्थनेन वा तदुपादानाङ्गप्रदीपाद्युपकारक-
15 मुपकरणं सर्वमुपकरणम्, लब्धिः पुनर्निर्वृत्तेः प्राक् पञ्चात्मना पूर्वोपात्तं तयोर्भवनामकर्मोदयं

[illegible] सर्वतो व्यावृत्तत्वात् [illegible] खपुष्पादिवत् [illegible]
व्यावृत्तं भविष्यति इत्याशङ्कते—अतोऽपीति । तथा च प्रसज्यप्रतिषेधाधिकारे [illegible]
[illegible]
[illegible] चेतनात्मा [illegible]
20 तस्मादभावावस्तुत्वमिति । चेतनास्वरूपमभिधत्ते—ज्ञानदर्शनादीति साकारेति, [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]—आदिग्रहणेनेति । [illegible]
25 [illegible]
[illegible]
[illegible]—सापि चेति [illegible]
[illegible] इन्द्रियाणामिति [illegible]
[illegible] उपकरणमाह—उपकरणन्त्विति [illegible]
30 [illegible]
[illegible]
[illegible] पदार्थदर्शनेन च वेति । लब्धिमाह—लब्धिः पुनरिति
[illegible]

द्रव्यम्, ज्ञानदर्शनावरणयोर्वीर्यान्तरायस्य च क्षयक्षयोपशमौ ततस्तः उपयोगो ज्ञानदर्शनस्वतत्त्व-
व्यक्तिः, स एव चात्मा, ततः किमिति चेत् ? अतो रूपादिमदप्यात्मा, पदेच्छूपरसादिधर्म मूर्तं पौद्गल-
माध्यात्मिकमिन्द्रियपाण्यादवयवात्मकं शरीरं तदप्यात्मैव, कुतः ? चेतनत्वात्—चेतनत्वञ्चात्मानन्यत्वं
प्रतिपादितम्, किमिव ? अभिमतात्मवत्—यथा शुद्धोपयोगलक्षणः केवल्यात्मा चेतनत्वात् तथेन्द्रि
याद्यपि रूपादिमदिति, तत्समर्थयति—तस्यैव तथाभूतत्वात्, आमुक्तेः स एव हि द्रव्यकेवली[^]
संसारावस्थः उपयोगात्मा तथाभूतो निरावरणज्ञानदर्शनसंवृत्तोऽभिमतात्मा, तस्मादामुक्तेस्तस्यैव
तथाभूतत्वादिहापि संसारे स एवेति रूपादिमतः पुरुषस्य मुक्तस्य चोपयोगात्मकत्वादविशेष एव,
एवञ्च कृत्वा ज्ञानमज्ञानं पुद्गलात्मकत्वाद्रूपादिवत् पुद्गलात्मकत्वाच्च ज्ञानस्यानन्यत्वं प्रतिपादितम्, अज्ञा-
नमपि च ज्ञानं तत एव तद्वत्, चेतनोऽचेतनः अचेतनश्चेतन इत्यनेकधा सर्वसर्वात्मकतां भावयति,
इत्यादिमहणाच्च निदर्शनमात्रमेतद्भावितमनया दिशा सर्वत्र भावनीयमित्याह । 10

अथोक्तेषु नयेषु [क]तमोऽयमित्यत्रोच्यते—

एषचायं सङ्ग्रहेषु द्रष्टव्यः, तेऽपि च सङ्ग्रहाः त्रिविधा द्रव्यस्थितनयप्रकृतयः, तेषु चाऽयं
द्रव्यप्रकृतिनयः स्थितप्रकृतिविरोधिनोरविशुद्धप्रधानयोर्विषयः ।

(एषचेति) एषञ्चाय सङ्ग्रहेषु—सङ्ग्रहः शतविकल्पः 'एक्केक्को य सतविधो सत्तनयसता
हवंति एमेव' इति (आव० भा० २२६ निर्यु० ९२६४) वचनात्, तेषु सङ्ग्रहेष्वयं विधिनियमनयो 15
द्रष्टव्यः, य एव वर्णितास्तेऽपि च सङ्ग्रहाः सङ्क्षेपेण त्रिविधा भवन्ति—द्रव्यस्थितनयप्रकृतयः, [द्रव्य-
प्रकृतयः] कर्मपुरुषकाराद्यपेक्षानन्यभावाः स्थितप्रकृतयः पुरुषकालनियत्यादिभावाः, नयप्रकृतयः प्रकृती-
श्वरादिकारणवादाः, तेषु चाऽयं नयः स्थितप्रकृतीनां पुरुषकालनियतिस्वभावनयानां विरोधिनो
ईश्वरनयस्य प्रधाननयस्य चाविशुद्धप्रधानात्मयोर्विषयो द्रव्यप्रकृतिनयो विधिनियमभङ्गो द्रष्टव्यः ।

[^] तदावरणात् [illegible] ज्ञानदर्शनावरणवीर्यान्तरायकर्मणां [illegible] मतिज्ञानदर्शनावरणादेः क्षयः क्षयोपशमश्च 20
[illegible] इन्द्रियनिरपेक्षस्य [illegible] । एतन्निरूपणमिदमुपयोग्याह—उपयोग
इति [illegible] ज्ञानदर्शनलक्षणः [illegible] उपयोगस्य
द्विविधा [illegible]
[illegible] । एवमुपयोगस्य [illegible]
[illegible] उपयोगात्मकत्वात् रूपादिमत् [illegible] शरीरमप्यात्मैवेति भावयति—अतो रूपादिमदिति, 25
रूपादिमच्छरीरं [illegible] चेतनत्वादिति हेतुः अभिमतात्मवदिति दृष्टान्तः [illegible]
यदेवमिति । [illegible] पुरुषस्य [illegible] मुक्तस्य चोपयोगात्मकत्वेनैकत्वात्, यथा रूपादिमत्पुद्गलात्मा भवति
चेतनत्वादेव [illegible] ज्ञानमज्ञानं भवति पुद्गलात्मकत्वात्, रूपादिमत्पुद्गलैरुपयोग्यात्मनः [illegible]
[illegible] तदेवेत्याह—एवञ्च कृत्वेति । भावं नयमुपदर्शयति—इत्यनेकधेति । तद्दर्शनेष्वपि [illegible]
[illegible]—एषञ्चायमिति । यथा सङ्ग्रहाः [illegible] शत भवन्ति [illegible] सप्तविधत्वात् [illegible] 30
सप्त नयशतानि भवन्तीत्याह—एक्केक्को य इति । शतविधान् सङ्ग्रहान् त्रिधा विभज्य दर्शयति—य एवं वर्णिता इति [illegible]
[illegible] द्रव्यप्रकृतय इति [illegible]
[illegible] पुरुषकारादयः [illegible] निर्मोहिता [illegible] यथा
[illegible] एवं त्रिधा सङ्ग्रहेषु सङ्ग्रहेष्वयं नयो द्रव्यप्रकृतिनय [illegible] चेतनाचेतनस्य वा चेतनाचेतनत्वात्,

स च सद्द्रव्यैकदेशत्वाद्द्रव्यार्थः, द्रव्यशब्दोऽपि कर्तृसाधनो द्रव्यमिति द्रवति याति न विच्छिद्यते भिन्नरूपमुपयात्येति । ननु कर्मणि कर्मसाधनत्वमुदितम् तत्कथमधुनाऽयमर्थे द्रवतीति द्रव्यं कर्तृसाधनम् ? उच्यते ननु कर्मसाधनव्याख्यानेन तेनैव कर्तृसाधनत्वमेव व्यवस्थापितं द्रव्येणैव द्रव्य क्रियते व्रीहिवदिति, सत्यां कर्मतायामपि कर्तृत्वं द्रव्यत्वादिति ।

5 (स चेति) स च सद्द्रव्यैकदेशत्वाद्द्रव्यार्थः, नियमात्मकत्वात् पर्यायोपसर्जनत्वेऽपि सद्द्रव्यैकदेशत्वाद्द्रव्यार्थं नयमिति । द्रव्यशब्दोऽपि कर्तृसाधनो द्रव्यमिति, द्रवतीत्यादिपर्यायैस्तदर्थं व्याचष्टे द्रवति याति न विच्छिद्यते भिन्नरूपमुपयात्या—भिन्नानि रूपाणि चेतना[व्यचेतना]नि व्रीहिपृथिव्यादीनि देवमनुष्यादीनि च सामस्त्येन व्याप्नोत्येव न किञ्चिदपि त्यजतीति । चोदक आह—ननु कर्मणि कर्मसाधनत्वमुदितं—कर्मकारकव्याख्यानेऽयं द्रव्यशब्दः कर्मसाधन एवोक्तो द्रूयत इति द्रव्यमिति, कर्मवाक्यम्
10 विधिनियममङ्ग इत्युक्तम्, तत्कथमधुनाऽयमर्थ द्रवतीति द्रव्यं कर्तृसाधनमुच्यत इत्यत्र विधिनियमनयो सूत्रे पूर्वोक्तमेव स्मारयन् ननु कर्मसाधनव्याख्यानेन तेनै[व]कर्तृसाधनत्वमेव व्यवस्थापितमिति, तत्कथमिति चेदुच्यते द्रव्येणैव द्रव्यं क्रियते व्रीहिवदिति, कर्तरि तृतीया द्रव्येणेति तथा कर्तृसाधनत्वाभ्युपगमात्, मयास्माभिः पुरुषकर्मपृथिवीव्रीह्यादीनामात्मनैवात्मनः कर्तुः कर्मत्वस्य विस्तरेण वर्णितत्वात् सत्यां कर्मतायामपि कर्तृत्वं द्रव्यत्वादिति सामान्यार्थस्याविच्छेदात् सार्वत्र्यात् ।

15 एतस्मिंश्च नये द्रव्यमेव शब्दार्थः स च नित्यो विच्छेदाभावादवस्थितत्वाद्वा ।

(एतस्मिंश्चेति) एतस्मिंश्च नये द्रव्यमेव शब्दार्थो न पर्यायार्थः, स च नित्यो विच्छेदाभावादवस्थितत्वाद्वा सर्वात्मकैकस्य सर्वार्थरूपानुसृतत्वात् ।

अन्वाह च पृथिवी धातौ किं सत्यम् ? विकल्पः विकल्पे किं सत्यम् ? ज्ञानम्, ज्ञाने किं सत्यम् ? ओम् तदेतद्ब्रह्म ।

20 अन्वाह चेति । ज्ञापकमाह एवमेव नयमनुवर्तमानोऽन्योऽप्याह पृथिवीधात्वादिभावि यावद्

सर्वेषु नैकस्यत्वादिति भाव । द्रव्यपर्यायविधिनयमयोर्मध्ये सामान्यमेव एवमाह—स चेति । व्रीहिपृथिव्यादिरूपमुपयाति पर्यायवर्गोपरोधेऽपि सर्वपुरुषयोगेन नियमात् सद्द्रव्यता द्रव्यार्थतेति भावः । इत्येवाह—नियमात्मकत्वादिति । द्रव्यशब्दस्य व्युत्पत्तिः—द्रव्यशब्दोऽपीति तदेव सर्व पुरुषार्थं तथा तथा भवति व्याप्तत्वात्तस्यैव देवमनुष्यादिरूपेण न सर्वत्र सर्वथा विच्छिद्यते द्रव्य कर्मपुरुषादिरूपेण सर्वमिदं व्याप्नोतीति द्रव्यमिति भावः । यद्
25 द्रव्यशब्दस्य कर्तृसाधनत्वेऽपि विरुद्धत्वात् पूर्वं यदा चैवं भवति कर्मैव एव कर्तृत्वं सिद्धं तदा द्रवतीति द्रव्यं कर्तृसाधनं न भवति कर्मत्वस्य कर्तृत्वस्य [illegible] द्रव्यं द्रवते पचते ओदनेन कर्मपुरुषादिरूपेण कर्मानुरूपेण इत्यादिभावात् ननु कर्मणीति । तथा परस्य [illegible] कर्मकर्तृत्वं क्रियत इति परस्य कर्तृसाधनत्वमपि द्रव्यस्य [illegible] व्रीहिरेव व्रीहिं क्रियत इति व्याख्यातम् कर्मैव कर्तापीत्युक्तम् इत्युपपत्ति—ननु कर्मसाधनेति । अनेकत्र कर्तृत्वं कर्मत्व [illegible]—मयास्माभिरिति । सार्वत्र्यमपि
30 [illegible]—सत्यामिति [illegible] द्रव्यस्यार्थस्य [illegible] भावः । एतस्मिन् नयस्य किं वाच्यमित्याह—एतस्मिंश्चेति । यथा सर्वं द्रव्यमेव नान्यच्च न पर्यायस्य [illegible] किन्तु द्रव्यस्य नित्यत्वेन [illegible] तदेव शब्दार्थ इति भावः । [illegible] द्रव्यस्य सर्वगति—सर्वात्मकेति । [illegible] शब्दार्थो द्रव्यस्य शब्दार्थो न परस्यापि [illegible]—अन्वाह चेति । [illegible] एवमेवेति । पृथिवी धातुः [illegible] सत्यं [illegible]

इति, पृथिव्येव पृथिवीधातुः, प्रभृत्यादिधर्मधारणात्, तत्र किं सत्यं ? विकल्प इति, स्वयमेव पृष्ट्वा व्याचष्टे न कश्चिदप्यत्र पृथिवी नामास्ति अवभासितत्वात्मकोद्भवमादीन् विमुच्य, त एव हि विकल्पाः पृथिवी, स पृथिव्येव ते विकल्पाः, किं सत्यं ? ज्ञानम्, तेऽपि च विकल्पा ज्ञानादन्ये न सन्ति, ज्ञानमेवात्म कर्मलक्षणं चैतन्यं तथा तथा विजृम्भते, चैतन्यस्यैव व्यवहारमार्गोपात्तत्वात्, ज्ञाने किं सत्यं ? ओम्, भवति रक्षति पाति प्रीयते तृप्यति चेतनाचेतनभेदे सति, एवमादिधात्वर्थात्मना विपरिणममान-धर्मोऽसत्यैकं भवति येन यथा परिकल्प्यते तत्तथाऽनुवर्तत इत्योम्, तदेतद्ब्रह्म, स एष परमार्थः, तदेतत्तत्त्वं परमं ब्रह्म बृहदिति ।

तस्यार्थं कथयति—

एतदुक्तं भवति—अतः परं शब्दार्थव्यवहारो निवर्तते निर्विकल्पत्वात्, व्यवहारातीतोऽयमर्थः, कथमोमित्येषोऽन्वयव्यतिरेकरहितः शब्दार्थो भवितुमर्हतीति चेत् को ब्रूतेऽन्वयव्यतिरेकरहित इति यस्मादत्रानुवृत्तिव्यावृत्ती अनन्तरोक्तपृथिव्यादिधातुविकल्पज्ञानसत्त्वानुप्रबन्धसामर्थ्योपहितरूपे, एते चानुवृत्तिव्यावृत्ती यथाभागं प्रसिद्धिं गच्छतः, स च शब्दार्थोऽनाद्यनुप्रबन्धसामर्थ्योपहितानुप्रवृत्तित्वान्नित्यः, भस्त्रोत्पादविनाशशब्दावपि तत्स्थित-रूपावेव, नात्युत्पत्त्यात्यन्तविनाशरूपौ, ऊर्ध्वपतनव्यवस्थपर्णपर्पनिपतनवदृश्यत्वतस्तावेवोत्पद्यते विनश्यतीति चोच्यते ।

(एतदिति) एतदुक्तं भवति अतः परं शब्दार्थव्यवहारो निवर्तते निर्विकल्पत्वादिति—इदं शब्दार्थव्यवहारगतिर्मार्गनिर्विकल्पं ज्ञानमेवावतिष्ठ इति, अतः परं ब्रह्मेति यत्परं तत्त्वं तत्त्वज्ञानमपि निर्विकल्पं सत् प्रथते तद्दर्शयति व्यवहारातीतोऽयमर्थः कथमिति ब्रह्मत्वात्तोऽधिगमोपायोपक्रममात्रं

तस्य कथमोमित्यत्—तच किमिति । विकल्प अपि न वस्तुभूताः ज्ञानव्यतिरेकेण तदात्मकत्वाभावात्, ज्ञानमेव तत्त्वं पृथिव्यादिरूपनिवेशनात्मक एवम् प्रमाणप्रमेयप्रमाणव्यवहारः प्रमातृव्यवहारश्च तथापि कश्चिदर्थं पुरुषार्थैस्सन्धरेण व्यवहारात्मक-धारात् नहि प्रमाणप्रमेयोमित्यादिविकल्पत्वे प्रमाणप्रमेयव्यवहारो वा नहि व्यतिरेकादि परतो प्रकाशे दीपोभावो भवति तथाऽनन्तधौरभिन्नरूपं तत्त्वमिति ज्ञानमेवात्मकं चैतन्यमेव तथा तथा विजृम्भते तस्य तथा तत्सम्बन्धित्वेनधात्वावर्तीनानामित्यत्—तेऽपि च विकल्पा इति । ननु ओमित्यत्तत्त्वम्, तत्रस्थे नहि प्रसिद्धवस्तिस्ये पुरुषः तथा च सर्व-ध्यमनास पृथिव्यादिविकारतयोऽत्वतात्मा नयार्थेन सर्वमुपेत्याप्यवक्तव्यमिति दर्शयति—ओमिति ब्रह्मात् परं तत्समूलं निर्विकल्पमोघध्येयतत्त्वं ब्रह्म परमार्थं एकत्वं श्रुतिरेवैषा अन्विष्योपक्रमस्ते ओमिति वस्तुतत्त्वावबोधकतत्त्वं विधीयते तद्गतमेव ध्यानस्मर्तृत्व निर्विकाल्पकमनुपादाय तस्मिन् तथागमितत्त्वविषयवस्तात्मकत्वम्, ओंकारात्मकस्य ब्रह्मत्वाभिधानमपि यथाविवक्षैव कल्पनारूपं तत्त्वम् अत एवोपन्यस्तेऽन्वयव्यतिरेकाभावेनाभावं शब्दार्थं इति । पूर्वोक्तिगत्युक्तिविस्तरमाह—एतदुक्तं भवतीति परमार्थतोऽयमत्र निर्विकल्पस्य ब्रह्मणो हि द्वे रूपे मूर्तामूर्तविकल्पारोपिते व्यावहारिकस्वरूपे तत्र भूतापेक्षया पृथिवी धारणा तत्पेक्षयोपविपुलत्वादपवधाममती तदपरोक्तं तारणुत्तमि तेषां सर्वेषां वरतम ओङ्कारः तत्त्वार्थ-विवेकः तत्र मूर्तामूर्ते आध्यात्मिकाधिदैविकरूपे वर्षकालकृतत्वे कल्पनाजनकत्वे व्यावहारिकत्वात् एतत्र सर्वत्रापि मायया परतत्त्वं ब्रह्म वाचकत्वातीतं निर्गुणवस्तुवस्तुत्वमानमिति माया । तावत् परतत्त्वं ब्रह्म वाचकत्वं तत्त्वज्ञानमपि बोधयितुं न समर्थम् तस्मात् तत्त्वान्तमसैव बोधयितुमाहेत्यत—अतः परं ब्रह्मेति । व्यवहारातीतोऽयमर्थः इति । ननु व्यवहार-

१ सि. क. वद्गुणादि । २ सि. क. विकल्पे । ३ सि. क. व्याख्यानस्यविनाशे ।

दर्शयति, कथमोमित्येषोऽन्वयव्यतिरेकरहितः शब्दार्थो भवितुमर्हतीति चेत् को ब्रूतेऽन्वयव्यतिरेकरहित इति, यस्माद्धात्वनुवृत्तिव्यावृत्ती अनन्यत्वेऽपृथिव्यादिधातुविकल्पहानसत्त्वस्वानुप्रबन्धसामर्थ्योपहित-रूपे-पृथिव्यादिधातूनामचेतनाभिमतानां विकल्पसत्त्वानां चेतनकर्मात्मनोः कर्माभिमतानाञ्च ज्ञानसत्त्व-स्वरूपपुरुषस्येनान्वितव्यतिरिच्यमानामोमिति कर्मात्मैकत्वापत्त्या तत्सत्त्वानुप्रबन्धेन अप्युपपादनं भिन्नमे-वैतदन्वयव्यतिरेकमानेनार्थं शब्दार्थः, एते धात्वनुवृत्तिव्यावृत्ती यो यो भागो यथाभागं प्रसिद्धि अभिधानाभिधेयव्यवहारात्मिकां कर्मेति पुरुष इति कर्मपुरुषकार इति एकमेवेति वा प्रसिद्धिं गच्छतः इति, स च शब्दार्थोऽनाद्य[नु]प्रबन्धसामर्थ्योपहितानुप्रवृत्तित्वान्नित्यः, अत्रोत्पादविनाशवत्त्वादपि तत्स्वरूपादेव, नासदुत्पादस्य विनाशरूपादिति, तस्मादेते ऽभ्युपगतेनापि गतार्थम्, यथार्थसमाविर्भावतिरोभावस्वरूपयोरपि भावाभिधायित्वाद्यथा पदार्थः तत्पदे विनश्यतीति चोच्यते तथा तथा परिणममानः ।

अनित्यघटादिशब्दा अपि नात्यन्तमुत्पन्नमभूतभावार्थं ब्रुवते, स्वसत्त्वबीजं द्रव्यमेवा-विच्छिन्नमाहुः ।

अनित्यघटादिशब्दा अपीति—अनित्यः प्रध्वंस इत्यादयो घटः पट इत्यादयश्च शब्दाः पृथिव्यादिविकल्पा अपि नात्यन्तमुत्पन्नमभूतभावार्थं ब्रुवते, किन्तर्हि ? स्वसत्त्वबीजं द्रव्यमेवाविच्छिन्न-माहुः— स्वतत्त्वं यदभूत्वा भवति भूत्वा च न भवति तदनित्यम्, 'समानकर्तृकयोः पूर्वकाले' (पा०

पदार्थेस्तत्र चार्थस्य सम्बन्धो न भिन्नैरित्याह—तस्योपकुर्वन्त इति । एकसम्बन्धिनं दर्शयति—कोऽसाविति वाक्यार्थस्यैक एवासमस्ततया समग्रः एकः सम्बन्धी स च धर्मीभूतत्वादेकरूपस्य इति भावः । अनयोरितरेतरसमाहारयोः साम्यात् अन्वाचयसमुच्चययोस्तु भिन्नत्वमाह—अन्वाचयेति । चार्थे द्वन्द्व इति अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्व इति सूत्रार्थः । चशब्दार्थमाह समुच्चय इति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः, अत्र च-शब्देन सममभिव्याहृतपदार्थे इतरापेक्षत्वं द्योत्यते तदसमभिव्याहृते तु न अत एवाविशेषणप्रयोगः यथेश्वरं गुरुं 15 च भजस्वेति अनेकस्यान्यतरस्मिन्नितरसापेक्षस्यैकस्य चैकस्मिन्नेकधर्मावच्छिन्नेऽन्वये चार्थेऽनेकसुबन्तस्य द्वन्द्व-प्रसङ्गात् समुच्चये समासः । ग्रामञ्चेति भाष्ये 'अहरहर्नयमानो ग्रामञ्च पुरुषं पशुम् । वैवस्वतो न तृप्यति सुराया इव दुर्मदी' ॥ इति दृश्यते दुर्मदो यो मद्यपः स यथा सुरया न तृप्यति एवं यमो प्राणिग्रहणेन इति तदर्थः, सुराया इति षष्ठी अत्र समुच्चयेऽपि प्रकृते इतरेण चार्थसम्बन्धवादितरेतरयोगसमाससमुच्चयप्रसङ्गे द्वन्द्वः प्राप्नोति परन्तु समासेनैव अनेकेतरेतरयोगः प्रतीयते तत्रैव समासो भवति अत एव न समुच्चयसमासोदाहरणमिदम् । अन्वाचय इति, 20 अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः अन्यसिद्ध्यानुषङ्गिकत्वेनिर्भयत्वम् तथाप्रधानम् अतएव हि यं भानपि तयोः प्रधानाप्रधानभावात् समासः । पाणिपादमिति अवयवावयविभेदः समूह समाहारः अयमेव विशेष्योऽत्र एव तत्रैकवचनम् । ब्राह्मणेति परस्परापेक्षाणामुद्भूतावयवभेदसमूहस्यानामेकधर्मावच्छिन्नत्वेनान्वय इतरेतरयोगः अत्र साहित्यं विशेषणं द्रव्यं प्रधानं समाहारे साहित्यं प्रधानं द्रव्यं विशेषणम्, अत्रान्योऽन्यमिलनोऽन्यसाहित्यं मन्यते यथा ब्राह्मणपदेन क्षत्रियादिविशिष्टब्राह्मणः क्षत्रियपदेन स एव विट्पदेन शूद्रपदेन च स एव अत एव तत्प्रियत्वाद् प्रतिपदं बहुवचनप्रयोग 25 इति बोध्यम् । रामेति इतरेतरयोगस्यैवेदमुदाहरणम्, अत्रापि रामपदेन रामकेशवयोः केशवपदेन च तयोरभिधानान्नापि द्वन्द्वः समुदायेन एकवचनसामर्थ्यम्, अतो भान्यतरपेक्षम्, समुदायापेक्षया द्विवचनमिति बोध्यम् । समुच्चयादीनां सम्बन्धमाह—ते चेति । द्रव्यादिभिन्नत्वमुपदर्शयति—न चैत इति, योऽयं समुच्चयादिर्न द्रव्यगुणक्रियात्मा अपि तु भेदाभेदरूपा प्रतीतिरित्याह—किमित्यादि नाम चार्थः क्रिया क्रियागुणयोश्चार्थसम्बन्धात् द्रव्यापत्तेः द्रव्यस्यैव क्रियात्वयोग्यत्वात् किन्तु द्रव्यगुणक्रियाधारत्वेन प्रतीयते चार्थभूतसमूह इति भावः । वीरेति अत्र वीरादि- 30 शब्दोऽन्यविशिष्टेतरपदसम्बन्धो व्यतिरिक्तः चार्थमात्रवाचक पदान्तरसन्निधानेऽपि तस्य तात्पर्यतया निर्दिश्यते तत्र च सम्बन्धः पुरुषपदवाच्यत्वसम्भवाद्विशेषणविशेष्यभावो वाक्यार्थः न तु स भाविकविकार्थः पदान्तरसन्निधान एव तत्र प्रतीते विशेष्यत्वविशेषणत्वयोर्भेदमेवेतरस्यैवोपप्रधानभावज्ञापकत्वात्, विशेषणं हि सामान्यात्मना क्रियासम्बन्धित्वाद-प्रधानं ज्ञातमपि तत्पदविशेषणेनाभिधीयमानत्वाद्विषयात् ज्ञापकत्वेन विधीयते वीरादिगुणः प्रार्थमात्रे विशेषणं भवति प्रधानं प्रधानं विशेष्यम् ज्ञापकन्तु परोपकारकोपाधिमात्रं लेशभूतमप्रधानं विशेषणम् द्रव्यं हि साक्षात् क्रियासम्बन्धाय

१ सि क. चे च । २ सि क. न चेद्रव्यं ।

स्वगताऽनन्यान्यत्वभावो धर्मः प्रवृत्तिरेवेति सम्बन्धः, यथाऽत्र धीरशब्दः पुरुषसामानाधिकरण्यात् वस्तुत्वेनैकत्वं गतः तथा पुरुषशब्दोऽपि धीरसामानाधिकरण्यात्, अन्यथा वैयधिकरण्यप्रदर्शनादि[वद्] सम्बन्धाविरोधाः स्युः, एकधाम्नयोरैकस्य सामानाधिकरण्यात्, अथ च धीरो विशेषणं पुरुषो विशेष्य इति परस्परतो भिन्नार्थत्वमनयोः, इतरथा सामानाधिकरण्याभावात् पौनरुक्त्यादिदोषाः स्युः

5 एकधाम्नयोरैकत्वं सामानाधिकरण्याद्विशेष्य[विशेषण]भावाभावान्यत्वम् एव शुद्धाविषयम्, तेन एकान्त-परिपूर्णत्वे वस्तुतत्त्वभाविनष्टार्थैकसम्बन्धिविषयत्वं शुद्धनयाद्युपायैकसमुदायगोचरत्वमित्यनन्यत्वम्, अन्यत्वमपि शुद्धनययोरेवासौ समुदाय इति, तथा द्रव्यादलिङ्गसंख्यो भावो वस्तुत्वेकत्वादिर न्योऽन्यश्चेति । इत्थं वा व्याख्यानेऽप्यत्वैकान्तो द्रव्यार्थभागोऽन्यत्वागमेति परिहृता दोषाः ।

अतः परमलिङ्गसंख्यत्वमतिपादनायोत्तरो ग्रन्थः—

10 साधु भवतीत्यादौ भवने भवितृषु लिङ्गसंख्यामेदवत्सु याः लिङ्गसंख्यास्ता न भवन्ति, भवने नपुंसकलिङ्गमेकवचनतानुमीयते भूयते च तद्विशेषणे साधुशब्दे, तस्मादन्यत्वं भवतुः ।

साधु भवतीत्यादि यावत्भेदवत्सु याः [लिङ्ग]संख्यास्ता न भवन्तीति, एकस्मिन् द्वयोर्बहुषु वा देवदत्तादिभवितृषु लिङ्गसंख्याभेदवत्सु यथालिङ्गं संख्याभेदत्वापादना न भवन्ति भवने नपुंसकलिङ्ग-

15 मेकवचनमेव चानुमीयते, तद्विशेषणे साधुशब्दे भूयते साधु भवनं पदयेनाधिकरणभावविरोधेऽपि, तस्मादन्यत्वं भवतो देवदत्तादिभ्यः स्वरूपतो वस्तुत्वेकत्वे ।

साम्प्रतं किमर्थं नपुंसकलिङ्गं प्रथमैकवचनमेवात्रोच्यते—

प्रत्ययपरप्रकृतिभ्यवस्थायामपि प्रथमैकवचने अतिक्रमकारणाभावात्, नपुंसकत्वं भवन-

---

भवनम्, पुरुषस्तु तथैव विभक्तममनन्यत्वमुभयत्र द्रव्यान्तरेऽप्यभावात्मकः अतएव विशेषणविशेष्यभावः सामानाधिकरण्य-

20 सम्बन्धः स च तयोर्धिकप्रतिनिमित्तत्वे तयोरधर्मापिलम्, धर्मौस्तु विशेषणं धीरे पुरुषविषयं विशेष्यत्व पुरुषे धीरविषयं तयो धर्मिणं सम्बन्धः एतत धीरत्वपुरुषत्वसमुत्पन्न धीरपुरुष इति बोधः, पुरुषशैकत्वे पेनकोयेऽपि कोऽपि भवत्यतस्सामानाधिकरण्यम्, तत भिन्नाभिन्नमीति तथैव समुत्कर्षो वस्तुत्व तद् भिन्नाभिन्नरूप इति भावः । ययेव वदति-यथाऽत्रेति धीरशब्द धीरशब्दयतिपाद धीरत्वं पुरुषत्वं च समानाधिकरणौ धर्मौ, धर्मधर्मिणो-र्वैकत्वात्तत्स्वैकत्वं यतस्त इत्थं । विशेष्यत्वाद्वैकत्वात् तयोर्भेदोऽभीष्टः-अथ चेति नकल्पत्वं न स्यादित्येतत

25 धीरपुरुषत्व पुरुषशब्देन च धीरपुरुषत्व बोधात् पौनरुक्त्यं भवेदिति भेदोऽप्यनुमेय इति भावः । इत्यतो भेदाभेदात्-मकमिति । द्रव्यमिव भेदाभेदात्मकोभेदाभेदसमुच्चयवति-तथा द्रव्यादिति । अथ लिङ्गादि भवितृसंख्यात्वं समुदाय-साधु भवतीत्यादिनेति । एतदेव विवृणोति-एकस्मिन्निति । साधु भवतीत्यत्र साधुशब्दो भवनक्रियाविशेषणम्, अत एव द्रव्यधर्मान् लिङ्गसंख्यादीन्, न च गृह्णाति भिन्नलिङ्गसंख्याभेदवत्सु भवितृषु तद्विशेष्यमनुविधाय तानपि निर्दिश्यते यथा तु क्रिया द्रव्येण भवेयोगस्याप्यते साधु भवनं पश्येति तदा तु तस्या द्रव्यवद्भावमापन्नत्वात् कर्मत्वमुपैति

30 इदं कर्तृत्वमपि भवनं कर्तृत्व इतीति भावः । भवन इति भावत्वात्मकत्वानामस्यैव तत्र लिङ्गविशेषः नपुंसकलिङ्गमेव भवति भेदाभावादेकवचनमेवैकत्वम न लिङ्गसंख्येति भावः । एतदेव पुनः स्फुटयति-प्रत्ययपरेति साधु भवतीत्यत्र क्रियाविशेषणस्य साधुशब्दस्य कर्मत्वेनाभावात् द्वितीयाविभक्तेरभावात् प्रथमैकवचनस्यैवातिक्रमकारणाभावात् प्राप्ति

स्वाप्यकत्वात्, यथा लोके दृष्टं किमपि दृश्यत इति, तथा त्रिकालविषयाद्द्रव्यादन्यो भावो न च तेन विना कारकः त्रिकालत्वात्, द्रव्यं त्रिकालविषयम् भावस्य त्रिधा भिन्नकालत्वेऽप्येकरूपत्वात्, वर्तमानत्वेनावतिष्ठमानं तत्तस्य च द्रव्यं त्रीनपि कालान् विषयीकरोति गमनगन्तृवत्, वर्तमान एव देवदत्ते गन्तरि गतेस्त्रैकाल्यं दृष्टम्, अगमद्गच्छति गमिष्यतीति तथाऽभूद्भवति भविष्यति द्रव्यमिति ।　5

(प्रत्ययेति) प्रत्ययपरप्रकृतिव्यवस्थायां तु प्रथमैकवचने, किं कारणं ? अतिक्रमकारणाभावात् अवश्यञ्च प्रत्ययपरा प्रकृतिः प्रयोक्तव्या 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (पा० २ अ ३ पा० ४६ सू०) इति सत्तामात्रेऽपि प्रथमाविधानात् ततोऽतिरिक्तार्थासम्भवात् प्रथमातिक्रमणे फलाभावात्, वचनस्य वचना[न]न्यापेक्षत्वात् सत्तामात्रार्थकारणत्वात् कारणान्तराभावात्, कारणाद्धि तदतिक्रमः स्यात्, नपुंसकञ्च भवनसाम्यत्वात्, अव्यक्ते गुणसन्देहे [च] नपुंसकलिङ्गं प्रयोक्तव्यमिति, 10 किं यथा लोके दृष्टमिति चेदुच्यते किमपि दृश्यत इति—यथा हस्त्यश्वनरादिसमूहं दृष्ट्वा वक्तारो भवन्ति किमपि दृश्यत इति, इतिः प्रदर्शने, एतदेव वाक्यमुदाहरणत्वेन प्रदर्शयति तथाऽत्रापि, पूर्वसाधने तद्विशेषपक्षे हेत्वन्तरमुपचयरूपेणोच्यते तेन प्रकारेण तथा, यथा पूर्वं वस्तुनैकत्वगत्याऽनन्यत्वमिति पक्षीकृत्य साधितं तथाऽत्रापि त्रिकालविषयाद्द्रव्यादन्यो भावः, न च तेन विना कारक इति पक्षः द्रव्येण विना न स्याद् कारको भावः, तत्सहवृत्तिरेवान्यत्वेऽपीत्यर्थः, कस्मात् ? त्रिकालत्वात्, त्रयः काला 15 अस्येति त्रिकालः, कोऽसौ ? भावः क्रियालक्षणः, अभूत् भवति भविष्यतीत्युपनेयमानत्वात्, भेदेन

विभक्त्यन्तत्वेन प्रकृतिरेव प्रत्ययः प्रत्ययपरैव च प्रकृतिः प्रयोक्तव्येति भावस्तथा प्रातिपदिकमात्रप्रयोगार्थमपेक्षा प्रातिपदिकार्थे प्रथमैव भवति तत्रापि प्रथमोपस्थितत्वात् एकत्वान्वितार्थकत्वादेकवचनमेव भवतीति भावः । तदेवाह—अतिक्रमेति । प्रातिपदिकमात्रमेव विवक्षमाणोऽपि वक्ता वा हि सर्वैरन्याभिधानवक्तव्यतया प्रथमां प्रतीक्षमाणा विभक्त्यादिसम्बन्धमपेक्षते प्रातिपदिकमात्रस्यार्थ्यं तत्र प्रथमाविभक्तिर्भवतीति विधायकं सूत्रं प्रमाणयति—प्रातिपदिकार्थेति । 20 ततोऽतिरिक्तेति तदतिरिक्तार्थस्य वाच्यत्वेनाप्रतीतेरिति भावः । अत एव प्रथमातिक्रमणे फलाभाव इत्याह—प्रथमेति । वचनमात्रस्य वचनान्तरापेक्षत्वात् नैकत्वादिसंख्याविशेषाभावात् सत्तामात्रार्थाभिधाने नैकविधत्वात् एकवचनमेवाभिधातुं योग्यतया तदतिक्रमे हेत्वभावादेकवचनमेव प्रयुज्यत इत्याशयेनाह—वचनस्येति वचनं कञ्चा विवक्षितत्वा नैकत्वसंख्यामात्रविवक्षेति भावः । एकवचनप्रयोगे सत्तामात्रार्थ एव केवलं हेतुरित्याह—सत्तामात्रार्थेति । अथ नपुंसके हेतुमाह—नपुंसकञ्चेति भवनञ्च इत्यादिना व्याख्यातमेव पूर्वम् । पुनरपि द्रव्यात् क्रियाया अन्यत्वं समर्थयति—25 तथेत्यादिनेति द्रव्यं कालत्रये स्थितत्वात् न कालत्रयं त्ववस्थितमपि क्रियासम्बन्धाद्भूतभविष्यद्वर्तमानाभिधेयो भवति तदेव त्रिकालविषयम् कालत्रयेऽपि तस्य भवनात् क्रिया तु वर्तमानेऽपि स्थित एव च कालत्रयमनुभवति तत एवैति त्रिकालं एककाल क्रियायाः कालत्रयानुभवनात् प्रत्यासत्ते भिन्नत्वेऽपि वर्तमानैकविषया भवतीति त्रिकालविषयद्रव्यात् द्रव्यात् वर्तमानविषया क्रियाऽन्या त्रिकालत्वादिति भावः । अनुमानमिदमुपन्यस्यति—त्रिकालविषयादिति कारकः क्रिया भाव इत्यर्थः त्रिकालत्वमस्य दर्शयति—अभूदिति भूतार्थस्य वर्तमानविषयत्वात् अभूत् भवः अत्र भूतत्वं च तावदत्र 30 एवं इत्यादिना अर्थावाप्तत्वात् क्रियात्वेन हि तावत्स्वभावानां भावेन सम्बन्धात् धातुवाच्या स्वार्थभूता तथाऽन्यथा क्रिया भवेदनुभवे कालत्रय च वर्तमानविषयोऽपि स्वाभाविकत्वेन सम्बन्धो न तु प्रत्ययवाच्योऽन्यथा च कालत्रयं त्रिकालत्वात् क्रियायाः कालत्रयमनुभवतीति त्रिकाला वा तथाविधक्रियाश्रयत्वेन द्रव्यं सम्बध्यते इत्यभिप्रायं द्रव्यं त्रिकालविषयमिति तथा

त्रिभिरपि कालैरभिसम्बन्धदर्शनात् भावस्य त्रिकालत्वं सिद्धत्वाद्धेतुः, द्रव्यं त्रिकालविषयमिति, भावस्य क्रिया भिन्नकालस्येऽप्येकरूपत्वात्, वर्तमानेनावच्छिन्नमात्रं तत्सम्बन्धे द्रव्यं त्रीनपि [कालान्] विषयीकरोतीति त्रिकालविषयमित्युच्यते त्रिष्वपि कालेषु तदेव भवतीत्यर्थः, अत्रिकालं द्रव्यं त्रिकालविषयमिति, क्रिया तु त्रिकालस्य वर्तमानविषयेत्युक्तं भवति, गमनगन्तृवदिति दृष्टान्तः, तद्व्याचष्टे वर्तमान एव देव 5 दत्त गन्तरि, एवकारोऽवधारणे, त्रिष्वपि कालेषु गन्तुर्वर्तमानैककालत्वमवधारयति गतेः त्रैकाल्ये गमनस्य त्रयोऽपि कालस्य अभयधारितैकरूपा दृष्टाः, तमिवर्तयति अगमत् गच्छति गमिष्यतीति तथाऽयम् [मि] सावितपनयो व्याख्यातार्थः ।

भावस्य द्रव्यात् पृथक्त्वासिद्धिवत् गन्तुर्गमनपृथक्त्वासिद्धेर्हि दृष्टान्तः साध्यैकदेश इति चेदुच्यते देवदत्तगमनयोः त्रैकाल्यात्रैकाल्यभेदसिद्धेः द्रव्यभावयोरपि तद्वत्, युगपदयु- 10 गपत्त्वस्वलपटवत् ।

भावस्यस्यापि परमतामङ्गा आग्यत भावस्य द्रव्यादन्यत्वेन तत्पृथक्त्वरकत्वेन च साध्यत्वाद्गमनगमनयोरेकार्थत्वात् द्रव्यात्पृथक्त्वासिद्धिवत् गन्तुर्गमनपृथक्त्वा[सिद्धे]र्हि[1] दृष्टान्तः साध्यैकदेश इत्येतस्मां विप्रतिपत्तावां कथं साधनमिति चेदुच्यते, देवदत्तगमनयोस्त्रैकाल्यात्रैकाल्य- भेदसिद्धेर्द्रव्यभावयोरपि तद्वदिति सामान्यविशेषयोः साध्यसाधनताभ्यां विवक्षितत्वाददोषः, तद्विशिष्टि- 15 स्थापनमपि तुल्यमेति, युगपदयुगपत्त्वस्वलपटवदिति दृष्टान्तः, तस्य भावः तत्त्वम्, तैरिव भवतीत्यर्थः, ननूक्तं द्रव्यभेदे द्रव्यार्थभागः, अभागोऽन्यथाभाव इति नैव दोषः युगपदयुगपत्त्वविशेषणात्, आत्मा-

'पतते भिद्यते वर्तं आत्मा तु न भिद्यते । पर्यायविशिष्टतात् पतत्येव भिद्यते च' इति, पर्यायपर्यायमपि विशेषपर- पररूपतत्पर्यायपदार्थस्यतदोषप्रसङ्गेन तथाभेदाद् अभेदेऽपपत्तिः । तमेव हि भावमात्मेनानुप्रविश्य वर्तनेन भिद्यते न तु सर्वमेति तत्त्वं । एतदेवाह भावस्येति भावस्य-क्रियायाः कालत्रयसम्बन्धेऽपि द्रव्यस्यैकरूपत्वमित्यर्थः तत्र 20 हेतुं दर्शयति-वर्तमानेनेति तत्सम्बन्धे-त्रिकालविषयत्वसम्बन्धे सति । तात्पर्यमाह-अत्रिकालमिति । दृष्टान्तमाह गमनगन्तृवदिति देवदत्तादि द्रव्यं वर्तमानैकरूपत्वादवधारितम् गमनादिक्रिया त्रैकाल्येन भावधारिता कालत्रयसम्बन्धा अगमत् गच्छति गमिष्यतीति एवं द्रव्यं भावश्च विज्ञेयमिति भावः । अथ गमनगन्तृदृष्टान्तो द्रव्यक्रियात्मतया साध्यैकदेश एव तयोर्भेदासिद्धेरतो दृष्टान्ता साध्य इत्याशङ्कते-भावस्येति । भावस्य हि द्रव्यादन्यत्वे अनन्यत्वं साध्यम् तत्र च विशेषं गन्तृगमनयोरिति यथा तदि द्रव्यार्थतायाम् भावस्य द्रव्यपृथक्त्वासिद्धिवद्गमनस्य गन्तृपृथक्त्वासिद्धिरिति दर्शनादि 25 स्यात्मतमिति । यद्येऽपि क्रिया गमनस्यापि विशेषणत्वं तयोरित्याह-भावगमनयोरिति अतो भेदासिद्धेः साध्यै- कदेश इति भावः । गन्तुर्देवदत्तस्य गमनस्य च विशेषत्वात् तयोश्च त्रैकाल्यात्रैकाल्यतो भेदः सिद्ध एवेति तद्वदेव द्रव्यभावयोरन्यत्वं साध्यत इत्याशयेन समाधत्ते-देवदत्तगमनयोरिति । सामान्यविशेषयोरन्यत्वे दृष्टान्तमाह-युगपदिति युगपत्त्वं च तत्सामान्यं सर्वेषामप्यर्थानामित्यतः सामान्यम् अयुगपत्त्वे च क्रमभावी विशेषः तयोरन्यत्वेऽपि यथान्यत्वं तथा गमनगन्त्रोर्द्रव्यभावयोश्चानन्यत्वमिति भावः तदिव-युगपदयुगपत्त्ववत् एव । अत्रापि दृष्टान्तधर्मि- 30 ण्यो उभयोर्भेदे द्रव्यार्थतया द्रव्यत्वं सर्वत्र विभक्तत्वेऽप्यन्यत्र अभावे वा दृष्टान्ताभावात् साधनमात्राभाव इत्याशङ्कते-ननूक्तमिति । समाधत्ते-युगपदिति सामान्यविशेषयोरेकत्वान्यत्वमिति न द्रव्यार्थतायां च भावान्तर इति भाव । द्रव्याद्यभावं दर्शयति-आत्मादीति । तस्यैव भेदं दर्शयति-द्रव्यात्मैव चेति । अन्यत्वं यतो द्रव्यार्थविशेषणत्वे

1 सि. क. हिष्टान्ता । 2 सि क. त्रैकाल्या । 3 सि क. तद्व ।

त्रिधर्मैक्यायुगपत्त्वं वा द्रव्यार्थास्याभेदत्वात् द्रव्यस्यैव वाऽयुगपत्त्वो घटः तथा त्रैकाल्यात्रैका-
ल्यवस्तुत्वम्यानन्यत्वे द्रव्यभावयोः ।

अथ मतं द्रव्यार्थाभेदत्वादस्य नयस्य द्रव्यार्थस्य च नित्यत्वात् कथमिदं प्रागभाव-
प्रध्वंसाभावात्मकं त्रैकाल्यम्, पूर्वापरकालतुल्यत्वात् द्रव्यार्थाभ्युपगमात् द्रव्यस्यैव वाऽत्रैका-
ल्याभ्युपगमे भावस्य द्रव्यार्थत्याग इत्यत्रोच्यते, प्रवृत्तिनित्यत्वात् नात्रापि द्रव्यार्थत्यागः,
वस्तुनो द्रव्यभवनात्मकस्योभयत्वादेव नित्यत्वस्यापि द्वित्वम् तदपि नित्यं यस्मिंस्तत्त्वं न
विहन्यत इत्युक्तत्वात् ।

अथेत्यादि, अथ मतं द्रव्यार्थाभेदत्वादस्य नयस्य द्रव्यार्थस्य च नित्यत्वात् कथमिदं प्रागभाव-
प्रध्वंसाभावात्मकं त्रैकाल्यम्, युज्यत इति वाक्यशेषः, नैवमाकारवस्तुना भवति तद्वर्तमानमित्युच्यते
तच्च प्रागभूतम्, यद्विनष्टमतीतं प्रध्वस्तम्, अभूतं यद्भविष्यति तदपि प्रागभूतमिदानीमभावात्,
मृत्पिण्डघटकपालादिदर्शनात् तच्च पूर्वापरकालतुल्यत्वान्नित्यस्य न युक्तम् न व्येतीति नित्यमिति
निरुक्तेः, तस्मात् सिद्धं भावस्य(?) त्रैकाल्यमं द्रव्यार्थाभ्युपगमात्, द्रव्यस्यैव वाऽत्रैकाल्याभ्युपगमे भावस्य
द्रव्यार्थत्याग इत्यत्रोच्यते न दोषः, प्रवृत्तिनित्यत्वात्—नात्रापि द्रव्यार्थत्यागः प्रवृत्तिनित्यत्वात् भवनं प्रवृ-
त्तिर्भाव इत्यर्थः, सा च प्रवृत्तिर्नित्या सदा प्रवृत्तेः वस्तुनो भावोऽपि नित्य एवेति न द्रव्यार्थत्यागोऽत्रै-
काल्यमिति । इतर आह—कुतो नित्यत्वस्य द्वैतमिति अत्रोच्यते वस्तुनो द्रव्यभवनात्मकस्योभयत्वादेव

वस्तुनाऽभिमतेन नित्येन भवितव्यम्, तस्मादत्र क्रिया चोभयमपि नित्यमेवेति कथं क्रियात्मकभावस्य नित्यस्य द्रव्यवत्
प्रागभावप्रध्वंसाभावात्मकत्वमुच्यते—अथ मतमिति । प्रागभावेति स्थितमानवर्तमानप्रतियोगिप्रागभावत्वं भूतत्वं वर्तमानप्रध्वं-
साभावप्रतियोगित्वमतीतत्वं भविष्यत्त्वम्, प्रारम्भापरिसमाप्तक्रियाधिकरणसमयत्वं वर्तमानत्वम्, इमानि च नित्यप्रतियोगिकानि क्रियासु
न सम्भवन्ति यथा पर्वताः तिष्ठन्ति नद्यः स्यन्दन्ते इत्यादौ सर्वदा ध्रुवाणामिति भावः । प्रकृतमेव स्पष्टयति—नैवमाका-
रेति यस्तूत्पद्यमानं वर्तमानं भवति तद्वर्तमानमित्युच्यते यतो हि प्रागभिव्यक्तमिदानीं भवतीति वर्तमान इति
यद्विनष्टं प्रध्वस्तं तदतीतं यथा घटस्य इदानीमभावात् यथाभूतं तद्भविष्यति यथा कपालादि तस्मादिदानीमपि नास्ति
एवमतीतभविष्यतोरभावरूपतया ततः प्रागितिरिक्तस्य द्रव्यार्थस्य नित्यस्य भावस्य तौ कालौ न भवत इति कथं त्रैकाल्यं युज्यत
इति भावः । एतदेव हेतुपूर्वकमाह—तच्चेति सर्वकालं तुल्यत्वेनावस्थानात् नित्यस्यैव न युक्तमिति भावः । नित्यस्यार्थं दर्शयति—
नेति यो न व्येति—विनाशं न याति तदेव नित्यम् न हि विनाशप्रागभावयोः कदाचिदपि प्रयोगोऽस्ति तस्मात्त्रिकालता नेति न त्रैकाल्यं
युज्यत इति भावः । अत्रैकाल्ये हेतुमाह—द्रव्यार्थेति । यदि द्रव्यमेवाभिमतं न तु क्रिया तर्हि भावे द्रव्यार्थता स्यात् भवेत्
क्रियाया अभ्युपगमाभावादाह—द्रव्यस्यैव चेति । समाधत्ते—न दोष इति तावतां प्रवृत्तिविशेषाणां सर्वेषामेव सर्वदाऽनुगम-
नित्यत्वात् तत्तत्प्रवृत्तिविशेषस्यानित्यत्वेऽपि प्रवृत्तिसामान्यस्यैव नित्यत्वात् द्रव्यार्थतायाः आहुश्च 'अभिधानैर्नित्यानां धातुः
कर्मार्थः क्रिया । एवमनेकविशेषस्य प्रवृत्तेः धात्वर्थत्वमिव च' इति प्रवृत्तिः कस्यापि नित्या न ह्यत्र कदाचिदपि अभिधानमनि
वृत्तेर्भावत्वेन वर्तते वा भावत्वेन वर्णितव्यम् अपायेन च युज्यत इत्युक्तेन भावेः सदा प्रवर्तनात् वस्तुनो भावोऽपि
नित्य एवेति त्रैकाल्यं द्रव्यार्थत्वाऽनेकस्योपपद्यत इति भावः । एवं प्रवृत्तिनित्यता प्रकारान्तरतो नेति द्रव्यमेवाभिमतं
द्विविधमिति प्रकारान्तरेण समर्थयति—कुत इति । नित्यता क्रियानित्यत्वेऽपि सर्वत्र नित्याभ्युपगमोऽयुक्तः यदि च
इतरे तदुपलभ्यमानम् एकत्रैकाल्यपरामर्शदर्शनेन तथा नित्यत्वमेवेति द्विविधं नित्यत्वमेवाश्रयेन समाधत्ते—वस्तुन इति ।

---

१ क xx । २ सि क. पठान्मात् । ३ सि. ऋदुर्थल । ४ सि क च दुर्विनमिन्नम् ।

नित्यत्वस्यापि स्थित्या सिद्धम्, यथा भाष्यकारेणोक्तं 'नहि ध्रौव्यमिच्छामि यावत् तदपि हि नित्यं यस्मिंस्तत्त्वं न विहन्यते' (महाभा० अ० १ पा० १ आ० १) इत्युक्तत्वात् ।

इदानीमपि वस्तु प्रदर्श्यते—

कूटस्थस्य द्रव्यस्य सर्वप्रभेदनिर्भेदस्य बीजभूतस्य गमनस्थानादिसर्वात्मकत्वेनावस्थित-
5 स्यानन्तमात्मानं पर्यनुभवतस्तदर्थानुभवनात्मत्वादेव द्रव्यकौटस्थ्यं युज्यते, इतरस्य तु तथा-
तथाऽभिव्यज्यमानस्य सततप्रवर्तनात्मनो भावस्याकौटस्थ्यं सततसंप्रवृत्तिरूपं नित्यत्वम् ।

कूटस्थस्येत्यादि, द्रव्यं हि कूटस्थं नित्यं पूर्वापरकालानुस्यूतत्वात् तस्य कूटस्थस्य द्रव्यस्य सर्वप्रभे-
दनिर्भेदस्य बीजभूतस्य गमनस्थानादिसर्वात्मकत्वेनावस्थितस्यानन्तमात्मानं पर्यनुभवतस्तदर्थानुभवना-
त्मत्वादेव द्रव्यकौटस्थ्यं युज्यते, इतरस्य तु भावस्य तथातथाऽभिव्यज्यमानस्य पर्यनुभूयमानस्य क्रमेण
10 युगपद्वा सततप्रवर्तनात्मनो भावस्य प्रवृत्तेरकौटस्थ्यं सततसंप्रवृत्तिरूपं—अव्यवच्छिन्नप्रवर्तनात्मकं नित्य
त्वमपि नित्यत्वस्यापि स्थित्यमिति साधूक्तम् ।

अत एव भूताभूतभावत्वं द्रव्यादिधर्म्यभेदात् प्रवृत्तेरन्यत्वकारि, भूताभूता क्रिया, द्रव्यं
भवदेव व्यतिक्रान्त्यव्यतिक्रान्तिभावत्वात् यथा कृतः कटो देवदत्तेन, कृतः कर्मणा विभागः
तत्र विभागः कटकर्तृचलनात्मकस्य कर्मण ईप्सिततमत्वात् कर्म, चलनेन देशान्तरं प्रापयित्वा
15 क्रियत इति सा व्यतिक्रामति, विभागः कर्म च न व्यतिक्रामतः शब्दार्थस्य पिण्डितत्वात्, न
च व्यतिक्रमो निर्निमित्तो भवितुमर्हतीति, दृष्टश्च वर्तमानयोः कर्मविभागयोर्द्रव्ययोरव्यतिक्रमे
करणस्य व्यतिक्रमः ।

अत एवेत्यादि एतस्मादेव नित्यत्वद्वित्वादन्यदिदमपि कार्यं भूताभूतभावत्वं द्रव्यादेर्धर्म-
भेदात् प्रवृत्तेरन्यत्वकारि—द्रव्यादन्यो भाव इत्यस्यार्थस्य साधनं—द्रव्यविलक्षणो भाव इत्यत्र हेतुरित्यर्थः,
20 भूताभूता क्रिया द्रव्यं भवदेव—भूता वर्तमाना च क्रिया द्रव्यं वर्तत एवेत्यर्थः, अथ वा भूतं द्रव्यममूर्तं

तथैव महाभाष्ये विशिष्टोक्तेः भावयति—यथा भाविति । महाभाष्ये तूक्तम् अथवा नैतदेव नित्यलक्षणम् ध्रुवं कूटस्थ
मविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्ययोगि यत्तन्नित्यमिति तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते' इति, तदनुरोधेन
भावेऽपि क्रियायामव्यवस्थितेऽपि न नित्यत्वं विहन्यत इति भावः । अयोगमनमिदं नित्यत्वं दर्शयति—कूटस्थस्येति ।
25 द्रव्यं हीति यथा हि घटे वर्तिष्यमाणे एव स्थास्यति भवति, स्थास्यन् एव गमिष्यति भवति, गमिष्यन् एव शयिष्यते भवति, न एव
च घटो भवति घट एव कपालानि भवन्ति कपालानि च शर्करा भवन्ति तत्र भविष्यत्स्वप्यवस्थास्वन्वये घटु वै बीजरूप
संसारं प्रभेदानुभवति, एवमत्र देवदत्तादिभ्यो तिष्ठति गच्छति आस्ते शेते करोति पचति पठति इत्यादि चेष्टां तदेव
गमनस्थानादिभावमनुभवदेवद्रव्यमेकमवस्थितमिति तत्स्वरूपं कूटस्थनित्यत्वं दर्शितमेव भावः । देवदत्तस्य च द्रव्यस्य किंचि क्रिय-
न्तस्य यथाविध्यवस्थानतया गमनस्थानादिप्रवृत्तिरूपेण भावः सततसंप्रवृत्तिलक्षणनित्यत्वस्य भवति तदपेक्षया-
30 इतरस्य स्थितिरिति । अतश्च क्रियाः प्रवाहनित्यत्वं तत एव क्रिया भूताऽपि अभूतापि तत्र इत्यादिको भावो भूताभू-
भावत्वादेवमपि हेतुः द्रव्यधर्मादन्योऽत्र—अत एवेति । व्याख्याने—एतस्मादेवेति । क्रियानुप्रवृत्तत्वप्रभूतत्वाद्व-
द्धिरव्यवच्छिन्नत्वाच्च क्रियायामेव अन्यत्वलक्षणा प्रवृत्तेर्नित्यत्वात्, न तु लक्षणे नित्ये द्रव्ये तत्तदन्यत्व इत्यत एव
भूतेति । यथासंख्यमिति, व्यतिक्रान्त्यव्यतिक्रान्तिभावत्वात् भूताभूतत्वे व्यतिक्रान्तत्वाद्भूतत्वं वर्तमानत्वमित्यर्थः । द्रव्यक्रिया

करण स्थित गतश्च यथासंख्य व्यतिक्रान्तव्यतिक्रान्तविभागत्वात्क्रिया क्रिया द्रव्यभावः तद्यथा कृतः कटो देवदत्तेन, देवदत्तः कटकरणकाले करणोपरमे च कटस्यैकरूप एव, क्रिया तु वीरणसंयोगावस्थाया-मव्यतिक्रान्त्वा कटनिर्वृत्त्युत्तरावस्थायां व्यतिक्रान्ता, तथा कृतः कर्मणा विभाग इति द्वितीयमुदाहरणम् कर्तृकर्मसमवायित्वात् क्रियायाः पैचिमिरिमत् वैयाकरणसिद्धान्तेन तु 'कर्तुरीप्सिततमं कर्म' (पा० अ० १ पा० ४ सू ४९) क्रियैव तु वैशेषिकस्य, शुद्धाविशेषण विभागहेतुः क्रिया विभागश्च 5 सम्बन्धमुपरमात् द्रव्यवदवस्थित इति विवक्षितस्य विभागः कटकर्तुभक्तमात्मककस्य कर्मण ईप्सिततम स्यात् कर्म, चैकेनेन द्रव्यं देशान्तरं प्रापयित्वा क्रियत इति सा क्रिया व्यतिक्रामति विभाग कर्म च न व्यतिक्रमतः, सम्बन्धार्थस्य पिण्डितत्वात्—नामत्वादित्यर्थः। न च कर्मातिक्रमो निर्निमित्तो भवितुमर्हति, दृष्टस्य वर्तमानयोः कर्मविभागयोर्द्रव्ययोरव्यतिक्रमे करणस्य क्रियायाः विभागविषयस्य व्यतिक्रमः।

न चैकस्मिन् व्यतिक्रमाव्यतिक्रमौ युगपद्भवतो विरोधात् तस्मादेतदनुमीयते—देवदत्ते 10 द्रव्ये कटस्य कर्तरि कर्मणि वा कर्तरि चलने वीरणानां कटे वा कर्मणि करणलक्षणया प्रवृत्त्या तदतद्भवनस्वरूपया द्विरूपतया भवितव्यमविच्छेदेन।

(नचेति) न चैकस्मिन् व्यतिक्रमाव्यतिक्रमौ युगपद्भवतो विरोधात् प्रमाणान्तरापेक्षामन्तरेण,

योर्व्यतिक्रान्ताव्यतिक्रान्तत्वे दर्शयति—तद्यथेति कटोदाहरणे वीरणसंयोजनादिक्रिया भेदरूपता भाव्या। कर्तृकर्मभवपत्-क्रियया निदर्शयति—कृत कर्मणेति। पचिमिरिमदिति अभिमतापचाद्यपसर्गेत्पाद्यक्रियाया कर्तृसमवायित्वम् 15 धात्वादिभेदनक्रियायास्तु कर्मनिष्ठत्वमभिमतमाश्रित्यं कर्तृसमवायित्वं द्वैधीभावात्त्वात् कर्मभूतकाष्ठसमवायित्वम्, एवमेव कृतः कर्मणा विभाग इत्यत्रापि कर्तृदेशान्तरप्रापणक्रिया कर्तृभूतकर्मगता विभजनक्रिया कर्मभूतविभागगता विज्ञेया। विभागस्य व्याकरणसिद्धान्तेन कर्मत्वं दर्शयति—वैयाकरणेति। कर्तुरीप्सिततमं कर्मेत्यस्य कर्तृक्रियायाऽऽप्तुमिष्टतममप्राप्त-प्रकारेभ्यश्चेत्यस्य कर्म भवतीत्यर्थः कर्ता क्रियया आप्तुमिष्यमाण कर्मेति भावः तत्र कर्म तत्प्रधानमभूतं द्रव्यं वा भवतु क्रिया वा न तत्राग्रहः 'क्रिया हि नाम लोके कर्मेत्युपचरन्ति यां क्रियां करिष्यति किं कर्म करिष्यतीति तथा 'क्रियापि 20 क्रियेप्सिततमा भवतीति' महाभाष्ये प्रोक्तत्वादिति। वैशेषिकमते तु क्रियैव कर्मेत्युच्यते द्रव्यगुणकर्मेत्यादौ कर्मपदेनोत्क्षेपणा-दिक्रियाया एव विवक्षितत्वादित्याशयेनाह—क्रियैव स्थिति। अस्य कर्मपदेन विवक्षितं दर्शयति—शुद्धाविशेषेणेति विभागस्य हेतुभूतं तदेवात्र कर्मेत्युच्यते तदविशेषेण क्रियाऽपि विभागोऽपि भवति कटपर्यन्तं क्रियाभावादसावुपरमेण तदभावस्य द्रव्यस्याभावात्, कुतश्चिद्धि भावो द्रव्यवत् प्रवर्तत इति व्यवस्थितेति भावः। कृतः कर्मणा विभाग इत्यत्र विभागक्रियायां कर्मत्वं व्यक्तिता विभागतरिक्तयोः व्यतिक्रमाव्यतिक्रमाव्यतिक्रान्तत्वं प्रदर्शयति—विवक्षितस्य विभाग इति 25 व्यवस्थितिमाग इत्यर्थः कटकर्तुः चलनात्मकं कर्म तेनेप्सिततमो विभाग तत्कर्म भवति स च विभाग कर्तृभूतेन चलनेन कर्मैव द्रव्यं देशान्तरं प्रापयित्वा क्रियत इति विभागकर्मकर्तृसमवायिनी क्रिया व्यतिक्रमति कटनामन्तरं मुपरमात् विभागत्वात् कर्मभूता द्रव्यागमतया क्रिया न व्यतिक्रमतीति भाव। कर्मविभागयद्वाव्यविभागजाते तदव्यतिक्रमे च प्रमाणं दर्शयति—न च व्यतिक्रम इति द्रव्यादिव क्रियायाः द्रव्यागमात्क्रियायोऽपि भिन्नत्वात्तस्य च भवनलक्षणादात्मलाभाय क्रियात्वाय व्यतिक्रमत्वं युक्तमेव यदा च तदा व्यतिक्रमो द्रव्यात्मानात्कर्मविभागसद्भावे, स्योरनमित्तो पवनस्येति भावः। 30 यत एव कर्मैव कर्तृत्वे तस्य व्यतिक्रमाव्यतिक्रमौ विरुद्धौ धर्मौ प्रमाणान्तरेण न भवेताम्, तस्मात् कर्मविभागव्यतिकरत्वं व्यतिरेकमनुमिनाति—न चैकस्मिन्निति तथा च कर्मणि करणस्य व्यतिक्रमे कर्म भूतं भवति कल्पनाऽभूतम्, द्रव्यं तु तत्तद्भवनस्वभावतयाऽविच्छिन्नतया भवत्येवेति तत्र करणं प्रवृत्तो भिन्नं भवतीति भावः। एतदेव विवृणोति—न चैकस्मिन् व्यति-

१ मि क दर्शित/ क्रिया। २ सि क. पचिमिरिमिन्। ३ क ××। ४ क. व्यतिक्रमाव्यतिक्रमो। ५ सि/क. च निमित्तो।

तस्मादेतदनुमीयते तद्यथा देवदत्ते द्रव्ये कर्तृस कर्तरि कर्मणि वा कर्तरि चक्रमे कीरपानो कटे वा कर्मणि करणसम्बन्धया प्रवृत्त्या भवितव्यमविच्छेदेन, सा च प्रवृत्तिः क्रिया तदवकूजनसरूपा—तस्मिंश्च द्रव्येऽवस्थिता करणे भवनमस्याः प्रवृत्तेः स्वरूप तया च [व्यतिक्रमा] व्यतिक्रमविभागतया द्विरूप-तयाऽर्थद्वयमव्यवच्छिन्न[ा]नुवृत्त्या प्रवृत्तिमनादिनिधनया भवितव्यमिति ।

5 यथा देशान्तरसंयोगविभागफलं कर्म गमनं गन्तुः पदार्थान्तरम्, तयोः सत्कारणस्य च कर्मणो यावद्द्रव्यभावाभावात् पदार्थान्तरतायां सत्यां गन्तुर्गमनेन सम्बन्धः गच्छति देवदत्त इति, व्यतिलंघितगमनश्च गत इत्युच्यते, तथा गमनाद्यपि करणसम्बन्धमन्तरेण न भवतीति क्रिया सिद्ध्यति अतो नित्यं स्वतत्त्वात्, यदि स्वतत्त्वस्याभयो न स्यात् कर्मेति न स्यात्, क्रियमाणाच्च तत्कर्म करणव्यतिक्रमे च कृतमिति न स्यात्, तथाभवन्ना स्वसम्बन्ध-
10 व्यतिक्रममन्तरेण कृतमित्येत व्यपदेशं न जनयेत् करणसम्बन्धाभावात्, आकाशादिवत् तथा च तन्मयकर्मसत्त्वात् करणसम्बन्धाच्च सदसत्कारणमिति नित्यं स्यात्, सत्कारणवन्नि-त्यमिति नित्यलक्षणयोगात् ।

यथा [देशान्त]रसंयोगेत्यादि, इदमधुना गन्तृगमनदृष्टान्तयोरभिहितमवगतार्थम्पि कयोश्च भागुरुत्वतत्त्वतानभ्युपगमे दोषाभिधित्सयोच्यते, 'संयोगविभागाः [च] कर्मणाम्'
15 (वैशे० अ० १ आ० १ सू० ३०) कार्य सामान्यम्, 'गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम्' (वैशे० अ० १ आ० १ सू० २९) कार्य सामान्यमिति वचनात् देशान्तरसंयोग द्रव्यस्य देशान्तरविभागश्च गमनकर्माऽऽरभते गुरुत्वादिकार्यमुत्क्षेपण कर्म तस्मात् संयोगविभागफलं कर्म गमनं गन्तुः पदार्थान्तरम् तयोः संयोगविभागयोः तत्कारणस्य कर्मणो यावद्द्रव्यभावाभावात्, वैशेषिकमतवत् पदार्थान्तरतायां सत्यां गन्तुर्गमनेन सम्बन्धः, तत्सम्बन्धमन्तरेण गमने [न] भवति गच्छति देवदत्त

20 कर्मेति । देवदत्त इति देवदत्तेन कटः इव इत्यत्र देवदत्ते द्रव्ये कर्तरि कटे कर्मणि [illegible] विभागः [illegible] कर्तरि च करणेन भवितव्यम्, तत्र कर्तृ द्रव्ये [illegible] व्यतिक्रमात्मविभागमविभागमविच्छिन्न[illegible] भाव । [illegible] तत्र नित्यं [illegible]—यथेति । [illegible] देशान्तरेति । अत इति, [illegible] विभा-[illegible]—स्वतत्त्वादिति [illegible]
25 इ [illegible] भावः । [illegible] भाति । [illegible]—इदमधुनेति । संयोगेति [illegible] गुरुत्वेति [illegible] । एवं [illegible]
30 इत्याह—देशान्तरेति । [illegible] तयोरिति [illegible] न [illegible] तस्माद्गमनं कर्म [illegible]

1 सि [illegible] । 2 सि क. [illegible] । 3 सि क. [illegible] ।

इति हि गमनसम्बन्धात् दृष्टम्, व्यतिक्रमितगमनश्च गत इत्युच्यते, तस्मात्तद्व्यतिक्रममन्तरेण गतमिति न भवति, एष विधिः कर्मविशेषे गमने दृष्टः, तथा गमनाद्यपि करणसम्बन्धमन्तरेण न भवतीति क्रिया सिध्यति यतो भिन्न स्वतत्त्वात्–कर्मत्वात् द्रव्याच्च [यदि] कर्मत्वस्य स्वतन्त्रसाश्रयो न स्यात् कर्मेति न स्यात्, क्रियमाणाद्धि तत् कर्म करणे सति, करणव्यतिक्रमे च कृतमिति स्यात्, कर्मणि तु भिन्ने द्रव्यात् स्वतत्त्वाच्च स्यादिति, तथा भवत्येत्यादिना करण भवदपि स्वसम्बन्धव्यतिक्रममन्तरेण कृतमित्येव 5 व्यपदेशं न लभेत् स च दृष्टः, किं कारणं न स्यादिति चेत् करणसम्बन्धाभावात्, किमिव? आकाशादिवत्, ततः किं स्यात्? तथा च तद्भूतकर्मसत्त्वात् करणासम्बन्धाच्च सदसत्का[रण]मिति नित्यं स्यात् नित्यलक्षणयोगात्, किं नित्यलक्षणमिति चेदुच्यते 'सदकारणवन्नित्यम्' (वैशे० अ० ४ आ० १ सू० १) इति नित्यलक्षणं वैशेषिकमतेनेति, एव तावत् कर्म गमनादि करणसम्बन्धाद्भवतीत्युपपादितम् । 10

यथा च कर्म क्रियया विना न भवति तथा करणमपि भवनव्यक्तिमन्तरेण नैव भवेत् तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात् ततश्च प्रागादिनिर्विशेषणः नास्त्यभाव इत्यविशेषेणैवात्यन्ताभाव एव स्यात्, न भवेदेव सर्वम्, खपुष्पवत् असत्कारणत्वाद्वा अभूतभवनसम्बन्धव्यतिक्रमत्वात् ।

यथा च कर्मेत्यादि, यथा च गमनादिकर्म क्रियया विना न भवति तत्कृतिविना तथा 15 करणमपि भवनव्यक्तिमन्तरेण–भवनक्रियाविर्भावेन विना नैव भवेत्–न भवितुमर्हतीत्यर्थः, तथा भवनसम्बन्धव्यतिक्रममन्तरेण भूतमिति न स्यात्–तत्सम्बन्धे भवतीति भवति, तत्सम्बन्धव्यतिक्रमे च भूतमिति पूर्वपूर्वोत्तरोत्तरकार्यकारणभावेनेति क्रियासम्बन्धप्रश्नं च मर्शयति, ततश्च प्रागादि

यदा द्रव्ये सम्बन्धेति तदैव देवदत्तो गच्छतीत्युच्यते तदुपरमे च गत इत्युच्यते तस्मात् क्रियायाः प्रवर्तमानत्वे गति शब्दोऽन्तरं वाच्य इति भावः । एवं भवनमपि करणसम्बन्धेन भवतीत्याह–तथेति तथा च करणं क्रियातो द्रव्यतश्च भिन्न 20 मिति भावः । क्रियाऽऽत्मानुभूयमानं हि कर्म तस्मात् भिन्नं कर्मत्वतत्त्वम् तदैव कर्मत्वमुच्यते तदन्य यदि कर्म कर्मत्वाश्रयो न स्यात् कर्मैव तत्साहाय्या कर्मैव न स्यात् नियमभावात् एवं च कर्म क्रियासम्बन्धात् भवति तद्व्यतिक्रमे च कृतमिति भवतीति क्रियातो द्रव्यतश्च कर्म भिन्नमित्याह–यदि कर्मत्वस्येति । कर्मणि भवत् करणं स्वसम्बन्धेन तत्र कर्मव्यवहारं व्यतिक्रमेण च कृतमिति व्यवहारं जनयतीत्याह–करणं भवदपीति । आकाशादौ करणसम्बन्धाभावात् कृतमिति व्यपदेशो न भवति तथा तत्सम्बन्धाभावे कर्मणोऽपि कृतमिति व्यवहारो न स्यादित्याह–आकाशादिवदिति । तथा चापत्तिमाह–तथा 25 चेति करणसम्बन्धाभाव इत्यर्थे क्रियाजन्यकर्मणः सद्भावात् पुनः करणसम्बन्धाभावात् तस्ये सदकारणवत्त्वादित्यर्थं कर्मणः नित्यत्वं प्रसज्यतामिति नित्यलक्षणयुक्तत्वादिति भावः । अथ कर्मैव क्रियाया अपि भवनमन्तरेणासम्भवात् तस्य अपि भवनमावश्यकम्, तस्माच्च भवनसम्बन्धतद्व्यतिक्रमाभ्यां भवति भूतमिति व्यपदेशतामिति दर्शयति–यथा चेति निर्देशस्य सामान्यमन्तरेणासम्भवादिति भावः । एतदेव स्फुटीकरोति–यथा च गमनादीति । किं करोति इति प्रश्ने गच्छतीति गमनं करोतीति प्रतिवचनात् गमनक्रियासामानाधिकरण्यं यथा करोतेः तथा किं करोतीति प्रश्ने न करोति 30 किञ्चिदपि इति भवनक्रिया प्रतिवचनतया वा कश्चित् किञ्चित् कुर्वाते यथा भवाऽऽस्तेऽऽस्तेति प्रतिवचनाच्च करोतेर्भवन क्रियासामानाधिकरण्यात् करणस्यापि भवनं सिद्ध्यतीति भावः । पूर्वपूर्वेति यथा कर्म करणं कर्मणि च भवनं कारणमिति

---

१ सि क. व्यक्तो । २ सि. क. न स्यात् । ३ सि क. तथ दृष्टम् ।

निर्विशेषत्वं इत्यादि भवनसम्बन्धे व्यतिक्रमे च्यवति प्राक्पश्चादितरेतरसंयोगाद्यभावाभावात् अभावभेदरहितो भावाभावः इत्यनर्थान्तरमिति विशेषैकान्ताभाव एव स्यात्, भवनसम्बन्धव्यतिक्रमाभावात्, खपुष्पवदिति, यथा खपुष्पं भवनसम्बन्धाभावात् व्यतिक्रमाभावाच्च न भवेदेवं सर्वं घटादि स्यादिति, असत्कारणत्वाच्च—यथा हि वस्तुनो भवनकारणं योऽसौ भवनसम्बन्धो भवन-
5 सम्बन्धश्च स नास्ति व्यतिक्रमो वेत्यसत्कारणभावाभावकारणत्वात् सम्बन्धाभाव एव स्यात् खपुष्पवत् सर्वं घटादि वस्तूपसंहारे हेतुमाह—अभूतभवनसम्बन्धव्यतिक्रमत्वादिति, गतिस्थितिक्रियादिकरणभवनसम्बन्ध-व्यतिक्रमसद्भावात् गच्छति तिष्ठति करोति भवति गतस्थितकृतभूतभावात्मकं देवदत्तवस्तु भवदुपलभ्यते [न] अन्यथेति ।

साम्प्रतं भवनस्य तत्त्वसंभूतस्य [न] व्यतिक्रम इत्यत्रोच्यते—

10 व्यतिक्रमश्च भवति गुणकर्मादौ कृतविभागप्रविभजनभूततायां, गुणं कृतो भवति गमनकर्म विभागो भवति संयोगस्यान्येनेति कथं गुण कृतो भवति, कर्म विभागो भवतीत्येत-दुच्यते? ननूक्तं द्रव्यं क्रिया च द्रव्यमेव सर्वमिदमिति, तस्य भूतता व्यतिक्रमः ।

(व्यतिक्रमश्चेति) व्यतिक्रमश्च गुणकर्मादौ—गुणकृत्स्नादीनां कर्म गुणकर्म, आदिग्रहणात्

नहि गमनक्रिया कर्तारं कर्म करणादि विना भवतीति भावः । भवनसम्बन्धाद्युत्पत्तीति भवनसम्बन्धव्यतिक्रमाच्च कर्म भूतमिति
15 व्यपदिश्यते तत्र भवनसम्बन्धात्, पूर्वं प्रथमतः भवनसम्बन्धे भावः भवनसम्बन्धव्यतिक्रमे च पश्चाद्भावी भवति तत एव च क्रिया भूता भवति भविष्यतीति [illegible] भवनसम्बन्धे यदि क्रियाया नोपेत्यते तर्हि [illegible] एव प्रसज्यते योऽप्यभावः [illegible] स एव न तु प्रागभावादिरूपः भवनसम्बन्ध [illegible] अपेक्षया तद्व्यतिक्रमे [illegible] भवनसम्बन्ध इति अभावभेदरहित—अभावान्त-रभेदैः रहितः [illegible] एव स्यादित्यर्थः । एवञ्च भावसंभवाभावात् सर्वं घटादि खपुष्पवत् [illegible]
20 यथा खपुष्पमिति । हेत्वन्तरमाह—असत्कारणत्वाच्चेति तत् [illegible], [illegible] हि भवनसम्बन्धः [illegible] नहि क्रियाया भवनस्य वा [illegible] तस्मात् कारणाभावात् सर्वं घटादि न भवेत् खपुष्पमिति भावः । अथान्ते हेतुमुपसंहरति—अभूतेति । वस्तुनः भवन-भवनसम्बन्धव्यतिक्रमौ निदर्शयति—गतिस्थितिक्रियादीति, देवदत्तो गच्छति तिष्ठति करोतीति [illegible] भवनस्य [illegible] गत स्थितः कृत इति [illegible] भूत इति भवनसम्बन्धव्यतिक्रमे एव एव देवदत्तो भवानुपलभ्यते,
25 तत्र तत्सम्बन्धव्यतिक्रमाभावे देवदत्तोऽप्यसन् भवेदिति [illegible]

[illegible]

---

१ सि क. [illegible] । २ सि क. [illegible] । ३ सि क. [illegible] । ४ सि. क. [illegible] ।

संयोगः यथासंख्य कटविभागादिभवनमूलतायां—अत्राप्यादिमहणात् पटविभागसंयोगादयो गृहीताः, भवनस्य मूलतायामेवभवनस्य भवति व्यतिक्रमः, तृण कटो भवति, गमनकर्म विभागो भवति संयोगप्राप्त्येन, साम्प्रत कथ तृणं कटो भवति कर्म विभागो भवतीत्येतदुच्यते इति, अत्रापि ननूक्त द्रव्य क्रिया च द्वयमेव सर्वमिदमिति, संयोगादिसर्वगुणक्रियात्वप्रतिपादनात्, तस्य भवनस्य मूलता व्यतिक्रम एव । 5

एषश्च भावक्रियामयोऽयं कारकाणां कर्मादिभावः न नियतरूपः, न हि किञ्चित्स्वाति विशेषयोगात् नियतम्, किं तर्ह्यनियतशक्तिविषयम् तदेव हि द्रव्यमन्यया क्रियया कर्म भवति, अन्यया करणमन्ययाऽधिकरणमित्यादि, तस्मात् सर्वप्रभेदनिर्भेदं बीजं वस्तु द्रव्यं तत्त्वम्, तद्भेदिभवनव्यक्तिक्रिया ।

एषश्चेत्यादि, एवंकृत्वा भावक्रियामयः—भाव एव क्रिया, द्रव्यं भावः स एव च क्रिया, 10 द्रव्यस्य वा क्रिया तदात्मयः द्रव्यभवनात्मकोऽयं कारकाणां कर्मादिभावः कर्मकरणादिभावः न नियत रूपः विविधक्रियाभवनसम्बन्धाद्भवति देवदत्तः पचत्योदन काष्ठैः स्थाल्याम्, ओदनो भवति, काष्ठानि ज्वलन्ति—संधुक्षन्ति स्थाली धारयति अधिश्रित[।] इत्येवमादिदर्शनात्, न हि किञ्चित्स्वातिविशेषयोगात् गोत्वादियोगवदिवत् कर्मत्वकरणत्वाधिकरणत्वादियोगात् कर्मैवेदं करणमेवाधिकरणमेव नियतं साम्प्रतपि

एतो भावः यथासंख्यमिदमस्य तृणकर्मसंयोगाभ्यां कटविभागादिभवनम् तन्तुकर्मसंयोगाभ्यां पटविभागसंयोगादिभवन- 15 मित्यर्थं एवम तृणसंयोगात् कटो भवति तृणकर्मैव कटविभागाः तन्तुसंयोगात् पटः तन्तुकर्मैव पटविभागाः तन्मूलां वैयाम्यरसंयोगस्येति व्यतिक्रमने तृणादौ प्रवृत्तिप्रवाहो व्यतिक्रम्य इदानीं व्यवहारैव तस्य भवनादिति भावः । अथ द्रव्यमिदं द्रव्यं कर्म कटो भवति तदभावे वा कथं कर्म विभागो भवतीत्याशंक्य भावाभावपदार्थाभावान्मात् सर्वत्र- भेदनिर्भेदबीजभूतात् क्रियात्मका वर्तिपठितान्यादीनां रूपतास्मना मूलक्रियारूपीभावादिभ्यश्चे कर्मादित्वादिति समाधत्ते- यायमतमित्यादिना । द्रव्यकरणान्तभवनलक्षणद्वैतस्यैव द्रव्यं नानाकर्म भवतीत्याह—एवश्चेति । भावक्रियामय 20 इत्यस्य व्याख्यानेमाह—भाव एव क्रियेति अनेन सामान्यविशेषक्रियोरभेदं दर्शितम्, द्रव्यं भाव इति अनेन द्रव्यक्रियोरनन्यत्वं दर्शितम्, द्रव्यस्य वेति अनेन द्रव्यक्रियोरन्यत्वं दर्शितम् । तात्पर्यमाह—द्रव्यभवनेति द्रव्याणि क्रियाभवनलक्षणविरेव कारकं धावतीति नोच्यते किन्तु द्रव्यस्य तत्समत क्रियाभवनत्वानुपपत्त्या भवनादिरूपैव तत्त्वं नान्यमिति कविरेव साधनम्, तत्र कर्तृकर्मणोः स्वभावसमवेतक्रियाश्रयत्वा करणादीनामाश्रयान्तरसमवेतक्रियाश्रयत्वा किञ्च द्रव्यस्य कारकत्वे तदेकत्वेन कर्मत्वेनिक्रियानुपपत्तिः इत्यते च यदि पस्य अनेन कथमाह यदे कार्यं निर्देशितवाद्यो कर्मत्वेनि- 25 त्वम् सर्वस्य च सर्वकारकत्वेन क्वचित् कदाचिदिच्छया तदपि क्रियाभेदकार्योत्पत्तिः क्वचित्कर्तृत्वादिद्रव्यस्यापि एको भवादपरमिति धावकत्वेन व्यवहारः पचिपठिभवतोरभेदस्यापि दत्वात् यथा करोतीत्यादी च पचेरपि द्रव्याभावतया तदन्तरत्वेन इति भावः । देवदत्त इति देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्यादावाभेदेनैव पचतेर्धातोः सर्वकारकव्या- पारत्वेनाभिमतक्रियाव्यापाराभिधायी धातुरिति दर्शितम् । अथ कर्मादिभूतानामपि व्यापारविशेषेषु कर्तृत्वं प्रदर्शयति- ओदनो भवतीति अत्र कर्मैव कर्ता भवन काष्ठानि ज्वलन्ति काष्ठानि पचिक्रियाकरणान्यपि स्वव्यापारे ज्वलने कर्तृत्व 30 त्वात् कर्तृणि, स्थाली धारयति, पचिक्रियाया अधिकरणमपि स्थाली स्वव्यापारे धारणे कर्तृत्वात् कर्त्रीति कर्मादीनि न नियत- त्वानीति भावः । गोत्वद्रव्यत्वादिवत् कर्मत्वादीनि न प्रतिनियतजातिरूपाणि नैव कर्मत्वादी करणत्वादयो न नैयत्यमिति- यत्नेनाह—न हि किञ्चिदिति । यदि कर्मत्वादयो न जातिरूपास्तर्हि क्रियात्मका इत्यत्राह—अनियतेति क्रियाश्रयत्वविरेव

---

१ क अनोदनत्व इत्यधिकं दृश्यते ।

भवतीति, किन्तर्हि ? अनियतशक्तिविषयम् शक्तीनां कारकत्वात्, तदेव हि द्रव्यमन्यया क्रियया प्रमाणि मेत्रमिति मेत्रापि कर्म भवति, अन्यथा करणं नेत्रेण पश्यतीति, अन्यथाऽधिकरणं नेत्रे काजलं तिष्ठतीति, तस्मात् सर्वप्रभेदनिर्भेदं बीजं वस्तु द्रव्यं तस्य तद्विभवनशक्तिः क्रिया ।

यदि द्रव्यवत् क्रियापि वस्तुनस्तत्त्वं स्यात् ततस्तया विना नैव स्यात् तत्त्वात्तदात्मत्वात्तद्-
5 रसवत्त्वात् न तत्त्वेन विना भवति देवदत्तवाक्शक्तिवत्, घटरूपादिवत्, दृष्टैवत्वगमनादि क्रियया विनापि देवदत्ताख्यं वस्तु, अन्तरेणापि तु क्रियां भवत्येव वस्तु दोषादर्शनात् ततोऽन्यत्, तदन्तरेणापि भावात् यद्यदन्तरेणापि भवति तत्ततोऽन्यत्, घटपटवत् ।

यदीत्यादि, एवमनिष्टतो दोषो यदि द्रव्यवत् क्रियापि वस्तुनस्तत्त्वं आत्मा स्वरूपं स्यात् ततस्तया विना- क्रियया नैव वस्तु स्यात्, तत्त्वात्तदात्मत्वात्तद्रसत्वात्, यद्यस्य च आत्मा स्वरूपं
10 वा न तत्त्वेन विना भवति देवदत्तवाक्शक्तिवत्, यथा देवदत्तस्य वाक्छक्तयोऽवस्थाविशेषाः क्रमभाविनो न तेन विना भवन्ति तथैवापि वस्तु क्रियया विना न स्यात्, घटरूपादिवदिति घटस्य रूपादयो युगपद्भाविनस्तेन विना न भवन्ति तथा क्रियया विना तद्वस्तु न स्यादिति विशेषः दृष्टैवत्वगमनादि क्रियया विनापि देवदत्ताख्यं वस्त्विति अनिष्टापादनमेतत्, दोषादर्शनादपि वस्तु भवतीत्येतद्दर्शयन्नाह– अन्तरेणापि तु क्रियां भवत्येव वस्तु तस्य विनाभावे दोषादर्शनात्ततोऽन्यत् क्रियातोऽन्यद्वस्त्विति यदि
15 यत्तदन्यत् न केवलं दोषादर्शनादेव, किं तर्हि ? अन्यत्वहेतुरप्यस्तीति, तत आह–तदन्तरेणापि भावात्, यद्यदन्तरेणापि भवति तत्ततोऽन्यत् घटपटवत्, यथा घटः पटमन्तरेण भवन्नन्यः पटश्च घटमन्तरेणापि भवंस्तस्याऽन्यः, तथा क्रियामन्तरेणापि भवद्वस्तु ततोऽन्यदिति ।

तथिदर्शनान्तरं विचारान्तरापत्तमभ्याह——

दृश्यते हि देवदत्ते गच्छति वृत्तिं करोति यज्ञदत्त इति, अत्र यज्ञदत्तस्य वृत्तिकरणं
20 गमनं देवदत्ताख्यस्यैववस्तुनो द्रव्यपरमार्थः तथा क्रियापि स्यात्, गमनवत्क्रियात्वात् स्थानमपि

कारकत्वं कर्मत्वादयोऽपि कर्तुरीप्सिततमं कर्मेत्यादि [illegible] शक्तिविशेष एव [illegible] इदं [illegible] भावः । तत्र निदर्शनमाह–तदेव हि द्रव्यमिति । तदेवं द्रव्यमित्यत्र [illegible] दर्शयति–तस्मादिति । अथ [illegible] दोषमादर्शयितुमाह–यदीति । [illegible] घटभेदे क्रियायाः द्रव्यस्य [illegible] क्रियया विना [illegible] द्रव्यं न भवेत्, यथा क्रमभाविनां [illegible]
25 [illegible] द्रव्येण विना न तत्त्वम्, यथा च युगपद्भाविनां रूपादीनां [illegible] विना [illegible] न क्रियया विनापि देवदत्ताख्यं [illegible] तस्याद्भवेव [illegible]–यदि द्रव्यवदिति । [illegible]–यथेति । [illegible] भावि [illegible] घटस्य इति । विशेष इति [illegible] युगपद्भाविनस्तेन विना इति भावः । अन्तरेणापि त्विति क्रियामन्तरेणापि द्रव्यस्य [illegible] भावः । तस्या विना भाव इति क्रियया विना द्रव्यस्य भाव इत्यर्थः । तदन्तरेणापि द्रव्यसिद्धौ [illegible]–तदन्तरेणापीति ।
30 क्रियामन्तरेणापीत्यर्थः । [illegible] निदर्शनान्तरमाह–दृश्यते हीति [illegible]

---

१ १ ० सि. क. दोषदर्शं । २ सि. क. [illegible] । ३ सि. क. [illegible] ।

परमार्थ इति प्रागेव स्थानक्रियया गमनविरोधिन्या यदि देवदत्तोऽवरुद्धः स्यात्तत्र तस्य गमनं नैव स्यात्, देवदत्तस्यावरुद्धदेशे यज्ञदत्तस्यवत्, गमनक्रियापरमार्थदेवदत्तस्य वा स्थानं नैव स्यात्कदाचिदपि, गमनेनावरुद्धत्वात्, देवदत्तस्यावरुद्धे यज्ञदत्तस्यवदेवेति यानस्थानयो रभावाद्यज्ञदत्तस्य वृत्त्यवृत्ती स्याताम्, यानाभावात्तावत् पूर्ववद्वृत्तेर्यज्ञदत्तवृत्त्यभावः, देवदत्तस्य वा गमनकालेऽपि भावे सततमवृत्तिर्वा स्यादिति, एवं स्थानाभावादपि तथेति । 5

(दृश्यते हीति) दृश्यते हि 'देवदत्त गच्छति' वृत्तिं करोति यज्ञदत्त इति, अत्र यज्ञदत्तस्य वृत्तिकारणं गमनं देवदत्तस्य वस्तुनो द्रव्यपरमार्थस्तथा क्रियापि स्यात्, गमनवत्क्रियात्वात् स्थानमपि परमार्थ इति प्रागेव स्थानक्रियया गमनविरोधिन्या यदि देवदत्तोऽवरुद्धः स्यात्तत्र तथाऽवरुद्धत्वात् तस्य देवदत्तस्य गमनं नैव स्यात्—कदाचिदपि न गच्छेद्देवदत्त इत्यर्थः, देवदत्त[स्य]ावरुद्धदेशे यज्ञदत्त[स्य]वत्, यथा देवदत्तस्य वस्तु देवदत्तेनावरुद्धमिति तद्विरोधिनो यज्ञदत्तस्य स्थान[illegible]यज्ञदत्तस्य 10 नैव जातु भवति तथा देवदत्ते स्थानेनावरुद्धे गमनं नैव जातु स्यादिति, अथ मा भूद्यज्ञदत्तवृत्तिकारणस्य देवदत्तस्य गमनस्याभाव इति गमनवत्त्व एव देवदत्त इष्यते तथापि गमनक्रियापरमार्थदेवदत्तस्य [वा] स्थानं नैव स्यात्कदाचिदपि, गमनेनावरुद्धत्वाद्देवदत्तस्य, देवदत्तस्यावरुद्धे देवदत्ते यज्ञदत्तस्यवदेव, इत्यभिप्रेतो हेत्वर्थे, ततश्च हेत्वोर्यानस्थानयोरभावात्, यानाभावात्तावत् पूर्ववद्वृत्तेः—यथा प्रागगमनोत्सर्ग-ममासत्त्वाद्वृत्तिभावः तथा गमनाभावात्[illegible]पि देवदत्ते यज्ञदत्तवृत्त्यभावः, देवदत्तस्य गमनकालेऽपि 15 भावे यथा यज्ञदत्तस्यावृत्तिर्भवत्येव सततमवृत्तिर्वा स्यादिति, एवं स्थानाभावादपि वृत्त्यवृत्ती स्याताम्उक्त-न्यायेन तथेति—तेन प्रकारेण प्रोक्तोपपत्तिक्रमप्रापिताभावप्रकारेण यानस्थानयोरिति ।

तथैव यज्ञदत्तस्य वृत्तिर्देवदत्तस्य गमने सत्येव भवति [illegible], तथा च तत्र यज्ञदत्तस्य वृत्तेः कारणं देवदत्तस्य गमनमेव [illegible] तत्र गमनं यदि देवदत्तद्रव्य[illegible] स्यात्, गमनात् प्राक् देवदत्तस्य स्थितिक्रियापि देवदत्तद्रव्य[illegible] तथा क्रियया देवदत्तस्यावरुद्धत्वात् तस्य गमनं कदापि न भवेत्, गमनविरोधिन्या 20 स्थितिक्रियया तस्यावरुद्धत्वात्, देवदत्तेनावरुद्धे देवदत्ते यज्ञदत्तस्य तद्विरोधिनोऽवकाशाभाववत् [illegible] देवदत्तस्य कदाचित् गमनं [illegible] स्थितिरतः [illegible] न देवदत्तपरिस्पन्दो भावः । [illegible] यज्ञदत्तस्येति, तथा [illegible]-[illegible] देवदत्तसर्व [illegible] । [illegible] स्थानमपि [illegible] तदपि देवदत्त[illegible] [illegible] देवदत्ते गमनविरोधिस्थानक्रियाऽभावः इति तस्य कदापि गमनं न स्यादिति[illegible]-[illegible]विति । [illegible]-देवदत्तस्येति । स्थानेन स्थितिक्रियया पूर्व[illegible] । गमनवत्त्व एव यदि देवदत्तस्तदा स्थितिस्तस्य कदापि न भवे- 25 दित्याह—अथ मा भूदिति । [illegible] देवदत्तस्य स्थितिभावः स्थितिरूपस्य गमनाभाव [illegible] [illegible]—ततश्चेति । देवदत्तस्य यानाभावात् यज्ञदत्तस्य वृत्त्यवृत्ती तावदुपपादयति—यानाभावादिति देवदत्तस्य पूर्ववृत्ते यथा हि तस्य गमनात् पूर्वं वृत्तिरासीत् तथैव गमनकालेऽपि देवदत्तस्य स्थितिक्रिया[illegible]-[illegible] स्यात् देवदत्तस्य गमनकालेऽपि यज्ञदत्तस्य [illegible] तर्हि सततं [illegible] स्यात् देवदत्तस्य [illegible] देवदत्त[illegible] भवेतामिति भावः । एवं स्थानाभावादपि यज्ञदत्तस्य 30 [illegible]—एवं स्थानाभावादपीति तथैव देवदत्तस्य [illegible] यज्ञदत्तस्य वृत्त्यवृत्ती भाविते ।

---

१ सि क °दपेव । २ सि. क. जातु । ३ सि क °त्वावृत्ति । ४ सि. क. °वृत्ति । ५ सि क °भावतात । ६ सि. क. °वृत्तभावा । ७ सि क °देवदत्त । ८ सि ड. °नापेक्षपि ।

तथा गमनारम्भकत्वादस्य देवदत्त एवास्य वृत्तिनिमित्तमिति यावद्देवदत्तं वृत्तिप्रसङ्गः, तदारम्भत्वात् तत्काळ्यवत्, तस्य गतिपरमार्थस्यावस्थानाच्च, स्थित्यारम्भकत्वाद्वाऽस्य गच्छत्यपि देवदत्ते यज्ञदत्तावृत्तिरेव सदा स्यात्, स्थानकाळ्यवत्, एवं तावद्देवदत्तगतिस्थितिविषययज्ञदत्तवृत्त्यवृत्तिविचारद्वारेण दोष उक्तः। इदानीं यज्ञदत्तवृत्त्यवृत्तिविषयोऽपि विचारस्तथैव कर्तव्यः, अत्रापि यदि द्रव्यपरमार्थवदित्यादिग्रन्थो यावद्वृत्त्यवृत्ती यज्ञदत्तशब्दोच्चारणेन यथासम्भवं योज्यः, प्रकारान्तरेण तु यज्ञदत्तवस्तुस्वरूपवद्वृत्त्यवृत्तिक्रिययोः तदव्यतिरिक्तत्वात् देवदत्तयानस्थानयोरपि तदव्यतिरेकाद्यावद्देवदत्तगमनस्थानञ्च वृत्तिरेवावृत्तिरेव वा स्यात्, विरोधिनः क्रियान्तरस्याभावात् पूर्ववत्।

तथा गमने इत्यादि, गमनस्थानभावाभ्युपगम्यापि दोष उच्यते, तत्र गमने तावद्यदा देवदत्ते गच्छति वृत्तिरस्य तदा तदारम्भकत्वाद्यावद्देवदत्तं वृत्तिप्रसङ्गः, यदा देवदत्तगमनकाले यज्ञदत्तस्य वृत्तिहेतुर्देवदत्तो गमनारम्भत्वात् तदा यावज्जीवमारम्भको यावदायुर्यज्ञदत्तवृत्तिहेतुरेव स्यात्, गमनारम्भत्वात् तत्काळ्यवदिति, तस्य—देवदत्तस्य गतिपरमार्थस्यावस्थानाच्च—देवदत्तस्य गमनात्मनः पूर्वोत्तरकालतुल्यत्वात्, अवस्थितिपरमार्थमाह—देवदत्त एवास्य वृत्तिनिमित्तमिति इतिशब्दो हेत्वर्थे, यतो देवदत्तो गमनात्मैव तस्मात् सततं वृत्तिप्रसङ्गः, एवं तावद् स्थानविरोधिन्या गतेर्भावेऽभिहितो दोषः गतिविरोधिन्याः स्थितेर्वा भावे स्थित्यारम्भकत्वाद्वाऽस्य—देवदत्तस्य गच्छत्यपि देवदत्ते यज्ञदत्तावृत्तिरेव सदा स्यात् स्थानकाळ्यवदेवदत्तस्य[illegible]मिति, एवं तावद्देवदत्तगतिस्थितिविषययज्ञदत्त[वृत्त्य]वृत्तिविचारद्वारेण दोषा उक्ताः, इदानीं यज्ञदत्त[वृत्त्य]वृत्तिविषयोऽपि विचारस्तथैव कर्तव्यः अत्रापि यदि द्रव्यपरमार्थवदित्यादिग्रन्थो [यावत्] वृत्त्यवृत्ती यज्ञदत्तशब्दोच्चारणेन यथासम्भवं योज्यः प्रकारान्तरेणापि तु यज्ञदत्तादि यावत् वृत्तिरवृत्तिर्वा यज्ञदत्तद्रव्यात्म हि वस्तुस्वरूपं वृत्त्यवृत्तिक्रिये च तदव्यतिरिक्ते ततो देवदत्तयानस्थानयोरपि देवदत्ताव्यतिरेकात्तद्यावद्देवदत्तगमनस्थानयोरिति वृत्तिरेवावृत्तिरेव वा स्यात्, यज्ञदत्तवत्, विरोधिनः क्रियान्तरस्याभावात् पूर्ववत्।

अथ उक्त गमनस्थानारम्भकत्वमभ्युपेत्य दोषमाह—तथा गमनारम्भकत्वादिति देवदत्तस्य गमनारम्भकत्वे यदा गच्छति यज्ञदत्तस्य वृत्ति आरम्भकत्वात् तदा तदारम्भकत्वेऽपि वृत्तिप्रसङ्गेन यावद्देवदत्तं यज्ञदत्तस्य वृत्तिरेव भवेत्। तदारम्भक-तत्काळ्यवदिति यज्ञदत्तस्य यथा वृत्तौ हेतुमाह—तस्य देवदत्तस्येति। व्याचष्टे—यतो देवदत्त इति। देवदत्त-स्थित्यारम्भकत्वे [illegible] यज्ञदत्तस्य [illegible] गच्छत्यपि [illegible] यज्ञदत्तस्य [illegible]—स्थित्यारम्भकत्वाद्वेति। [illegible] देवदत्तगमन यज्ञदत्तवृत्त्यारम्भमभ्युपेत्य देवदत्तस्य [illegible] यज्ञदत्तस्य [illegible] विचारित। अथ यज्ञदत्त-वृत्तिर्देवदत्तगमने आरम्भमभ्युपेत्य यज्ञदत्तस्य [illegible] देवदत्तस्य [illegible] मोक्षेऽपि [illegible]—[illegible]मिति। पूर्वग्रन्थयोजनामेवमाह—यथापीति अत्र यदि द्रव्यपरमार्थो यज्ञदत्तस्य वृत्ति [illegible] [illegible] [illegible] देवदत्तोऽसत् [illegible] तस्य वृत्तिरेव स्यात् [illegible] देवदत्तवत् वृत्तिविचार-णार्थं यज्ञदत्तस्य [illegible] स्यात् [illegible] [illegible] यज्ञदत्तस्य [illegible] देवदत्तगमनयोरिति [illegible] गमनस्थाने [illegible] [illegible] पूर्ववदेव [illegible] गमनाभावात् यज्ञदत्तस्य वा वृत्तिरवृत्तिरपि स्याद् [illegible] एव वा स्यात्, एवमारम्भकत्वपि तथा तथा [illegible] यज्ञदत्त एवास्य वृत्तिनिमित्तमिति यावद्यज्ञदत्तं [illegible] [illegible] तत्काळ्यवत्, तस्य स्थितिपरमार्थस्यावस्थानाच्च। गत्यारम्भकत्वाद्वाऽस्य वृत्तिमत्यपि यज्ञदत्ते देवदत्तस्थानमेव सदा स्यात्

१ सि. क. [illegible], [illegible] [illegible] [illegible]। २ सि. क. [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। ३ सि. क. °[illegible] ।

तस्मादेतेन क्रियाया अपि नित्यत्वमित्याह—

तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थस्याद्भवनमेवेदं गतिवृत्तिस्थित्यादि, सततसंप्रवृत्तिरूपभवनात्मकत्वादतो द्रव्यं क्रिया चोभयं नित्यं भावः ।

(तदतदिति) तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थस्यात्—तद्भवनमतद्भवनञ्च सकलैकदेशापायतदतद्भवनम् [तद्भवनं] यावत्स्थितमवस्थादिविषयं पुनःपुनर्भवत्येवेति, अतद्भवनं स्थानाद्गमनं 5 गमनाच्च स्थानमिति, तदतद्भवनं भवनसहिते ते एव स्थानगमने, तथा वृत्त्यवृत्ती, तयोरविच्छेद आत्मा यस्याः प्रवृत्तेरविच्छेदात्मिका सा तदतद्भवनाविच्छेदात्मकप्रवृत्तिः, तस्या अपि नित्यत्वं तदकूटस्थ—कूटस्थद्रव्यनित्यत्वविलक्षणं तद्भावात्—तदतद्भवनाविच्छेदात्मकप्रवृत्तिनित्यत्वस्याकूटस्थस्याद्भवनमेवेदं गतिवृत्तिस्थित्यादि—एता यानस्थानवृत्त्यवृत्त्यादिकाः परस्परविरोधिन्यः क्रियाख्या एता भवनमेव, सततसम्प्रवृत्तिरूपभवनात्मकत्वात् भवद्भवनविलक्षणं नित्यञ्च प्रवृत्तिभवनमेवैतदभिन्नं क्रियामात्रमतो 10 द्रव्यं क्रिया चोभयं नित्यं भावः ।

साम्प्रतं क्रियाभेदाभावाद्भेदज्ञानव्यवहाराभावः स्यात्, तद्भेदे भेदज्ञानं भेदव्यवहारश्चेत्से-तत्राप्युक्तम्—

तस्माद्भेदज्ञानव्यवहारौ तु शब्दभेदद्रव्यप्रवृत्तितत्त्वानुरूप्यात्, शक्तिमतो द्रव्यस्य

तद्विषयत्वादिति योजना कार्येति प्रतिभाति । तदेवं यानस्थानयोर्व्यवहारयोः सततभवनस्य द्रव्यव्यतिरिक्तस्य क्रियाया अपि 15 व्यवहारो नित्यत्वमिति निगमयति—तदतद्भवनमेवेति तत्रापि च तदतती भवनं च भवनं च भवने तत्र तदेवैका तदतती च ते भवने च तदतद्भवने तयोरविच्छेद आत्मा यस्याः सा तदतद्भवनाविच्छेदात्मिकेत्येवं समासं दर्शयन्नाह—तद्भवनमिति तथाविधस्थानभवनपरम्परा तद्भवनम्, यथोत्पत्तिप्रभृत्यविनाशं स्थानाद्भवनं भवनम् तद्भवनप्रकारोऽनुभूयमानप्रकारस्थानाद् भेदात् उत्पत्तिप्रभृत्यविनाशात् तदनुभवात्प्रमाणम् यावत्तत्र प्रतीयमानत्वाद्भवनमवस्थितमस्या अत एव च तस्याः स्थान-समयाः समनुभवति भविष्यतीति । अतद्भवनञ्च विनाशोऽभवनपरम्परा यथा स एव देवदत्तः क्वचित्तिष्ठति क्वचिदुपविशति 20 दुर्गच्छति पुनस्तिष्ठतीति विलक्षणक्रियाभवनपरम्परेत्याशयेनाह—तद्भवनमिति । तथा वृत्त्यवृत्तीति क्वचिद्वृत्तिर्वे-त्यादौ क्वचिन्नवृत्तिः देवदत्तादेर्वानस्थानान्यतरमिति भावः । तदेवं तथाविधस्थानयानविषये मानानामनुभवं भवनप्रतिपत्ति-मनुभवतो विनाशतथाविधस्थानपरम्परा भवनसामान्यतद्रूपप्रतिपत्त्यनुभवत्वं प्रतिनियतैः निरन्तरमविच्छेदः अत एतत्स्थानादीनां यथावस्थं परस्परप्रतिविशेषलेन वस्तुता दृश्यन्ति तदविच्छेदात्मकानुभवेन प्रवर्तते नित्यत्वं भवनस्य-मर्वाभिप्रायेणाह—तयोरविच्छेद इति भवनस्थानादीनां क्रियाविशेषाणां विनाशेऽपि प्रवृत्तिसामान्यस्य भवनभवनस्याविच्छेदादित्यर्थम्, यद्यपि भवनमपि प्रतिक्षणमन्यदेव तथापि तद्वृत्तिवर्गो न विरम्यत इति भावः । कूटस्थेति, कूटस्थेनैक-रूपस्थायिना सततस्थं संसर्गवर्गतपरिणामविलक्षणविरहितं द्रव्यं तथाविधद्रव्यनित्यत्वविलक्षणं क्रियाया नित्यत्वमिति भावः । एताश्च यानादिक्रियाविशेषाणां भवनसामान्यात्मकत्वं सामान्यविशेषयोरभेदाभिप्रायेणाह—भवनमेवेदमिति । भवद्भिति भवद्भवनं—द्रव्यभवनं तस्मै विलक्षणमित्यर्थः । प्रतिक्षणविनाशेऽप्यभिन्नं भवनं क्रियामात्रमतो द्रव्यं क्रिया चेत्युभयं मूर्तं प्रतिक्षणपुनर्भवति—अभिन्नमिति । ननु क्रियाभेदमन्तरेण गच्छति तिष्ठति वर्तते न वर्तत इत्येवं क्रियाभेदज्ञानं 30 व्यवहारश्च कथं ज्ञातिसाङ्कर्याभ्यां प्रयत्नव्यापार एव भेदाद् नार्थभेद इतीतीह प्रस्तावे—तस्माद्भेदज्ञानेति ।

---

१ सि. क. व्यवहार । २ सि. क. तथापि । ३ सि. क. तदतद्भवनविलक्षणं ।

शक्तयो युगपद्भाविन्यो रूपरसादयः क्रिया एव, गमनस्थानादिक्रियास्तु क्रमभाविन्यः, विभक्तापि च तासां शक्तीनां यथानुरूपं प्रतिविषयनियतप्रत्यायनवृत्तित्वात्, रूपादिद्रव्यप्रविभक्तवृत्तिभेदमिवैकेन्द्रियग्राह्यत्ववत्, नियतप्रवृत्तिविशिष्टवस्तुभागाभिनिवेशिभिरभिधानैः सर्वस्य वस्तुरूपस्याभिधातुमयोग्यत्वात्, यथा देवदत्तो गच्छतीत्यादौ देवदत्तशब्दो गत्यादीन् नोपादत्ते न वा व्युदस्यति तथाऽऽख्यातमपि देवदत्तादीन् नोपादत्ते न वा व्युदस्यति क्रियांशविषयनियतशक्तित्वात्, तदेवं द्रव्यसत्त्वांशनियतशब्दप्रवृत्त्यनुपातमयं भेदप्रत्ययः।

(तस्मादिति) तस्माद्भेदज्ञानव्यवहारो तु गच्छति तिष्ठति [illegible] करोति [illegible] वा न वेति शब्दभेदो शब्दभेदद्रव्यप्रवृत्तित्वानुरूप्यात्—शब्दो भेदो यथा द्रव्यप्रवृत्तेः सा शब्दभेदद्रव्यप्रवृत्तिः शब्दोऽन्यो द्रव्यात्, प्रवृत्तिः क्रिया गुणोऽपि क्रियेति प्रागुक्तम्, रूपरसगन्धस्पर्शभेदायाः प्रवृत्तेः शब्दभेदा [द्रव्य]
10 प्रवृत्तिरन्या तस्मात्तस्य धर्मान्तर्धर्मित्वादिरूपं तदानुरूप्यात् शब्दभेद[द्रव्य]प्रवृत्तित्वानुरूप्याद्भेद ज्ञानं भेदव्यवहारश्च भवति शक्तिमतो द्रव्यस्य शक्त्यो युगपद्भाविन्यो रूपरसादयः क्रिया एव, गमनस्थानादिक्रियास्तु क्रमभाविन्यः, यथोक्तं 'शक्तिमात्रासहायस्य विश्वस्यानुगतकर्मणः। सर्वदा सर्वथा भावात् क्वचित् किञ्चिद्विवक्ष्यते' ॥ (वाक्य का १) इति विभक्तापि च तासां

द्रव्यप्रवृत्तिरन्या अन्या च शब्दप्रवृत्तिरित्याभेदात्—शब्दो भेदो यथा इति, भिन्नत्वप्रतीतिरपि द्रव्यम् तत्र शक्ति
15 [illegible] पूर्वमुक्तम्, ततश्च द्रव्यं सर्वसर्वात्मकमिति स्थितम्, [illegible] [illegible] द्रव्यमेवाभिधत्ते, न सर्वसर्वात्मकं द्रव्यम् [illegible] यथा शब्दो [illegible] [illegible] [illegible] भेदव्यवहारश्च भवतीति भावः। प्रवृत्तिः क्रियेति प्रवृत्तिः क्रिया नाम इति पूर्वं वर्णितम्, [illegible] गुणादेः क्रियात्वमेवेति भावः। तस्मात्तत्त्वमिति, तस्य [illegible] भेदः [illegible], [illegible] वा [illegible]
20 [illegible] 'घटे न वर्णो विद्यते' [illegible] न वेति लोकवत्, भेदव्यवहारो भेदज्ञानञ्च [illegible]। [illegible] एषोऽपि [illegible] विशेषोऽभिधान [illegible] इति [illegible] [illegible], यथा न सर्वं वाक्यमर्थमेव [illegible] [illegible] तेषां [illegible] राज राजानं राज्ञा राजनीत्यादौ राज [illegible] न स्यात्, [illegible] एवं [illegible] [illegible], अत एव [illegible] [illegible] एवमेवोऽपि [illegible] अभिधेया एव, यथाऽभिहितमन्यत्र,
25 [illegible] [illegible] वाक्यार्थः [illegible] वाक्यार्थं [illegible] [illegible] अत एव च इति [illegible] [illegible] मीमांसकोऽपि [illegible] [illegible] तदेवं [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इव [illegible] इत्यपि बोध्यम्। [illegible] [illegible]
30 [illegible] अत्र [illegible] 'शक्तिमात्रासहायस्य विश्वस्यानेककर्मणः' इति अन्यत्र च 'शक्तिमात्रासहायस्य [illegible]' इति [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible]। [illegible] [illegible]—विभक्तापि चेति [illegible] [illegible] भवति [illegible]

1 सि क 'माहितदर्शनात्।

शक्तीनां यथानुरूपं प्रतिविषयनियतप्रत्यायनवृत्तित्वात्—सत्यपि सर्वसर्वात्मकत्वे द्रव्यार्थनयस्य यथोत्तम कपटलक्षणपक्षे चक्षुरादिसूक्ष्मीभावाकारप्रत्यायने नियता वृत्तिरनाम्नात्र, रूपादिद्रव्यशक्तिप्रवृत्तिभेदनियते-न्द्रियग्राह्यत्ववत्, शब्दशक्तिप्रवृत्तिभेदाभेदैर्ज्ञानव्यवहारावित्यर्थः, तद्व्याचष्टे नियमप्रवृत्तीत्यादि, नियमप्रवृत्तेः क्रममात्या विशिष्टो यो वस्तुभागस्तद[भि]निवेशिभिरभिधानैः सर्वस्य वस्तुरूपस्याभिधातुं शब्दैरयोग्यत्वा-दिति, तमिदर्शयति—यथा देवदत्तो गच्छतीत्यादि यावत न भुङ्क्ते इति गतार्थम्, यथाऽऽदर्शयत्पीत्यादि तद्वदेव गतार्थं यावत् क्रियांशविषयनियतशक्तित्वादिति, नामाख्यातयोर्नियतवस्तुभागाभिनिवेशित्वादिति तदेव कारणं तदनुपात्यं भेदप्रत्यय इत्युपसंहरति, द्रव्यशब्दत्वसनियतशक्तिप्रवृत्त्यनुपाति भेदज्ञानमित्यर्थः ।

तथैव गतिस्थितिवृत्त्यवृत्त्यादिभेदव्यवहाराः, सर्वभेदपर्यनुभवार्थत्वाभिलप्रवृत्तेः, याऽसौ सततसम्प्रवृत्तिः सा सर्वान् गमनादीन् भावभेदान् पर्यनुभावयामि द्रव्यमिति प्रवर्तते, यदि ताबानुभवेत् ततो न ते स्युः, तेनापर्यनुभूयमानत्वात्, खपुष्पवत्, सर्वप्रभेदनिर्भेदं बीजं द्रव्यमिष्यते तच्च द्रव्यं न स्यात् भेदापर्यनुभवनात् खपुष्पवत् ।

(तथैवेति) तथैव गतिस्थितिवृत्त्यवृत्त्यादिभेदव्यवहाराः सर्वभेदपर्यनुभवार्थत्वाभिलप्रवृत्तेः, याऽसौ सततसम्प्रवृत्तिः सा सर्वान् गमनादीन् भवनभेदान् पर्यनुभावयामि द्रव्यमिति प्रवर्तते, यदि तावन्नानुभवेत् क्रियाभेदांस्तान् द्रव्यं ततो न ते स्युः तेनापर्यनुभूयमानत्वात् खपुष्पवत्, सर्वप्रभेदनिर्भेदं बीजं द्रव्यमिति चेष्यते, तच्च द्रव्यं न स्यात्, भेदापर्यनुभवनात् खपुष्पवत्—यदं तद्द्रव्यं बीज स्याद्यदि तान् भेदान् पर्यनुभवेत् ।

स्यात्—यथाऽनन्तरोक्तैर्भवत्यसम्भो गत्यादीन् नोपादत्ते न च भुङ्क्ते, नियतत्वाच्छक्त्यप्र-वृत्तीनां प्रवृत्तत्वाच्च तथा वस्तुनापि देवदत्तेन गत्यादयः किमनुपादाय भुक्ताः ? नेत्युच्यते विशेषः—

स्यान्मतं विरोधित्वादित्यनैकान्तिकमभावप्रसङ्गात्, गतेरभावो गत्या विरुध्यते प्रका शाभावेनेव तमसा प्रकाशः स्वमतेनेव, स्थित्या विरोधवत् खपुष्पादिना गत्यभावेनापि विरोधस्तत्र तद्विरोधित्वात्तदविनाभावात्, खपुष्पादेर्वा भावत्वमेव स्यात् गतिविरोधित्वात् [15] स्थितिवत्, एवं सति कुत एतद्भावविषयमेव, अभावविषयमेवैतदिति कुतः ? इति ।

यदीति गतिश्चाभ्युपगतस्थितेरभाव इत्याह—स्थितेरिति । पक्षद्वयं प्रदर्शयति—यद्वेति । तत्र प्रथमपक्षे दोषमाह— अवस्तुकत्व इति, विवक्षापूर्विका हि शब्दप्रवृत्तिः तत्र यदि स्थितिरवस्तु तर्हि तत्र विवक्षाऽनुदयेन शब्दप्रवृत्तिर्न स्यादिति भावः । एतदेव स्फुटयति—यद्यवस्तुविषयमिति, गतिनिवृत्तिर्विषयाभावात् तदवस्तुत्वात् स्थितिशब्दोऽनभिधानं भवेत् तेन काककासितामिवदनर्थकमिति भावः । ननु अभावोऽपि अवस्तु [illegible] निवृत्तिरूपत्व तस्मात् अपि [20] [illegible] कथं [illegible] स्यात् इत्याशङ्क्य [illegible] अपि अर्थे ज्ञानं यस्मात् करोति हि । इति तदभावाभिधानं स्थितिशब्दस्य इत्याशयेनाह—काककासितामिववदिति । अथ द्वितीयपक्षे दोषमाह— अथ द्रव्यमात्रमिति यदि स्थितिशब्दस्य द्रव्यमर्थस्तर्हि तस्य गतौ स्थितौ वैकल्यात्प्रत्यक्षपि स्थितिशब्दाभिधानं प्रवर्तेतेति भावः । विशेषाभावाच्चेति यच्चासौ द्रव्ये यच्चस्थितस्य एव प्रयोगस्तो न तु स्थितिविषय इत्यत्र [illegible] । उपसंहरति—एवमिति तथैव स्थितेर्भावमभावमात्ये दोषदर्शनाच्च गत्यभावं स्थितिः किन्तु गतिविरोधिभावविषय एवेति भाव । [25] अथ गतिस्थित्योर्भावत्वे परस्परतोऽप्यस्तं च दर्शयति—अवस्तु त्वस्यापि अत्र मूले [illegible] । अथ गतिस्थि त्योर्भावेन द्रव्याविरोधाद्भवनम्, तथा भवनस्य गतिस्थित्यात्मन एव गतिस्थित्योर्विरोध उपपद्यते, अतो विरोधा विरोधाद्भवनत्वं गतिस्थित्योरपि न स्थितिर्भाव एव तदित्यर्थाभावादिति भाव । अथ विरोधित्व तयोर्न उपपद्यते भावाभावयोरेव विरोधात् एवं हि प्रकाशाभावस्यैव तमसा प्रकाशस्य विरोधः यथैव स्थित्या विरोधवत् खपुष्पादिनापि विरोधोऽस्ति तस्मा देवमभिविरोधस्यापेक्षया गत्यभावेनाभावत्वेन विरोधो [illegible] अस्ति हि [illegible] इति [30]

---

१ सि. क्ष. भावस्थानभ्यु । २ सि. क्ष. °भावमिति । ३ सि. क्ष. विरोधिभावाभावस्थितिः । ४ सि. क्ष. °भवनाद्यर्थेन ।

स्यादिति, यदि स्तम्भवत् विरोधित्वादित्येवमनैकान्तिकमभावमसङ्गात्, गतेरभावो गत्या विरुद्धत्वे प्रकाशाभावेनेव तमसा प्रकाशः, यथा स्तम्भत्वेनेव—ननु प्राग् गतिरेव क्रियान्तरप्रादुर्भावेनाभिव्यक्ति नीयमाना भाव एवेत्युक्तम्, तत्र स्थित्या विरोधवत् खपुष्पादिना गत्यभावेनापि विरोधः, तत्र तद्विरोधित्वात्तदविनाभाव इति गतिरभावाविनाभाविनी स्यात्तद्विरोधित्वात्, यच्च यद्विरोधि तत्तेना-
विनाभावि दृष्टम्, यथा गतिः स्थित्या, खपुष्पादेर्वा भावत्वमेव स्यात्तद्विरोधित्वात् स्थितिवत्, एवं तदविनाभावित्वे सति कुत एतद्भावविषयमेव एतदभिधानं स्थितिरिति, खपुष्पादिरभावविषयमेवेतरदिति वा कुतः ? विशेषो वाऽत्र वाच्य इति ।

अत्र ब्रूमो यद्यभावोऽपि भावेनाभावेन वा भावो विरुध्यते तावुभौ भावावेव तर्हि, विरोधित्वात् यत्किञ्चिद्देशतः कालतो वा, गत्यभावमात्रविषयत्वे चानुपपद्यमानस्थितिर्गति-
निवृत्तिरिति स्यात् तथा च कल्प्यमानायामनुपपद्यमानस्थिता गतिस्थित्याद्येकभवनाविनाभूतद्रव्यविनाशविषयं स्थानमित्यभिधानं स्यात्, न चैवं द्रव्यस्य कूटस्थनित्यत्वाद्भवितुमर्हति, तस्मादेव च गतिनिवृत्तिः स्थितिर्नाभावः खपुष्पादिवत्, तस्माद्गत्यभावलक्षितभावविशेषस्थित्य-
विनाभाव्येव द्रव्यमिति ।

अत्र ब्रूमो यद्यभावोऽपीत्यादि, खपुष्पादेर्विपर्यं कृत्वा नैयायिकापादनम् किं विशे-
षेणोक्तेन ? यथा स्थितेरभावत्वानुपपत्त्या खपुष्पादेरिवाभिभावः, तस्य भावत्व इति तदुच्यते—यद्यभावो भावेन अभावेन वा भावो विरुध्यते तावुभौ यौ विरुध्येते भावावेव तर्हि विरोधित्वात्, यत्कि-
ञ्चिद्विरुद्धतरत्वसौक्ष्म्यं दर्शयति, अहिनकुलादिवत् घटपटादिवत् घटकपालादिवद्वा सर्वत्र सहानव-
स्थानलक्षणविरोधदर्शनाद्देशतः कालतो वेति, तस्मात् खपुष्पादेरपि भावत्वं नानिष्टमिति, यदपि च त्वया
स्थित्यभिधानमभावविषयमिति मन्यते तत्रापीयमनुपपत्तिः स्यादुच्यन्ती तद्यथा गत्यभावमात्रविषयत्वे

20 तदीयस्थानं स्थितिभावे भावे अभावे च स्थित एवमनेकान्तिकमिति वाच्ये—स्तम्भवदिति । यदीत्यादि भाव एवेत्युक्तमित्यत्र—ननु भावमिति गतिर्नाम क्रियान्तरेणाभिव्यक्ति नीयमानत्वात् पदार्थविवक्षिति भाव । ततो स्थित्या विरोधवत्त्वेनाप्यभावेनापि विरोधो वा इत्याह—तत्रेति गत्याक्षिप्तः । गतिरभावाविनाभाविनी अभावविरोधित्वात् स्थितिवदित्याह तत्र तद्विरोधित्वादिति । अभावविरोधित्वादभावाविनाभावित्वप्रसक्तेऽपि स्थितेर्भावत्वमिष्यते चैवम् खपुष्पादेरपि भावत्वं स्यादित्याह—खपुष्पादेर्वेति यद्विरोधित्वात् स्थितेरिव खपुष्पस्यापि भाव स्यादिति भाव । एवं तद्विरोधित्वेन तदविनाभावित्वस्य स्थितिखपुष्पयो-
25 रुभयत्रेऽपि स्थितिरभावे भावमेव यदि भावात्मकम् खपुष्पादयोऽभावत्वेन यदि न तु भावमिति इत्ते वैषम्यम्, विशेषहेत्वभावादिति दर्शयति—एतदभिति । तद्विरोधित्वस्य भावत्वव्याप्तत्वात् खपुष्पादौ यदि तद्विरोधित्वमभ्युपगम्यते तर्हि तस्यापि भावत्वम् किं च [illegible] एतदाह—अत्र ब्रूम इति एवम् खपुष्पादिर्व्यभिचारापादनात् तदीयस्थानस्य भावत्वमेवास्तु वोऽस्माकं [illegible]
[illegible] । एतदेवाह—खपुष्पादेरिति । यदि तथापि हेतुरभ्युपेयते तर्हि सोऽपि भाव इत्याह—किं विशेषेणोक्तेनेति । हेतुत्वमेव भावत्वात् तस्मात् स्थितेरिव खपुष्पादेरप्यभावत्वानुपपत्त्यैव स्यादित्याह—यथा स्थितेरिति । भावत्वमेव दर्शयति—
30 यद्यभाव इति भावयोर्विरोधित्वस्य देशतः कालतो वा [illegible], [illegible] [illegible]
[illegible] इत्याह—अहिनकुलादिवदिति । यदि स्थितिरभावमात्रविषय एवेत्यत्र दोषमभिधत्ते—यदपि चेति गत्यभावेति

1 सि भावेऽपि यदस्। 2 सि क. भावात इति। 3 सि क. भावात्वमिति । 4 सि क. बोधितम्यते। 5 सि क. °कत्वा° ।

चानुत्पद्यमानस्थितिर्गतिनिवृत्तिरिति, तथा च कल्प्यमानायामनुत्पद्यमानस्थितौ गतिनिवृत्तौ गतिस्थित्याद्य-मूर्तं भवन् प्रागुक्तन्यायेन तेनाविनाभूतं द्रव्यं तस्य विनाशोऽत्यन्तमभावश्चापद्येत स्थानमित्यभिधानं स्यात्, न चैव द्रव्यस्य कूटस्थनित्यस्याभावयितुमर्हति, तस्मादेव च-तदभिन्नभयात् प्रतिपत्तव्यं गतिनिवृत्तिः स्थितिर्नाभावस्तथा खपुष्पादिवदेवेति, तदुपसंहरति—तस्मात्स्वभावस्थितेत्यादि गतार्थम्।

अनन्तरं खपुष्पादिरपि प्रसङ्गतोऽभिधित्सितः— 5

अभाव इति च भावादन्यो भावविशेषः, अब्राह्मणक्षत्रियादिवत्, एवं खपुष्पाद्यसत्त्व-वाचिशब्दानां भावार्थत्वम् मृग्यते चास्योदाहरणम्।

(अभाव इति) योऽसावभावाभिमतस्तत्राप्यभाव इति नायमर्थः कथ्यते, किं तर्हि? नञः पर्युदासवाचित्वाद्भावादन्योऽभाव इति भावविशेषः, अब्राह्मणक्षत्रियादिवत्, एवं खपुष्पाद्यसत्त्ववाचि-शब्दानां भावार्थत्वम्, एवमसद्भावाभिमतेष्वपि सदर्थविषयत्वमिति न्यायव्याप्तिं दर्शयति-मृग्यते चा- 10 स्योदाहरणमतिदेशस्य।

इह तावत् भवत्वं भाव्यते—

यथा तिष्ठति पचतीत्यन्यथाभवनं प्रवृत्तिसामान्यं भवन् नातिवर्तते तथा विनश्यति प्रध्वसते नितिष्ठतीत्यादयोऽपि, येऽप्यत्यन्ताभावाभिमताः खपुष्पादिशब्दवाच्यास्तेषामपि न तु

स्थितेरनुत्पद्यमानताव्यवस्थायामसौ युज्येत तथा च गमनविनाभूतद्रव्यविनाश एव स्थितिरिति स्यात्, कूटस्थनित्यस्य द्रव्यस्योत्पत्ती 15 कथमेवं स्यादेवेति भावः। गतिस्थित्यादीति गतिमत्त्वेन स्थितिमत्त्वेन वा केनचिद्रूपेण भवनेनाविनाभूतं द्रव्यं भवति द्रव्यत्व गमनस्थानादिसर्वप्रमेयानुगतस्वरूपमिति पूर्वं समर्थितमेव स्थितेर्गमनाभावरूपत्वे तु गमनाविनाभूतद्रव्यनिवृत्तिरेव स्थितिरिति स्यात्तच्च द्रव्यस्य कूटस्थनित्यस्य न सम्भवतीति भावः। एवं गतिनिवृत्तिः स्थित्यात्मा भाव एवाभ्युपेय इत्याह-तस्मादेव चेति। गत्यभावस्थितेति अत्रापि मूले लोपकल्प्यते। गत्यभावेन कल्पिता या भावमूला स्थितिस्तदभिन्ना भावेन द्रव्यमिति भावः स्यादिति प्रतिभाति। ननु 'यत्रैव युक्तमन्यसदृशाधिकरणे' इति न्यायात्, अभाव इत्यत्र भावप्रसज्यस्य 20 भावान्ये भावनम् प्रतिषिद्धस्याभिधानाभावेनैव प्रतीतेरसतो भावान्यभावत्वात्कथमसिद्धाभावत्वमित्याह—अभाव इति चेति निरुपाख्ये व्यामोहाद्भावत्वसमारोपे तत्सामान्यत्वात् भावादन्योऽभाव इति ननु प्रयुज्यते भावादन्योऽसाविति बोधयितुम् यथा ब्राह्मणसदृशाभिप्राया बुद्धिर्येषां क्षत्रियादौ ब्राह्मणे प्रयुज्यते तथाब्राह्मणशब्दः प्रयुज्यते सोऽयं मिथ्याध्यवसायो यदा तत्त्वज्ञा-नाभिवर्धते तदा नञः प्रयोगः अब्राह्मणोऽयं क्षत्रिय इति क्षत्रियत्वज्ञानानन्तरमप्यब्राह्मणपदप्रयोगात् नार्थं ब्राह्मणो मिथ्या तीर्थकरितः किन्तु पर्युदासवाचित्वात् तत्सदृशो ब्राह्मणोऽस्तीति तत्त्वतः क्षत्रियादिरेवाब्राह्मणशब्दार्थो न बोध्यते। समारोपनिवर्तकस्य 25 वाच्यत्वादेरभावात् तथा निरुपाख्येऽपि युक्ता निरुपितभावान्तरमसत्स्वन्य भावत्वप्रयोगात् तत्त्वज्ञाने तु तन्निवर्तनाय नञः प्रयोग इति भावः। सर्वे एव शब्दा गुणगुणवत्त्वे वर्तन्त इति पक्षे खपुष्पादिशब्दस्य गुणवद्गुणस्यैव वचनात् प्रतीतेः सामान्यस्य समानमिव खपुष्पादौ सामान्यविशेषाभिमतस्यप्रयोगात्तोऽभावपदं प्रयुज्यते, तत्प्रयोगे च खपुष्पादौ यो विशेषो नास्ति तदर्थेन निरुक्तिः प्रतीयते भवन्निवृत्त च वक्तव्योऽयमन्यत्र इत्याशयेन व्याचष्टे—योऽसाविति अभावाभिमताः खपुष्पादि तत्राप्य-भावत्वेन भावार्थो बोध्यते किन्तु भावविशेषत्वेन निषेधः प्रतीयत इति भावविशेषादन्यो भावविशेष एव खपुष्पादीति भावः। 30 एतदेवाह—अब्राह्मणेति ब्राह्मणशब्दः विद्याभिजनाभिजनादिव्यापादनव्यतिरिक्तं प्रसिद्धं तत्र ब्राह्मणत्वव्यतिरिक्ते क्षत्रियादौ क्रियाभिजनादिगुणाभावेन ब्राह्मणप्रयुक्ताभिप्राये नञा तदर्थत्वेनाप्रतीता बोध्यत इति भावः। खपुष्पादेर्भावत्वं कथमित्यत आह- मृग्यते चेति उदाहरणमेवेति भावः। यद्विशेषभवनानि सामान्यभवनं नातिवर्तन्त इत्यादर्शयति—यथा तिष्ठतीति।

१ सि. क. खपुष्पादिवत्स । २ सि तदेषा ।

तथाऽभवनं किन्तु भवनमेव, यथाऽगतिस्थितिः गतेरेव प्रकारान्तरता, सति नियतत्वात् प्रकाराणाम् ।

(यथेति) यथा तिष्ठति पचतीत्यन्यथाभवनं—अन्येन प्रकारेण परिस्पन्दपरिणतस्य द्रव्यस्य ततः प्रकारादन्येनापरिस्पन्दपरिणतिप्रकारेण भवनं तिष्ठत्यास्ते शेते इत्यादि, तण्डुलादिकठिनद्रव्यस्य
5 भवन पचतीत्यादि, यथैताः क्रिया अन्यथाभवनमात्रभेदाः प्रवृत्तिसामान्यं भवनं नातिवर्तन्ते तथा विनश्यति प्रध्वंसते निस्तिष्ठतीत्यादयोऽपि भवनप्रकाराः प्रवृत्तिसामान्यं भावस्वरूपं नातिवर्तन्ते, एवं क्रियापदवाच्यकार्यसाम्यमन्यथाभवनमात्रतया व्याख्याता, येऽप्यसन्त्वामाभासिमताः खपुष्पादिसम्बन्धाः तेषामपि न तु तथाऽभवनं—अन्येन प्रकारेण न त्वभवनं[किन्तु]भवनमेव नात्यन्ताभवनमित्यर्थः, यथाऽगतिस्थितिः—गतेरन्या स्थितिरगतिस्थितिः, न तु गत्यभावमात्रं गतेरेव प्रकारान्तरता यथा सा स्थिति
10 रन्यथाभवनमेव खपुष्पादिरप्यन्यथाभवनम्, किं कारणं? सति नियतत्वात् प्रकाराणाम्, प्रकारत्वात् सत्येव खपुष्पादिः, यो यः प्रकारः स सत्येव, यथा गतिनिवृत्तिः स्थितिरूपत्वात्[स]ती ।

कथं खपुष्पादिः प्रकारतेति चेदुच्यते—

खपुष्पस्य च समवायरूपेणानभिव्यक्तिः, अशोककुसुमादिप्रकारेणाभिव्यक्तिरिति प्रकारत्वानतिवृत्तेर्व्यक्तिपयोश्च सर्वासमरूपाभवनद्वयाभेदात् कतमत् सं ? कतमच्च पुष्पाणां विक-
15 सनमन्यदिति देवदत्तगमनभवनद्वयस्यैव तदपि, एवञ्च गमनस्थानादिक्रमभाविनीनामपि क्रियाणां सततमप्रवृत्तितादात्म्यानतिक्रमादेक एव पूर्वापरीभूतो भावः प्रवृत्तिरित्युच्यते, प्रकर्षेण वर्तनात् स च प्रकर्षः सर्वप्रभेदानुभवनरूपः स एव चान्तर्भावितप्रभेदत्वात् प्रवृत्तिविशेष इत्युच्यते न त्वदिष्टप्रकाराणां प्रवृत्तिविशेषः सामान्यप्रवृत्तेर्भिन्नः कश्चित् भुजिविशेषवत् ।

यथैताः क्रिया इति [illegible] एवमेव [illegible]
20 [illegible] यथा वा [illegible]
पचतीति भवति एवं [illegible] तिष्ठति शेते इत्यादिरूपेण [illegible] भवति,
[illegible] नातिवर्तन्त इति भावः । [illegible]
[illegible]
[illegible] तथा विनश्यतीति [illegible]
25 [illegible] इति [illegible] इति [illegible]
[illegible] इति भावः । [illegible]
[illegible] येऽप्यसन्त्वामाभासिमता इति [illegible] तेषामपि
[illegible] न तु [illegible]
न तु [illegible] इति भावः । [illegible] यथाऽगतिस्थितिरिति
30 [illegible] । हेतुमाह—सति नियतत्वादिति [illegible]
[illegible]—यो यः प्रकार इति । [illegible]—खपुष्पस्य चेति

1 नि क. [illegible] ।

(खपुष्पस्य चेति) खपुष्पस्य च समवायरूपेणानभिव्यक्तिः, अशोककुसुमादिप्रकारेणाभिव्यक्तिरिति प्रकारसामस्त्यवृत्तेर्द्रव्यक्रिययोः सर्वात्मकत्वादस्मिन् द्रव्यार्थनयभेदे सर्व द्रव्यं क्रिया च गमनादि, द्रव्यभेदानां गमनादिक्रियाभेदानामशोकवकुलचम्पकाभेदात् कथमत् खम् ? कथमथ पुष्पस्याविकसनमभूत् ? इति देवदत्तगमनभवनवृक्षस्तवत् तदपीति-खपुष्पादिरपि भावः, एवमेतासि-एकत्र कृत्वा गमनस्थानादिक्रमभाविभीनामपि क्रियाणां सततसम्प्रवृत्तितास्थानतिक्रमादेक एव पूर्वापरीभूतो भा- 5
व[:प्र]वृत्तिरित्युच्यते, एवमेव च तदुपपद्यते यदुक्तं 'पूर्वापरीभूत भावमाख्यातेनाऽऽचष्टे व्रजति पचती' (निरु० अ० १ सू० १४) स्तादीति, सर्वभावैकार्थ्यस्य चानन्तरमुपपादयिष्यमाणत्वात्, कस्मात् स भावः प्रवृत्तिरित्युच्यते ? ब्रूमः, प्रकर्षेण वर्तनात्, स च प्रकर्षः सर्वभेदानुभवनरूपः, स एव चान्वर्थोचितसमभेदत्वात् प्रवृत्तिविशेष इत्युच्यते, रूपादिगत्यादीन् समभेदानन्वर्थोभयमेव भावः सामान्यभवनलक्षणो भवनभेदानां परस्परतो विशेषाविशेषो भेदानभ्युपगतत्वात्, न त्वविष्टः कारकाणां 10
प्रवृत्तिविशेषः सामान्यप्रवृत्तेर्भिन्नः कश्चिदिति, दृष्टान्तो भुजिविशेषवदिति ।

तद्व्याख्यानम्—

यथा भुजिरेवाशनपानादिना द्रव्यक्षेपकालभावभेदेन प्रकारमात्रं भिद्यते, न हि तेषु कश्चिदभुजिक्रिया वा, सर्वोऽप्यसौ भुजिरेव, तथा सामान्यप्रवृत्तिरेव प्रवृत्तिविशेषः, अस्त्यर्थस्य सर्वगतिस्थित्यादिभेदात्मकत्वात्, एवं गतिस्थित्योरक्रियात्वोर्वा सर्वैव चासौ प्रकारमात्रभिन्न- 15
सामान्यभवनलक्षणक्रियैव भुजिसामान्यमात्रप्रकारभिन्नभुजिविशेषवत् ।

खपुष्पादेः खपुष्पस्येव विशिष्टरूपेणानभिव्यक्तिः पुष्पस्येव रूपेण चाभिव्यक्तिरिति तदानभिव्यक्तिप्रकारेण सत्त्वमेवेति नास्तित्व हेतोरिति भावः । एतस्मिन्नये सर्वेषां सर्वात्मकद्रव्यविशेषाणां द्रव्यात्मकत्वाद् गमनादिक्रियाविशेषाणाञ्च क्रियात्मकत्वात् क्रियैव भवनात्मकत्वविशेषात् विशेषा एव सामान्यव्यतिरिक्ता न सन्तीति कथमत् खम् ? कथमथ पुष्पाणां विकसनमिति देवदत्तगमनवद्भेदस्य सामान्यरूपत्वात् खपुष्पादेरपि भवनात्मकत्वादित्यस्यैवेति तदुपपन्नमेवमवगन्तव्यं विवक्षितैकत्वापेक्षया-द्रव्यक्रिययोरिति । एवञ्च 20
क्रियाविशेषाणां सामान्यात्मकत्वादेव कारकाणां प्रवृत्तिविशेषलक्षणाः क्रियाः सततसम्प्रवृत्तिलक्षणसामान्यक्रियाव्यतिरिक्ता भवनरूपैव क्रियामात्रं सततसम्प्रवृत्तितत्त्वमेवेत्याह-एकत्र कृत्वेति एकत्र पूर्वापरीभूतो भाव एव प्रवृत्तिः क्रियेत्युच्यत इति भावः । एतदभिप्रायेणैव नैरुक्ते वचनं उपपन्नं इत्याह—यदुक्तमिति पूर्वापरीभूतमिति क्रियाप्रधानं पदम्, क्रियया एकत्वादेकैकमपरं कृत्वं पूर्वापरमिव भूतं सौत्रोपरमेणानवस्थितं भावं प्रतिपदकैमाख्यातेनाऽऽचष्टे इति तदर्थः । पचतिगमिभुजिगम्यादि- सर्वभावार्थानां प्रवृत्तिसामान्यरूपत्वमुपपत्स्यते इत्याह-सर्वेषामिति । ननु पूर्वापरीभूतो भाव एव प्रवृत्तिरिति 25
कुतो भेदम् प्रवृत्तिरिति कुत उच्यते एकस्यैव क्रियात्वं वो वा प्रकर्षं इत्याह-कस्मादिति । सर्वान् क्रियाप्रभेदान् व्याप्यैव स्वात्मवत्त्वात् एव सर्वान् भेदाननुभवतीति प्रकर्षवर्तनरूपत्वात्स प्रवृत्तिरिति प्रवृत्तिविशेष इति चोच्यते न तु प्रवृत्तिरन्या अन्यश्च प्रवृत्तिविशेष इत्यावेदनाय-स च प्रकर्ष इति । तथैव स्फुटयति रूपगत्यादीनिति प्रवृत्तिरेव विशेषणसमर्थत्वादविशेषात्वाच्च परस्परतो भेदान् प्रवृत्तिसामान्येन प्रवृत्तिविशेष उच्यत इति भाव । दृष्टान्तं भुजिविशेषं प्रदर्शयति-यथा भुजिरेवेति अशनपानादयो भुजेरेव प्रकारत्वात् द्रव्यविशेषेण भुङ् इति व्यवहारात्, एवं सामान्यविशे- 30
षयोः विशेषेति भावः एवं भेदाद्भेदानेव अविशेषैव क्रियाव भातु अन्यथा किम् एकानेकविशेषयोः प्रवृत्तिः सर्वनामिव च

---

१ सि क. विशेषाविशेषो ।

यथा शुषिरेष्वेत्यादि यावत् प्रकारमात्रं भिद्यत इति, अशनपानस्थानावकाशादिद्रव्यभेदेन कोष्ठपार्श्वौ पाष्ण्यौ नासे वेति क्षेत्रभेदेन प्रथमद्वितीयमासादिना दिनरात्र्यादिना वा कालभेदेन तीव्रमन्दशुषिरत्वक्रमौपचयरसापकर्षादिभावेन च प्रकारमात्रेणैव भिद्यते न शुषिरत्वेन, न हि तेषु प्रकारभिन्नेषु कश्चिदशुषिरः स्थिरो वा, किन्तु सर्वोऽप्यसौ शुषिरत्वानतिक्रमाच्छुषिर एव, अथवा परस्परतो प्रकारमात्रमेवाभिद्यते, सामान्यप्रवृत्तिरेव प्रवृत्तिविशेषो वर्तते, अस्त्यर्थस्य सर्वगतिस्थित्यादिभेदस्यैकत्वात्, एव गतिस्थित्योरपि चाययोरिति विरोधिभावप्रादुर्भावोऽपि सामान्यभवनस्यैव प्रकारमात्रभिन्नविसम्भितमिति, तदिदमयति—सर्वैव चासाविति यावत् क्रियैव, तथाऽवस्थितभवतिविवक्षितपदविवर्तहीनानेकार्थत्वात् प्रकारभेदाच्च तयोऽ[प]प्यसामान्यप्रवृत्तिविशेषो शुषिरसामान्यमात्रप्रकारभिन्नशुषिरविशेषवदिति ।

किञ्चान्यत्—

एवञ्च शुषिरगतिस्थितिपर्यायादीनामपि तथा तथा सर्वभावव्यापिता भावत्वान्नातिभेदत्वादीनामपि पूर्वोत्तरव्यत्ययव्यक्तिमयानेकत्वादेव च, पूर्वमभावमानो गच्छन् तिष्ठन्नुपासीनो वा पश्चाद्भाव्यते, तथा पश्यति जानातीच्छति द्वेष्टि प्रयतते स्मरतीत्यादिषु तुल्यचर्चः ।

एवञ्चेत्यादि, न केवलमस्माद्य एव सर्वपाश्चात्यर्थव्यापित्वात् सामान्यप्रवृत्तिमात्रभावनायां निदर्शनम्, किं तर्हि ? शुषिरगतिपर्यायादीनामपि तथा तथा सर्व[भाव]व्यापिता शुषेर्यावत्—शुषेरभ्यवहरणार्थस्योपयोगपर्यायत्वात् उपयोगस्याप्यस्त्यर्थत्वात्तदापत्तेः परिणामार्थत्वात् परिणामस्य वृत्तिसत्ताभवनार्थत्वात्, तथा गतिरपि सर्वभावव्यापिनी गमनचलनस्पन्दनपरिणामैकार्थत्वात्, द्रवति द्रोण्यति द्रुवारेति द्रुः, द्रोर्विकारो द्रव्यं द्रव्यस्य भव्ये द्रव्यं सदैव गत्यात्मकं विपरिणामात्मकमिति चार्थः, आर्षोऽपि यथा 'पोग्गले णं भंते ! किं एयति वेयति चलति फन्दति खोभति घुमति उ तं भावं परिणमति ? हंता गोयमा ! तहेव जाव परिणमति (भग० श० ५ उ० ७ सू० २१२) इति, स्थितिरपि

इति द्रव्यभेदमादिभेदेन प्रकारभेदेन शुषिरेषु इति दर्शयति—यथाप्रमाणमेति । कोष्ठादिषु शुषु इति क्षेत्रभेदेन, न हि तत्र शुषिरं शुष्यते न शुषु इति [illegible]—न हि तेष्विति । एवं गतिस्थित्योरिति विरोधिभावप्रादुर्भाव- [illegible] सामान्यविशेषभावप्रादुर्भावः सर्वथा प्रतिसामान्यस्य प्रकारभेदेन एव अस्त्यर्थस्य सर्वपदार्थेषु [illegible] तत्प्रकारभेदत्वात्, शुषिरसामान्यमात्रप्रकारभिन्नशुषिरविशेषवदिति भावः । एवं सर्वपदार्थेषु अस्त्यर्थव्यापिता प्रदर्श्य सर्वे सर्वोपघातका इति न्यायात् सर्वपदार्थस्य सर्वपदार्थव्यापित्वं इत्याशयेनाह—एवञ्चेति । तत्र शुषेः सर्वपदार्थव्यापित्वं दर्शयति—शुषेर्यावदिति [illegible] उपयोगविशेष एव, [illegible] इति [illegible] परिणामविशेषः [illegible] एवं शुषेः सर्वपदार्थव्यापित्वं [illegible] भाव । एवं गतेः सर्वभावव्यापित्वमाह—तथा गतिरपीति [illegible] भावः । [illegible]—द्रवतीति । तत्र मार्ग दर्शयति—आर्षोऽपीति । स्थितेः सर्वभावव्यापित्वमाह—स्थितिरपीति [illegible] सर्वभावव्यापित्वमिति भावः । [illegible]

1 सि० क० शुषारेषे । 2 सि० क० स्थितिमतो । 3 सि० क० °भवनत्व । 4 सि० क० क्षेत्रार्थत्वात् ।

तिष्ठत्यासकेऽपि स्वरूपं न त्यजति परिणमति तथा तथा भवतीत्यर्थः, पचति-छिनत्ति-लिखत्यादयः पच्यादयः, तेषामपि पच्यादीनामस्त्याद्यविशेषः, पाकस्य क्रियाफलत्वात् क्रियायाश्च हेतुफलरूपाभिन्न परिणतित्वात्, पच्यते पचत्यासाने भीषमधुरीभवति स्वयतेऽपि विपरिणमतीत्याद्यपेक्षार्थत्वात्, तथा छपति लिखति तथाऽऽत्मनः शिरो दर्शयति कर्मैव इत्याद्येकार्थम्, तथा तथा सर्वभावस्वे । त्वान्यतमस्तु भुव्यादीनां सर्वभावव्यापिता, गतिस्थितिसत्त्वाविपरिणामाद्यनतिक्रमात्, पठितसिसिधि- 5 धिषिगत्यादीनां कथमिति चेदुच्यते भापतिनामाविधेयत्वादीनामपि पूर्वोत्तरव्यत्ययव्यक्तिभवनैकत्वादेव च तथा तथा सर्वभावव्यापितेति वर्तते, भाव व्यक्तायां वाचि, भाऽवबोधने, भिदा वर्षे गति वदनेकार्थे इत्येवमादीनां पूर्वोक्तपूर्वापरीभूतव्यक्तिक्रमभवनमेकत्वात्, पक्तमेव हि पूर्वापरीभूतं भवनं गतिस्थित्या- दिवत् क्रियात्वादित्युक्तम्, तथा छपत्यादीनामपि, पूर्वापरीभूतैकभवनव्यत्ययव्यक्तिलक्षणक्रियात्वानति वृत्तेः सर्वभावव्यापितैव, पूर्वमभाषमाणो गच्छन् तिष्ठन्नुदासीनो वा पश्चाद्भाषते, पश्यति जानाति इच्छति 10 द्वेष्टि प्रयतते स्मरतीत्यादिषु तुल्योऽर्थः, तस्मात् काचित्पूर्वापरीभूता क्रियाऽस्ति क्रियात्वात् सर्वधात्वर्थः सर्वधात्वर्थव्यापिन इति साधूक्तम्, एवन्तावत् प्रवृत्तिसामान्यमेव क्रियाप्रवृत्तिविशेष इत्युक्तम् ।

अमुना लक्षणान्तरं परीक्ष्यमत आह—

यदप्यादिनैगमनयदर्शनमनवबुध्य पूर्वनयनिपातितस्थितिस्वरूपनिरूपणं क्रियते, सा तु द्रव्यावस्थाविशेषो गतिरवतिष्ठति, यथा गतिर्द्रव्यस्यावस्थाविशेषो बालकुमारादिवद्द्रव्यादनन्या 15 तथा स्थितिरिति गतिस्थितिवच्च सर्वक्रिया इति ।

यदप्यादिनैगमेत्यादि, ‘णेगेहिं मिणइ माणेहिं णेगमो तस्स णेरुत्ती’ । ‘संगहिय पिंडियत्थं

पचतीति । पाकस्य सर्वभावव्यापित्वमाह—पाकस्येति । पचिधातोः पाकोऽर्थः पाके नाम क्रियाया फलम् । तथा च क्रियाफलयोः कर्मकारणभूतयोरभिन्नपरिणतित्वात् स्वयतेऽपि विपरिणमते वर्षेऽपलीयते विपचतीति पक्तमादिप्रकाराभिधायकत्वात् सर्वभावव्यापितेति भावः । एवमितरेषामपि धात्वर्थानां सर्वभावव्यापित्वं प्रदर्शयति—भापतीति पठितस्येत्याद्युक्तधात्वर्थानां पर्य- 20 त्ययाद् विशेषार्थत्वपर्यायत्वात् बहुत्वानपेक्षात्वयोग्या पूर्वमभाषमाणोऽपठन्नपठन् पश्चाद्भाषते पठति पश्यति चेति अन्यापदात् भावतया भवनाभेदेन तदैकत्वमिति सर्वाः क्रियाः पूर्वापरीभूता भवनाविशिष्टाः प्रवृत्तिविशेषत्वेनाभिमताः प्रवृत्तिसामान्यमेवेति तदर्थमेवमर्थं विशेषमिति भावः । एतदेव व्यनक्ति—पक्तमेव हीति । व्याख्यातपूर्वमत्र सर्वधात्वर्थव्यापीति योज्यम् । क्रियालक्षणं निगमयति—एवन्तावदिति यत्र वस्तुवस्तुपरस्परान्वयस्यापि व्यापकत्वे व्यवस्थावस्थाविशेषः प्रवृत्तिविशेषस्तच्च क्रियेति योऽस्य लक्षणं निराकर्तुमाह—यदपीति । णेगेहिं इति, एतत्सूत्री भाषाऽऽवश्यकनिर्युक्तौ पदार्थमनुसार- 25 पर्यायमत्र दृश्यते तद्यथा—‘णेगेहिं माणेहिं मिणइत्ती णेगमस्स णेरुत्ती’ ॥ ७५५ ॥ इति तदनु ‘संगहियपिंडियत्थं संगहवयणं समासओ बिंति’ ॥ ७५६ ॥ इति अनयोः नैगमस्य विभागपदार्थत्वं पारम्पर्याद् विभागपदार्थतैव विशेषवचनोपलक्षणतया प्रदर्शितं पदार्थद्वयं वस्तुविभागविभक्तिसमन्वयेति प्रतिभाति । तथा णेगेहिं मिणइ माणेहिं इत्यत्र पश्चात् वाक्यत्रयमन्ये वाचते । नैगम- नयवादस्यैकगमापन्नत्वात् भावो द्विविधः सामान्यविशेषाभिधायी वस्तुनो द्वैविध्यप्रतिपादकः सर्वमात्रनैगमनयदर्शनमुच्यते तत्रादावेव -मित्यादिना विभागवचनापेक्षया प्रथमत्वात्, नैगमाद्युपदर्शनादि हि द्वितीयमादिनैगमादि भवति अत्र यन्मे स्थितिवर्ण्यमान- 30 स्वरूपं न युज्यते वस्तुनो द्वैविध्यात्, एवञ्च स्थितिर्द्रव्यावस्थाविशेषः इत्युक्तं अतः स्थितेर्वाच्यत्वं तथा गतिसमासतो न मृग्यम्-

१ लि० क० ‘व्यापीरोपार्थत्वात्’ । २ कर्मैव इत्याद्येकार्थमिति पाठस्य स्थाने ‘कर्मैवकार्थं’ दृश्यते ।

यथा भुक्तिरेवेत्यादि यावत् प्रकारमात्रं भिद्यत इति, अशनपानखाद्यस्वाद्यादिद्रव्यभेदेन कांस्यपात्र्यां पात्र्यौ भवतो नेति क्षेत्रभेदेन प्रथमद्वितीयमासादिना चिरताल्पादिना वा कालभेदेन तीव्रमन्दक्षुत्पिपासाज्ञानौपम्यरसास्वादनादिभावेन च प्रकारमात्रेणैव भिद्यते न भुक्तिरेव, न हि तेषु प्रकारविशेषु कश्चिद्भुक्तिर्भवत्यक्रिया वा, किन्तु सर्वोऽप्यसौ भुक्तिरूपानतिक्रमाद् भुक्तिरेव, अथवा परस्परतः प्रकारमात्रभेदादिष्यते, सामान्यप्रवृत्तिरेव प्रवृत्तिविशेषो भवति, अस्यार्थस्य सर्वगतिस्थित्यादिभेदसमन्वयात्, एवं गतिस्थित्योरविशेषात्तयोर्भेति विशेषिभावप्रादुर्भावोऽपि सामान्यभवनस्यैव प्रकारमात्रभिन्नत्वमित्यभिप्रेतमिति, तमिममर्थमाह—सर्वैव चासादिति यावत् क्रियैव, तस्मादस्थितिभवतिस्थितिप्रवृत्तिवत् हीनानेकार्थत्वात् प्रकारभेदाच्च तयो[र]न्यसामान्यप्रवृत्तिविशेषो भुक्तिसामान्यमात्रप्रकारभिन्नभुक्तिविशेषवदिति ।

10 किञ्चान्यत्—

एवञ्च भुक्तिगतिस्थितिपथ्यादीनामपि तथा तथा सर्वभावव्यापिता भाषतिजानातिश्वेतत्वादीनामपि पूर्वोत्तरव्यक्त्यव्यक्तिमयनैकत्वादेव च, पूर्वमभाषमाणो गच्छन् तिष्ठन्नासीनो वा पश्चाद्भाषते, तथा पश्यति जानातीच्छति द्वेष्टि प्रयतते स्मरतीत्यादिषु तुल्यचर्चा ।

एवञ्चेत्यादि, न केवलमस्यायम् एव सर्वभावधर्मव्यापित्वात् सामान्यप्रवृत्तिमात्रभावव्यापी

15 नियर्तनम्, किं तर्हि ? भुक्तिगतिपथ्यादीनामपि तथा तथा सर्व[भाव]व्यापिता, भुक्तेस्तावत्—भुजेरभ्यवहरणार्थस्योपयोगपर्यायत्वात् उपयोगस्यापरार्थत्वात्तयोः परिणामार्थत्वात् परिणामस्य वृत्तिसामान्यार्थत्वात्, तथा गतिरपि सर्वभावव्यापिनी गमनचलनस्पन्दनपरिणामार्थानेकार्थत्वात्, द्रवति द्रोष्यति दुद्रावेति द्रुः, द्रोर्विकारो द्रव्यं द्रव्यञ्च भव्ये द्रव्यं सदैव गत्यात्मकं विपरिणामात्मकमित्यर्थः, आर्षेऽपि यथा 'जीवे णं भंते ! किं एयति वेयति चलति फंदति खोभति उदीरति तं तं भावं परि-

20 णमति ? हंता गोयमा ! तहेव जाव परिणमति' (भग श० ५ उ० ७ सू० २१२) इति, स्थितिरपि

[illegible]

१ सि० क० भुक्तार्थे सि० क० स्थितिवत्स सि० क० व्यापित्वा । ४ सि० क० भेदार्थत्वात् ।

तिष्ठत्वेऽपि स्वरूपं न त्यजति परिणमति तथा तथा भवतीत्यर्थः, पचविकृतविक्लित्त्यादयः पच्यादयः, तेषामपि पच्यादीनामवस्थाविशेषः, पाकस्य क्रियाफलत्वात् क्रियायाश्च हेतुफलरूपाभिन्नपरिणतित्वात्, पच्यते पच्यमानं मीलमधुरीभवति आस्तेऽपि विपरिणमतीत्याद्येकार्थत्वात्, तथा कृपति क्लिश्यति तथाऽऽत्मनः स्थितं वर्धयति कर्मभूयत इत्याद्येकार्थम्, तथा तथा सर्वभावप्रवृत्तेः । साम्प्रतमस्तु भुव्यादीनां सर्वभावव्यापिता, गतिस्थितिसत्ताविपरिणामाद्यनतिक्रमात्, पठिलिखिति- 5
चिनोतिप्रभृतीनां कथमिति चेदुच्यते भावतिआमातिप्रेवमादीनामपि पूर्वोत्तरव्यवच्छिन्नानेकत्वादेव न, तथा तथा सर्वभावव्यापितेति वर्तते, भाव व्याप्तौ व्याप्ति, प्राऽवबोधने, भिदा वर्णे गति वदनेऽपि से इत्येवमादीनां पूर्वोक्तपूर्वापरीभूतव्यवच्छिन्नक्षणभवनस्यैकत्वात्, एकमेव हि पूर्वापरीभूतं भवनं गतिस्थित्यादिवत् क्रियात्वादित्युक्तम्, तथा स्पन्दादीनामपि, पूर्वापरीभूतैकभवनव्यवच्छिन्नक्षणक्रियात्वानतिवृत्तेः सर्वभावव्यापितैव, पूर्वमभावमानो गच्छन् स्थितमुदासीनो वा पश्चाद्भवते, पश्यति जानाति इच्छति 10
द्वेष्टि भवत्ये स्मरतीत्यादिषु तुल्यमर्थः, तस्मान्न काचिदपूर्वापरीभूता क्रियाऽस्ति क्रियात्वात् सर्वधात्वर्थाः सर्वधात्वर्थव्यापिन इति साधूक्तम्, भवन्ता वत् प्रवृत्तिसामान्यमेव क्रियाप्रवृत्तिविशेष इत्युक्तम् ।

अधुना लक्षणान्तरं परीक्ष्यमव आह—

यदप्यादिनैगमनयदर्शनमनवबुध्य पूर्वनयनिपातिस्थितिस्वरूपनिरूपण क्रियते, सा तु द्रव्यावस्थाविशेषो गतिवदिति, यथा गतिर्द्रव्यस्यावस्थाविशेषो बालकुमारादिवद्व्यावृत्तव्या 15
तथा स्थितिरिति गतिस्थितिवच्च सर्वक्रिया इति ।

यदप्यादिनैगमेत्यादि, 'णेगेहिं मिणइ माणेहिं णेगमो णस्स तस्स णेरुत्ती'। 'संगहिय पिंडियत्थं

पचतीति । पाकस्य सर्वभावव्यापित्वमाह—पाकस्येति । पचिधातोः पाकोऽर्थः पाको नाम क्रियायाः फलम् । तथा च क्रियाफलयोः धर्मधर्मिवन्मूलयोरभिन्नपरिणतित्वात् आस्तेऽपि विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति षड्भावविकारा भिन्नार्थत्वात् सर्वभावव्यापितेति भावः । एवमितरेषामपि धात्वर्थानां सर्वभावव्यापित्वं प्रदर्शयति—भावतीति पठिलिखिमोर्धात्वर्थान्तर्गत- 20
त्वात् चिनोत्यादेरन्तर्गतत्वाच्च सामान्येनाभिधीयमाना पूर्वमभावमानोऽपठन्नपश्यन् पश्चाद्भवते पठति पश्यति चेति व्याख्यानमप्यत्र भवनात्मेन पौर्वापर्यमिति सर्वाः क्रियाः पूर्वापरीभूता भवनाभिधेयाः प्रवृत्तिविशेषरूपेणाभिमताः प्रवृत्तिसामान्यमेवेति सर्वधात्वर्थव्यापिनीमिति भावः । एतदेव दर्शयति—एकमेव हीति । व्याख्याव्यापित्वमासर्वधातुष्वेवमनुसन्धातव्यमिति बोध्यम् । क्रियाभावं निगमयति—भवन्तावदिति अथ तत्तत्प्रवृत्तिसामान्यस्य भवनक्रियारूपस्याविशेषः प्रत्येकं प्रवृत्तिविशेषरूपत्व क्रियेति लक्षणान्तरं निराकर्तुमाह—यदपीति । णेगेहिं इति एतदर्थी गाथाऽत्रानुसन्धेया गाथार्धमग्रगाथा- 25
र्धेनाम्नात्र स्मर्यते तथा—'णेगेहिं माणेहिं मिणइत्ति णेगमस्स णेरुत्ती' ॥ ७५५ ॥ इति तत्र 'संगहियपिंडियत्थं संगहवयणं समासओ बिंति' ॥ ७५६ ॥ इति किन्तु नैगमस्य निमातृत्वाभिन्न व्याख्यात् निमातृत्वादेव निर्देशमूलकत्वोपेतं प्रदर्शितुं नानार्थेषु वस्तुविषयं दीक्षासिद्धसन्नयोऽपि प्रतिभाति । तथा णेगेहिं मिणइ माणेहिं इत्यत्र पाठे व्याख्यानवर्णनो व्यज्यते । नैगमनयस्यानेकप्रकारत्वात् मानो द्विविधः सामान्यविशेषात्मके वस्तुनो द्वैविध्यप्रतिपादकं दर्शनमाद्यनैगमस्य सर्वमनुस्यूते तथा परस्य भिन्नतया निमातृत्वापेक्षया प्रवृत्तत्वात्, द्वैविध्यविधिनयदर्शनानि हि द्विरूपाणि नैगमानि भवन्ति तत्र नये स्थित्यादिर्व्याख्या- 30
नान्तर्गतं न युज्यते वस्तुनो द्वैविध्यात्, एवमेव स्थित्यादिर्व्यावस्थारूपत्वं यत् क्रियाया अवस्थाविशेषत्वमतीतनिवृत्ति-

१ सि क. °त्वाभिदोषापेत्वात् । २ कर्मभूयत इत्याद्येकार्थमिति पाठः प्रतिषु °भूयेतीत्यन्तरं दृश्यते ।

संग्रहवर्णं समासेन ॥[1] ( ) द्रव्यस्वभाविनयलक्षणे द्रव्यक्रियात्मकविकल्पानेकत्वो गमो नैगम इति विकल्पापेक्षया द्रव्यक्रियाविकल्पात्मकत्वमनुसारं यावन्नैगमनयदर्शनम्, क्रियाविकल्पनाद् द्वितीयादिनैगमत्वात्, पदार्थदर्शनमनयुक्तं पूर्वनयनिपाति—सङ्ग्रहनये निपतितुं यदीदं यस्य निरूपणस्य यदिदं विविक्तरूपनिरूपणं क्रियते सङ्ग्रहनयवर्गमनुपाति, प्रथमात् विधिभङ्गात् व्यवहारनयात् आरातीया येऽर्वाचीना
5 पूर्वभवाः ते सङ्ग्रहनयभेदाः तदनुपाति यदुत्तरं क्रियात्मकत्वं विवक्षुदाहरणद्वारेणोच्यते तत्स्वलक्षण नाम तदविविक्तमपविषयविवेकैरेवोच्यते, कथं पुनस्तैः विविक्तरूपनिरूपणं क्रियते ? उच्यते—सा तु द्रव्यावस्थाविशेषो गतिवत् प्रतिपत्तव्येनैव निरूप्यते यथा गतिर्द्रव्यस्यावस्थाविशेषो बालकुमारादिवत् व्यावर्त्यमाना तथा स्थितिरिति, गतिस्थितिवच्च सर्वक्रिया इति ।

अत्रापि लक्षणान्तरे दोष उच्यते—

10 अत्रोच्यते, अविकल्पितैकत्वे यत्नप्रसाधितक्रियार्थान्तरत्वत्यागः, अव्यक्तद्रव्यावस्थात्वात्, यतो द्रव्यं ततो नान्याऽवस्था तदव्ययत्वात्, देवदत्तबालकुमारादिवत्, ततश्च द्रव्यार्थान्तरभूतक्रियापदार्थाभ्युपगमविरोधः, एवमभिधानास्वव्युत्पत्तौ व्युत्पत्तौ चोभयथापि स्ववचनादिविरोधः, तत्र तावदव्युत्पत्तौ अवस्थायास्ततोऽन्यत्वं, तस्याविविक्तद्रव्यवाच्यत्वात्, देवदत्तान्यवत्, यथा देवदत्तस्य हस्तके देवदत्तस्य स्वमन्यः, सोऽस्य स्वामीति तेन
15 विपर्ययेणान्वयव्यतिरेकेण तस्य वाच्यत्वात्ततोऽन्यत्वं तदेव द्रव्यावस्थेति ।

(अत्रोच्यत इति) अविकल्पितैक[त्व]इति येनुच्यते यत्नप्रसाधितक्रियार्थान्तरत्वत्याग—यत्न[प्र]यत्नेन प्रसाधितमुक्तिक्रियालक्षणाभिधानेन द्रव्यादर्थान्तरं क्रियेति तस्य त्यागो दोषः, किं कारणं ? अव्यक्तद्रव्यावस्थात्वात्, इह यथवाऽस्मदेवाम्यत्वा क्रमभाविनो बालकुमारादयो धर्मा द्रव्यस्यैव देवदत्तादेरवस्था एवोच्यन्ते, ते नांशान्तरभवनत्वात्ततो भान्ये, तस्मात्र क्रियोऽर्थान्तरमिति वक्तुमुपपन्नम्, स चाभ्यु-

20 [illegible]—द्रव्यस्वभाविनयलक्षण इति । [illegible] प्रथम[illegible] व्यवहारनयः [illegible] भेदाः सङ्ग्रहनयभेदाः [illegible] नैगमभेदाः तेन प्रथमनयानन्तरभेदकथनात् पूर्वे ते नयाः सङ्ग्रहनयभेदाः, [illegible] क्रियाया स्थितिद्रव्यावस्थाविशेषत्वं [illegible] [illegible] इति एवद्रव्योपवर्णितत्वापेक्षया [illegible] [illegible],
25 [illegible] । [illegible] स्थितिरिति [illegible] स्थितिरपि [illegible] क्रिया [illegible] । [illegible]—अत्रोच्यत इति [illegible] द्रव्यावस्थाविशेषत्वे क्रियाया [illegible] [illegible] भावात्, ततश्च पूर्वं [illegible] प्रसाधितं [illegible]—अविकल्पितैकत्व इति [illegible] क्रियाभ्युपगमे पूर्वं [illegible] प्रसाधितं [illegible]
30 [illegible] क्रिया [illegible] इति [illegible] । [illegible]—अव्यक्तेति, [illegible] द्रव्यावस्था—क्रियास्थितिः [illegible] द्रव्यादर्थान्तरत्वाभावं [illegible] । [illegible]

1 सि क. °नयवृ° ।

पगतद्रव्यार्थान्तरभूतक्रियापदार्थत्यागो दोषः, एष प्रयोगेणैवोद्भाव्यते यत्तद्द्रव्यं ततो नान्यदित्यादि गवार्थं तावदभ्युपगमविरोध इति, एकमेवाभिधानात्स्वभ्युत्पत्तौ[व्युत्पत्तौ]रित्यादि, अत्र द्रव्यावस्थेऽन्यस्य शब्दस्यार्थद्वयकल्पना स्यात्–राजपुरुषादिसम्बन्धवदभ्युत्पत्तिः, [व्युत्पत्ति]र्वा राजपुरुषशब्दवत्, उभयथापि तावदभ्युपगमा[दि]विरोधः, तद्व्याचष्टे तत्र तावदभ्युत्पत्त्यवस्थायामवस्थातोऽन्यत्व–द्रव्यादन्यावस्था तस्यैवाति विपक्षत्वसाध्यत्वात् तस्य स्वस्वामिसम्बन्धाविर्भावीविषयिणोऽवस्थासम्बन्धेन साध्यस्य द्रव्यस्य, इतरथा 5
[द्र]व्यसम्बन्धोऽवस्थासम्बन्धो वाऽनर्थकः स्यात्, इह तद्विशेषघातिनोऽपि शब्दस्य साध्यार्थोऽन्य इत्यवश्यमभ्युपगन्तव्यम्, देवदत्तावत्, यथा देवदत्तस्य इत्युक्ते देवदत्तस्य स्वस्य सोऽस्य स्वामीति तेन विषयेण स्वामिविषयेणावस्थासम्बन्धेन तस्य देवदत्तस्य साध्यत्वात् ततोऽन्यत्व दृष्टमेव द्रव्यावस्थेति।

शिलापुत्रकशरीरवदिति चेन्न, अवस्थाशरीरशब्दप्रयोगानर्थक्यात्।

(शिलेति) शिलापुत्रकशरीरवदिति चेत्–स्वात्मत शिलापुत्रकस्य शरीरमित्यत्र शिलापुत्रकादनन्य 10
स्मिन्नपि शरीरे स्वामिविषयसम्बन्धाभ्यासदर्शनादनैकान्तिकतेति एतच्च न, अवस्थाशरीरशब्दप्रयोगानर्थक्यात्, यदनन्यच्छिलापुत्रकाच्छिलापुत्रकशरीरं शरीरमेव शिलापुत्रक इति घटकुम्भशब्दवत् पर्यायमात्रप्रतीतपदार्थकं भोक्तारं मत्वान्यतरप्रयोगानर्थक्यं स्यात्तुल्यार्थत्वात् तथा द्रव्यमेवावस्था द्रव्यावस्थेत्यन्यतरानर्थक्यम्, तस्मादन्यतरानर्थक्यादभेदानुपपन्नं शिलापुत्रकशरीरवदनैकान्तिकतेति।

किञ्चान्यत्– 15

अथापि शरीरावस्थाक्रियात्वादन्यत्वम्, शिलापुत्रकेण शीर्यते शरारुत्वाच्छरीरमिति शरारुर्भवति तेन शरारुणा भूयत इति द्रव्यक्रियाभिधानं नातिवर्तते, तथा च द्रव्यस्यावस्था वस्थमवतिष्ठते द्रव्येणावस्थीयत इत्यवस्थानस्य क्रियात्वानतिवृत्तेः, व्युत्पत्तावपि सामासिकपदत्वात् समासस्य च षष्ठीसमासत्वात् षष्ठ्याश्च कर्तरि विहितत्वात्, सा यद्विषय द्रव्यस्य कर्तृत्व

एष प्रयोगेणैवेति। एवं द्रव्यावस्थेतिसम्बन्धेन व्युत्पत्तिपक्षे चाभेदाभ्युपगमो विरुध्यत इत्याह–एकमभिधानादित्यादि, 20
द्रव्यावस्थेत्यभिधानाभिमतं। अर्थद्वयकल्पनेति राज्ञ इदं इत्यादिवदव्युत्पत्तिपक्षे षष्ठ्यर्थेन राजपुरुषशब्दवत्सामासिकशब्दत्वव्युत्पत्तिपक्षे षष्ठ्यर्थेन अर्थद्वयकल्पनेऽपि तत्र तावदभिविरोधो भवतीत्यर्थं। तत्र तावदव्युत्पत्तिपक्षे विरोधं दर्शयति–तत्र तावदिति द्रव्यावस्थायामव्युत्पत्तावपि द्रव्यस्यावस्थेति [illegible] तत्स्वामिभावसम्बन्धविषयषष्ठीविषयत्वेन द्रव्यादन्यत्वं क्रियाया द्रव्यावस्थायामवस्था [illegible] द्रव्यसम्बन्धोऽवस्थासम्बन्धो वा अर्थः स्वामिति द्रव्यावस्थासम्बन्धो द्रव्यस्यैव एव भिद्यतेति भावः। तत्र दृष्टान्तमाह–देवदत्तावदिति यथाऽत्र देवदत्त स्वामी अयमस्य 25
[illegible] देवदत्तस्य स्वमिति तयोर्भेदव प्रतीयते तथा द्रव्यावस्थायामपि तत्सम्बन्धोर्भेदावधेयो [illegible] भिन्न इति भावः। ननु यत्र स्वस्वामिभावप्रतीतावपि न भेदः प्रतीयते शिलापुत्रकशरीरादौ तत्स्वामिभावप्रतीयमानभेदरदर्शनादित्याशङ्क्यते–शिलापुत्रकेति। तद्व्याचष्टे–स्वात्मतमिति। एवं तर्हि शिलापुत्रकशरीरयोः पर्यायमात्रत्वेन घटकुम्भवत् [illegible] वैयर्थ्यमन्यतरस्य स्यात्, एवं द्रव्यावस्थायामपीति तत्स्वामिविषयसम्बन्धत्वं भेदसाधकमेव न शिलापुत्रकशरीरादौ व्यभिचारः यद्यपि शिलापुत्रकशरीरयोरभेदे पर्यायमात्रत्वेन वैयर्थ्यमस्य भेदमभ्युपगम्य स्वात्मसाधकेन 30
[illegible] अवस्थाशरीरेति। किञ्च तर्हि पर्यायो द्रव्यक्रियात्मकत्वेन शिलापुत्रकशरीरस्यापि तथात्वेन नानैकान्तिकत्वमिति दर्शयति–अथापीति शिलापुत्रकशरीरमित्यत्र शरीरशब्दः क्रियात्मा न धातुनिष्पन्नत्वेन क्रियात्मकत्वादि

१ सि. क. मते दि । २ सि. क. °अभिधानात्वे । ३ सि. क. °दर्शनमि चि । ४ सि. क. °यामपि ।

तयोऽर्थान्तरभूतां तां तदन्यगतिविच्छेदप्रतिबन्धपरिमितामवस्थां दर्शयति, आत्मनोऽक्रिया-
त्वात् क्रियामन्तरेण कर्तुः कर्तृत्वाभावात्, तस्मादुपपादवभ्युत्पत्ती च यदि द्रव्यं ततोऽन्य-
यतोऽवस्था ततो द्रव्यमिति विरुध्यते ।

(अत्रापीति) अत्रापि शरीरावस्थाक्रियात्वादन्यत्वम्—नन्वस्माभिरुपपादितं द्रव्यक्रियास्म-
5 एव वस्तिवति, तस्मादत्रापि शिलापुत्रकेण शीर्यते शरावस्याश्शरीरमिति शरावस्यैवास्ति तेन शराव-
भूयत इति द्रव्यक्रियाभिधानं नातिवर्तते, यथा च द्रव्यसावस्था—द्रव्यमवतिष्ठते द्रव्येणावस्थीयते इ-
त्यवस्थास्य क्रियास्थानविवृतेस्ततोऽन्यत्वमेव, एवं तावदभ्युत्पत्तौ, व्युत्पत्तावपि सामासिकमपत्वा-
समासस्य च षष्ठीसमासत्वात् षष्ठ्याश्च कर्तरि विहितत्वात्—कर्तरि षष्ठीयं द्रव्यस्यावस्थेति द्रव्यमवति-
ष्ठत इति प्राप्नोत्, सा यतिपदमित्यादि यावत् तदन्यगतिविच्छेदप्रतिबन्धपरिमितामवस्थां दर्शयति सा—
10 यतिपदं द्रव्यस्य कर्तृत्वं—यां क्रियां साधयत् साधनं कर्तृ भवति तद्रव्यं ततोऽर्थान्तरभूतां तं—अवस्था-
मक्रियां, दर्शयतीति सम्बध्यते, किं कारणं ? आत्मनोऽक्रियात्वात्—तस्य द्रव्यस्य स्वयमक्रियात्वा-
त्क्रियामन्तरेण कर्तुः कर्तृत्वाभावात् कर्तरि षष्ठी [न]स्यात्, यता—तस्मात् द्रव्यादन्यत्र गतिः, अन्य-
गतिः, द्रव्यादिच्छेद—परिस्पन्दः परिणतिः पूर्वस्या औदासीन्यावस्थाया प्रच्युतिः क्रियान्तरावस्था-
वा तयोरन्यगतिविच्छेदयोः प्रतिबन्ध आत्मा अस्या अवस्थानक्रियायाः सा तदन्यगतिविच्छेदप्रतिबन्धा-
15 त्मिका तां दर्शयति षष्ठीति अथवा तदन्यगतिरिति—तस्मिन्नेव नियमेन गतिर्विच्छेदः शेषं पूर्ववत्
पूर्वस्मिन् व्याख्याने भेदोऽनयोः, गतिर्देशान्तरप्राप्तिः[वि]च्छेदं स्थानेऽपि व्यावृत्ततेति इह पुनरे-
इति विशेषः, तस्माद्व्युत्पत्तावभ्युत्पत्तौ च यदि द्रव्यं ततोऽवस्थेति विरुध्यते, यतोऽवस्था ततो द्रव्यमिति
विरुध्यते, जातिमदवयात् लोके तथा दृष्टत्वात् प्रमाणविरोधः तथानुमेयत्वादनुमानविरोधः, तद्यो-

20 आह शिलापुत्रकेण शीर्यते इति अनेन क्रिया प्रतिपादिता । शरावस्था भूयत इति अनेन द्रव्यं प्रतिपादितम्
एवं द्रव्यावस्थायामेवापि द्रव्यक्रियात्मकं वस्तूच्यत इति दर्शयति—तथायेति । एवमव्युत्पत्तिपक्षमवेत्य येन आदर्शि-
तम्—एवमभ्युपायरिति । द्रव्यस्यावस्थेति षष्ठीसमासत्वात् द्रव्यस्यावस्थानक्रियाकर्तृत्वेन कर्तृत्वमस्तीति व्युत्पत्ति-
मादर्शयति—व्युत्पत्तावपीति । सा यतिपदमिति इयं हि षष्ठी द्रव्यस्यावस्थानक्रियाकर्तृत्वं बोधयति द्रव्य-
क्रियाहेतुत्वात् एवं द्रव्यावस्थाया अन्यत्वमपि दर्शयति द्रव्यस्य क्रियातो भिन्नत्वात्, तस्मादिममपि तत् क्रिया-
25 द्रव्यमि अन्यत्र तत्र क्रियाकर्तृत्वाभावेन तदनुपपत्तेरिति कर्तृत्वं दर्शितमिति भावः । अथ द्रव्यादन्यत्वं दर्शयति-
तत इति तदन्यगतिविच्छेदप्रतिबन्धात्मिकामिति तस्य गतिविच्छेदयोर्भेदमेवाभ्युपगम्य द्विधा व्याख्यानं कर्तृत्व-
मन्यं व्याख्यानं दर्शयति—तस्मादुव्यादिति अन्यगतिश्च विच्छेदश्चान्यगतिविच्छेदौ तथान्यगतिविच्छेदे तदन्य-
विच्छेदे इत्येवं तत्र अवस्थानक्रिया हि द्रव्यस्यान्यत्र गतिं प्रतिबध्नाति, तथा द्रव्यादिच्छेदं—द्रव्यस्य विच्छेदनान्य-
प्रच्युतिं द्रव्यस्य विच्छेदनक्रियातोऽन्यथा क्रियया प्रच्युतिर्न, तथापि प्रतिबध्नाति षष्ठीति भावः । गतिविच्छेदयोर्भेदमनु-
30 व्याख्ये अथ वेति । पूर्वस्मिन्निति पूर्वव्याख्याने गतिविच्छेदयोर्भेदः अत्र व्याख्यानेऽभेद इति विशेषः । भेदस्य षष्ठी-
वाच्ययोरर्थमाह—गतिरिति । व्युत्पत्त्यव्युत्पत्तिपक्षयोर्व्याख्यानयोर्भेदात् षष्ठीप्रतिषेधस्य कारणविरोध एवोक्तं भवति
तस्मादिति । प्रमाणविरोधमाविष्करोति दर्शयति—जातिमदवयादिति अवयवविरोधेन इत्याविष्करोति । लोके-

1 मि. क. एतुचम् ।

तद्विरोधः, एवं द्रव्यावस्थाविशेष इति क्रियालक्षणमभ्युपगमाविरोधादयुक्तम्, कालसाधनयोगौ भाव इत्येतयोः क[ा]र्यकार्यान्तरलक्षण[त्व]मिति तैरेव निराकृतमिति ।

त्वन्मनोरथानुवृत्तेस्तु द्रव्यमात्रदर्शनाभिमुखीभूयापि बलादेवात्याज्याभिमतत्वद्द्रव्यशब्दार्थवशात् पुनरपि द्रव्यावस्थान्तरभूताया गतिस्थित्यादिक्रियाया आपत्तिः, भवति भवनं वा द्रव्यमिति भव्यार्थत्वात्, तत्र प्रकृतिप्रत्ययार्थाभ्युत्पत्तेर्द्रव्यक्रिययोः सिद्धिः, यद्भूयते सा क्रिया यद्भवति तद्द्रव्यमिति साध्यसाधनभेदात् ।

त्वन्मनोरथानुवृत्तेस्त्वित्यादि, द्रव्यस्यावस्थामात्रं क्रिया नार्थान्तरमित्येषः सांख्यमतानुवर्तिनो भवतः परप्रत्ययो मनोरथः स नोपपद्यते, सर्वत्र द्रव्यक्रियात्मकभावापत्तिभावादुक्तवत्, अथापि त्वन्मनोरथमनुवृत्य द्रव्यमात्रदर्शनाभिमुखीभूयापि—अवस्थान्तरं भूयमाणमपि उपेक्ष्य त्वा, यद्यपि तदुपर्युक्त स्वाङ्गीकृतचेतसो न किञ्चिद्ब्रूमः तथापि बलादेव—उपपत्तेरेवात्याज्याभिमतत्वद्द्रव्यशब्दा[र्थवशा]त्—अत्यागार्हमभिमतं तस्य तव सांख्यस्य च द्रव्यमेवार्थः, तदभिधायिनो द्रव्यशब्दस्य वशात् तदर्थवशाच्च पुनरपि—वारं वारं द्रव्यावस्थान्तरभूताया गतिस्थित्यादिक्रियाया आपत्तिः, सा क्रियाऽऽपन्ना, कस्मात्? भवति भवनं वा द्रव्यमिति भव्यार्थत्वात्, द्रव्यश्च भव्ये भव्यशब्दस्य कर्तरि भावे चाऽस्तु तथा द्रव्यशब्दोऽपि, तत्र द्रव्यशब्दस्य भव्यार्थत्वात् प्रकृतिप्रत्ययार्थाभ्युत्पत्तिरवश्यम्भाविनी, प्रत्यय[प्रकृति]प्रत्ययार्थाभ्युत्पत्तेः द्रव्यक्रिययोः सिद्धिः—प्रकृत्यर्थस्य क्रियात्वात् प्रत्ययार्थस्य द्रव्यत्वात् कथं व्युत्पत्तिरिति चेदुच्यते साध्यसाधनभेदात्, यद्भूयते सा क्रिया, यद्भवति तद्द्रव्यम्,—यदनुभवता वस्तुना भूयते स प्रकृत्यर्थो भावः, यद्भवति तत्कर्तृ, तस्मात् कर्तृभाव[ना]नात्वाद्द्रव्यक्रियानानात्वं स्यात्,

द्रव्यावस्थयोरैक्यस्य दर्शनाद्विरोध इत्याह—लोक इति । तयोर्भेदस्यानुभवात्वैक्यस्य विरुद्धत इत्याह—तथेति । स्वसिद्धान्तविरोधमाह—तद्विरोधेति । द्रव्यावस्था क्रियेति अभ्युपगमोऽपि एतदभ्युपगमविरोधादयुक्त इत्याह—एवमिति । द्रव्यस्य कार्यत्वेनाद् साधनयोगाद् भेदात् कार्यत्वेऽपि भावः साधनयोगो भाव इत्यपरैर्यत् कथितं तैरेव प्रकारो दोषस्तत्पर्य पर्युदस्त इति नाम तदन्यस्तत्र इति दर्शयति—कालसाधनेति । अथ द्रव्यमात्रं तत्त्वमिति सांख्यपक्षाभ्युपगमेऽपि क्रियाया अर्थान्तरत्वं भवेदेव प्रसज्यत एवेत्याह—त्वन्मनोरथानुवृत्तेस्त्विति द्रव्यमात्रप्रदर्शनस्य मध्ये [illegible] परत्वमाह—सर्वत्रेति भवतः द्रव्यक्रियोभयस्वरूपतायाः प्रतिपादितत्वादिति भावः । तदुपरि स्वाङ्गीकृतचेतसो वयं तव दर्शनविरोधेन त्वन्मनःपरिहारेण यद्यपि किञ्चिन्न ब्रूमो नैव वक्तव्यमपि युक्तिभिरेव द्रव्याभिधाय क्रिया सिध्यतीत्याह—अथापीति । तदर्थेऽपरत्यागस्य द्रव्याभिधानस्य हेतुमाह—भवतीति । भवतीति कर्तृव्युत्पत्तिः भवनमिति भावव्युत्पत्तिर्भव्यशब्दस्य, भव्यशब्दो हि 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा' इति सूत्रेण भावे कर्तरि च निपातितः 'द्रव्यं च भव्ये' इति तद्धितसूत्रेण भव्यार्थे द्रव्यशब्दो निपातित तस्माद्द्रव्यशब्दो भव्यशब्दवत् कर्तरि भावे वा व्युत्पत्तिद्वयेन च भावप्रधानत्वपक्षे क्रियायाः कर्तृप्रधानत्वपक्षे द्रव्यस्य च सिद्धिरिति भावः । द्रव्यशब्दार्थेन दर्शयितुमाह—'द्रव्यश्चेति । द्रव्यशब्दार्थबलेन दर्शयितुमाह—तत्र द्रव्यशब्दस्येति भव्यशब्देन द्रव्यशब्दस्य भव्यार्थकत्वैकार्थकत्वात् क्रियाकर्तृभावविशेषस्य विरोधात्सम्भवेनान्यतराविरोधाभ्यां प्रकृतिप्रत्ययार्थत्वाऽभिधानात् प्रकृतिभूतस्य भू इत्यस्य भावार्थे कर्ता द्रव्यमिति द्रव्यक्रिययोः सिद्धिरिति भावः । प्रकृतिप्रत्ययार्थव्युत्पत्तिमेव दर्शयति—साध्यसाधनभेदादिति । भवत्यर्थना क्रिया साध्यम्, प्रत्ययार्थकः कर्ता सिद्धरूपः भावप्रत्ययार्थोऽपि क्रियैवेति सिद्धसाध्यत्वाभ्यां कर्तृभाव-

१ सि. क. बोधमात्र । २ सि. क. वारं वारं । ३ सि. क. भावात्वात् ।

नान्यथा, तस्मादुभयोरप्यात्मकत्वाद् द्रव्यक्रियार्थवत्वात् भव्यभवनादिसम्बन्धाच्च भवत्येव द्वित्वमितीति साधूक्तम् ।

यत्पुनरेतदुक्तमविशिष्टदेशसंयोगो वा स्थितिरिति लक्षणं तत्र युक्तं वाक्यस्यानर्थक्यम्, विकल्पार्थासम्भवात् द्वाभ्यामविरोधात् ।

5 (यदिति) यत्पुनरेतदुक्तमविशिष्टदेशसंयोगो वा स्थितिरिति लक्षणं तत्र युक्त वाक्यानर्थक्यम् तथापि वाक्यस्यानर्थक्यं विकल्पार्थासम्भवात्, कस्मात् पुनरयुक्त ? द्वाभ्यामविरोधात्—क्रिया द्रव्य-पर्यायान्तरमित्यनेन दर्शनेनाविरोधात्, यत्किञ्चित् क्रियालक्षणेन द्रव्यक्रियाभवनेन च प्रागुक्तेन न्यायेन चाविरोधादिति, एवं तावत् प्रवृत्तिसामान्यभिन्नात्वमित्युक्त्वार्थविशेषग्रहणप्रयोजने दोषाभिधानं कृतम् ।

अमुनेदमपि विशेषग्रहणप्रयोजनं दूष्यते—

10 यदपि च द्वितीयं विशेषग्रहणप्रयोजनमभिधीयते सर्वदा सर्वभावानां प्रवृत्तिसमन्वयात् देवदत्त इति नामप्रवृत्तिकम् समप्रवृत्तिकमेव, पचत्यादिवद्देवदत्तादयोऽपि शब्दाः क्रियावचनाः, तस्मात् क्रियावचनो धातुरिति धातुसंज्ञास्तेऽपि स्युः, विशेषग्रहणसामर्थ्यात् पुनः देवदत्तादयो विशेषा न भवन्तीति निवर्त्यन्ते, सर्वमेतदसम्बन्धानुगुण्यात् प्रवृत्तिसामान्यमेवेदं भवनवत् सत्यपि भवद्भवनभावविशेषे सम्बन्धाविशेषार्थत्वात् न क्रियेति ।

(यदपि चेति) यदपि च द्वितीयं विशेषग्रहणप्रयोजनमभिधीयते सर्वदेत्यादि, सर्वदेति 15 प्रवृत्तिविहापि दर्शयति, सर्वभावानामिति व्याप्तिः, कुतः ? प्रवृत्तिसमन्वयाद्धेतोः देवदत्त इत्यपि न अप्रवृत्तिक—नाक्रियं वस्तु तेन शब्देनाभिधीयते, किं तर्हि ? समप्रवृत्तिकमेवोच्यते, यथा पचत्यादीनां क्रियावचनत्वमेव देवदत्तादीनां द्रव्यवाचित्वाभिमतानामपि, वाक्यस्यार्थस्य प्रवृत्त्या सत्त्या भवनादिसर्वभवनात्मिकया समन्वितत्वम्, ततः पचत्यादिवद्देवदत्तादयोऽपि शब्दाः क्रियावचनाः, तस्मात् 'क्रियावचनो धातुः' (महाभा अ १ पा ३ सूत्रे १) इति धातुसंज्ञास्तेऽपि स्युः, विशेषग्रहणसामर्थ्यात् 20 पुनर्विशेषाः न भवन्तीति निवर्त्यन्ते, कस्मात् पुनर्देवदत्तादयो विशेषा न भवन्तीति ? उच्यते

भेदाद्यभिमतयोरेव इति भावः । एतदेवाह—यद्भूयस्त्व इति । [illegible] ... इत्यत्र भाव इति [illegible] ... सर्वभेदात्मकत्वम्—सर्वेति । [illegible] ... प्रागुक्तम् ... परत्युक्तमिति । [illegible]

25 इति भावः । [illegible] ... क्रिया [illegible] ... विशेषग्रहणम् ... धातुत्वं निराकर्तुमाह—यदपि चेति । [illegible] ... प्रवृत्तिसमन्वयादिति, क्रिया हि [illegible] ... [illegible]

30 [illegible] ... इति भावः । [illegible] ... विशेषग्रहणेति । तत्र कारणमाह—सर्वमेतदिति [illegible]

सर्वमेवसम्बन्धानुगुण्यात् नाय विशेषः—सर्वैर्हसिपठिगम्यादिभिर्भेदैर्देवदत्तभवनप्रवृत्तेः सम्बन्धेनाऽनु-
गुणत्वात् प्रवृत्तिसामान्यमेवेदं भवनवत् सत्यपि भवद्रूपसमानविशेषे तु द्रव्यस्य[ा] विशेषार्थत्वात्, तस्मात्
[न] क्रियेति देवदत्तादेरक्रियात्वमुपसंहरति, इतिशब्दस्य समाप्त्यर्थत्वात्, एवमयं विशेषग्रहणमिति प्रकृ-
तोपसंहारः, प्रवृत्तिविशेषः क्रिया न प्रवृत्तिसामान्यमिति न भवनमात्रं नापि देवदत्त इत्युपसंहारार्थः ।

अस्यापि विशेषग्रहणस्य सदोषत्वमुच्यते— 5

इदमपि त्यक्तद्रव्यार्थोत्थानम्, प्रत्याख्यातविशेषग्रहणप्रयोजनतुल्यदोषानुषङ्गश्च ।

(इदमपीति) इदमपि त्यक्तद्रव्यार्थोत्थानम्,—इदं हि विशेषग्रहणप्रयोजनव्याख्यानमुत्थान
एव द्रव्यार्थत्याग कुरुते, अपिशब्दात् प्रागुक्तभवनसामान्यक्रियात्वनिवृत्त्यर्थं विशेषग्रहणमन्ते क्रियमेव
स्मरतीति स्मारयति, सर्वदा सर्वभावानां प्रवृत्तिसमन्वयादिति हेतुवचनेन देवदत्त इति नामप्रवृत्ति-
मिति नामवाच्यार्थस्वरूपवचनेन च प्रवृत्तिमात्रमेवेदं न द्रव्यं नामेति द्रव्यार्थस्य प्रागभ्युपगतस्य त्यागः 10
कृतो भवननेनापि विशेषग्रहणप्रयोजनवचनेन द्वितीयेनेति, न केवलं द्रव्यार्थत्याग एव दोषः, किं
तर्हि? प्रत्याख्यातविशेषग्रहणप्रयोजनतुल्यदोषानुषङ्गश्च ।

इदं कथमिति चेदुच्यते—

यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे विशेषग्रहणे प्रवर्तते ईहते चेष्टते इत्यादीनां धातु
संज्ञा न प्राप्नोति क्रियावचनानामेव धातुत्वापेक्षाक्रियात्वात् तथेहापि देवदत्तादिधातुत्व 15
निवृत्त्यर्थे विशेषग्रहणे पृतादीनां धातुसंज्ञा नैव प्राप्नोति, अक्रियावचनत्वाद्देवदत्तवत्, स वा
क्रिया स्यात् सर्वमेवसम्बन्धानुगुणत्वात्पृतादिवत्, अनिष्टं चैतदिति । प्रवृत्तिसामान्यनिवृत्त्यर्थे
देवदत्तादिद्रव्यनिवृत्त्यर्थे च विशेषग्रहणे द्विधाऽप्यस्वशब्दोपादानसाध्यसाधारिलक्षणमुक्ति-
वचनस्यानर्थक्यं स्यात्, द्वयोरपि क्रियात्वात् ।

यथा तत्रेत्यादि ग्रन्थ उपसंहृते दोषाख्यया चोपमेयोत्तरत्वेन समर्थयति, प्राग्व्यक्तरेव स्मर 20
कर्तृस्थाः फलोद्देशिन्याः क्रियास्व प्रतिपाद्योपसंहृत तस्मात् प्रवृत्तिविशेषः क्रिया न प्रवृत्तिसामा-
न्यमिति, तत्र दोष आख्यायते यदि प्रवृत्तिविशेषः क्रिया प्रवर्तत ईहते चेष्टत इत्यादीनां धातुसंज्ञा न

धार्मिर्मोक्षविरोधात्मका ये एव हि विशेषा तमोन्मुखा प्रकृतिः स्थितिता सामान्यादिमिष इत्युच्यते अत एव सामान्यं
नपुंसकं भवति एवमामिमोक्षविरोधात्मकवचनमेवदन्यत्रऽपि सामान्यसैव समतया प्रक्रियामात्रत्वेन न प्रकृतिविशेषतेति देवदत्ता-
दिद्रव्यप्रतिषेधे न धातुत्वमिति भावः । तत्र व्याख्यानमाह—भवनवदिति यच्छस्य—देवदत्तादिद्रव्यस्य अविशेषार्थत्वात्—भवनमा- 25
त्रवाचित्वात्, भवितभवतिविभक्तीनां भवनसामान्यवाचित्वेन न क्रियाविशेषवाचकत्वमेवं देवदत्तादिद्रव्यनामसपीति भावः । तदेवमुक्तं
विशेषग्रहणप्रयोजनं दूषयति—इदमपीति विशेषग्रहणेन उत्प्रेक्षप्रयोजनप्रत्याख्यानेन च क्रियायाः द्रव्यस्य च निराकरणमेव इदं
वस्त्वेति भावः । एतदेवाह—इदं हीति । प्रवृत्तिमात्रमेवेदमित्रभेदवचनेन द्रव्यस्य व्यावर्तितत्वाद्द्रव्यार्थत्याग इत्याह—प्रवृत्तिमात्र
मेवेदमिति । प्रत्याख्यातविशेषग्रहणप्रयोजनतुल्यदोषानुषङ्गमेव स्फुटीकरोति—यथा तत्रेति कारकवाच्य इति वाचक-
विधिना सह वाक्यमेवं वाचकी प्रकृति क्रिया या पूर्वं सामान्यतया भवन प्रतिपाद्यते तस्मात् कारकान्ते प्रकृतिविशेषा क्रियेति 30
भाष्याभिप्रायः । तद्व्याख्यास निर्णीतार्थं कार्यं दर्शयति—तस्मादिति । तत्र दोषमुद्भावयति—यदीति विशिष्यतरेण क्रियायाः

१ सि. क. सम्बन्धिना ।

प्राप्नोति क्रियावचनानामेव धातुत्वात् तेषामक्रियात्वात्—प्रवृत्तिविशेष[स्य] क्रियात्वादित्येष दोषः यथा
तत्र प्रवृत्तेः सामान्यनिवृत्त्यर्थे विशेषग्रहणे, तथेहापि देवदत्तादिधातुत्वनिवृत्त्यर्थे विशेषग्रहणे देवदत्तादीनां
धातुसंज्ञा नैव प्राप्नोति किं कारणम्? अक्रियावचनत्वात्, देवदत्तवत्, तद्धर्मस्याक्रियात्वादक्रियावचनत्वम्,
तद्धर्मस्याक्रियात्वं सर्वभेदसंबन्धानुगुण्यात्, स वा देवदत्तः क्रिया स्यात् सर्वभेदसम्बन्धानुगुण्यत्वात्,
5 द्रव्यादिवत्, अनिष्टं चैतदिति, किञ्चान्यत्—प्रवृत्तिसामान्यनिवृत्त्यर्थे देवदत्तादिद्रव्यनिवृत्त्यर्थे च विशेषग्रहणे
द्रव्यत्वस्तस्वरूपोपादानसामर्थ्याभावाविशेषव्यावृत्त्यर्थमग्रहणानर्थक्यं स्यात्—यदुत्पन्नसत्स्वरूपोपादानसामर्थ्यभावो
भावस्तस्य, भावादिमहत्त्वात् स्वरूपोपादानसिद्धभावः सत्त्वमिति लक्षणमुक्तिव एव द्रव्यमिति[न]
वस्तुनोऽपि, शिष्टसंख्यादिमदशिष्टसंख्यादित्वेन द्रव्यो द्रव्यस्य तथा त्रिकालात्रिकालविषयत्वं भूता-
भूतमेव द्रव्यादिधर्मस्वलक्षणवचनमनर्थकं द्वयोरपि क्रियात्वादिति ।

10 यथा च तथोच्यते नैव दोषः, विशेष इति हि भवतः क सम्प्रत्ययः? य उपादीयमा-
नोऽन्यं निवर्तयतीति परो ब्रूयात् यथैवं ब्रुवाणयोऽपि उपादीयमाना विशेषाभिवर्तयन्ति तर्हि
गच्छन्त्यादयो विशेषा निवर्त्यन्ते न गच्छति न शेते न भुङ्क्ते वर्तते एवास्ति भवति विद्यत एव
केवलमिति, विपर्ययादिवत् यथाचोक्तं भाष्यकारेण 'सामान्यमपि यथा विशेषस्तद्वदिति',
(महा० अ० १ पा० २ सू० २४) ततश्चैषां सिद्धा धातुसंज्ञेति यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे
15 विशेषग्रहणे परिहार एवमिहापि प्रत्युच्यते, एवञ्चोच्यमाने नन्वसम्भूतस्य एव दृष्टं फलमभिप्रे-
तम्, नन्वस्माभिरप्यभिहित प्रवृत्तिरेव प्रवृत्तिविशेष इति, एवञ्च कृत्वा प्रवृत्तिमात्रस्य सर्वत्र
भावात् विशेषग्रहणमनर्थकमुभयोरपि व्याख्यातृविकल्पयोः ।

सामान्यप्रतिषेधपक्षे प्रवर्तते इत्यादीनां धातुत्वं न स्यादिति भाव । द्वितीये विशेषग्रहणपक्षेऽपि दूषयति—तथेहापीति ।
इहापि विशेषग्रहणे देवदत्तादीनां सर्वविशेषाधारतया सामान्यप्रतिषेधपक्षवत् धातुत्वं यथा तथैव इत्यादिसामान्यप्रतिषेधपक्षे
20 धातुत्वं न स्यात् तदेवोपपादयति । सर्वविशेषाधारतया सामान्यरूपत्वेन प्रवृत्तिविशेषवत्त्वक्रियात्वाभावादित्याह—अक्रियावचन-
त्वादिति । सामान्यमात्रस्याक्रियात्वे हेतुमाह—तद्धर्मस्येति इत्यादिधात्वर्थस्य सर्वे ये भेदा विशेषास्तत्सम्बन्धानुगुण्ये
वा क्रियात्वमिति हेतुकं । सर्वभेदसम्बन्धानुगुण्यत्वेऽपि इत्यादेर्धातुत्वे देवदत्तादीनामपि धातुत्वमेव स्यादित्याह—स वेति । प्रवृत्ति-
सामान्यस्य देवदत्तादेश्च भावरूपत्वात् भवतु नाम विशेषग्रहणम्, उभयोरपि तयोरपि क्रियात्वात्, सामर्थ्येन [illegible]
भावो नाम [illegible] द्रव्यम्, अशिष्टसंख्यादिमत् भावः शिष्टसंख्यादिमद्द्रव्यम्, अत्रिकालविषयो भावः त्रिका-
25 लविषयं द्रव्यं भूतो भावः अभूतं द्रव्यमित्यादिभेदेन द्रव्यभावलक्षणभेदेऽप्यनुपपन्नत्वात एव भिन्नं न तु वस्तुभेदेनेत्याह
उभयोरपि [illegible]—किञ्चान्यदिति । भावादिमहत्त्वादिति भाष्यभावादिमहत्त्वादित्यर्थः । अपि च भाष्य-
कारेण विचारद्वारेण समर्थितं इत्यादीनां धातुत्वं निराकर्तुं भाष्यकृदभिमतं प्रदर्शयति—यथा चेति । प्रवृत्तिविशेषग्रहणे प्रवृ-
त्त्यपादिस्यते तथैव दोषः सम्भवति यत विशेषस्य अभ्यर्थमभिप्रेत भवान् दोषमाहेति भाष्यकारः पृच्छति विशेष
इतीति । व्याख्यातार विशेषपदार्थं स्वरूपं वदति परो—य उपादीयमान इति । इत्यादयोऽपि व्यापकत्वेन सम्बन्धादिति इत्येव
30 तेषां धातुत्वमिति भाष्यकार आह—यथैवमिति । द्वितीयविशेषग्रहणपक्षेऽस्माकमनिष्टापि देवदत्तादीनां धातुत्वं दुर्वारम्, उभ-
यानुगतेषु प्रवृत्तिविशेषणादिति दोषमभिधाय तुल्यतया उभयोरपि व्याख्यातृविकल्पयोः—एवमिहापीति । ननु प्रवृत्तिविशेषस्य

---

१ सि. क. व्यादर्शे ।

यथा च तत्रोच्यते नैष दोष इत्यादि, एवं दोषेऽभिहिते स्वाम्मत प्रवृत्तिसामान्यनिवृत्त्यर्थं विशेषग्रहणप्रयोजनदोषं परिहरामीति विशेष इति भवतः क सम्प्रत्ययः ? इति प्रश्नोपक्रम दोषवादिनैव परिहारमभिधापयिष्यता दोषवादी किल ब्रूयात्—य उपादीयमानोऽन्यं निवर्तयतीति परो ब्रूयात्—यद्येवं भूवादयोऽप्युपादीयमाना विशेषान् निवर्तयन्तीति, तर्हि गच्छत्यादयो विशेषा निवर्त्यन्ते न गच्छति न शेते न भुङ्क्ते वर्तत एवास्ति भवति विद्यत एव केवलमिति, तस्मादुपादीयमाना गमनादीन् विशेषान् 5 निवर्तयन्ति भूवादयस्तिष्ठत्यादिवत् तथा चोक्तं भाष्यकारेण 'सामान्यमपि यथा विशेषस्तद्वत्' (महाभा० अ० १ पा० २ सूत्रे २४) इति ज्ञापकमिदमिति, भवत्यादिविशेषोपादीयमानत्वे विशेषनिवृत्तिहेतुत्वात् तिष्ठत्यादिनिवृत्तिहेतुगच्छत्यादिवत्, ततश्चैषां सिद्धा धातुसंज्ञा—भूवादीनामिति, यथा तत्र प्रवृत्तिसामान्यनिवृत्त्यर्थे विशेषग्रहणे परिहार एवमिहापि प्रसज्यते—द्रव्यनिवृत्त्यर्थेऽपि विशेषग्रहणे परिहार उच्यते, प्रत्युच्येत तथा सर्वभावानां प्रवृत्तिसमन्वयादेवं वस्तु इत्यपि नाप्रवृत्तिकं वस्तु तस्मात्तन्निवृत्त्यर्थं सर्वमेवेदं 10 न्याय्यानुगुण्यात्तु भावं विशेष इत्येतदर्थेऽपि विशेषग्रहणे वैयर्थ्यमस्य क्रियात्वं स्यात्, भूवादीनां तद्वत्क्रियत्वात् [धातु]संज्ञा मा भूत्, तत्तस्योपादानसिद्धवादवचनानर्थक्यप्र[स्या]द्विशेषापादने कृते स एव परिहार उच्यते त्वया, विशेष इति भवतः क सम्प्रत्यय इत्यादि यावत् सिद्धा धातुसंज्ञा, एवं परिहारद्वयेऽपि समानमित्युत्तरमुच्यते—एवमुच्यमाने भवत्सदृश एव दृष्ट—नभ्यसनुज्ञापने—अनुज्ञात स्वक्षेत्र दग्धसूदयक्षेत्र तस्य दर्शनबीजस्य स्वाद्वनसलिलसेकेन फलमभिव्यक्त, तद्विवृणोति स्यादयम्—अन्वया- 15 भिरप्यभिहितं प्रवृत्तिरेव प्रवृत्तिविशेष इति—उच्यते भूवादिसामान्यमुपादीयमानं गमनादिविशेषं निवर्तयतीति तदन्येव यदि भूवादिसामान्यव्यतिरेकेण गमनादिविशेषः स्यात्, स तु सामान्यमेवेत्युक्तम् तस्मान्न सामान्याद्विशेषाभावात् उपादीयमानं विशेषाभिवर्तयितुमर्हति, द्रव्यगुण्यादिविशेषाणि च तत्प्रवृत्ति

क्रियात्वे भूवादीनां धातुत्वं न स्यात् तेषां प्रवृत्तिविशेषाभावात्वादिति वदते भवतो विशेषपदेन किमभिप्रेतमिति दोषवादिनैव परिहारमभिधापयितुकामो भाष्यकारो वार्तिकं पृष्टवानाह—स्वाम्मतमिति तथं हि भाष्यकृता वां पुनः क्रियां भवान् मत्वाह- 20 वर्तिवदविभिवादीनां धातुसंज्ञा न प्राप्नोतीति । परोक्ति प्रत्यवमर्शि—य उपादीयमान इति उक्तं हि भाष्यकृता परोक्ति 'न ब्रूमः यदस्माभिः क्रियेति किं तर्हि ? यदस्य यत्नेनैव विशेषः क्रिया अन्यथा हि यदस्मात् प्रणीयते प्रवत्यते अन्यथा च भाषीयते' इति । तामेव युक्तिं भाष्यकार० उक्ती एवमाह—यद्येवं भूवादय इति तथं च भाष्यकृता 'यद्येवं सिद्धोऽस्तिभवति-विद्यतीनां धातुसंज्ञा अन्यथा हि यदस्मात् प्रवर्तन्तेऽन्यथा हि भ्रियते' इति । तिष्ठत्यादिभवतीति तथा हि भाष्ये 'एवं तर्हि क्रियावाः क्रिया निर्वर्तिका भवति द्रव्यं द्रव्यस्य निवर्तकम्, एवं हि कश्चित् कश्चित् पृच्छति किमयमसौ देवदत्तस्य भ्राविति 25 न चाह-भवत इति अपर आह-अपरोऽस्त इति अपर आह स्थित इति स्थित इत्युक्ते सर्वेऽपि यदन्ये निवृत्तिमन्तो' इति एवं च क्रिया क्रियान्तरव्यावर्तिका प्रवृत्तिविशेष उच्यते तत्प्रभृतिश्च धातुत्वम्, तथा च स्थितात्वाः क्रिया- क्रियान्तरनिवर्तकत्वात् तिष्ठत्यादिनिवर्तकगच्छत्यादिवत् वैयर्थ्येन द्रव्यवत्, द्रव्यं हि द्रव्यस्य निवर्तकं न तु क्रियान्तरस्य वनिभिरव्यभाग्यन्यायाति भाव। एवं च सामान्यस्य विशेषत्वमपि द्वितीयस्याप्याख्यायां देवदत्तोऽन्यस्यापि प्रवृत्तिविशेषत्वाद्धातुत्वं प्रसज्यत इत्याह—एवमि- हापीति । एवमपि प्रवृत्तिमात्रत्वात् सामान्यव्यतिरिक्तविशेषाभावात् विशेषव्यावर्तनाभावेन तद्वत्त्वं भवतीति प्रत्यवस्थानमि- 30 त्यादेव तदपि प्रवृत्तिकमिति इत्येतदपि न्याय्यमेतदपेक्षप्रवृत्त्यमुक्तावपि—एवमुच्यमान इति । तदर्थदर्शी—तस्मादिति

---

१ सि क. भवतः । २ सि क. 'हृतमेवेहापि' । सि क सुतरमिदम् । ३ सि चाक्षाह ।

विशेषत्वाभावात्तु मन्त्र परिहारे विशेषग्रहणा[न]र्थक्यमेवं देवदत्तक्रियास्वप्युपचयक्रियात्वदोषात्प्रदर्शना एवेति, तदुपसंहरन्नेवञ्च कृत्वा प्रवृत्तिमात्रस्येत्यादि गदार्थं चावदनर्थकमुभयोरपि भ्वादिभिन्नयोरिति, एवं तावद्विशेषग्रहणमनर्थकम् ।

न केवलमनर्थकमेव किं तर्हि ? अनर्थोर्थमपीत्यत आह—

5 न चाफलमेव, अनिष्टकृदपि, एवं देवदत्तस्य क्रियात्वं स्यात्, अन्यनिवर्तनप्रवृत्तिविशेषत्वात्, पचादिवद्गादिवदिति, येऽप्यमी भ्वादयस्तेऽपि अनित्यास्तत्प्रत्ययानामधातुसंज्ञा च स्यात्, सर्वमेवसम्बन्धानुगुणविशेषत्वादेवदत्तवदेव ।

न चाफलमेवानिष्टकृदपीति, तदनिष्टकृत्त्वं साधनेनैव भाव्यते—एवं देवदत्तस्य क्रियात्वं स्यात्, अन्यनिवर्तनप्रवृत्तिविशेषत्वात् पचादिवद्गादिवदिति प्रवृत्तिविशेषत्वमन्यत्वं तन्निवर्तनश्चेति द्रव्यान्-

10 तरस्य प्रवृत्तिसामान्यव्यतिरिक्तस्यार्थस्याभावादेवायुक्तमभ्युपगम्यापि दोषः—देवदत्ता क्रिया स्यात्, अन्यनिवर्तनत्वे सति विशेषप्रवृत्तित्वात्, ते गच्छन्त्यादिविशेषनिवर्तनो पचत्यादिविशेषनिवर्तनस्य सामान्यत्वात्, उपादीयमानत्वे सत्यन्यनिवर्तनत्वात् प्रवृत्तिविशेषश्च, ततश्च पचत्यादिर्वद्धर्वत्यादिवच्च क्रिया, क्रियात्वाच्चाश्रयिणः तत्प्रत्ययस्य धातुसंज्ञा पूर्ववदप्यन्यत्वप्रसङ्गेन, पचत्यादिवद्भ्वादयः तद्वद्देवदत्तादय इति सर्वं क्रियैवेत्यापन्नं अनिष्टमेवतावयोरिति, येऽप्यमी भ्वादयस्तेऽप्यक्रियाः, तत्प्रत्ययानामधातुसंज्ञेत्यादि,

क्तिव्यतिरिक्तो व्यञ्जकः प्रसिद्धो न तु तद्रूपाव्यतिरिक्तः, यदैवोत्पद्यते तदैव विनश्यतीति द्रव्यस्यावस्थाविभागं ब्रुवता त्वया न ततोऽन्यः संयोगः संयोगी वाऽभ्युपगम्यते, क्रियात्मावस्थाद्रव्यमेवमिति नियमात्, तदभ्युपगम्य व्यक्तिधर्मस्त्यक्तः, तस्यागाच्च व्यक्तिरनुपपन्नैव, व्यक्तिकारणाभावात् ।

5 अपि चेत्यादि, अभ्युपगम्याभिन्नार्थैक्यापत्तिविषये व्यङ्ग्यव्यञ्जकौ लोकप्रतीतव्यक्तिधर्मविपरीतत्वात् तत्त्यागाद्यभाव इति ब्रूमः, लोके हि पूर्वव्यक्तिव्यतिरिक्तो व्यञ्जनः प्रसिद्धोऽन्य, तद्यथा दीपादि योगो मृगव्यधमुरिन्द्रियसाद्व्यमिव्यक्तिघटादिदर्शनहेतुः यथासंख्यम्, मुनिक्रियासाधनैर्मूर्तोगिमूक्तामिद्रव्यभावमुपलभ्यते यथा न तथा तद्रव्य[ा]व्यतिरिक्तम्, यदैवोत्पद्यते तदैव विनश्यतीति द्रव्यस्थैवस्थाविभागं ब्रुवता त्वया न ततोऽन्यः संयोगः संयोगी वाऽभ्युपगम्यते द्रव्यक्रियाद्यभ्युप,

10 द्रव्यावस्थामात्रत्वादुत्पादादीनाम्, किं कारणं ? क्रियैवात्मावस्थाद्रव्यमेवमिति नियमात्–उत्पादादयः क्रियायाः स्वावस्था इवेव यथा द्रव्यस्यापि परस्परभिन्नाः समोऽवस्था इवेतत्र यथा यथाभिविधिव्यक्तो ययम्, द्रव्यनिर्मुक्तत्वाविशेषात् तस्मादभ्युपगतं त्वया न किञ्चिद्द्रव्य[व्यति]रिक्तमस्तीति, ततश्च तदभ्युपगम्य व्यक्तिधर्मस्त्यक्तः, तद्विपर्ययधर्मत्वो द्रव्यमात्रस्याभ्युपगमात्, तस्यागाच्च व्यक्तिरनुपपन्नैव, व्यक्तिकारणाभावात् ।

15 सा भव निर्मुक्ता व्यक्तिरव्यक्तिर्वा द्रव्यधर्मः समानः, यथोक्तं 'सुदूरमपि संपात्य संक्षीणोऽपि पपपरिपु । न समासागमावन्वे कश्चित प्रतिपद्यते ( ) इति, एतदायुक्तम्–

व्यङ्ग्यव्यञ्जकौ अभिन्नार्थैक्यापत्तिमिति अभिन्नमभ्युपगम्येत्यर्थः । [illegible] तद्यथेति परपक्षोक्ते मृगव्यधमातो [illegible] द्रव्यमिन्द्रियसत्त्वमिभ्यक्तौ दीपादियोगो व्यक्तिदर्शने हेतुरित्यर्थः । मुनिक्रियाया साधनं मूर्तयोगिमूक्तादिर्वा मुनिक्रियाव्यतिरिक्तो लोके [illegible] द्रव्यमात्रमुपलभ्यते [illegible] [illegible] मुनिक्रियेति, [illegible]

20 [illegible] संयोगस्य, [illegible] संयोगिनो द्रव्यस्य [illegible] एव लोके [illegible] भावमिति वर्तत इति भावः । [illegible] [illegible] यदैवेति, [illegible] द्रव्यस्य स्वावस्था इति [illegible], [illegible] इति भावः । [illegible] द्रव्यमात्रस्य [illegible] क्रियेति [illegible]–उत्पादादय इति [illegible] द्रव्यस्य [illegible] क्रियात्मा वा इति [illegible] द्रव्यमात्रस्य [illegible]

25 [illegible] द्रव्यव्यतिरिक्तस्याभावे द्रव्याव्यतिरिक्ता क्रिया [illegible] न स्यात्, [illegible] । तद्विपर्ययेति व्यक्तिधर्मविपर्ययभूतद्रव्यमात्रस्याभ्युपगमादित्यर्थः । तस्यागाच्चेति [illegible] [illegible], न हि [illegible] [illegible] व्यक्तिर्भवतीति भावः । [illegible] व्यक्तिरव्यक्तिर्वेति [illegible]

30 [illegible] [illegible] [illegible], [illegible] [illegible]–[illegible] । [illegible]

---

१ सि. क. दर्शन्ति । २ सि. क. [illegible] । ३ क. ×× । ४ सि. क. [illegible] । ५ सि. क्षमय ।

अहेतुतो व्यक्तेरिव चाऽव्यक्तेरपि तत्त्वे नित्यमेव व्यक्तिरव्यक्तिर्वा सर्वस्य स्यात्, परिणामान्नैवमिति चेन्न, उक्तदोषतुल्यत्वात्, एष तावदुत्पादविनाशयोः संयोगेनाद्य विकल्पः समप्रसंगपरिहारप्रपञ्चोऽभिहितः[1], तथा वक्ष्यमाणेषु समानः प्रपञ्चो द्रष्टव्यः ।

(अहेतुत इति) अहेतुतो वा व्यक्ते[रि]वाव्यक्तेरपि तत्त्वे तेन तुल्य तत्त्व, तस्य भावस्तत्त्वं व्यक्तिवत्त्व इत्यर्थः, कथं ? यथा व्यक्तिर्निर्हेतुका तथैवाव्यक्तिरपि निर्हेतुका, ततः किमिति चेदुच्यते— 5 नित्यमेव व्यक्तिरव्यक्तिर्वा सर्वस्य स्यात्, निर्हेतुकत्वात्, मृदवस्थायां घटाव्यक्तिवद्घटावस्थायामव्यक्ति- र्घटस्य स्यात्, घटावस्थायां घटव्यक्तिवत् मृदवस्थायां व्यक्तिः स्यात्, मृत्पिण्डे घटव्यक्तिवत् गगनेऽपि स्यात्, वियदव्यक्तिवन्मृदप्यव्यक्तिर्वा स्यादित्यादि, परिणामान्नैवमिति चेत्—स्यान्मत यथा त्वयोक्तं न तथा भवितुमर्हति परिणामाभ्युपगमात्, अवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तौ धर्मान्तरापत्तिः परिणामः, तस्मान्मृत्पिण्डशिवकादिपरिणामैः स्थित्युत्पत्तिविनाशा भविष्यन्ति, न निर्हेतुकाः, तस्मादेव परिणामात् 10 व्यक्त्यव्यक्ती च स्त इति, एतदपि न, उक्तदोषतुल्यत्वात्, ये एतेऽस्माभिर्भावस्वाभावस्वपक्षे च भिन्नाभिन्नात्मकत्वे दोषा उक्तास्ते तुल्या एव परिणामपक्षेऽपि द्रष्टव्याः, परिणामावस्थयोः श्रुतिमात्रभे- दात्, तैस्तैः प्रादुर्भावस्यात्, विनाश[स्य] निवृत्तित्वात् अवस्थितस्येति च [स]ामान्येनैव स्थितिवचनात्, परिणामोच्चारणेन च नन्वेवमुभयमप्यवस्थितत्वाविरोधितो भव्यो योऽयो भावद्वयमेवाभिहितमिति, तस्मा- दपरिहारः परिणामः, एष तावदुत्पादविनाशयोः संयोगेनाद्य विकल्पः समप्रसङ्गपरिहारप्रपञ्चोऽभिहितः, 15 तथा वक्ष्यमाणेषु—उत्पादस्थितिसंयोगे स्थित्युत्पादसंयोगे स्थितिविनाशसंयोगे विनाशोत्पादसंयोगे विनाशस्थितिसंयोगे त्रिकादिसंयोगेषु च समानः प्रपञ्चो द्रष्टव्यः, यदैवोत्पद्यते तदैव विनश्यत्यतः प्रवृत्ति- र्भावद्वयमभिहितमिति प्रत्ययोजनया योजयिष्यते ।

अथोत्पादविनाशसामानाधिकरण्ये दोषदर्शनाद्विकल्पान्तरमाश्रीयते यदैवोत्पद्यते तदैव

धर्मित्वमनिमित्तत्वेऽपि भवति—यथोक्तमिति स्याद्वादः । समाधत्ते—अहेतुत इति कारणान्तरनिरपेक्षा व्यक्तिरिति भावः । 20 यथा स्वाव्यक्तेरपि तत्त्वे—व्यक्तिवत्त्वे इति एवं व्याचष्टे—अव्यक्तेरपीति । तदेव व्यक्तिवत्त्वं दर्शयति—यथेति । अहेतुके भावे नित्यं भावस्य सत्त्वमसत्त्वं वा भवेत् न कदाचित्कत्वं तथा सर्वं सर्वत्र स्यात् इत्यादिदोषं दर्शयति—नित्यमेवेति । अथ स्थित्यादयो नाहेतुको भवन्ति अपि तु परिणामात् स्युरिति शङ्कते—परिणामादिति । परिणामस्वरूपं दर्शयति—अव स्थितस्येति तत्र निवृत्त्यापत्ती विनाशोत्पत्ती अवस्थानं स्थितिः तदेतत्त्रयं वस्तुनः परिणामित्वादुपपद्यत इति नोक्ता दोषा इति भावः । अत्रापि पक्षे दोषमाह—उक्तदोषेति, भिन्नेति उपादानकारणं परिणममूलस्य पिण्डशिवकादेर्भेदस्य कथं 25 परिणामिनो मृदात्मकत्वस्येति विकल्पतः परिणामस्य परिणामिनश्च भेदाभेदाभ्यां च दोषस्तैस्तत्रारम्भादेकत्वादि प्रदर्शितस्त- थात्वमपि पक्षे निर्दोषं परिणामावस्थयोः पर्यायत्वात् यद्यपि धर्मधर्मिणोरभेदेऽपि परिणामस्य त्रैविध्यं यथा मृदः पिण्ड- शिवकादिः धर्मपरिणामः वर्तमाना मृत् अनागता अतीता चेति लक्षणपरिणामः नवपुराणादिरवस्थापरिणाम इति तथापि धर्मधर्मिणोरवस्थानतिरेकेऽवस्थापरिणामयोः श्रुतिमात्रभेद एव इति बोध्यम् । दोषमपरं दर्शयति—नन्वेवमिति । यदैव चोत्पद्यते तदैव विनश्यतीति उत्पादविनाशसंयोगेन विकल्पे दोषा उपदर्शिताः एवमेवापरेष्वप्युत्पादस्थित्यादिषु 30 विभाव्या इति दर्शयति—एवं तावदिति । प्रकृतं दर्शयति—उत्पादेति । अथोत्पादस्थितिभावमेव विधिमाश्रयते—अथेति ।

1 सि व्यक्तिर्न हेतुकाः । 2 सि क. इति निस्सेव । 3 सि क उभयमितु ।

निविष्ठतीति, अत्रापि हि द्वयी गतिः—तेनाप्युत्पत्तिप्रकारेणावतिष्ठमानं यद्वा स्थित्युत्पत्तिविना-
शप्रकारैः सर्वथावतिष्ठमानं तदेवोत्पद्यते तदेव निविष्ठति चेति, यदि तयोत्पादेनैवावतिष्ठमा-
नमुत्पद्यते निविष्ठतीत्युच्यते तत्र तत्पादेनैवावस्थितत्वान्नोत्पद्यत इति उत्पत्तिर्द्वयस्याऽपि कुतः ?
उत्पद्यमाने चावस्थानम् ? यदुत्पद्यते कथमवतिष्ठते ? यद्यवतिष्ठते कथमुत्पद्यते ? इति
5 स्ववचनादिविरोधाः पूर्ववत् ।

अथोत्पादविनाशसामानाधिकरण्य इत्यादि, उत्पादविनाशैकाधिकरण्ये दोषदर्शनात्
निर्दोषोऽयमिति विकल्पान्तरमाश्रीयते यदेवोत्पद्यते तदेव निविष्ठतीति अत्रापि न निर्दोषमेवमिति ब्रूमः,
अत्रापि हि द्वयी गतिः तेनाप्युत्पत्तिप्रकारेणा[व]तिष्ठमानं—यद्वोत्पादेनैवावतिष्ठमानमुत्पद्यते [1]निविष्ठती-
त्युच्यते यद्वा स्थित्युत्पत्तिविनाशप्रकारैः सर्वथाऽवतिष्ठमानं यदेवोत्पद्यते तदेव [2]निविष्ठति चेत्युच्यते
10 यदि तयोत्पादेनैवावतिष्ठमानमुत्पद्यते [3]निविष्ठतीत्युच्यते तत्र उत्पादेनैवावस्थितत्वान्नोत्पद्यत इति
उत्पत्तिर्द्वयस्यापि कुतः ? इति, असंभव इत्यर्थः अस्ति चोत्पत्तिः, उत्पद्यमाने चावस्थानं ? कुत इति वदते,
यदुत्पद्यते कथमवतिष्ठते ? यद्यवतिष्ठते कथमुत्पद्यते ? इति स्ववचन[ादि]विरोध[ा]ः पूर्ववदिति—यथाङ्कुरो-
त्पत्तिविनाशैकाधिकरण्योदाहरणे स्ववचनादिविरोधास्तथात्राप्युत्पत्तिस्थितिसामानाधिकरण्ये योज्या इति ।

व्यापित्वतत्त्वानुभवतोऽङ्कुरवत्तन्तुवत् भवीर्यभूम्यस्य पूर्वोत्तरतया स्थित्युत्पत्तिविनाशावस्था
15 व्यापित्वतत्त्वानुभवबीजाङ्कुरत्वादय इत्यस्मिन् प्रकल्पे उत्पत्तिस्थितिसामानाधिकरण्ये न
स्ववचनादिविरोधा इत्यत्रोच्यते, एतस्मिन्नपि प्रकल्पे बीजस्यांशूनां चाऽनुत्पादित्वादविनाशि-
त्वाच्च नित्यत्वात् स्थितिरेवेति कुतोऽङ्कुरो बीजात्, कुतोऽप्यंशुभ्यस्तन्तुः ? इति त एव
विरोधाः, पूर्वमप्यनित्यत्वाद्वा बीजानुत्पत्तेः ।

व्यापीत्यादि यावत् प्रकल्प इति, साम्प्रतं [4]व्यापित्वतत्त्वानुभवतोऽङ्कुरवत्तन्तु—व्याप्नोतीति व्यापी

---

10 अत्रापि चोत्पद्यमानस्य [illegible] विकल्पमाश्रयति—अत्रापीति [illegible] ।
[illegible] वस्तुनः [illegible] अथवा [illegible] वस्तुनो [illegible] इति
द्वैविध्यं दोषाभिधित्सया दर्शयति—तेनापीति । प्रथमप्रकारे दोषमाह—यदीति । [illegible]
[illegible] पूर्वं [illegible] उत्पद्यते [illegible] भावः । उत्पत्तिर्द्वयस्यापीति, [illegible]
[illegible] भावः । [illegible] उत्पद्यमाने इति । [illegible]
15 [illegible] अथवा तदेवोत्पद्यते तदेव निवि-
ष्ठतीति स्ववचनविरोधः [illegible] तदेवैकमेवेति [illegible]
पूर्वमिव [illegible]—पूर्ववदिति । द्वितीयप्रकारे दोषो नास्तीति [illegible]—व्यापीति [illegible]
[illegible] तत्र एकार्थो [illegible] न तत् [illegible]
त्वात् [illegible] स्थितिमात्र [illegible]
20 [illegible] सर्वथावतिष्ठमानं तदेवोत्पद्यते तदेव निविष्ठतीत्युच्यत इति [illegible]
[illegible] इति परिहरन्नभिप्राय । एतदेव व्याचष्टे—व्याप्नोतीति, व्यापकं [illegible]

---

1 सि क. अथ विनाशसामानाधिकरण्योदाहरणे । 2 सि क. मार्गे । 3, 4, 5, सि क. [illegible] । 6 सि क.
यथा [illegible]तत्त्वानुभवतो [illegible] तु वस्तु ।

अविशेषितत्वात् सर्वस्य व्याप्यस्य कार्यस्य व्यापकं कारणमुच्यते व्यापीति, व्यापिनः सत्त्वस्यैवैवमनु भवतोऽङ्कुः तथापि द्रव्यार्थपाठाभ्यविभा, व्यापि सत्त्वस्य सत्त्वेति वा विग्रहः, स च व्यापिसत्त्वस्यानुभवो ह्युरेव तन्तुर्व्याप्यः, कारणमयत्वात् कार्यस्य, किमुक्तं भवति ? पर्यांशुमयस्तन्तुः भवतोऽङ्कुरेव तन्तुरिति दृष्टान्तो, अंशुरपि तन्तुः तन्तुरप्यंशुरिति वा, तथा बीजमयोऽङ्कुरः, बीजमेवाङ्कुरः, अङ्कुरोऽपि बीजं बीजमप्यङ्कुर इति वा दार्ष्टान्तिकः, तद्वर्णयति–मदीयद्रव्येत्यादि–मकृतदीपस्य ग्रामीयसो द्रव्यस्य 5 मेर्वादेरिव पूर्वोत्तरतया स्थित्युत्पत्तिविनाशावस्था व्यापिसत्त्वस्यानुभवबीजाङ्कुरत्वादय इत्यभिन्न् प्रकृत्ये घटेषोत्सृपते घटेनापविश्य इत्युत्पत्तिस्थितिसामानाधिकरण्ये साधनादिविरोधा न सन्ति, तत्र वस्तु नोऽन्यमात्रमिदमस्यानुत्पत्त्यविनाशिनः स्थितिरेव व्यापित्वत्रोच्यते, एतस्मिन्नपि प्रकृत्ये बीजस्य दार्ष्टा-न्तिकांशूनां वा दृष्टान्तभूतानां घटाभावान्यस्य वा कस्यचिद्वस्तुनः मदीयस्यानुत्पत्त्यविनाशित्वात् नित्यत्व नित्यत्वात् स्थितिरेव, नात्पादविनाशाविति कुतोऽङ्कुरो बीजात् ? कुतोऽंशुभ्यस्तन्तुः ? अतोऽङ्कु- 10 रतन्त्वनुत्पत्तिरेवेति, ततः किमिति चेत् ? इति त एव विरोधाः, उत्पत्त्यभावात् पूर्ववत् साधनादि-विरोधावस्थता यथेति, पूर्वत्वाभ्यनियतत्वाद्वा बीजानुत्पत्तेः, स एव विरोधा इति वर्तते, अस्तु त्वदुक्तेनैव न्यायेन व्यापिसत्त्वस्यानुभवपूर्वत्वाभावबीजस्य मदीयद्रव्यस्थितस्य चेति पूर्वत्वा[भा]वानुत्पादाविनाशि-

अर्थान्तराविशेषेण यतो व्याप्नोति अत एव तत् व्यापीत्युच्यते पिण्डशिवकस्थासकोशकुशूलघटकपालादिषु परोऽङ्कुरपर्यन्तम्, अभीष्टद्रव्यम् तत्, अत एव तथाः पूर्वापरोत्तरभावाः स्थिताभावोऽवस्थाः पिण्डादिरूपाः पिण्डाकारमत्वावस्थाः तथांशुतन्तवो घटवे 15 तन्तुरपि यस्य तत्र व्यापिनः कारणस्य तन्त्वोत्पत्तावद्भवतोऽन्तु. द्रव्यार्थवादाभावात् अतश्च व्यापिसत्त्वस्यानुभवो-द्रव्यानुवर्तयतीति मयम्व्याख्याताऽन्यैः अत तन्तुस्थानीयांशुविकारत्वात् अंशुमयस्तन्तुरिति अंशुरेव तन्तुः एवमङ्कुरमपेक्ष्य घटादीनां बीजस्य व्यापिनः मदीयद्रव्यस्य विकारत्वाद्बीजमयत्वमतो बीज एवाङ्कुर इति अङ्कुराद्युत्पादस्तो बीजस्यैवावस्था इति भावः । अनुत्पत्त्यन्तरमारभ्यते–व्यापि सत्त्वमिति । अस्यार्थः सत्त्वं अस्तित्वं व्यापि सर्वाणि कार्याणि व्याप्ते यतस्तस्मादुभयतोऽङ्कुरेव तन्तुस्तन्तुरेवांशुः पूर्ववदव्यापकस्य सर्वपदार्थेऽव्यापकस्यापरिणाम इति प्रतिभाति यथा मृत् पिण्ड- 20 शिवकस्थासकोशादयः यथा वा तस्य अवयवान्तरस्य व्याप्यत्वाभावेऽपि द्रव्यार्थाभावात् व्यापिनो द्रव्यस्यैकस्याप्यवस्थोऽवस्था इति स्थित्युत्पत्तिविनाशप्रकारैरवस्थितं घटेषोत्सृपते घटेन विशिष्टमित्युच्यत इति भेदाभेद इति तद्वार्थः । भिन्नप्रवेश चेत् पर्यवसित इत्याह–किमुक्तमिति भावमुक्तत्वव्याख्येयाह–पर्यांशुमय इति अंशोर्व्यापिसत्त्वस्या-वेवत्त्वतयाऽनुभवत्वात् अभिन्नत्वात् विकारावस्थामेवाह अंशुरेव तन्तुरिति भावः अनुत्पत्त्यवस्थाप्याह–अंशुरपीति अत्र पूर्वापरत्वमसत्त्वानुत्पादविनाशवत् अभीष्टद्रव्यस्य व्यापिनोऽन्युत्पत्तेऽप्यस्य विकारेऽपि तस्य अभावात् बीजस्यैव तत्र 25 प्राधिकारिनियतत्वात्, कारणात्मस्वेऽपि सातत्त्विनाशित्वात्, तथा चान्यथा निर्गोऽस्मदीयादेवाङ्कुरादीनामनुत्पत्तिरेव, बीजं निष्क-म्भूर अस्य इति हि दृश्यते बीजस्य निष्पत्तौ न कर्मेतद्विनिवृत्त्यापि व्याप्यते तस्य वस्तुन इति अन यस्ते तत्र वस्तुनोऽ-न्यमात्रमिदमस्यानुत्पत्त्यविनाशिनः स्थितिरेव व्यापित्वमुच्यते इति योजना भिन्ना । तदेव दर्शयति–एतस्मिन्नपीति एतत् स्थितिप्रकारेण यदि उत्पत्तिरुच्यते तर्हि कस्मादुत्सृपते येन घटेषोत्सृपते घटेन निष्ठितमिति स्यात् अन्यथा घटेषोत्पत्तिस्थिती घटेनापवित इति मिथ्यं व्याप्तिसाधिविरोधा भवन्तीति दर्शयति–इति त एवेति अवस्थितत्वेनाभिमतस्य बीजादेरप्यनुत्पत्ति- 30 रेव पूर्वत्वस्य नियतत्वाभावात्–पूर्वत्वभ्येति 'कम्बो गुणकर्मणिति' इत्यमरः अस्य पूर्वत्वस्य सत्त्वं अस्तित्वं व्यापि सर्वार्थव्याप्यत्वात्, सोऽस्य व्यापि–आत्मं पूर्वत्वमः सत्त्वं आत्मभूतमिति व्यापिसत्त्वस्यानुभवपूर्वत्वमपीदं तत्र मदीयस्य कारणस्य व्यापि सर्वदिव्यत्वयोरभिमतत्वात्, एवं तस्य पूर्वापरभावनीतिसत्त्वसामान्यापित्येनानुत्पत्ता-

1 सि क तत्त्वानुत्पत्ति ।

त्वाभिन्नत्वं नित्यत्वाद्बीजानुत्पत्तिरतोऽपि यदेवोत्पद्यते तदेवावतिष्ठत इति स्ववचनादिविरोधा इति कूपखन्यकस्य व्यापितां दर्शयति ।

अत्र मा भूदमेते दोषा इति स्तम्भाद्युत्तरकाल बीजोत्पत्तिरिष्यते ततः—

स्तम्भोत्तरबीजोत्पत्तेस्तु हेतोरङ्कुरवत् स्थितिभिन्नोत्पत्तित्वात् सर्वस्य द्रव्यात्मनोऽनित्यताऽव्यापिता च, एव पूर्वापभाव एव च, अभेदत्वात् ।

स्तम्भोत्तरबीजोत्पत्तेस्तु हेतोरङ्कुरवदित्यादि—यथाङ्कुरो बीजात्स्थितादुत्पद्यमानः स्थितादन्य उत्पद्यते, पूर्वदोषभयात्, पूर्वस्तम्भाच्च बीज तथा सर्वोऽपि स्थितिभिन्नोत्पत्तिः, तस्मात् स्थितिभिन्नोत्पत्तित्वात् सर्वस्य द्रव्यात्मनोऽनित्यताऽव्यापिता च, यथाङ्कुरो बीजात् स्थितादुत्पन्नोऽनित्योऽव्यापी च तथा त्वदभ्युपगतप्रदीपद्रव्यात्मनोऽप्यनित्यत्वमव्यापित्वं च स्यात्तेन क्रियाभ्यन्तर्, एवं—पूर्वापभाव एव च, अभेदत्वात्—पूर्वमिदं बीजादि उत्तरमिदमङ्कुरादीत्येतस्य चाभावः, कस्मात् ? अभेदत्वात्, अभिन्नं हि तद्वस्तु द्रव्यमेकमिदम् व्यापिकालत्वबीजाङ्कुरादिप्रादुर्भावस्य क्रियाविषयत्वात्तस्य प्रदीपस्य कल्पना भ्रान्तित्वात् किं पूर्वं ? किमुत्तरमिति पूर्वोत्तरविमुत्पत्ति[प्र]कल्पवचनानुपपत्तिः ।

अथोच्येत यदेवोत्पद्यते तदेवावतिष्ठत इत्यनेन वचनेन त्वयमर्थ एव कथितो भवति उत्पत्तिरेवावस्थानमिति, यदि नोत्पद्यते नावतिष्ठेतानुत्पत्तिरूपत्वात्, तस्मात् खपुष्पवत्खण्डेनैवोच्यते यदेवोत्पद्यते तदेवावतिष्ठते नानुत्पत्तिकमवतिष्ठत इति; एवं सति यदेवोत्पद्यते तदेवावतिष्ठत इत्यस्येदं व्याख्यानं सदृश यत यथोत्पद्यते तत तथावतिष्ठत इति, प्रागुक्तोत्पत्त्यात्मैक्यपक्ष उत्पत्तिस्थित्यैक्ये उत्पत्तिरेवावस्थानमित्यापन्नमुक्तस्थितित्यागात्, न स्थितिरन्या काचिदुत्पत्तेरतस्य क्षणिकत्वापत्तिः, उभयात्यागाभिमतौ चानेकान्तापत्तिरभ्युपगमविरोधिनी प्रक्रिया स्यादिति ।

अथोच्येतेत्यादि, यावत् खपुष्पवत्खण्डेनैवोच्यत इति, स्यात् परिहारोऽर्थव्याख्याऽस्य यद् यदेवोत्पद्यते तदेवावतिष्ठत इत्यनेन वचनेनेति स पुनरयमर्थ एव कथितो भवति—उत्पत्तिरेवावस्थानमिति

क्रियाभिन्नत्वाद् बीजस्याभिन्नत्वेन यदेवोत्पद्यते तदेव स्थितिरपीति निरस्यत इति भावः । कूपखन्यकस्येति स्थितिषु भावेष्वस्य व्यापकस्य प्रदर्शनमिति भावः । नवीन स्तम्भादेर्भिन्नत्वेऽपि ततो बीजोत्पत्तेरभ्युपगमे उत्पत्ते स्थितिसमानाधिकरण्यं न सम्भवतीत्याह—स्तम्भोत्तरेति । पूर्वदोषेति [illegible] बीजाद्युत्पत्तिप्रसङ्गाभिमत एव स्थितत्वेनाभिमतस्यापि बीजादेः स्तम्भादिभिन्नत्वात् [illegible] इति भाव । एतदेव स्पष्टयति—यथाऽङ्कुर इति, एवं पूर्वोत्तरभेदानां [illegible] पूर्वोत्तरभावकल्पना न युक्ता [illegible] एवमिति अभिन्नं हीति [illegible] [illegible] पूर्वोत्तरभाव कल्पना [illegible] तस्माच्च पूर्वोत्तरभाव [illegible] इति भावः । अथ यदेवोत्पद्यते तदेवावतिष्ठते इति वाक्यं प्रकारान्तरेण व्याख्याति—अथोच्येतेति अथ दर्शयति—उत्पत्तिरेवेति यदेवोत्पद्यते [illegible] तदेवावतिष्ठत इति [illegible] प्रक्रिया भवति तच्च

१ सि क. स्थितादन्युत्पद्यते । २ सि क. °भक्रिया । ३ क. ×× सुदृश्यम् ।

कथितो भवति, यदि नोत्पद्यतेऽवस्थितामिमतं नावतिष्ठेतानुत्पत्तिरूपत्वात्, यथाऽनुत्पन्नमस्थितं खपु-
ष्पादि, तदेकक्षण्येन यदैवोत्पद्यते तदैवावतिष्ठते, नानुत्पत्तिक्षणमवतिष्ठते, तस्मादुत्पत्त्यनुमितमेवावस्थान
न व्य[स्त]मेति, अत्रोच्यते—एवं सति यदैवेत्यादि यावत् क्षणिकत्वापत्तिरिति—इत्येतदीदं व्याख्यानं
ग्रन्थ, यदैवेति—यस्मादित्यर्थः, अन्ययत्वापयव्यञ्जकस्य यद यदोत्पद्यते तद यदावतिष्ठत इति प्रागुक्तो-
त्पत्त्यवस्थानयोरुत्पत्तिस्थित्यैक्ये[1] उत्पत्तिरेवावस्थानमित्यापन्नम्, किं कारणं? तत्कस्थितिरागात्—उत्प- 5
त्तिरेव स्थितिरित्यनुमानेन स्थितिरुत्पत्तिरेव इत्येति योक्ता व्याप्तिस्तत्रानुमतोऽप्युत्पन्नत्वात् यदीयमप्यपू-
र्वोत्पादतया स्थितिरिति सा लभ्या स्यात्, तस्यागादुत्पत्तिरेवावस्थानं न स्थितिरन्या काचिदुत्पत्तेरतश्च
क्षणिकत्वापत्तिः, उत्पद्यत उत्पद्यत एव नावतिष्ठते किञ्चिदिति सर्वं क्षणिकमित्युक्तं भवति, स्यान्मत
क्षणिकत्वदोषो मा भूदिति केनचित् प्रकारेण स्थितमुत्पद्यते केनचिन्निरोध्यते तदभोऽभ्युपगमाभिमतौ
वानेकान्तापत्तिः—यदि स्थित्युत्पत्ती न त्र्यंके स्यात् तदूरेऽभ्युपगमविरोधिनी स्यात् प्रक्रिया अनेकान्त 10
वस्तुत्वमापद्यत इति ।

अथोच्येतोत्पादपूर्वस्यदोषानपरिहार्यान् प्रत्युच्चार्यानुमत्य योभौ विकल्पौ त्यक्त्वा
विनाशप्रधाने विकल्पान्तरे निर्दोषे इत्यायमयेतेति यदा यस्य यदैव विनश्यति तदैवोत्प-
द्यत इति, अस्मिन्नपि विकल्पे दोष उच्यते—लोके तावत् प्रत्यक्षादिप्रसिद्धमङ्कुरोत्पत्ती
बीजं विनश्यति, तत्र पुनर्यदैव विनश्यति बीजं तदैवोत्पद्यते नाङ्कुर इति पूर्ववत् स्ववचना 15
दिविरोधाः, तत्पूर्वपक्षाद्यपोहाच्च लोकादिविरोधाः, तदैव विनश्यति तदैवोत्पद्यत इति वचने-
नानन्यभूतस्यैकस्मिन्नेव काले विनाश उत्पादश्चेति क्षणिकवादातिशयादि स्यात् ।

यत्केनचिदात्मना तत्सैवात्मनाऽऽत्मता नानुत्पन्नः स्थितिरिति एवं भावपक्षमपक्षं तु खपुष्पादीनामनुत्पत्त्यर्थं स्थितिव्याप्तत्व-
म्, यदा विनष्टमवतिष्ठते उत्पत्तिमत्त्वात्, यदि नोत्पद्यते नावतिष्ठेत यथा खपुष्पादि, उत्पद्यते चेद तदावतिष्ठत इति व्यतिरेक-
व्याप्त्यभिरत्नमिति भावः । एवं यदि यदैवोत्पद्यते तदैवावतिष्ठत इत्युत्पत्त्यवस्थानयोरैक्यं परिभाव्य व्यापारयोरेकत्वमुत्पद्यत इत्यु- 20
च्यते तदावावतिष्ठते इत्युक्त इति यदैवस्थितिर्वेनोत्पत्तेरेव हेतोरुत्पद्यत इत्यभिधानात यदावतिष्ठत इत्यभिधाने उत्पत्तिरेव
स्थितिरित्युक्तं स्यात्, उत्पत्तिव्यतिरिक्तस्थितिपरित्यागात् यत एव तत यदैव मेवेनाभिधानात् तथा च स्थितमात्रात् क्षणिक-
त्वं [illegible] इत्युत्तरत्र एवं सतीति उत्पत्तिरेवावस्थानमित्यर्थः कथितो भवतीत्युपन्यस्तं [illegible] । एतदर्थमेवास्य-
भिधानं वचनस्य दर्शयति यस्मादित्यर्थ इति [illegible] भावः । प्रागिति [illegible]
[illegible] पूर्वं व्याप्तिर्वा [illegible] भावः । व्याप्तिमत्त्वानुमतेनाभिमतेन स्थितिरेव वा उत्पत्तिरेवावस्थानमित्यनेनार्थेन 25
परिभाषयन्नाह—उत्पत्तिरेवेति यत एवेति [illegible] तत इति [illegible] परामर्शात् [illegible]
उत्पत्तिरेव विनाश इति यत्नसिद्धे भवतीत्याशय । तत्र दोषमापादयति—अतश्चेति उत्पत्तिपरम्परामात्रत्वादवस्थानं कदा-
पीति क्षणिकत्वात् स्थितौ हि द्वितीयादिक्षणस्थितत्वात् क्षणिकत्वं न स्यादिति भावः । क्षणिकत्वपरिहाराय यदि केनचित्प्रकारेण
स्थितमेव वस्तु केनचित्प्रकारेणोत्पद्यत इति स्वीक्रियते तर्हि तार्किकयोः [illegible] एव स्थितिरिति तदभ्युपगमविरोधापत्ति-
[illegible] प्रसङ्गात इत्याशयेनाह—स्यान्मतमिति । तदेवं यदैवोत्पद्यते तदैव विनश्यति यदैवोत्पद्यते तदैवावतिष्ठत 30
इत्युत्पत्तिप्रधानाभिधानद्वये प्रोक्तम् दोषानभ्युपेत्य विनाशैकौ विकल्पौ यदैव विनश्यति तदैवोत्पद्यते यदैव विनश्यति तदैवावतिष्ठत
इति विनाशप्रधानौ विकल्पौ भवतः इत्याह—अथोच्येतेति । यदैव विनश्यति तदैवोत्पद्यत इति विनाशोत्पादप्रधानविकल्पं

1 सि° °स्थितिरत्वोत्पत्तिरनुपपत्तिरेवा । 2 सि. स्थितिर्वा काचिदनुपपत्तिव । 3 सि °मवस्थाना ।

अथोच्येतोत्पादपूर्वत्वदोषानित्यादि, यदेवोत्पद्यते तदेव विनश्यति, यदेवोत्पद्यते तदे
वावतिष्ठत इत्युभयोरुत्पादप्रधानयोर्विकल्पयोर्ये दोषास्तानपरिहार्यान् प्रस्तुतार्थे अनुमत्य चेमौ विकल्पौ
मुक्त्वा विकल्पान्तरे निर्दोषे मन्यमान आश्रयेत विनाशप्रधाने, तत्राद्यस्तावद्विकल्पः—यदेव विनश्यति
तदेवोत्पद्यत इति, अस्मिन्नपि विकल्पे दोष उच्यते—लोके तावत् प्रत्यक्षादिप्रसिद्धमङ्कुरोत्पत्तौ बीजं
5 विनश्यति, तव पुनर्यदेव विनश्यति बीजं तदेवोत्पद्यते नाङ्कुर इति अङ्कुराप्रादुर्भाव एव प्राप्तः, इति
अकृतस्य हेत्वर्थत्वात् तथा पूर्ववत् स्ववचनादिविरोधाः, तत्पूर्वपक्षाद्यपोहाय लोकादिविरोधाः—
अङ्कुराभावेऽङ्कुरपूर्वाणां पत्रकाण्डनालपुष्पफलप्रसूत्यादीनामुत्तरेषां लोके प्रत्यक्षादिप्रमाणप्रसिद्धानाम
ङ्कुरपत्राद्यवयवाभावाल्लोकादिविरोधाः, पूर्ववद्वचनलोकाद्यपायाभ्यां दोषाभिधानमिति, यदेवेत्यादि, यदेव
विनश्यति तदेवोत्पद्यत इति वचनेनानन्यमूर्तत्वैकस्मिन्नेव काले विनाश उत्पादश्चेति क्षणिकवादातिशयः,
10 पूर्ववद्विभक्तकाले विनाशोत्पादौ हि क्षणिकवादः, स चानेनातिशय्यते, आविर्भावतिरोभावविनाशानुत्पत्तावित
स्यात् खपुष्पवद्बीजाङ्कुरशून्यता स्यादिति ।

अथ विनाशोत्पादैकाधिकरण्ये दोषदर्शनाद्विकल्पान्तरमाश्रीयतेऽत्राप्युक्तवदेव दोषाः
स्थानाभिधानेन तु योज्याः, तथा वा सर्वथा वा विनश्यदवतिष्ठमाने कुतो विनाशः, विनाशे
वा कुतोऽवस्थानमिति स एवाधिकृतार्थे वचनादिविरोधाः क्षणिकवादातिशयनादि च पूर्व
15 वत् । तस्मादविनाशपूर्वत्वदोषानपरिहार्यान् प्रस्तुतार्थानुमत्य च चतुरोऽपि विकल्पान्
त्यक्त्वेमौ निर्दोषौ विकल्पावित्याश्रयेत तत्राद्ये तावद्यदवतिष्ठते तदेवोत्पद्यत इति विकल्पे
पूर्वपक्षात्स्या यावत् क्षणिकवादातिशयनादि, अथ यदेवावतिष्ठते तदेव विनश्यतीति स्थिति
पूर्वद्वितीयविकल्पेऽपि व्याख्यानं तदेव योज्यम् ।

अथ विनाशोत्पादैकाधिकरण्य इत्यादि द्वितीयविकल्पे विनाशप्रधानस्थितिपक्षेऽवस्थो-
20 त्पादेऽप्युक्तवदेव दोषाः स्थानाभिधानेन तु योज्याः, योजनाविकल्पदर्शनमु तथा वा सर्वथा वेति

विकल्पं दर्शयितुमाह—तत्राद्यस्तावदिति । लोके तावदित्यादि [illegible] इति [illegible] तदेव विनश्यति
तदेवोत्पद्यत इति मतम् तथा च बीजस्य [illegible] इत्याह—लोके
तावदिति । पूर्ववदपि विकल्पे [illegible] इत्याह—तथेति । यदेव विनश्यति
तदेवोत्पद्यत इति [illegible]
25 लोके [illegible] अङ्कुराभाव इति [illegible]
[illegible] इत्याह पूर्ववदिति ।
[illegible]
[illegible] विनश्यतीति । [illegible]
[illegible] । एवं यदेव विनश्यति तदेवोत्पद्यत इति
30 [illegible] । [illegible] योजनादिरिति [illegible]

---

१ सि. °त्पाद इत्यादि । २ सि. कृतो । ३ सि. °नाशः सदेव । ४ सि. [illegible] इत्यादि ।
५ सि. च विनाश ।

विनाशप्रकारेण विनाशे उत्पत्तिस्थितिविनाशप्रकारेण वा विनाश इति विकल्प्यते, उत्पत्तिप्रधानविकल्पाभिहितदोषवदत्रापि विनाशप्राधान्येन स्थित्या सह योजितं तथा वा सर्वथा वा विनश्यदवतिष्ठमान कुतो विनाशः, विनाशे वा कुतोऽवस्थानमिति त एवाभिहितास्ते वचनादिविरोधाः क्षणिकवादाविशयमानि च पूर्ववत्, एवं तावदुत्पादपूर्वयोर्विनाशपूर्वयोश्चोत्पादस्थितिविकल्पयोर्दोषा उक्ताः, अथोच्यते उत्पादविनाशपूर्वतायामित्यादि पूर्ववदुच्चाय दोषाननुमत्य च उक्त्वा चतुरोऽपि विकल्पान् इमौ निर्दोषौ विकल्पाविल्याशयेन यत्रावस्थानमवतिष्ठते तदैवोत्पद्यत इत्यादि यावत् क्षणिकवादाविशयवादीति, पूर्वपक्षत्रापि व्याख्या कार्या, अवतिष्ठमान इत्युपचारेण तु योज्येति, यत्र यदैवावति ष्ठते तदैव विनश्यतीति स्थितिपूर्वद्वितीयविकल्पेऽपि व्याख्यानं तदेव योज्य यावत् क्षणिकवादातिशयवादीति गतार्थं शून्यता चेति ।

अस्मिन् विकल्पेऽन्यथापि दोषाभिधित्सयाऽऽह—

अवतिष्ठते वाऽनन्वयगोचरो व्यतिरेक एव तन्मात्रोपलब्धेश्च सर्वत्रैव तदैवावतिष्ठते तदैव विनश्यतीति व्यपदेशो न सम्भवतीति पूर्ववच्च एव स्ववचनादिविरोधा इति ।

अवतिष्ठते वाऽनन्वयेत्यादि यावत् स्ववचन[ादि]विरोधा इति, अनन्वयगोचर इत्यादि, अनवस्थानम[न]न्वयः, व्यतिरेको विनाशः, अन्वयशून्यो व्यतिरेक एवानन्वयः स एव गोचरो व्यतिरेकः—अन्वयशून्यो विनाश एवेत्यर्थः, तन्मात्रोपलब्धेश्च सर्वत्रैव—बीजाङ्कुरपटादौ तदैवावतिष्ठते तदैव विनश्यतीति—इत्थमपि व्यपदेशो न सम्भवतीति पूर्ववच्च एव विरोधाः ।

विनाशप्रकारेणावतिष्ठमानं तदैव विनश्यति तदैवावतिष्ठत इत्यर्थः सर्वथा वा—उत्पत्तिस्थितिविनाशप्रकारैरवतिष्ठमानं तदैव विनश्यति तदैवावतिष्ठत इत्यर्थः । उत्पत्तिप्रधानेति उत्पत्तिप्रकारेणावतिष्ठमानं उत्पत्तिस्थितिविनाशप्रकारैर्वाऽवतिष्ठमानं तदैवोत्पद्यते तदैव तिष्ठतीति विकल्पेऽभिहिता दोषा अत्रापि भवन्तीत्यर्थः । दोषं दर्शयति—विनश्यदिति विनाशक्रियाव्याप्तम् एकैव विनाशजन्मैव युक्ते विविधाभिर्धर्मानुपलम्भातिरूपो विनाश इति भावः । विनाशस्थित्योर्भिन्नकालीनत्वेन यदि विनाशस्तदवस्थानं कुत इत्याह—विनाशे वेति । उच्यते च भवता तदैव विनश्यति तदैवावतिष्ठत इति वाक्यमेवैतत्ता वचनादिविरोधा इत्याह—त एवेति । अत्रापि व्याप्तिग्रहणानुमतोपलम्भस्वविरोधपरिहारव्यपदेशनया स्ववचनादिविरोधाः क्षणिकवादातिशयवादिता वक्तव्या इत्याह—पूर्ववदिति । एवं यदैवोत्पद्यते तदैव विनश्यति यदैवोत्पद्यते तदैव तिष्ठति यदैव विनश्यति तदैवोत्पद्यते यदैव विनश्यति तदैवावतिष्ठत इति चतुर्षु विकल्पेषु दोषा उक्ता इत्युपसंहरति—एवं तावदिति । एतेषाम् दोषाननुमत्य विकल्पद्वयमाह सफला यदैवावतिष्ठते तदैवोत्पद्यते यदैवावतिष्ठते तदैव विनश्यतीति विकल्पद्वयावरणेऽपि पूर्ववदेव दोषा वाच्या इत्याह—अथोच्यत इति । अत्र प्रथमविकल्पे दोषं योजयति—तत्राप इति स्थितिरूपमानाभिधानावस्थानमित्यर्थः लोकेऽभिहितस्यैवाङ्कुरादेः बीजादुत्पत्तिदर्शनात् तत्र तु यदैवावतिष्ठते बीजादि तदैवोत्पद्यते अङ्कुर इत्यङ्कुरादुत्पद्य स्वभावव्यापारादिमत्तोपगमात्स्ववचनादिविरोधाः अवतिष्ठते उत्पद्यते उत्पद्यते अवतिष्ठते उच्यते च भवता यदैवावतिष्ठते तदैवोत्पद्यत इति स्ववचनादिविरोधाः । क्षणिक एव वादे च स्थित्युत्पादयोरनुपपत्तेः क्षणिकवादातिशयः अनुत्पादस्थितिवत्त्वान्न वस्तुत्वमभावाच्छून्यवादता चेति भावः । द्वितीये स्थितिप्रधानविकल्पे विनाशविकल्पेऽपि दोषातिदेशमाह—अथेति । अत्र पक्षे स्थितिव्यतिरेकेण विनाश एवावतिष्ठत इति यदैवावतिष्ठते तदैव विनश्यतीति व्यपदेशोऽपि न सम्भवति विनाश एव परमार्थः न वस्तुस्वभावस्थितत्वात् लोकप्रसिद्धेन यदैवावतिष्ठते न तर्हि विनश्यति यदि विनश्यति न तदावतिष्ठते विरोधादित्याह—अवतिष्ठत इति । तदाश्रये—अनवस्थानमिति स्थितिशून्य इत्यर्थः । स्थितिशून्ये वस्तुमात्राधारः—अन्वयशून्य इति,

1 मि. क. वा अन्वय इत्यादि । 2 मि. क. अनन्वयगोचरेत्यादि । 3 मि. विरोधाः ।

अनेनापि प्रकारेण भवताऽऽक्षेपसाधनावयवाः ध्वंसन्ते तथाव्यवस्थानविनाशात्, तथाव्यवस्थानाविनाश एव हि सपक्षमपि तत्स्यात् न विनाशो, अग्निरत्र धूमादिति यथा, यथा हि धूमो धूमरूपेण व्यवस्थितो व्यवस्थित एवाग्नावग्नितया तद्वत्तया च प्रदेशे, त्वन्मतेन तु विधिविधाऽदर्शने विनाशे स्वभेदयाऽवस्थयाऽवस्य विनष्टत्वमितिव्यवस्थानविपरीतवृत्तित्वादस्य 5 पक्षधर्मत्वमसिद्धमतः प्रदेशस्याप्यन्यथावृत्तत्वादभूतत्वाद्वाऽऽश्रयासिद्धिः विपरीतवृत्तेर्विरुद्धतापि ।

अनेनापि प्रकारेणेति, एव तावत् पक्षदोषा अभिहिताः, न केवलं पक्षदोषा एव किं तर्हि ? व्यवस्थितावस्थाविनाशाभ्युपगमेनानेन भवताऽऽक्षेपसाधनावयवाः ध्वंसन्ते, किं कारणं ? तथाव्यवस्थानविनाशात् यथा एकदिक्त्वमुत्पाद्यत्वात् खरविषाणमाकाशस्फोटवदिति वचनवत्, तद्वैधर्म्येण साधनव्यवस्थां 10 दर्शयति—तथाव्यवस्थानाविनाश एव हि सपक्षमपि तत् स्यात्—यद्धि साधनं साधनं भवत् पक्षेण सहापि सतो व्यवस्थितस्वार्थस्याविनाशे भवितुमर्हति, न विनाशे, किमिव ? अग्निरत्र धूमादिति यथा, यथा हि धूमो धूमरूपेण व्यवस्थितो व्यवस्थित एवाग्नावग्नितया तद्वत्तया च प्रदेशे यथुभयव्युदासानुगृहीतसमुदायार्थसाध्यता यदि धर्मविशिष्टधर्मिसाध्यता सर्वथा व्यवस्थितस्य वस्तुनो व्याप्यो धूमांशो व्यापकेनाग्न्यंशेन व्याप्तः तथा व्यवस्थित एव व्यवस्थितं गमयत्यविनष्टमविनष्टं इति स्यात् साधनत्वं 15 साध्यत्वञ्च, त्वन्मते तु पुनर्विधिविधादर्शने विनाशेऽवस्थाभावेऽभवनरूपे वा विपरीतात्मके स्वभेदयाऽवस्थयाऽवस्य विनष्टत्वमितिव्यवस्थानविपरीतवृत्तित्वात्—अभवनाभवनरूपत्वादस्य—धूमाख्यस्यांशस्य पक्षध

चोदकोपन्यस्तसाधनात् चोऽभिहिते ? न भवेदेवेति परं दर्शयति, तथाभवेदेवमविनाशदोषो न सम्भवतीत्याह—तथाव्यवस्थेति, सर्वं एकदिश्यापाद्येत्यर्थः । तदेवं भवेदेवाभिहिते तदेव विनाशेऽवस्थानस्य धर्मिणि विनाशविवेकात्मके पक्षे दोषा उक्ताः । तदनन्तरं साधनावयवेष्वपि दोषाभ्यसनं सर्वे साधनावयवास्तथा विनाशिता इत्याह—अनेनापीति । भवेदाभिहिते तदेव विनाशस्थितौ 20 व्यवस्थितस्वार्थस्य विनाशाभ्युपगमेन विनाशपरमार्थवाद योऽपि हेतुर्दृष्टान्तो वाऽस्ति तेन दर्शयितुमभिप्रेत्याह—व्यवस्थितावस्थेति । अव्यवस्थितं वस्तु न साधनाङ्गत्वं भवितुमर्हतीत्यत्र निदर्शनमाह—यथेति अस वचनस न प्रतिज्ञातविरोधोऽर्थं एवं तत्र व्यवस्थितस्य साधनमिति भावः भवत्पक्षेऽर्थो यदि विनाशधर्मो न भवेत् तदैव योऽर्थं व्यवस्थितं साधयतीति दर्शयति—तद्वैधर्म्येणेति तत्समपि—पक्षेण सहितमपि स्यात् तत् स्वसाधनं स्यात् । तद्व्याख्याति—यद्धीति । पक्षेण सहापीति, पक्षधर्मत्वमव्यभिचारेण हेतोरिति दर्शयति । दृष्टान्तमाह—अग्निरत्रेति अग्निता व्यवस्थित एवाग्नौ अग्नितया व्यवस्थित 25 एव प्रदेशे धूमत्वेन व्यवस्थितो धूमस्तदभावे भवितुमर्हतीत्यभावः । व्यतिरेकमुखेनान्वयमुखेन वा तादृशं व्यवस्थितमविनष्टमेव व्याप्तिबलेन साध्येन व्याप्तं तत् व्यवस्थितमविनष्टमेव गमयतीत्याह—यद्युभयेति व्याप्यव्यापकव्युदासानुगृहीतसमुदायार्थेनाध्यवसेयः यदि वह्निर्न स्यात्तर्हि धूमो न स्यात् इत्युभयव्युदासः अत्र धूमस्य दहने सम्बन्धमवियाभिनुगमनमनुदासानुगृहीतसमुदायार्थसाध्यता व्यतिरेकव्याप्त्यनुगृहीतान्वयव्याप्तिर्वेति भावः । यदि धर्मविशिष्टेति अन्वयव्याप्तिमुखतोऽपि धर्मविशिष्टधर्मिसाध्यतेति भावः । उभयत्रापि व्यवस्थितो व्यवस्थितमेव गमयतीत्याह—सर्वथेति । विधिविधाभावविपर्यस्तैवाभाव-30 मुखमनुसारमते विनाशस्य स्थितिपरत्वमनवस्थाभावान्यथावचनात्मकतात्त्विकावस्था अविनष्टत्वेनापरं विनाशात्मकविलक्षणं सिद्धं सर्वं साध्यसाधनस्थाने स्वपक्षेऽस्त वा ? साधनत्वं वर्तितुमनपायविवक्षात् कथं साधकत्विति ? साध्यसाधनभावस्थानम् एवं न दृष्टमित्युक्तेस्त्याह—त्वन्मते त्विति । विपर्ययेणैतान्यत्र साध्यसाधनयोरसिद्धत्वेऽपि साधनस्य पक्षधर्माऽऽसिद्धिमनु-

र्मेत्वमसिद्धमतः प्रदेशस्याप्यन्वयाभूतत्वादभूतत्वाच्चाऽऽश्रयासिद्धिः, विपरीतवृत्तेर्विरुद्धतापि, सा च पक्षधर्मत्वमभ्युपगम्य, धूमो धूमरूपेणावस्थितो[न]ऽग्निरग्निरूपेणावस्थानस्याप्यभूतत्वात्, अथवाऽवस्थानविपरीतवृत्तित्वादिति त्वन्मतेनेत्थं विरुद्धता, मन्मतसंचारेण तु त्वदीयसर्वहेतुविरुद्धता, अवस्थानविनाशद्वयरूप एवास्तित्वयाऽभ्युपगतः, येन यावत्त्वमसमभिस्तित्वमवस्थानरूपं स्तृणसि तावताऽन्यन्तरे सपक्षे च दृष्टो यावन्त्वत्र विनाशरूपं स्तृणसि तावताऽस्तित्वस्यावस्थानाभावः तद्विपरीते वा विपक्षे दृष्टत्व- 5 स्यानैकान्तिकहेतुदोषाः, तस्यैवामेय[वस्थान]विनाशद्वयात्मकत्वे[त]द्वतः प्रदेशस्य च कुशलस्य व्यवस्थानासमीपावस्थ[ना]त् वनस्पतिचैतन्ये स्वापवत्स्वापि पक्षधर्मे च साधन तद्दृष्टदृष्टयोः, एव दृष्टान्तेऽपि साध्यसाधनधर्मधर्म्यसिद्धिदोषास्तदन्यथाभूतस्यादिदोषाश्च योज्याः ।

एवं त्रिकादिभङ्गेष्वपि यावद्योगं दोषाः उक्तवदत्र पक्षे, तस्माद्विपर्ययोऽस्त्विति मन्य उत्पद्यतेऽन्यद्विनश्यतीत्यादि, यथावस्तुबीजाङ्कुरकर्मोपात्तधर्माणुस्थूलपृथिव्यादिवत् । 10

एव त्रिकादिभङ्गेष्वपि यावद्योगमिति, एते द्विकसंयोगभङ्गेषु षट्सु दोषा उक्तास्तथा त्रिकादियोगभङ्गेष्वपि वाच्या इत्यतिदिशति, उक्तवदिति, उक्तविभागानित्यादेवामपि विकल्पानाम्, तत्रैकः त्रिकसंयोगो यदैवोत्पद्यते तदैवावतिष्ठते विनश्यति चेति, यदैवोत्पद्यते तदैव विनश्यत्यवतिष्ठते चेति द्वितीय इत्युत्पत्तिप्रधानौ द्वौ त्रिकसंयोगौ, तथा विनाशप्रधानौ स्थितिप्रधानौ च, अथवा यदैवोत्पद्यते तदैवोत्पद्यते विनश्यतीत्यनुत्पत्तिदोषपरिहारार्थं उत्पत्तिरूपं विनाशसमानाधिकरणमवधारयन् 15 विकल्पयेत्, तथा दोषेष्वपीति द्वयोर्द्वयोरपि धर्मयोस्त्रिकसंयोगाः कार्याः, उत्पादेनाभिमताग्निधूमस्योत्पादस्य प्रादुर्भावावस्थानस्योत्पादेन सहभावात्, अन्योन्याभिभवोऽङ्गमिथुनवृत्तयो हि गुणाः सत्त्वरजस्तमोऽभिधाना उत्पत्तिविनाशस्थित्यात्मका भवन्तीति । तथा चतुष्कसंयोगाः पञ्चकसंयोगाः षट्कसंयोगाश्च सम्भवन्तो योज्याः, यावद्योगमिति, सकलकरणोपायेन यावन्तो भङ्गाश्चावन्त इत्यर्थः, यावन्ति वा दर्शनान्यर्थतः सम्भवन्ति तद्दर्शनानुसारेण तावन्तो भङ्गाः कार्या इत्यर्थः, अभिहितसामा- 20 नाधिकरण्यानुपपत्तिदोषपरिहृता भङ्गोपचयात्मकेन दोषोपचयमपि विपर्ययसिद्ध्याख्येयमित्युपायं दर्शयति यत्र पक्ष इति—व्यवस्थामात्रं स्थित्यादयो न भिन्नाश्च परस्परत इत्यभिन् पक्षेऽमी दोषा इति, तस्माद्वि-

---

पर्ययश्च तथा सा वा दोषैरन्वयसिद्धिः येन विरुद्धं च व्यभिचार्यमेवाह—सा चेति विरुद्धता चेत्यर्थः । विरुद्धतामेव दर्शयति—धूम इति । एवं विरुद्धतोद्भावनं त्वन्मतेनोक्तमवस्थानं नास्ति विनाश एवास्तीति तदविनाभावादस्तेर्विरुद्धतेति यत्तत्तु सर्वस्यावस्थानविनाशद्वयात्मकत्वात् सर्व एव हेतव उपन्यस्यमाना उभयाविनाभाविनः उभयस्यैव साधका इति व्यक्ति- 25 धर्मधर्मे विरुद्धा एवेत्याशयेनाह—मन्मतेति, मन्मतसंचारेण—उभयात्मकत्वाभ्युपगमेन हेतोरवस्थानैकान्तिकविनाशाभिमताभाव विपरीतेऽपि दोषसम्भावनया विपक्षे साधने विरुद्धा भवन्तीति भावः । मन्मतसंचारमेवाह—अवस्थानेति । एवमनैकान्त विरुद्धमितिपरिहाराख्यं विरुद्धाव्यभिचारित्वमनैकान्तिकत्वं प्रदर्शयति—तत्र यावत्त्वमिति । एवं सम्भवद्दृष्टान्तेषु C दोषाभिहितिमाह—तथा चतुष्कसंयोगा इति । स्थित्युत्पत्तिविनाशानां परस्परसामानाधिकरण्ये ये ये दोषा अभिहितास्ते सर्वेऽत्र यथासम्भवं योज्या इत्याह—अभिहितेति । सर्वभेदाभेदैर्वं इत्थं स्थित्युत्पत्त्यादयो द्रव्यस्यैवावस्थाः तदतिरिक्ता भिन्ना 30 ते च स्थित्यादयोऽभिन्नाश्च पूर्वमपि द्रव्यभेदेन वर्तन्त इत्यभिन् पक्षे प्रोक्तमभिन्नात्वदोषा अमी सम्भवन्तीत्याह—यत्र

---

१ सि. क. व्यवस्थापावस्थार्थम् । २ सि क मात्रो द्रष्टौ । ३ सि × ।

पर्यायोऽस्तीति तदुपसंहरति—इत्यन्यदुत्पद्यतेऽन्यद्विनश्यतीत्यादि, आदिग्रहणादन्यद्विनश्यदन्यदुत्पद्यते अन्यद्विनश्यदन्यदवतिष्ठते अन्यदवतिष्ठतेऽन्यदुत्पद्यते, अन्यदवतिष्ठतेऽन्यद्विनश्यति, अन्यद्विनश्यद-न्यदुत्पद्यतेऽन्यदवतिष्ठते, इत्यादिभङ्गाः सम्भवन्तो भाव्याः, यथावस्तुबीजाङ्कुरकर्मोपात्तधर्मसूक्ष्मवि-स्पन्दवत्—यथाऽस्तु यथा वस्तु बीजमन्यदस्तु विनश्यति, अङ्कुरोऽन्य उत्पद्यते द्रव्यम्, कर्म—गमनमु-
5 त्पद्यते नाम विनश्यति आदिग्रहणात् निर्गमो गुरुत्वादिगुण उत्पद्यते संयोगगुरुत्वादिर्विनश्यति, आत्मा-काशकालदिङ्मनोद्रव्याणि नोत्पद्यन्ते न विनश्यन्ति अवतिष्ठन्त एव, तथाऽणवोऽपि, घटादिस्थूलमुत्प-द्यते पिण्डादि विनश्यति, धर्मोऽभिषेचनादिकर्मोपात्तः, उत्पद्यते गुणः संस्कारः प्रयत्नादिश्च, अप-वर्गनाशादिभिश्च विनश्यति न विभुत्वादिरिति ।

अत्रानुमानं कारणकार्यनानात्वेऽभिधीयते—

10 यद्यत् सतोऽन्यत् कार्यम्, तदतुल्यविकल्पत्वात् घटपटवत्, कथमतुल्यविकल्पतेति चेदुच्यते, अत्र चत्वारो भङ्गाः—कारणं सत् कार्यं च, कारणं सत् कार्यमसत् कार्यं सत् कारण-मसत्, कार्यमसत् कारणं चेति वा, तेषु द्वौ सम्भवेताम्, कार्यकारणयोर्द्वयोरपि सत्त्वं कार्य-सत्त्वमेव च, इतरयोरभ्युपगतप्रतिपक्षत्वात्तदाभावोऽभासितप्रयोजनत्वात् ।

(यत्तदिति) यद्यत् सतोऽन्यत् कार्यं तदतुल्यविकल्पत्वात् घटपटवत्, अन्यथा कारणं
15 कार्यं च सदित्यभिन्नं तत्र बीजादेः पुरुषादेश्च कारणात्तदङ्कुरघटादिकार्यमन्यदित्यभिप्रायः, यदी-ष्यते तु सदित्यभिन्नत्वात्तु नोऽन्यत् कार्यमिति विशेषहेतुरतदतुल्यविकल्पत्वादिति—सता तेनाऽतुल्यो

यत्र इतीति । एवं परेणेष्यते तदेव विनश्यतीत्यादि नाभ्युपगन्तव्यम्, अपि तु अन्यदुत्पद्यतेऽन्यद्विनश्यतीत्यादि-रूपमभ्युपेयमित्याह—इत्यन्यदुत्पद्यत इति । यावन्तो भङ्गाः पूर्वस्मिन् सम्भवन्ति तावन्तोऽत्रापि भाव्या इति दर्शयति आदिग्रहणादिति । [illegible] इत्यर्थे निदर्शनमाह—यथावस्त्विति अङ्कुरोत्पत्त्यन्यदा
20 बीजं विनश्यति अङ्कुरोऽन्य उत्पद्यत इति द्रव्यनिदर्शनम्, [illegible] विनश्यति [illegible] अन्योत्पद्यते इति कर्मनि-दर्शनम्, आदिपदेन गुणनिदर्शनं [illegible] संयोगगुरुत्वादिर्विनश्यति अन्यश्च निर्गमगुरुत्वादिरुत्पद्यत इति भावः । उत्पत्तिविना-शयोरन्यत्वेन स्थितिरपि दर्शयति—आत्मेति विभूनां निदर्शनमिदम् । [illegible]निदर्शनमाह—तथाणवोऽपीति स्थितिमन्तः [illegible] इति भावः । स्थूलद्रव्यविनाशौ दर्शयति घटादीति । धर्म इति अभिषेचनोपवासादि[illegible]
[illegible] धर्ममुत्पादयन्ति, अभिषेचनं स्नानम्, उपवासः [illegible] निरशनं [illegible] 'अरण्ये
25 [illegible] गुणवत्त्वम् । [illegible] क्रियाविशेषैरेव च ।' इत्यादिभिर्वैशेषिकसूत्रप्रदर्शितादिकम्, [illegible] [illegible] क्रियार्थविशेषेण [illegible] । [illegible] दर्शं प्रसिद्धम्, [illegible] [illegible], [illegible] [illegible] [illegible], [illegible] [illegible]
[illegible] धर्मोऽधर्मनिवर्तनेन [illegible], अभिषेचनादिक्रियाविशेषेषूत्पन्नं संस्कारं [illegible] विनाशं [illegible] [illegible] [illegible] इति दर्शयति—उत्पद्यत इति । गुणाः [illegible]
30 दर्शयति—अपवर्गनाशादिभिश्चेति । विभुत्वादयो नित्यगुणा [illegible] दर्शयति—नेति । अत्र कार्यकारणयोर्भेदं साधयति—यद्यदिति [illegible] [illegible] [illegible] वैशेषिकेण दर्शयति । [illegible]—यत्सदिति बीजादिकारणेभ्यः अङ्कुरादिकार्याणि पुरुषादिकारणेभ्यः घटादिकार्याणि [illegible] तदतुल्यविकल्पत्वात् विभागीकर्तुः । एवं दर्शयति—सदित्यभिन्नत्वादिति । हेतुमाह—तदतुल्येति [illegible] । कार्यस्य [illegible]

१ सि. क्ष. तदतुल्यत्वाच्च ।

विकल्पोऽस्तेति कार्यमभिसम्बध्यते, तत्र त्वया कारणादन्यत्वेनेष्टस्याभावप्रसिद्धिदोषो हेतोः, घटपट-
वदिति दृष्टान्तः, यथा घटः पटेनातुल्यविकल्पो लोके पृथुकुक्षिबुध्नप्रयोमकम्बुग्रीवाद्याकारादिविकल्पः
पटश्चातुरस्रदीर्घादिसंस्थानादिविकल्पादन्यो दृष्टः, तथा कार्यं सतोऽन्यदिति, अत्राह—कथमतुल्यविकल्प-
तेति ? असिद्धमतुल्यविकल्पत्वमिति चोदकाभिप्रायः, अत्र चत्वारो भङ्गाः—सम्भाव्यास्तु[1] यो वा
कारणं सत् कार्यं चेति, यो वा कारणं सत् कार्यमसत्, कार्यं सत् कारणमसत्, कार्यमसत् कारणं 5
चेति वा, तेषु द्वौ सम्भवेताम्, न द्वौ तद्यथा, इह कार्यकारणयोर्द्वयोरपि सत्त्वे कार्यसत्त्वमेव चेत्से-
त्तद्विकल्पद्वयं स्यादिति—कारणं सत् कार्यं सत्, कारणमसत् कार्यं सदित्येतौ विकल्पौ भवितुमर्हतो
नेतराविति, कस्मात् ? इतरयोरभ्युपगतप्रतिपक्षत्वाद्वादाभावात्—अभ्युपगतः प्रतिपक्षो यस्मिन्नयेन वादिना
सोऽभ्युपगतप्रतिपक्षो विकल्पो वादी वा, तद्भावादभ्युपगतप्रतिपक्षत्वात्, किं भवति ? वादाभावो
भवति, अफलितप्रयोजनत्वात्, परश्चेदभ्युपगच्छति किमिति वादः क्रियते ? तौ च विकल्पौ सत् कार- 10
णमसत् कार्यं, असत् कारणमसत् कार्यं चेति, यदि त्वमभ्युपगच्छसि, अफलितप्रयोजनः स्यामहम्,
ततो वादाभावाद्विकल्पद्वयं स्यादिति ।

किमतः ? उच्यते—

तद्यदि तावदुभयसत्त्वमत्र कारणाविर्भाववत् कार्याविर्भावः, उपलब्धिलक्षणप्राप्तत्वे
सति तदात्मकसत्त्वाविशिष्टत्वात्, कारणस्यात्मवत्, अथ न कारणाविर्भाववत् कार्याविर्- 15
भावः, सच्च कार्यमिति निश्चितं तत्सत्त्व तद्वैलक्षण्यात्त तर्हि सत् कारणम्, असत्, सद्विलक्ष-
णत्वात् खपुष्पवत्, ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, इतरेतरासत्त्ववैलक्षण्यात्, अथै-
वमपि वैलक्षण्ये कारणसत्त्वविनिश्चयो न निवर्तते आविर्भावात्मकत्वात् सत्, न तद्वदनाविर्भावा-
त्मकत्वात् कार्यं सत्, खपुष्पवत्, इतरथा हि नित्यमेवाविर्भवेत्, सत्त्वात् कारणवत्,
कारणं वा नित्यं नाविर्भवेत्, अनाविर्भावात्मकसत्त्वाविशिष्टत्वात् कार्यवदिति । 20

(तद्यदीति) तद्यदि तावदुभयसत्त्व—कार्यसत्त्वं कारणसत्त्वञ्चेत्यत्र विकल्पः परीक्ष्यते तिष्ठतु
तावदसत् कारणं सत् कार्यमिति विकल्पः अत्र—उभयसत्त्वे कारणाविर्भाववत् कार्याविर्भावः, स्यादिति

तथैवातुल्यविकल्पत्वं मासिद्धमित्याह—तस्येति । दृष्टान्तं व्यनक्ति—यथेति अत्र विकल्पधर्मेण भेदः प्रतीतः घटपटयो-
र्विलक्षणत्वात् तदतुल्यविकल्पत्वं सिद्धमिति भावः । अतुल्यविकल्पत्वमेव दर्शयितुं पृच्छति—कथमिति । असिद्धतानिरा-
करणाय विकल्पानाह—अत्रेति कारणं सत् कार्यं सत् कारणं सत् कार्यमसत् कारणमसत् कार्यं सत्, कारणमसत् 25
कार्यमसदिति विकल्पाः तत्र सम्भविनौ विकल्पौ दर्शयति—तद्यथेति उभयसत्त्वासत्त्वयोरेव वादविषयतया तदितरविकल्प-
विषये वादाभावादिति भावार्थः । तमेवाह—इतरयोरिति असत्कारणसत्कार्यसत्कारणासत्कार्यरूपविकल्पयोः प्रतिपक्ष-
त्वात् च वादाभावादिति । अभ्युपगतः प्रतिपक्षो यस्मिन् येन वेति बहुव्रीहिद्वयमभिप्रेत्याह—अभ्युपगत इति । तत्र प्रथमं
विकल्पमुभयसत्त्वलक्षणं विचारयति—तद्यदीति । तस्मादपरे कार्यसत्त्वमिति । कारणधर्मः सत्त्वाविशेषादविशेषे सदा
कारणवदभिव्यक्तत् कार्यसत्त्वाद्युपलम्भाः स्यात्, अथ सत्त्वे तदविशेषात् कारणत्वान्न अतिप्रसङ्गात्—उभयसत्त्व इति अथमपि 30

---

१ सि. क्ष. सम्भाव्यस्तु ।

यथार्थं सम्बध्यते, उपलब्धिलक्षणप्राप्तत्वे सति तदात्मकसत्त्वाविशिष्ट[त्वात्,]कारणात्मवत्–यथाऽऽवरणभूतातिसामीप्याद्यनुपलब्धिकारणविरहे सति सत्त्वात्मकं कारणमाविर्भवति नित्यं सदपि तथोपलब्धिकारणसत्त्वे सति तदात्मकसत्त्वाविशिष्टं कार्यमाविर्भवेदित्यस्मिति, अपेक्ष्यापि, एतेन सत्त्वेऽप्याविर्भावानाविर्भावकृतं वैलक्षण्यमापाद्यते कारणकार्ययोः, ततश्च सद्विलक्षणत्वादसत् कारणवदपतेऽप्युपगमव्याघातविरुद्धम्, तस्यानैकान्तिकत्वचोदना तु [ननु]घटसत्त्वं पटसत्त्वविलक्षणमिति, यतो हि घटात् पटो विलक्षणः सोऽपि सन्, खपुष्पमसत्, तत्र संदेहः किं खपुष्पवदसत् कार्यं स्यात्? पटविलक्षणघटवद्वा स्यात्? इति, अत्रोच्यते न, इतरेतरासत्त्ववैलक्षण्यात्–घटः पटात्मना नास्ति पटोऽपि घटात्मना नास्त्येवेत्यसत्त्वाभ्यामेव वैलक्षण्यमनयोरतो विपक्षासिद्धः सपक्ष एव हेतोः नानैकान्तिकः, दोषो मन्यः सत्कार्यवादविपर्ययेण तुल्यगमत्वात्तदनुसारेणोक्तो यावदनाविर्भाव[त्व]कसत्त्वाविशिष्टत्वात् कार्यवदिति प्रथमचक्रकं भयसत्त्वप्रसङ्गेनोक्तम् ।

अथ न कार्यानित्यप्रादुर्भाववत् कारणानित्यप्रादुर्भावः सच्च कारणमिति निश्चितं तद्विलक्षण्यात्तु तर्हि सत् कार्यम्, असत्, सद्विलक्षणत्वात् खपुष्पवत्, इतरः कारणवत्, खपुष्पमपि वा सत्, अनित्यप्रादुर्भावानुपलब्धेः कारणवत्, ननु घटसत्त्वं पटसत्त्वविलक्षणम्, न, इतरेतरासत्त्ववैलक्षण्यात्, अथैवमपि वैलक्षण्ये कार्यसत्त्वविनिश्चयो न निवर्तते प्रादुर्भावात्मकत्वात् तत्, न तत्प्रादुर्भावात्मकत्वात् कारणं सत् न त्वेवं भवत्यतः कारणं सदुपलभ्यत्वात् कृतवत्, कृतमपि वा कारणवदसत्, उपलभ्यत्वात्, सत्त्वे वा विशेषो वक्तव्यः, अविशेषे

कस्याऽऽविर्भवेदिति पक्षः । हेतुमाह–उपलब्धीति अनुपलब्धिकारणविरहे सतीत्यर्थः । अनुपलब्धिकारणान्येव दर्शयति यथेति । ननु कार्ये तत्त्वनियमेऽपि न कारणाविर्भाववत् सदा कार्यस्याविर्भावः कार्यत्वेन तदा प्रादुर्भावे हि कारणीनं कार्यमित्यमिति नियम एव न स्यात् इत्यत्र न कारणकार्यभावव्यवस्थैव दोष इत्याशङ्कते–अपेक्षेति । तथा यदि कारणस्य सद्रूपत्वकार्यविलक्षणत्वात्सत्त्वं प्रसज्यते [illegible]–ततश्चेति । कारणमसत् सद्विलक्षणत्वात्–यथा कार्येण तत् विलक्षणत्वात् खपुष्पमित्यनुमाने व्यभिचारमाशङ्कते–तस्यानैकान्तिकत्वेति अनैकान्तिकत्वमेव संदर्शयति–यतो हीति सद्विलक्षणत्वे इतरतामात्रविवक्षया [illegible] असत्त्वसामान्यविवक्षया खपुष्पवदसत्त्वेन तत्र न कार्ये [illegible] कार्यं कारणवत् सत् तत खपुष्पवदसदिति ततः संशयात्मकत्वाद्धेतुरनैकान्तिक इति भावः । समाधत्ते–इतरेतरेति घटपटयोर्मिथः सत्त्वेन वैलक्षण्यमस्ति किन्तु इतरेतरात्मना-
ऽसत्त्वेनैव वैलक्षण्यमिति न हेतोर्विपक्षवृत्तित्वं सपक्ष एव वृत्तेरतो नानैकान्तिकत्वमिति भाव । [illegible] नियमविधिरे इत्येव निर्दिश्य विशेषमभिधत्ते–दोषो मन्य इति, यत्र कारणस्य सद्विलक्षणत्वेऽपि कार्यस्यासत्त्वं [illegible] किन्तु कार्यं सदेवेति नियमो न [illegible] तदनाविर्भावात्मकत्वात् कार्यं तत्र स्यात् खपुष्पवत्, अनाविर्भावात्मकस्य कारणस्य हि सत्त्वमनाविर्भावात्मकस्य कार्यस्यासत्त्वं [illegible] तथैव प्रमाणसिद्धं कार्यस्यासत्त्वं यदि [illegible] तर्हि तस्य नित्यमेवाविर्भावः स्यात् कारणवत्, अनाविर्भावात्मककार्यसत्त्वाविशिष्टत्वादेव वा कारणमपि न नित्यमाविर्भवेदिति प्रथमचक्रकं विवक्षितमिति भावः । यदि कारणमनित्यप्रादुर्भावं नाभ्युपेयते न चोपलभ्यते तदाऽऽह अथेति इतरः वैलक्षण्यात् । अनित्येति कार्यस्यैवानित्यमेव यथा प्रादुर्भाव उपलभ्यते तथा खपुष्पादेः कारणस्य चानुपलभ्यानुपलब्धि-

---

१ सि° क° तथानुपलब्धि ।

वैलक्षण्यानुपपत्तेः, विशेषोत्प्रेक्षणेऽपि विशेषस्यासदाश्रयत्वात् ततोऽन्यत्वमेव—तत्रासत्त्वमेव, अघटपटवदिति ।

अथ न कार्यानित्यप्रादुर्भाववदित्यादि कारणासत्त्वप्रसङ्गभङ्गचक्रके द्वितीयं यावदुपसंहारमस्योऽर्थः कारणं सदुपलभ्यत्वात्—आविर्भाव[त्म]कत्वात् रूपवदित्यर्थः, स्यान्मतं रूपं घटादि कार्यमरूपात् कार्यात् कारणात्मस्यविलक्षणञ्च सदसदात्मकत्वानिले, तत्र न विशिष्टं रूपमपि कारणवत् 5
सदुपलभ्यत्वादाविर्भाव[त्म]कत्वात् कारणवदेवेति, उपलभ्यत्वविशेषणमावरणाद्यभावप्रकाशाद्युपलब्धिप्रदर्शकमिति, शेषं प्रागुक्तसत्कार्यवादद्वितीयचक्रकविपर्ययेण तुल्यगमं यावत्ततोऽन्यत्वमेवेति, तत्र किमुक्तं भवति ? तद्व्याख्यानार्थमाह—तत्रासत्त्वमेव अघटपटवदिति—घटपटाभाव एव पटो घटस्तथा विशेषोऽपि कल्प्यमानोऽसत्त्व [अ]व्यतिरेकेण स्यात्, नान्यथेत्यविशेषात् वैलक्षण्यानुपपत्तिरिति द्वितीयं चक्रकम् । 10

अथैतत्साम्यमनिच्छतोऽस्य कार्यमेव सदित्यवधारणपक्षः स्यात्, कार्यशब्दसमीपे एवकारप्रयोगात् सत्त्वं कार्य एव नान्यत्रापीति ततश्च कारणमसदिति प्रसक्तम्, तथा च कारणविपरीतानिर्वृत्तघटादीनां सत्त्वतुल्यं कार्यसत्त्वमिति कार्यासत्त्वनिवृत्त्येकान्तत्यागाभ्युपगमविरोधः नाममात्रेऽविसंवादः ।

अथैतत्साम्यमित्यादि, पूर्वदोषपरिहारेणान्यतरसत्त्वपरिग्रहे कार्यमसदिति नेच्छतोऽयमर्थं 15

प्रादुर्भावानुपलब्धिसमयेऽसद्भावात् कारणवत् खपुष्पमपि सद्भवेदिति भावः । कारणासत्त्वेति अतः कार्यं सत्समये उपलब्धिमत्त्वादिति भावः । सत इति यथा विशेषो न आविर्भावात्मकत्वात् सत् तथा कारणमपीति भावः । अथ रूपस्य कारणवैलक्षण्यं शङ्कते—स्यान्मतमिति । उपलभ्यमानत्वे सत्यपि यदि कारणासत्त्वं तर्हि रूपमपि तद्वदसत् स्यात्, उपलभ्यमानत्वाद् अविशेषात्, कारणवत् कारणात् रूपं विलक्षणमसदसदनित्यमेवेति प्रतिज्ञामात्रात् विपर्ययसिद्धेरित्युत्तरयति—तत्र न विशिष्टमिति । आविर्भावात्मकत्वादित्युक्तोपलभ्यत्वादिति विशेषाभिधानस्य फलमाह—उपलभ्यत्वेति, 20
आवरणाद्यभावेन प्रतिबन्धकाभावः सूचितः प्रकाशाद्युपलब्धिपदेन आविर्भावसामग्रीसम्पत्तिः प्रदर्शिता यदि भवन्मतेन कार्यकारणयोः सत्त्वं तुल्यमेव तुल्ये च सत्त्वे विशेषो वक्तव्यः अन्यथाविशेषात्तो भवन्मतसिद्धमनुमानं न तु कारणस्य तथा विशेषप्रादुर्भावात्मकमिति नोच्यते चेद्विशेषहेतुरसिद्धोऽन्यथा अविशेषे च वैलक्षण्यानुपपत्ति घटपटाभाववत्, यथा घट एव पटाभावेति तयोर्न वैलक्षण्यम्, ननु विशेषः कार्यस्य सत्त्वादिकृतः ... अघटपटवदिति—
अभावात्मकत्व इति चेत् एवं विशेषोत्प्रेक्षणेऽपि विशेषस्यासदाश्रयत्वात्ततोऽन्यत्वमेवेति भावनीयमित्यभिप्रेत्याह—दोषं 25
प्रागुक्तेति यथा घटाभाव एव पटो घटाभाव एव पट इति विशेषस्य ... तथा चाविशेषात्
कार्यकारणयोः सत्त्वतुल्यता प्रसक्तेति भावः । अथोभयोः सत्त्वमनिच्छतः प्रकृतपक्षे तृतीया भङ्गः कारणमसत् कार्यं सदिति
पक्षमेव सत्त्वस्य इष्यत इत्याह—अथैतत्साम्यमिति । पूर्वदोषेति उभयोः साम्यप्रसङ्गदोषपरिहारेणेत्यर्थं पूर्वपक्षपरिहारेणेति वा पाठे उभयसत्त्वपक्षपरिहारेणेत्यर्थं अन्यतरसत्त्वपरिग्रहे कारणमसत् कार्यं सदिति पक्षमाश्रित्य इयोरन्यतर
सत्त्वाभ्युपगमेऽपि कारणस्य सतो कार्यस्य सदिति यथार्थं तत्पक्षः कार्यशब्दसमीपे एवकारप्रयोगात् तत एवकारस्तदोऽन्य- 30
त्रावधारणमिति न्यायात् कार्यमेव सत् नान्यत् कारणमपि कारणमसदिति प्रसक्तम्, एतच्च इष्टं कारणमसत् कार्यं सदिति
यदोऽवधारितं ... सदिति ... कारणमात्रमिति ... इति च

---

१ सि. क्ष. अथैतत्साम्यात् सा ।

कार्यमेव सनिलयधारणपक्षः स्यात्, स चासत्कारणप्रतिषेधवादविपर्ययेण दोषाभिधानमिहापि सर्वो यावन्नाममात्रेऽविसंवाद इति, एवञ्च सति कार्यसत्त्वमित्युत्सैकान्तत्यागाभ्युपगमविरोध इत्यादि गतार्थम् ।

यथैवं सत्त्वं नावधार्यते कारणमप्यसीतीष्टत्वादिति चेत्, अथैवमप्यनिवृत्ताः पूर्व
5 दोषा एव, अथोऽप्येवं सर्वथा सत्त्वात् मृत्पिण्डादीनामेककारणता यथैकस्यैवाहेः संवर्ते विवर्ते च सदा तथा तस्यैवावस्थानात्, यदेव कारणसत्त्वं तदेव कार्यसत्त्वमपि, यदेव कार्यसत्त्वं तदेव कारणसत्त्वमपीति नावधारणकृतो दोषोऽस्ति नापि पूर्वतुल्यत्वापत्तिदोषः, एकत्वात्, अनेकविषयत्वात्तुल्यत्वस्येति ।

(अथैवमिति) यथैवं-अथ कार्यमेव सनियमधार्यमाणे पक्षे दोषा इति सत्त्वं नावधार्यते
10 कार्यमस्त्येव कारणमप्यसीतीष्टत्वादिति चेत्? अथैवमप्यनिवृत्ताः पूर्वदोषा एव । अथोऽप्येव सर्वथा सत्त्वादित्यादि यावदनेकविषयत्वात्तुल्यत्वस्येति एवमुक्तदोषपरिहारार्थमित्थं कस्यचित् सर्वथा सत्त्वात् सर्वेऽपि पिण्डशिवकघटादिभेदा एककारणाः यथा न कश्चिद्विशेषोऽस्ति, यथैकस्यैवाहेः संवर्ते विवर्ते[चा]भिमतैककारणता, नाहेः पृथग्भूतौ संवर्तविवर्तौ, तथा तथा तस्यैवावस्थानात् नान्यैः संवर्तो विवर्तो वा न भवति तथेति, तद्भावयति—यदेव कारणेत्यादि यावत् कारणसत्त्वमपीति नावधा-
15 रणेनानुपपन्नः, इतिशब्दस्य हेत्वर्थत्वात्, यदि कार्यमेव सत् अथ कारणमेव सदित्युच्येत, यदि सदेव कारणं कार्यमेवोच्यते सर्वथा तस्य कारणस्य [illegible]संवर्तविवर्तैकरूपत्वाद्वावधारणकृतो दोषोऽस्ति परम-तापेक्षत्वादवधारणस्यापि, नापि पूर्वतुल्यत्वापत्तिदोषः [illegible]

पत्र विसंवाद इति [illegible]—स चेति । [illegible]—एवञ्च सतीति कार्यसत्त्वनिवृत्तिः कार्यसत्त्वं [illegible]
20 सतीति [illegible] कार्यमात्रस्य सत्त्वादित्येतदिति भावः । अथ कार्यमेव सदिति नावधार्यते कारणमपि सत्त्वात्, किन्तु कार्यं सदेवेत्यवधार्यते कार्यं नियमात् सदेवेति, ननु कार्यं वा भवेत् कारणं वा तत्र [illegible]—अथैवमिति । कार्यकारणयोः सत्त्वे [illegible] विशेषो न स्यादिति [illegible] यथैवमप्यनिवृत्ता इति । ननु कारणत्वेऽपि कार्यं सदेव [illegible], कारणकार्ययोरभेदात् कारणैव हि [illegible] भेदाः, [illegible] कारणकार्ययोः कश्चिद्विशेषोऽस्तीति [illegible]—अथोऽप्येवेति । एकत्वादेवेति कारण-
25 कार्ययोः [illegible] । सर्वथेति कारणात्मकं कारणकार्ययोः सर्वथा सत्त्वादित्यर्थः । एकस्मादेव हि कारणात् पिण्डशिवकघटादिप्रभेदाः [illegible] संवर्तविवर्तावेव भवतः कारणस्यैव तेन तेन [illegible] न भेदः कारणात् कार्यस्येति [illegible]—सर्वेऽपीति । तत्र व्याप्तिं दर्शयति यदेवेति तदेवेत्यादि कारणसत्त्वमपीति पर्य-न्तेन [illegible] कारणत्वे कारणकार्ययोरभेदात् कार्यमेव सत् कार्यं तदेवेति [illegible] दोषो नास्तीति भावः । [illegible]—यदि कार्यमेवेति कार्यमेव [illegible] कारणमेव [illegible]
30 [illegible] कार्यं सदेवेत्युच्यते तदापि कारणस्य [illegible] सदेवेति । [illegible] पूर्वोक्ततुल्य-त्वापत्तिदोषोऽपि नास्ति तयोरभेदात् अनेकत्वे हि तुल्यत्वम्, [illegible]
[illegible] । तुल्यत्वाभावे हेतुमाह—एकत्वेति । अथ कारणकार्ययोः [illegible] सत्त्वविशेषाभावस्य [illegible]

१ सि. क. तदेवं । २ सि. क. यथैवाहेः [illegible] । ३ सि. क. [illegible] । ४ सि. क. पीति इति वा ।

कार्याविरुद्धमप्रदोषो वाऽस्ति, एकत्वात्, अनेकं हि तुल्यमतुल्यं वा स्यात्, इदमनेन तुल्यं घटादि पटादिवदिति, निरस्तपूर्वापरभावात्मनि कार्ये कतरद्विमं कारण नाम, कारणात्मकभावितकार्यत्वात्तु अक्रमत् कारणमिति, न त्वस्ति भेदस्तस्मादयदोष इति ।

अत्रोच्यते एवमप्येकत्वाद्विशेषाभावः, ततो यथैव कारणमनुपादानसिद्ध सामान्यमन्तर्भावितात्तेपविशेषसत्त्वात्मकं तथा कार्यमपीति कारणवदेवाक्रमं स्यात् ।

(अत्रेति) अत्रोच्यते एवमप्येकत्वाद्विशेषाभावस्त्वयाऽमुना वक्तः, ततः किं ? तत इति, यथैव कारणमनुपादानेत्यादि यावदक्रमं स्यादिति, विशेषाभावात् कारणवत् कार्यमनुपादानसिद्धम्, अनुपादानसिद्धत्वात् सामान्यं सामान्यत्वात्स्वन्तर्भावितात्तेपविशेषसत्त्वात्मकमेव तच्च कार्यस्य सामान्यत्वादनुपादानसिद्धत्वादन्तर्भावितात्तेपविशेषसत्त्वात्मकोऽसङ्कुशूलपटादिविशेषसत्त्वात्मकत्वात्, कार्यमपि कारणवदेवाक्रमं स्यात्, उपलभ्यते च क्रमेण प्राक् पिण्डः पश्चाच्छिवक इत्यादि ।

अथ मा भूदेष दोष इत्यक्रममेव कार्यं कारणे कार्यस्य सन्निहितत्वात् यदि क्रमवदनादिकारणं स्यान्न स्यात् कारणं क्रमवत्त्वात् खपुष्पवत्, युगपत्सन्निहितसर्वधर्मकं कारणमिष्टम्, नो चेत् संवर्तविवर्तावनादिवाऽऽकाशेऽपि स्यातामुभयोरक्रमतुल्यत्वात्, तस्मादक्रममेव सर्वम्, कारणत्वादेव भेदेनाभवदप्यक्रमरूपेण भवदपि तत् सदैवेति ।

अथ मा भूदित्यादि यावत् सदैवेति व्याख्यात एवं यथाक्रमं कारणम्, महादिवत् संवर्तविवर्तविवर्तसंवर्तसद्भावात् कारणे कार्यस्य सन्निहितत्वात् यदि क्रमवदनादिकारणं स्यान्न स्यात् [कारणं] क्रमवत्त्वात्—अक्रमत्वाभावादित्यर्थः, अक्रमात् कारणात्क्रमस्याविरुद्धभवत्वात् खपुष्पवत्, युगपत्सन्निहितसर्वधर्मकं कारणमभ्यधीष्टम्, नो चेत् संवर्तविवर्तावनादिवाऽऽकाशेऽपि स्याताम्, उभयोरक्रमतुल्यत्वात्, तस्माद्भिन्नमूर्तेरपि संवर्तविवर्ताभ्याम् सदैवाक्रम यथादित्यस्वरूपमूर्तेः, तस्मात् कारणत्वादक्रममेव सर्वम्, अनादिकारणत्वात्मवत्, किमर्थं तर्हि कारणवत्स भेदेन भेदा गृह्यन्ते तदैवेति चेदुच्यते कारणत्वादेव कारणत्वात्मवत्, अद्भिः संवर्तविवर्ताभिभेदेनाभवदपि कारणत्वेनैवाक्रमरूपेण भवदपि स यथास्थि गृह्यत एव सत्त्वात्, तदेव कार्यं तथा तथा गृह्यत इत्यर्थः ।

स्वनुपपत्तिमाह—अत्रोच्यत इति । अविशेषे दोषमाह—यथैवेति कारणस्य हि पूर्वोपयुक्तान्मूलानुपपत्त्या भिन्नवादिसतानुपपन्नत्व एव सामान्यम्, अत एवान्तर्भावितनिखिलविशेषात्मकं तथा कार्यमपि स्यादेकत्वात् निर्विशेषत्वादेति भावः । एवं प्रत्यक्षविरोधमाह—उपलभ्यते चेति कार्यस्याक्रमत्वं कारणत्वादेवेत्यभिप्रायवदत्—अथ मा भूदिति । महदादि संवर्तविवर्तयोरक्रमत्वेन सदा सन्निहितत्वात् तथा सन्निहितानां येऽयं पूर्वापरभावेनाव्यवस्था क्रम इत्यादर्शयाह—महादिवेति । यदि क्रमवदेव कारणमपि स्यात्तर्हि तत्कारणमेव न भवेत् असन्निहितसर्वधर्मत्वात् क्रमवत्त्वादित्याह—यदीति । अनुमेयान्ते हेतुसाध्यं हेतुं प्रतिषेधसत्त्वा व्याचष्टे—अक्रमत्वाभावादित्यर्थ इति । कारणत्वसत्त्वैकत्वं चेदस्ति तदेवाद्युपपत्तिरिति । कारणे कार्याणां युगपत्सन्निहितत्वे प्रतिनियतकारणत्व कार्याभिव्यक्तिर्भावित्याह—नो चेदिति । युगपत्सन्निहितसर्वधर्मत्वादेव कारणता सर्वमभिन्नमेवेत्युपसंहरति—तस्मादिति । ननु युगपदेषां कार्याणां सन्निहितत्वे तदानीं भेदभेदेन कुतो न गृह्यन्त इति चाह—किमर्थमिति । कारणत्वादेव ते तदानीं तद्रूपेण न गृह्यन्ते कारणत्वादेव हि कारणकार्यात्मनोऽपि भेदेन न ग्रहणमित्याह—कारणत्वादेवेति । तच्च कार्यं भेदेनाभवदपि अक्रमरूपेण भवदपि सदैव

अत्रोच्यते—

सदप्यसत् अनुमानान्तरविरोधात्, खपुष्पमपि तर्हि सत्स्यादनुपलम्भत्वात् कार्यवत्, कारणश्च स्यात् अनुपलम्भत्वात् कार्यवत्, कारणत्वे वा तथा भेदेनाभूतत्वात् सद् स्यात् कार्यवत्, नचैष नेष्यते कारणमसत् कार्यञ्च सदिष्टं तथाऽनुपलम्भत्वात् खपुष्पवदेव तत्था-
5 नुपादानसिद्धं कारणमसत् सदुपादानसिद्धं कार्यमसच्च सम्भवति, यदि तु कारणानुपादाना-
दित्यवत् कार्यमनुपादानसिद्धं सत्त्वादिति नेष्टं सदिति नियमो न व्यावर्त्यते ततश्चैलक्षण्यात्
न तर्हि कारणं सदनुपादानादित्वात् खपुष्पवदित्यादि पूर्ववत्प्रकरणद्वयमवर्त्तनम् ।

(सदप्यसदिति) सदप्यसत् अनुमानान्तरविरोधात् खपुष्पमपि तर्हि सत् स्यात्, अनुपल-
म्भत्वात् कार्यवत् कारणञ्च स्यात् खपुष्पमनुपलम्भत्वात् कार्यवत्, कारणत्वे वा तथा भेदेनाभूतत्वात्
10 सत् खपुष्प स्यात्कार्यवत्, नचैव नेष्यते कारणमसत् कार्यञ्च सत् त्वयिष्टं तथानुपलम्भत्वात्—भेदेन
क्रमभाविना हि संवर्तनिवर्तादिप्रकारेणानुपलम्भत्वादित्यर्थः, खपुष्पवदेवेति च वैधर्म्यदृष्टम्, तथाऽनु-
पादानसिद्धं कारणं [असत्] सत् उपादानसिद्धं कार्यमसच्च सम्भवति, यदि त्विष्यते, यथा कारणमनुपा-
दानसिद्ध [म]सत्त्वात्तथा कार्यमनुपादानसिद्धं सत्त्वादित्येवमेवानुपादानसिद्धमेवेष्टम्, असत्त्वापत्तिभयात्
सदिति च नियमो न व्यावर्त्यते भवतः ततश्चैलक्षण्यात्—उपादानसिद्धत्ववैलक्षण्यान्न तर्हि कारणं सत्,
15 कस्मात्? अनुपादानादित्वात्—सामान्यत्वादन्यथोपादानाद्येव [विशेष]सत्त्वासत्त्वादिति सत्कार्यवैलक्ष-
ण्यात्, खपुष्पवदित्यादि [पूर्ववत्प्रकरणद्वयमवर्त्तनम्] तदतुल्यविकल्पत्वात् पटपटवत् द्रव्यक्रियावद्वा कथ-
मतुल्यता ?, इह कार्यकारणयोर्द्वयोरपि सत्त्वं कार्यमेवैकेनतद्विकल्पार्थं स्यात्, इतरयोरभ्युपगमप्रतिपक्षत्वा-
द्वाऽभावात्, तयोरि तावदुभयसत्त्व तदुपादानसत्त्वाविशिष्टत्वात् कारणस्यासत्त्वं उपलब्धिलक्षणप्रा-
प्तत्वे यथा कारणस्यानुपादानोपलब्धिस्तथा कार्यस्य स्यात्, अथ न कारणानुपादानवत् कार्यानुपादानं तत्
20 कार्यमिति निश्चित तद्वैलक्षण्यान्न तर्हि सत् कारणं असत्, तद्विलक्षणत्वात् खपुष्पवत् इतरः कुटपटवत्,
ननु पटसत्त्वं पटसत्त्वविलक्षणं, न, इतरेतरासत्त्ववैलक्षण्यात्, अथैवमपि वैलक्षण्ये कारणसत्त्वनिः-
श्चयो न निवर्त्यते, अनुपादानात्मकं च तत्, न तर्हीनमुपादानात्मकत्वात् कार्यं सत् खपुष्पवत्, इतरथा
हि नित्यमेवोपादीयेत सत्त्वात् कारणवत्, कारणञ्चोपादानवत् स्यात् उपलम्भसत्त्वाविशिष्टत्वात् कार्य-

तथा तत्र प्रमाद इति दर्शयन्नपरमप्यनिष्टमाह—अहितिरिति । अथ कारणत्वे कार्याणां कारणत्वादेव भेदेनानुपलम्भे
